[redacted]DOTHECA INDICA;

A

[redacted]CTION OF ORIENTAL WORKS

PUBLISHED UNDER THE SUPERINTENDENCE OF THE

[redacted]ATIC SOCIETY OF BENGAL.

NEW SERIES

Nos. [redacted]4, 235, 244, 251, 270, 280, 285, 286, and 293.

Sáma Veda Sañhitá.

WITH THE COMMENTARY OF

SÁYANA ÁCHÁRYA.

ASIATIC SOC LIBRARY BENGAL

EDITED BY

SATYAVRATA SÁMASRAMÍ.

EDITOR OF THE HINDU COMMENTATOR,

VOL. I.

974

CALCUTTA.

PRINTED AT THE GANES A PRESS.

1874.

15810

सामवेदसंहिता

तत्र

॥ छन्दआर्चिकः ॥

तत्राप्याग्नेयैन्द्रेति पर्वद्वयात्मकः

अध्यायचतुष्कः प्रथमोभागः

भगवत्सायणाचार्य्य-विरचित-भाष्य-सहितः

श्रीलश्री

वङ्गदेशीयासियाटीक-समाजाभ्यर्थनया

अधीतवेद-"प्रवक्तसम्मन्त्रिनी"-सम्पादकेन

श्रीसत्यव्रतसामश्रमिभट्टाचार्य्येण

वङ्गसामगेन

टीकितो यथावसरं शोधितश्च।

कलिकाता

गणेशयन्त्रे मुद्रितः

साक्षाः १८९५ ।० ०

नमः सामवेदाय ।

सामवेदसंहिता ।

तत्र

भाष्यावतरणिका ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
नत्वा कृतिमुखान्त्यास्त्वं नमामि गजाननम् ॥ १ ॥
यस्य निश्वसितं वेदायोवेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
सकटाक्षेण तद्रूपं दधदुक्तमहोपतिः ।
आदिशत् सायणाचार्यं वेदार्थस्य प्रकाशने ॥ ३ ॥
पूर्वोत्तरमीमांसे (१) ते व्याख्यायातिमङ्गलात् (२) ।
आप्तुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥
सामवेदार्थमेषोऽपि प्रकाशयति सादरम् ।

(१) जैमिनि कृतपूर्व-मीमांसा-सूत्रानुसारेण वैयाधिकरणन्यायमालाविस्तारिक
मीमांसा-सूत्रानुसारेण च (विषय संशय पूर्वपक्षोत्तरपक्ष-सङ्गत्याधिक-वैया-
धिकरण) न्यायपरपर्यायाधिकरणानि निर्मितानि. तथैव व्याख्यानेन विस्तृतानि
तयोरेव पूर्वोत्तरमीमांसयोरभिधानमधिकरणमालान्यायमाला न्यायविस्तरो वा ।
(२) अतएवोक्तं तत्र तत्र, "मीमांसा-न्यायरत्नेनक्रीडा पृथ्वीक्षितो भवेत्" । अति-
रिति भावः ।

उद्गातुस्तत्वजिज्ञासोरपि तेन कृतार्थता (१) ॥ ५ ॥
यज्ञोब्रह्म च वेदेषु द्वावर्थौ काण्डयोर्द्वयोः (२) ।
अध्वर्युमुख्यैर्ऋत्विग्भिश्चतुर्भिर्यज्ञ-सम्पदः ॥ ६ ॥
निर्मिमीते क्रिया-सङ्घैरध्वर्युर्यज्ञियं वपुः ।
तद्वलंकुर्वते होता ब्रह्मोद्गातेत्यमी त्रयः ॥ ७ ॥
अस्त्र-याज्यानुवाक्याभिर्होतालङ्करुतेऽध्वरम् ।
आज्य-पृष्ठादिभिः स्तोत्रैरुद्गातालङ्करोत्यसुम् ॥ ८ ॥
त्रयाणामपराधन्तु ब्रह्मा परिहरेत् सदा ।
ऋचान्त्वदृति मन्त्रेऽसावर्थः सर्वोऽभिधीयते ॥ ९ ॥
यज्ञं यजुर्भिरध्वर्युर्निर्मिमीते ततो यजुः ।
व्याख्यातं प्रथमं, पश्चाद्ऋचां व्याख्यानमीरितम् ॥ १० ॥
सान्नाम्नगाश्रितत्वेन साम-व्याख्या ऽथ वर्ण्यते ।
अनुतिष्ठासु-जिज्ञासा-वशाद् व्याख्या-क्रमो ह्ययम् ॥ ११ ॥
जाते देहे भवत्यस्य कटकादि-विभूषणम् ।
आश्रितम् मणिमुक्तादि कटकादौ यथा तथा ॥ १२ ॥
यजुर्जाते यज्ञ-देहे स्यादृग्भिस्तद्विभूषणम् ।
सामाख्यामणिमुक्ताद्याऋक्षु तासु समाश्रिताः ॥ १३ ॥

(१) उद्गाट-नामकः ऋत्विगविशेषः; तस्य सामवेदार्थ-ज्ञानमत्यावश्यकम्, यतो बोधुल्यंगे तस्यैव सामवेदार्थ कार्य-कलापाधिकारित्वात्, तथाच खाट्यायन-सूत्रम् 'उद्गाता सामवेदेन (४ प्र. १० खं)-इति। 'मन्त्रान् कर्माणि चोद्गातैव कुर्यादन्ते (१ प्र. १ ख)-इतिच ।

(२) तत्र ऋधिकांशः कर्मकाण्डः, किञ्चिदंशः ब्रह्मज्ञानप्रतिपादकः ज्ञानकाण्डः प्राभाकरादि मते ज्ञानकाण्डो नास्त्येव ।

नन्वध्वर्यु-होतृब्रह्मोद्गातृ-कर्त्तव्य-प्रतिपादको यो मन्त्रस्तस्यार्थो योजनीय इतिचेत्, योज्यते— "ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शकरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उत्वः"-इत्येष मन्त्रः(१)। तस्यायमर्थः—त्व-शब्दः सर्वनामसु पठितः एक-शब्द-पर्यायः, एकोहोतृ-नामकः ऋत्विक् तंत्र तत्र विप्रकीर्णत्वेनाधीतानामृचां यज्ञानुष्ठान-काले सङ्गीभाव मापाद्य पुष्टिं कुर्वन्नास्ते; एकउद्गातृ-नामकः शक्वर्युपलक्षित-च्छन्दोविशेषयुक्तास्वृक्षु गायत्रादि-नामकं साम गायति; एको ब्रह्म-नामको होत्रादीनां वेद-त्रय-विषये यस्मिन्कस्मिंश्चिदपराधे जाते तत्प्रतीकाररूपां विद्यां वदति(२)। अतएव च्छन्दोगा आमनन्ति "यज्ञस्य हैषभिषग् यद् ब्रह्मा यज्ञायैव तद् भेषजं कृत्वा करोति"-इति*, "यदि यज्ञक्रतावार्तिर्भवति भूरिति ब्रह्मा गार्हपत्ये जुहुयात्"-इत्यादि च; एकस्त्वध्वर्युर्यज्ञस्य मात्रामियत्तां विमिमीते विशेषेण परिच्छिनत्ति इति।

* यज्ञस्य विरिष्टं सन्दधाति भेषजकृताह वा एष यज्ञो यत्रैवं विद् ब्रह्मा भवति (४प्र०१७ख०)"-इति कौथुम-गाथो-पलक्षितान्दोग्य पाठः।

† "यद्यज्ञक्रतौरियेद् भूःस्वाहेति गार्हपत्ये जुहुयात् (४प्र०१७-ख०)"—इति कौ०. गा० छा० पाठः।

अत्र ब्रह्मेति "ब्रह्मा यजमानं सर्वोयत्रिजोमि रक्षति"-इति प्रकरणेपसंहरण-वचनाक्षधत्ते

(१) ऋग्वेदस्य इदमष्टमाष्टक-द्वितीयाध्यायोत्तमाष्टकं।

(२) विप्रकृतो व्याख्यानं निरुक्तप्रथमाध्याय-द्वितीयपाद-द्वादशखण्डे तत्रापेक्षं द्रष्टव्यम्।

ननु वेदार्थ-प्रकाशकेऽस्मिन् ग्रन्थे वेदानां व्याख्येयत्वे सति तत्परित्यज्य यजुरादिकं व्याख्येयत्वेनोपन्यसितमयुक्तम्-इतिचेत्—नायंदोषः, मन्त्र-विशेष-वाचकैर्यजुरादि-शब्दैस्तत्तन्मन्त्रोपेतान वेदानामुपलक्षितत्वात्॥

ननु मन्त्र-वेदयोः को विशेषः? इति चेत्, उच्यते—मन्त्र-ब्राह्मण-समष्टिर्वेदः। तथाचापस्तम्बः स्मरति "मन्त्र-ब्राह्मणयो र्वेद-नामधेयम्"-इति (१)। वेदैकदेशयोर्मन्त्र-ब्राह्मणयोः पृथक् स्वरूपं जैमिनिर्न्यायेन निर्णीतवान्, (२) तत्र मन्त्र-स्वरूप-निर्णयं द्वितीयाध्यायस्य प्रथमपादे सप्तमाधिकरणे न्याय-विस्तर-कारः (३) इत्यमुदाजहार—१"अहेर्बुध्निय मन्त्रं मे-इति मन्त्रस्य लक्षणम्।

(१) उपनिषदु भागस्त्वनयोरन्यतरः,तथाच काचिदुपनिषत् मन्त्रात्मिका ईषेत्वेत्यादिः काचिद् ब्राह्मणात्मिका केनेत्यादिः। मीमांसक मत-विशेषे तु "आम्नायस्य क्रियार्थ त्वादानर्थक्यमतदर्थानाम् (१।२।१)" इति जैमिनि सूत्रात क्रियापरातिरिक्तानामुपनिषदिति प्रसिद्धानां वेदत्वमेव नास्ति। तत एव 'अपरा ऋग्वेदोयजुर्वेदः सामवेद' इत्यादि कथन-पूर्वकम् 'अथ परा यया तदक्षरमधिगम्यते' इति मुण्डकोपनिषद् (१-१ ५) वाक्यम्, 'वेदः क्रतुरधिगन्तव्यः सरहस्योद्विजन्मना' इति मनु-वाक्ये सरहस्य पदम्, "दृष्टवदानुश्रविकः" इति सांख्य-सूत्रोत्थितिश्च सङ्गच्छते। तदेतत् स्पष्टमेवाभ्यधायि प्राभाकरैः 'प्रवर्तक-निवर्तक विधिलक्षणेन व्यतिरेकेण केवल वस्तु-वादी वेदभागो नास्ति'। एतन्मते मन्त्रभागानां अग्नाजासीत्यादीनां क्रियापर एवार्थोग्राह्यः, अर्थवादः काल्पनिकः, ऋनेत्यादौ तु ब्राह्मण-ग्रन्थ सन्निधादराद् ब्राह्मणत्व भ्रमः, तथादरश्च वेदवेत्तृभिः शिष्य गुरवेदृं तत्प्रणीतत्वात्, ब्राह्मण ग्रन्थ वाक्य बाहुल्यात्मकत्वात् तत्सारित्याच्च तथा भ्रमः, यथा गोरण्य-गामवेदृहोक्ष्य-गानयोरण्ये,क्षेपत्व भ्रमः।

(२) तथाच द्वितीयाध्याय प्रथम पादे अहर्निशंशब्दाधिकरणे सूत्रे 'तद्वोदकेषु मन्त्राख्या इति 'शेषे ब्राह्मण-शब्दः' इति च। तत्र शेषा मन्त्राणां चोदकेषु अध्वर्यवेषु मन्त्र इति आख्या प्रसिद्धा, तत मन्त्र लक्षणं ग्रोक्षणित्याय सूत्रार्थः शेष-लक्षणन्तु स्फुटम्।

(३) स्पष्टं न्याय विस्तर-कारः, अन्यथारूपा निर्दृष्टोऽयं लेख शैलो।

नास्त्यस्ति वाऽस्य नास्त्येतदव्याप्तादेरवारणात्॥ याज्ञिकानां समाख्यानं लक्षणं दोष-वर्जितम्। तेऽनुष्ठान-स्मारकादौ मन्त्र-शब्दं प्रयुञ्जते॥ आधाने इदमाम्नायते—'अग्नेबुध्निय मन्त्रं मे गोपाय'-इति; तत्र मन्त्रस्य लक्षणं नास्ति, अव्याप्तिव्याप्त्योर्वारयितुमशक्यत्वात्—'विहितार्थाभिधायकोमन्त्रः'-इत्युक्ते, 'वसन्ताय कपिञ्जलानालभते' इत्यस्य मन्त्रस्य विधिरूपत्वादव्याप्तिः, मनन-हेतुर्मन्त्रः-इत्युक्ते ब्राह्मणेऽतिव्याप्तिः, एवम् 'अग्नि पदान्तो मन्त्रः' 'उत्तमपुरुषान्तो मन्त्रः' इत्यादि-लक्षणानां परस्परमव्याप्तिः; इतिचेत्—नैवम्, याज्ञिक-समाख्यानस्य निर्दोष लक्षणत्वात् * अतश्च समाख्यानमनुष्ठान स्मारकादीनाम् मन्त्रत्वं गमयति उरुप्रथ इत्येवादयोऽनुष्ठान-स्मारकाः [१] अग्निमीले पुरोहितमित्यादयः स्तुतिरूपाः [२] ईषेत्वेत्यादयस्त्वन्ताः [३] अग्नआयाहि वीतये-इत्यादयश्चामन्त्रणार्थिता [४] अग्नेदग्नेन् विक्षेत्यादयः प्रेषरूपाः [५] अधःश्विदासांदुपरिश्विदासीदित्यादयो विचाररूपाः [६] अग्नेऽस्विकेऽग्वालिके न मानयति कयनेत्यादयः परिदेवनरूपाः [७] पृच्छामि त्वा परमन्तं पृथिव्याइत्यादयः प्रश्नरूपाः [८] वींदमाद्यः परमन्तं पृथिव्याइत्यादय उत्तररूपाः [९] एवमन्यदप्युदाहार्यम्। इदमग्नेत्यन्त द्विजातीयेषु समाख्यानमन्त्रेण नान्य; कश्चिदनुगतो धर्मोऽस्ति, यस्य लक्षणत्वमुच्येत; लक्षणस्यापयोगश्च पूर्वाचार्यैर्दर्शितः—'ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्कृतः'। लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः'-इति; तस्मादभि-

* निर्दोषत्वात्-इति गौडस्वामि पुस्तक पाठः।

† पृथग्दृशः-इति गौ० पुस्तक पाठः।

युक्तानां मन्त्रेऽयमिति समाख्यानं लक्षणम्" १॥ ब्राह्मण-स्वरूपमपि तत्रैवाष्टमाधिकरणे इत्थं निर्णीतम्—२"नास्त्येतद् ब्राह्मणे-ष्वेव लक्षणं विद्यतेऽथवा। नास्तीयन्तो वेदभागाइति क्लृप्तेर-भावतः॥ मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः। अन्यद् ब्राह्मणमित्येतद् भवेद् ब्राह्मण-लक्षणम्॥ चातुर्मास्येष्विद मान्नायते—'एतद् ब्राह्मणान्येव पञ्च हवींषि'-इति, तत्र ब्राह्मणस्य लक्षणं नास्ति, कुतः? वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्तातिव्याप्तयोः शोधयितु मशक्यत्वात्; पूर्वोक्तोमन्त्रभागएकः, भागान्तराणि च कानिचित् पूर्वेरुदाहर्त्तुं सङ्गृहीतानि 'हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः। परक्रतिः * पुराकल्पोऽवधारण-कल्पना'-इति— तेन ह्यन्नं क्रियतइति हेतुः [१] एतद्वोदधित्व-मिति निर्वचनम्[२] अमेध्या वै माषा इति निन्दा [३] वायु वै क्षेपिष्ठेति प्रशंसा [४] तदश्चिकित्सन् जुहवानी माहोषा मिति संशयः [५] यजमानेन सम्मितोदुम्बरो भवतीति विधिः [६] माषानेव मह्यं पचते-इति परक्रतिः [७] पुरा ब्राह्मणा अभैषु रिति पुराकल्पः [८] यावतोश्वान् प्रतिगृह्णीयात् तावतोवारुणां चतुष्कपालान्निर्वपेदिति विशेषावधारणकल्पना [९] एवमन्यदप्यु दाहार्य्यम्। न च 'हेत्वादीनामन्यतमद्ब्राह्मणम्'—इति लक्ष णम्, मन्त्रेष्वपि हेत्वादि-सद्भावात्†। तथाहि— इन्द्रवोवामु श्रन्ति होति हेतुः—उदानिषुर्महोरिति तस्मादुदकमुच्यतइति

* परक्रिया-इति रामशास्त्रि-पुस्तक-पाठः।

† सम्भवादिति गौ० पुस्तक-पाठः।

निर्वचनम्—मोघमन्नं विन्दते अप्रचेताइति निन्दा—अग्निर्मू र्धा-दिवः ककुदिति प्रशंसा—अधःखिदासीदुपरिखिदासीदिति संशयः—कपिञ्जलानालभतइति विधिः—सहस्रमयुतादददिति परकृतिः—यज्ञेन यज्ञमयजन्त देवाइति पुराकल्पः। 'इतिकरण बहुलं ब्राह्मणम्'-इति चेत् न, इत्यददा इत्ययजथा * इत्यपच-इति ब्राह्मणो गायेदित्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेऽनित्याप्तेः। 'इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेत्—न, राजा चित्यं भगं भक्षीत्याह' 'योवा रक्षाः शुचिरस्मीत्याह' इत्यनयोर्मन्त्रयोरतिव्याप्तेः। 'आख्यायिकारूपं ब्राह्मणम्'—इति चेत् — न, यमयमी-संवाद-सूक्तादावतिव्याप्तेः। तस्मान्नास्ति ब्राह्मण-लक्षणम्-इति प्राप्ते, ब्रूमः— मन्त्रब्राह्मणरूपौ हावेव वेदभागावित्यङ्गीकारात् मन्त्र-लक्षणस्य पूर्वमभिहितत्वात् 'अवशिष्टो वेदभागो ब्राह्मणम्'-इत्येतल्लक्षणं भवतीति"[१]॥

मन्त्रविशेषाणामृग्यजुःसामरूपाणां लक्षणानि तस्मिन्नेवाधिविचविकरणे (२) जैमिनिः सूत्रयामास—"तेषामृग् यदार्षवशेन पाद व्यवस्था" [३१]"गीतिषु सामाख्या" [३४] "शेषे यजुःशब्दः" [३७]-इति(३)। तदेतन्न्यायविस्तरे स्पष्टीकृतम्—

* इत्यपचेथा-इति सामयमि-पुस्तकेऽधिकः पाठः।

(१) दृश्यतेकादशदशेखिति बोध्यम्।

(२) अयंहि चिन्त्यम्—अथेयं लक्षणं कथं न लक्षयतीति, दृश्यते ह्येवमनेकत्राचार्यवर्यैर्मायचरणम्। तथाच षड्विंश ब्राह्मण चतुर्थ प्रपाठकीय प्रथमखण्डे—"ऋग्वेदः प्रथिव्या वेद-वदोन्तरिक्षात् सामदेवोमुष्मात्"इति, मन्त्र ब्राह्मण-षष्ठ-प्रपाठकीय-सप्तदशखण्डे, 'अग्नेऽयंचो वायवेऽयूंषि सामान्यादित्यात्" इति, मन्त्र प्रथमेऽध्याये अग्नि-वायु-रविश्चत्व

१_४_५"ऋक्-साम-यजुषां लक्ष्म सांकर्यादिति शङ्कते। पादश्च गीतिः प्रश्लिष्ट-पाठइत्यस्यसङ्करः॥ इदमाम्नायते—अग्नेर्वयुनाय मन्त्रं मे गोपाय य ऋषयस्त्रैविदा विदुः। ऋचः सामानि यजूंषि" (१)-इति; त्रीन् वेदान् विदन्तीति त्रिविदः, त्रिविदां सम्बन्धिनोऽध्येतारस्त्रैविदा स्ते च यं मन्त्रभागमृगादि-रूपेण त्रिविधमाहुः, तं गोपायेति योजना। तच्च त्रिविधानामृक्-साम-यजुषां व्यवस्थितं लक्षणं नास्ति, कुतः? साङ्कर्यस्य दुष्परिहरत्वात्; 'अध्यापक-प्रसिद्धेष्वेवेदादिषु पठितो मन्त्रः'-इति हि लक्षणं *वक्तव्यम्, तच्च सङ्कीर्णम्—"देवोवः सवितोत्पुनात्वच्छिद्रेण वसोः सूर्यस्य रश्मिभिः"-इत्ययं मन्त्रो यजुर्वेदे सम्प्रतिपन्नो यजुषां मध्ये पठितः, नच तस्य यजुष्ट्वमस्ति, तद् ब्राह्मणे सावित्रार्चे त्यक्तेन व्यवहृतत्वात्; एतत् साम गायत्रास्ते-इति प्रतिज्ञाय किञ्चित् साम यजुर्वेदेऽप्युक्तम्; "अच्युतमसि"(२)"अच्युतमसि"प्राणसंगितमसि"-इति त्रीणि यजूंषि सामवेदे समाम्नातानि, (३) तथा गीयमानस्य स

* तल्लक्षणमिति गौ० सा० पुस्तकयोः पाठः।

ब्रह्मसनातनम्' इदोद्य यज्ञ सिद्ध्यर्थं ऋग्-यजुः-साम-लक्षणम्' इतिः अमरोऽपि "इतिवेदालयस्त्रयी" इति। अथवा नायं चिन्ता-विषयः—एभ्यश्चहि वेदेभ्य आङ्गिरसेनाथर्वणा पुरा संगृहीतः प्रथितश्चतुर्थोवेद इति, अतएवोपपन्नं ऋग्यजुःसामानुरूपमभिधानमथर्ववेति "अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा" इति तैत्तिरीयादि-श्रुताङ्गिरसेति विशेषणञ्च।

(१) शुक्लयजुर्वेदस्य ब्राह्मणभागीय-प्रथमाष्टक-द्वितीयाध्यायस्य षड्विंशतितमं मन्त्रम्।

(२) शुक्लयजुःसंहितायाः प्रथमाष्टक-षष्ठाध्याय पञ्चमानुवाकारम्भे।

(३) आनीमाति छान्दोग्य-ब्राह्मणस्य तृतीय प्रपाठके सप्तदशखण्डे द्रष्टव्यानि।

आश्रयभूता ऋचः सामवेदे समाम्नायन्ते ; तस्मान्नास्ति लक्षण मिति चेत्—न, पादादीनामसंकीर्ण-लक्षणत्वात् ; 'पादबन्धेनार्थेन चोपेताः वृत्तबद्धाः मन्त्राः ऋचः' 'गीतिरूपाः मन्त्राः साम' 'वृत्त-गीति-वर्जितत्वेन प्रश्लिष्टपठिताः मन्त्राः यजूंषि'-इत्युक्ते न क्वापि सङ्करः"-१-४-५-इति(१) ॥

यदुक्तं गीतिषु सामाख्येति तदेव विग्रहीकर्तुं समाध्यायस्य द्वितीयपादे रथन्तरशब्दो निरूपितः—"अतिदेश्यं विनिश्चेतुं कवतीषु रथन्तरम्। गायतीत्यग् गानयुक्ता शब्दार्थीगानमेव वा ॥ इति चिन्ता गानयुक्ता त्वभित्वेत्यृक् प्रसिद्धितः। लाघवा दतिदेशस्य योग्यत्वाच्चान्तिमोभवेत् (१अ०) ॥ इदमाम्नायते 'कवतीषु रथन्तरं गायति'-इति, 'कया नश्चित्रआभुवदित्याद्या स्तिस्रऋचः कवत्यः (२), तासु वामदेव्यं साम गाध्ययनतः प्राप्तम् (३)तद्बाधितुं रथन्तरं साम तास्वतिदिश्यते, तत्रातिदेशस्य स्वरूपं निश्चेतुं रथन्तर-शब्दार्थश्चिन्त्यते। गानविशेषयुक्ताभित्वागूरनो-नुमइतीयमृग् (४) रथन्तरमित्युच्यते, कुतः? अध्येत्र-प्रसिद्धि

(१) इत्यत्र गद्य-पद्य गीति-रचना वयं भट्टात् बटयधिस्वम।

(२) तथाहि 'कयानश्चित्रआभुवदिति कवत्यः' इति ताण्ड्यब्राह्मण-पञ्चदश पपाठक-दशम खण्डारम्भः। अत्र 'तृचस्तृक्तानामादि ग्रहणेन विधिरनादरः' इति (३।३) न्यायेन-स्मरणात् तृच लाभः। सच उत्तरार्चिकस्य प्रथमप्रपाठकोय द्वादश मन्त्ररूपः; तत्र कयानश्चित्रेति प्रथमा ऋक्, कस्त्वा सत्योमदानामिति द्वितीया, अभीषणः सखीनामिति तृतीया।

(३) ऊह-गान-ग्रन्थे तथैव पाठात्। तत्र तत्र प्रथमप्रपाठक प्रथमार्द्धीय पञ्चम साम।

(४) सा च छन्दस्यार्चिकस्य तृतीयाध्याय-प्रथम दशत्यो प्रथमा।

तः(१) रथन्तरं गीयतामिति केनचिदुक्ताः अध्येतारः स्वर-स्तोभ-विशेष युक्ता * मभिलेत्यृचं पठन्ति, न तु स्वरस्तोभमात्रम्; तस्माद् गान-विशिष्टायामृचीरथन्तर-शब्दार्थत्वमिति, प्राप्ते, ब्रूमः— स्वरादि-विशेषानुपूर्वीमात्रस्वरूपमृगचर-व्यतिरिक्तं यद् गानं तदेव रथन्तरशब्दार्थः, कुतः ? लाघवात्, किञ्च कवतीष्वृचु गानमतिदेष्टुं योग्यं नत्वृचस्तदयोग्यतास्ति, कयानोऽभिलेत्यनयोर्ऋचोर्युगपदाधाराधेयभावेन पठितुमशक्यत्वात्; तस्माद् गानविशेषएव रथन्तरशब्दार्थः(२)"९-इति ॥

पुनरपि नवमाध्यायस्य द्वितीयपादे प्रथमाधिकरणस्य प्रथमवर्णके सामशब्दस्य गान-मात्र-वाचित्वं स्मारितम्— ७"सामोक्ति-बृहदादयो गीताया मृचि केवले । गाने वा एवेति स्मार्यते सप्तमोदितम् ॥ सामान्यवाची सामशब्दो ऋग्विशेषवाचिनो बृहद्रथन्तरादि-शब्दाश्च गानमात्रे वर्त्तन्ते, न तु ऋग्विशिष्टायामृचि-इत्ययं नियमः सप्तमस्य द्वितीयपादे सिद्धः, सर्वत्र वक्ष्यमाण-विचारोपयोगितया स्मार्यते"७-इति ॥

साम-शब्द-वाच्यस्य गानस्य स्वरूपमृगचरेषु क्रुष्टादिभिः सप्तभिः स्वरैः अक्षरविकारादिभिश्च निष्पाद्यते । क्रुष्टः प्रथमो द्वितीय

---

* स्वर-स्तोभ-युक्तेत्येव पाठः रा० सा० पुस्तकयोः ।

---

(१) आरण्य-ग्रन्थे तथैव पाठात् । तत्र तत्र द्वितीयप्रपाठकोपैकविंशतितम साम ।

(२) कवतीषु रथन्तरम्, ऊह्य गाने संवत्सर-पर्वस्थानीयं साम ; विदितमेतत् प्रायणीयेऽह्नि मध्यन्दिने ।

तृतीय चतुर्थः पञ्चमः षष्ठ इत्येते सप्त-स्वराः(१), ते चावान्तर भेदैर्बहुधा भिन्नाः। स्वरस्य साम-निष्पादकत्वं छान्दोग्योपनिषदः प्रथमे प्रपाठके(ऽख०) प्रश्नोत्तराभ्यामामनन्ति—"स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच— हन्त! त्वा पृच्छानीति, पृच्छेति होवाच— का साम्नो गतिरिति, स्वरइति होवाच"-इति। काण्वा उद्गीथविद्यायां स्वरस्य साम-सम्बन्धि-सर्वस्व-स्थानीयत्वं शोभन-वर्ण-स्थानीयत्वं चामनन्ति(२)—"तस्य हैतस्य साम्नो यः स्वं वेद, भवति ह्यस्य स्वं, तस्य स्वर एव स्वम्,-इति, "तस्य हैतस्य साम्नो यः सुवर्णं वेद, भवति ह्यस्य सुवर्णं, तस्य वै स्वर एवसुवर्णम्"-इति च।

अक्षर-विकारादीनान्तु साम-निष्पादकत्वं नवमाध्यायस्य द्वितीयपादे एव 'अर्थैकत्वाद् विकल्पः स्यात्' (२७ सू०)-इत्येतस्य सप्तमाधिकरणगतस्य सूत्रस्य व्याख्यानावसरे प्रवरस्वामिना सुष्ठ-सुक्तम्—"सामवेदे सहस्रं गीत्युपायाः, आह कइमे गीत्युपाया नाम? उच्यते— गीतिर्नाम क्रिया ह्याभ्यन्तर-प्रयत्न-जन्या, स्वर

(१) "सप्त योः सौ कुरुतमइव साम्नः स्वर सप्तेवा उपजीवन्ति, योः वर्षा प्र सप्त मनुष्याः, योद्वितीयस्तं गन्धर्वाप्सरसो, यस्तृतीयस्तं पशवो, यश्चतुर्थस्तं पितर श्चाण्डेष शेरते, यः पञ्चमस्तमसुर-रक्षांसि, योः ऽन्नाद्यमोषधयो वनस्पतयो यश्चान्यस्त इति सामविधान-ब्राह्मण-प्रथमप्रपाठकाद्यखण्डे। नारद शिक्षादावेतद्-विशेषो द्र

(२) कौथुमाद्यखण्डेषमेव, तथाहि 'सामविधानं ब्राह्मणस्य प्रथमप्रपाठकाद्यखण्डे य वै साम्नः स्वं यः सुवर्णं वेद, स्वं च ह वै साम्नः सुवर्णं च भवति, स्वरो वाव साम तदेव सुवर्णम्"-इति।

विशेषाणामभिव्यञ्जिका, साम-शब्दाभिलप्या, सा नियत-प्रमाण-ऋचि गीयते (१), तत्सम्पादनार्थोऽयमगच्छर-विकारोविश्लेषो विकर्षणमभ्यासोविरामःस्तोभइत्येवमादयः सर्वे सामवेदे (२) [illegible]यन्ते"-इति। तद्विषये विचारो न्यायविस्तरेऽभिहितः— "समुच्चेया विकल्प्या वा विभिन्ना गीतिहेतवः। आद्याः प्रयोगग्रहणाद्ध्रौव्यकत्वाद् विकल्पनम्॥ छान्दोग्ये तवल्का-

(१) तथाहि श्रूयते—'एतस्य साम्न ऋगेवास्योनि, स्वरोमांसानि, लोभा लोमानि' इति 'सामविधान'-ब्राह्मणाद्यप्रपाठकाद्यखण्डे।

(२) गेयारण्योहोद्याभिधेयेषु चतुर्षु गानग्रन्थेषु, माहानाम्न्यादि-सामसु च। तद्यथा।

"अग्न आ याहि वीतये गृणानो हव्यदातये।
निहोता सत्सि बर्हिषि"। (सा० कृ० १प्र० १ ख० १ऋ०)

अथ गानानि त्रीणि, तत्राद्यं गेयगानस्य प्रथमं साम। तदेव पश्यतु तावत्—

"ओग्नायि। आयाह्योइ वीयितोयाइयि। तो
ग्नाइयि। गृणानोह। व्यदातो याइयि। तोयाइयि।
ायिह्यो तासाइइ। त्माइयि। वा इइ४ओ होवा।
होइ३षो। १"

अथ आद्याक्षरादयोविकृताः, 'वीतये'-इति वीजकात् 'वीयि'-इत्याद्यात्मात्-'इत्यादिविश्लिष्टः, 'याइयि' इत्याद्यश्च विकर्षणः, 'तोयाइयि'-इत्येतत्स्तोभयत्व भ्यासः, 'हव्यदातये'-इति वीजकं 'ह'। यदा तोयाइयि-इत्यंशे हकारानन्तरं स्याः, 'त्ति'-इति मूलकः 'त्याइयि'-इत्यंशः स्तोभः, अधिकत्वे सति ऋगविलक्षण ोभः-इति तल्लक्षणत्वात्। स्तोभादयइत्यादिपदात् लोपागमादयो ग्राह्याः, 'बर्हिषि'-इत्यंशस्य हकाराश्रवणं, मध्ये 'औहोवा'-इत्यागमस्य। एवं यथा-क्षतो विकृतादिः सर्वत्र ध्येयः।

रादि *-शाखा-भेदेषु विलक्षणागीति-हेतवोऽक्षर-विकारादय आम्नायन्ते, ते सर्वे कर्मानुष्ठाने समुच्चेतव्याः; कुतः? प्रयोगवचने सर्वेषां परिगृहीतत्वात्— मैवम्, एकैक-शाखोक्तैरेवाक्षर-विकारादिभिरध्ययन-काल एव गीति-स्वरूप-निष्पत्तेस्तन्निष्पत्ति-लक्षणस्य प्रयोजनस्यैकत्वात्, प्रयोग-वचन-परिगृहीता अपि व्रीहि-यववद् वृद्धद्रथन्तरवच्च विकल्यन्ते"[८]-इति ॥ गीतिहेतुषु स्तोभस्यात्यन्तमप्रसिद्धत्वात्तल्लक्षणं तस्मिन्नेवपादे एकादशाधिकरणे चिन्तितम्— [९]"स्तोभस्य लक्षणं नास्ति किं वास्ति न विवर्णता। आधिक्यमप्यतिव्याप्तं विशिष्टं लक्षणं भवेत्॥ न तावद् विवर्णत्वं लक्षणम्, वर्ण-विकारस्य विपरीत-वर्णत्वेन स्तोभत्व-प्रसङ्गात्; अग्नआयाहो (छ.प्र१.द१.१) त्यस्यामृचि अकारस्य स्थाने ओकारं कृत्वा गायन्ति "ओग्नायि" इति(गे०प्र१.सा१)। अधिको वर्णः स्तोभ इत्युक्ते सति, अभ्यामेऽतिव्याप्तिः; पिवामोमन्द्रमन्द्रतुत्वे त्येतस्यामृचि (१) दृतुत्वेत्यक्षर-त्रयं गानकाले त्विरभ्यस्तम् (२)। अतोविकाराभ्यामयोरतिव्याप्तेर्नास्तिलक्षणम् इति चेत्— मैवम्, "अधिकत्वे सत्यृग्विलक्षणो वर्णः स्तोभः"(३)

* तलवकाराद्-इति गौ० सा० पाठः।

(१) छन्दोनामार्चिकस्य चतुर्थ प्रपाठकीय-पञ्चम-खण्डोऽयमिति यावत्।

(२) गेयगानस्य दशमप्रपाठकैकदेशिगानेषु सामसु द्रष्टव्यम्।

(३) तदेतल्लक्षणं वर्णस्तोभसाधारण्याभिप्रेतम्, तेन ह्याग्नेयादि नवविध नाम्नेयं स्तोभः, हाउकारादि पञ्चदश वैदस्तोभेषु च व्याप्तिः। तदुक्तम् "आग्नेयादिः स्मृतिः संख्यानं प्रलय-परिदेवन प्रेषमन्त्रपणश्चैव मृष्टिराख्यानमेव च"-इति वैकृतस्तोभ-भेदाः। तत्र "अग्न

इति विशिष्टस्य तल्लक्षणत्वात्; लोकेऽपि सभायां विप्रलब्धकेनोच्यमानं प्रकृतार्थानन्वितं काल-क्षेप-मात्र-हेतुं शब्दराशिं स्तोभ इत्याचक्षते, तस्मादस्ति लक्षणम्"[९]-इति॥ अक्षर-विकार-स्तोभादिवत् वर्ण-लोपोऽपि क्वचिद् गीति-हेतुर्भवति, तल्लोप-विषयश्च विचारो नवमाध्याये प्रथमपादस्याष्टादशाधिकरणेऽभिहितः— [१०]"इरा गिरा विकल्पः स्यादुतेरैवा विशेषतः। आद्योमैवं बाध-पूर्वमिरायाविहितत्वतः॥ ज्योतिष्टोमे श्रूयते "यज्ञायज्ञीयेन स्तुवीत"-इति (१)। 'यज्ञायज्ञा'-इत्यनेन शब्देन युक्तायामृचुत्पन्नं साम यज्ञायज्ञीयम् (२), तस्यामृचि गिरा शब्दः पठ्यते 'यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे'-इति (३)। तत्र सामगा योनिगान(४)

ज्योतिरमृता अभूम"-इति, "नमोऽस्त्राय नमोऽस्त्रपतये"-इत्यादिः, "येदेवादेवाः दिविषदः, अन्तरिक्षसदः, पृथिवीषदः"—इत्यादिः, 'एतत् संख्यानं रिक्थमद्रुः"—इति, "यदिन्द्राहं यथाजम्"-इति, "समविणं दक्ष"—इति, "विश्वेषां देवानां सन्दिजस्व ज्योतिरातननम्"—इति, "प्रजाभूतमजीजनत्"-इति, "द्यौरक्तान भूमिरातननत् समुद्रं समचुकुपत"—इति इत्येवमादयः क्रमेणोदाहार्याः। पद-स्तोभ-विवरणन्तु मन्त्र-ब्राह्मण-तृतीय-प्रपाठक-त्रयोदश-खण्डे; तदुदाहरणानि तु स्तोभग्रन्थेऽन्येषणमन्त्रापि प्राप्स्यानि वक्ष्यन्ति। इमे नव वाक्यस्तोभाः पञ्चदश पदस्तोभाश्च गानग्रन्थेषु श्रुताः सामसु, तत्राप्यरण्ये बहु।

(१) ताण्ड्यब्राह्मणाष्टमप्रपाठकीयषष्ठखण्डे श्रुतमेतत्।

(२) एतच्च गेयगान-प्रथम-प्रपाठकीय-द्वाविंशतितमं साम।

(३) छन्दोनामार्चिक-ग्रन्थे प्रथम-प्रपाठक-प्रथमखण्डे प्रथमा।

(४) साम्नां योनिभूताः ऋचः छन्दसि सार्चिके पठ्यन्ते, तासां गानानि सामापरपर्यायाणि यत्र विधन्ते, तद्योनिगानमित्याचक्षते, वेदसाम,-वेदगानं, गेयगानमित्यपि

मधीयानाः सन्तैव गकारेण गायन्ति 'गायिरा गिरा'-इति; ब्राह्मणे (१) तु गकार-लोप-पूर्वकमाकार-यकारादिकं गानं विधीयते 'ऐरं कृत्वोद्गेयम्'-इति, गिरा-शब्दे गकार-लोपादिराशब्दो भवति, इरायाः सम्बन्धि गानम् ऐरम्, तादृशं कृत्वा प्रयोग-काले तद्गानं कर्त्तव्यमित्यर्थः; तत्र योनिगान-ब्राह्मणयोः समान-बलत्वेन विशेषाभावात् विकल्पेन प्रयोक्तव्यम्-इति प्राप्ते, ब्रूमः—'न गिरागिरेति ब्रूयाद्, यद् गिरा गिरेति ब्रूयाद् आत्मानमेव तदुद्गाता गिरेत्' (२) इति गकार-सहित-गाने बाधकमुक्त्वा गकार-रहितमिरा पदं गेयत्वेन विधीयते, तत्पदादेरिकारस्य गानार्थमाकारीयकारडकार येति त्रीन् वर्णान् प्रयुञ्जते, तत 'आयिरा'-इत्येव गातव्यम्" (३)[१०] इति॥ तत्रैवोपरितनाधिकारे कश्चिद् विशेषश्चिन्तितः—[११]"इरा-पदं न गेयं स्याद् गेयं वा गीत्यनुक्तितः। न गेयं गीयमानस्य स्थाने पातात् प्रगीयते॥ ब्राह्मणेन विहितइराशब्दो न गातव्यः, कुतः? ऐरमिति शब्देन गीतिरनुक्तत्वात्; पाणिनीयेन

तस्यापरमपरं नामधेयम्। तत्र वेदसामेत्यभिधानमधिकरणमालायामेवावलोक्यते। वेयगानमित्येतदभिधानं तु गेयमित्यस्यैवापभ्रंशोऽनुमीयते। बहुत्र गेय गान पुस्तके गेयगानमित्येव लिखित दृश्यते, क्वचित् वेयमित्यपि। इदानीन्तन वैदिकाश्च 'वे' इत्येव व्यवहरन्ति।

(१) ताण्डे अष्टम-प्रपाठकीय-षष्ठे-खण्डे।

(२) तत्रैव खण्डे।

(३) गानञ्चैतदभिजिति 'अग्निष्टोमसाम, उक्थ्यगानस्य द्वितीय-प्रपाठकीय पञ्चदशम्।

'विमुक्तादिभ्योऽण्[५,२,६१]-इति सूत्रेणेरा-शब्दादण्-प्रत्ययोमत्वर्थीयो विहितः, तथासतीरापदोपेतं क्रत्वेत्येतावानेवार्थो भवति; यदि प्रगीतेरा-पद-सम्बन्धः तद्धितेन विवक्ष्येत, तदानीमाकारो यकारईकारोरेफआकारश्चैतैः पञ्चभिर्वर्णैर्निष्पन्नमायीरा-रूपं गीयमानेरा-शब्द-प्रातिपादिकं भवति, तादृशात् प्रातिपदिकात् पाणिनीयेन 'छन्दाच्छः[४,२,११४]'-इति सूत्रेण प्रत्ययान्तरे सति, आयिरीयं क्रत्वेति ब्राह्मणपाठो भवेत्; तस्मान्न गेयम्-इति प्राप्ते, ब्रूमः— गीयमानस्य गिरा-पदस्य स्थाने इरा पदं विधीयते-इति पदमात्रस्य बाधः, गानन्तु न बाध्यते: किञ्च विमुक्तादि[५,२,६१]-सूत्रेणाण्-प्रत्ययेऽपि, पूर्वस्मात् 'मतौ छः सूक्त-साम्नोः[५,२,५९]-इति सूत्रात् सामानुवृत्तेरेरं सामेत्यर्थो भवति, सामत्वं च गीति-साध्यम्, यदा तु 'तस्य विकारः[४,३,१३४]'-इत्यस्मिन्नर्थे अण् प्रत्ययः, तदानीमिरायाविकार इति विग्रहे यथोक्तं गानं लभ्यते; तस्माद् गातव्यम्"[११]-इति॥

बहुभिः प्रकारैर्गानात्मकं यत् साम-स्वरूपं निरूपितम् तस्यैव देवता-स्तुति-हेतुत्वं नवमाध्यायस्य द्वितीय-पादेऽष्टमाधिकरणस्य प्रथम-वर्णके निर्णीतम्— [१२]"ऋक्सामाभ्यां विकल्पेन स्तुतिः साम्नैव वागिमः। पुरैव मैवमृङ्निन्दा-साम-प्राशस्त्य-दर्शनात्॥ क्वचित् कर्म-विशेषे श्रूयते—'ऋचा स्तुवते, साम्ना स्तुवते'-इति। तत्र, पूर्वन्यायेन विकल्पः-इति चेत्—मैवम्, ऋङ्निन्दा-साम-प्रशंसयोर्वाक्यशेषेऽवगमात्, 'यदृचा स्तुवते तदसुरा अन्ववायन्, यत्साम्ना स्तुवते ,तदसुरानान्ववायन्, यएवं विद्वान् साम्ना स्तुवीत-इत्यृचं निन्दित्वा साम प्रशस्य लिङ्प्रत्ययेन साम

विहितम्, तस्मात् साम्नैव स्तोतव्यम्"[११]-इति (१)॥ तस्य च साम्नः ऋचं प्रति संस्कारकत्वं तस्मिन्नेव पादे द्वितीयाधिकरणे निर्णीतम्—[१२]"सामर्चं प्रति मुख्यं स्याद् गुणो वा वाद्य-पाठतः। मुख्यमभ्यसितुं पाठो गुणो गीताक्षरैः स्तुतेः॥ रथन्तरं गायतीत्यादौ यद्गानं विहितम् तदेव साम-शब्दार्थइति प्रतिपादितं स्मारितञ्च, तदेतद् गानमृचं प्रति प्रधान-कर्म स्यात्, कुतः? याग-प्रयोगाद् बहिरध्ययन-कालेऽपि पठ्यमानत्वात्, गुणकर्मत्वे तु व्रीहि-प्रोक्षणादिवद् याग-मध्ये एव गानमनुष्ठीयेत, ततो बहिर्गानस्य विश्वजिदादिवत् फलं कल्पनीयम् (२) मध्यकालीन-गानं तु प्रयाजादिवदारादुपकारकम् (३); तस्मान्मुख्यमेतत्र तु गुण-कर्म-इति प्राप्ते, ब्रूमः— न तावद् बहिः पाठः प्रधानकर्मत्वं कल्पयितुं शक्नोति 'भूमिरधिक-शुष्केष्टि-न्यायेन

(१) प्रायणीयातिरात्रानलरमनुष्ठेये तु ऋक्-साम्नोरुभयोरेवास्ति विधानम्, परं तत्रापि महती निन्दा गम्यते, तथाहि ताण्ड्यचतुर्थ-तृतीये "साम्नोयन्ति, ऋचा पुनरायन्ति" इति, साम्ना प्रयुज्यमाने इतः अस्माल्लोकात् यन्ति स्वर्गम्, ऋचा तु स्वर्गं गच्छन्तोऽपि यजमानाः पुनरागच्छन्ति इति तदर्थः।

(२) यत्र फलविशेषेण श्रूयते न दृश्यते वा, तत्र स्वर्गः फलं कल्प्यते, 'स स्वर्गः सर्वान् प्रत्यवश्रिष्टः' इति मीमांसा सिद्धान्तात्। अतः "विश्वजिता यजेत" इत्यत्र स्वर्गः फलं युक्त्या निरूप्यते; तद्वदत्रापि। तदुक्तम्— "विनापि विधिना दृष्टलाभान्न हि तदर्थता। कल्प्यस्तु विधिसामर्थ्यात् स्वर्गोविश्वजिदादिवत्"।

(३) तथाचावधेयम्— यागस्य कर्मरूपत्वात् कर्मणश्च क्षयित्वात् कालान्तरभाविस्वर्गादि-फल-साधनत्वं नोपपद्यते, अतः याग-क्रिया-सद्भाविनी काचिच्छक्तिरूपपूर्वमिति मीमांसकैः स्वीक्रियते, सा च यथा अङ्गार-अन्यमोष्णं भाण्डाङ्गारेषु अलोऽनुवर्तते, तथैव नष्टेऽपि यागे कर्तुरात्मानमाश्रयते। तच्च फलीपूर्वम्, समुदायापूर्वम्, उत्पत्त्यपूर्वम्, अङ्गापूर्वमिति नानाविधम्, तत्र सन्निपत्त्यादिति भेदात् अङ्गापूर्वं द्विविधम्,

२
15810

प्रयोग-पाटवाय गानाध्ययनोपपत्तेः (भूमिरथिको भूमौ रथमालिख्याभ्यासं करोति, यथा वा क्षात्रः शुष्केष्या प्रयोग-पाटवं सम्पादयति, तद्वत्)। नापि गुणकर्मत्वे प्रयोजनाभावात् प्रधानकर्मत्वमिति वाच्यम्, गानेन संस्तुतैर्ऋगाक्षरैः स्तुति-सम्भवात्; 'आज्यैः स्तुवते'-'पृष्ठैः स्तुवते'-इति स्तुति-विधानात्, तस्मादृगाक्षराणां स्वरविशिष्टत्वाकाराभिव्यक्तिर्दृष्टं प्रयोजनमित्यदृष्टस्याकल्पनीयत्वाद् गानं संस्कारकर्म"[१२]-इति॥

यथोक्तमृगक्षराणां संस्कारकं गीत्यात्मकं यत् साम तदेतदेकैकं छन्दोगा एकैकस्मिंच 'वेदसाम'-नामके ग्रन्थेऽधीयन्ते, ऊहनामके तु ग्रन्थे एकैकं साम लक्षेऽधीयते सोऽयमूहग्रन्थः तस्मिन्नेव पादे प्रथमाधिकरणस्य द्वितीयवर्णके विचारितः—[१४]"ऊहग्रन्थोऽपौरुषेयः पौरुषेयोऽथवाग्रिमः। वेदसाम-समानत्वाद् विधि-सार्थत्वतोऽन्तिमः॥ यस्मिन् ग्रन्थे सामगास्तूचे लक्षे सामैकैकं गायन्ति सोऽयमूहग्रन्थोनित्यो न तु पुरुषेण निर्मितः, कुतः? अनध्यायवर्जनेन कर्तुरस्मरणेनाध्यापकानां वेदत्व-प्रसिद्धा च वेदसाम-नामक-योनि-ग्रन्थ-सदृशत्वात्; इति चेत्— मैवम्, अपौरुषेयत्वे विधि-वैयर्थ्य-प्रसङ्गात्— 'यद्योन्यां तदुत्तरयोर्गायति'-इति विधीयते।

यानि द्रव्य-देवता-संस्कार-द्वारेण यागस्वरूपस्थातिशयाधानेन तदुत्पत्यपूर्व-निष्पत्तौ व्याप्रियन्ते तद्द्वारेण फलापूर्वं, तानि सन्निपत्योपकारकाणि, अवघातादीनि, यानि तु उत्पत्यपूर्वस्यः फलापूर्व-निष्पत्तौ साक्षादेव व्याप्रियन्ते, तानि आरादुपकारकाणि, प्रयाजादीनि-इति। एतत् समस्तं जैमिनीय-द्वितीयाध्याय-द्वितीयाधिकरणादौ स्फुटम्॥

अयमर्थः— अपौरुषेयत्वेन सम्मतिपन्ने वेदसाम-नामके ग्रन्थे 'कया नश्चित्र आ भुवत्'(१)इत्येतस्यां योन्यामेकस्यामृचि यद् वामदेव्य-नामकं (२) सामोपदिष्टं तदेवोत्तरयोर्ऋचोः 'कस्या-सत्योमदानाम्' 'अभी षु णः सखीनाम्' (३)-इत्यनयोः द्वितीय-तृतीययोर्गातव्यम्-इत्ययं विधिरूहग्रन्थस्य वेदत्वे व्यर्थः स्यात्, 'वेदसाम'-वदध्ययनादेव तत्सिद्धेः। उपरितनऋग्द्वये सामोद्देश्य पौरुषेयत्वेऽपि साम-स्वरूपस्य तदाधारभूतानां तिसृणामृचां च वेदत्वादनध्यायाः वर्जनीयाः, कर्त्तुरस्मरणं जीर्णकूपारामादिष्विव चिरकाल-व्यवधानादुपपन्नम्, अ-स्मरण-मूलेवाध्यापकानां वेदत्व-प्रसिद्धिः (४)— यथाबह्वृचामध्यापकामह्नाव्रत-प्रयोग-प्रतिपादक माश्वलायन-निर्मितं कल्प-सूत्रमारण्येऽधीयमानाः पञ्चममारण्यक

---

(१) ऋग्वेदीयमार्चिकस्य २प्र०६ख० ५ऋक्। उत्तरार्चिकस्य च १प्र० १२मू० १ऋक्।

(२)—गेयगानस्य पञ्चम-प्रपाठके कयान-इत्यस्यामृचि त्रीणि सामान्यात्मानानि; तत्र तृतीयं वामदेव्यम् महावामदेव्यं चीयते, आर्षेयब्राह्मणे तथैवाम्नानात्; तथाहि तदीय-प्रथम-प्रपाठकोनविंशखण्डे—"वाचः सामनी द्वे वामदेव्यं महावामदेव्यं वा" -इति।

(३) उत्तरार्चिकस्य १प्र० १२मू० १,२ ऋचौ। अनयोर्गानमूहग्रन्थस्य प्रथम-प्रपाठके पञ्चमं साम।

(४)—अवास्तोत्तरमनुसन्धेयम्— यदेतत् प्रथमाध्याय प्रथमपादाष्टमाधिकरणम् "समाख्याध्यापकत्वेन वाक्यत्वन्तु पराहतम्। तत्कर्तृपलम्भेन स्यात् ततोऽपौरुषेयता" इति—"अध्ययन-सम्प्रदाय-प्रवर्त्तकत्वं नमामाख्योपपद्यते, कालिदासादि-ग्रन्थेषु तत्कर्तृगा-द्यवसाने कर्त्तार उपलभ्यन्ते, तथा वेदस्यापि पौरुषेयत्वं तत्कर्तोपलभ्येत, नचोपल-भ्यते, अतोवाक्यत्व-हेतुः प्रतिकूल-तर्क पराहतः, तस्मादपौरुषेयोवेदः"-इति तद्-व्याख्यानम्— वेदोपौरुषेयः कर्त्तुरनुपलम्भात् आत्मवत् इत्यनुमानस्य + ऊहग्रन्थस्यापौरु-षेयत्व-साधकैतन्यायेन जल-मध्यस्थ-मसी-चोदवत् कथं न विरुध्यम्? -इति।

मिति वेदत्वेन व्यवहरन्ति, तद्वत् ; न च तस्यापि वेदत्वमस्तिति वाच्यम्, प्रथमारण्यकेन पुनरुक्तत्वात्, अर्थवाद-राहित्येन ब्राह्मण-सादृश्याभावाच्च ; तस्मात् पञ्चमारण्यकवदूहः (१) पौरुषेयः ; पौरुषेयस्य च न्याय-मूलत्वात् यत्र वक्ष्यमाण-न्याय-विरोध-स्तदप्रमाणम्"[१४]-इति ॥

तत्रैव केचिद् विशेषा-स्तृतीय-चतुर्थ-पञ्चम-षष्ठाधिकरणैर्बहु-वर्णकोपेतैर्विचारिताः ; तत्र, तृतीयाधिकरणम्— [१५] "अग्नेः सामर्चः कृत्स्नं वा प्रत्यृचं तिसृभिः श्रुतेः। अग्नेर्मैवं स्तुतेरग्नेरसिद्धेः प्रत्यृचं भवेत्॥ 'एकं साम तृचे (२) क्रियते स्तोचियम्' इति, श्रूयते, तत्र त्रेधा विभक्तेषु सामांशेषु एकैकोंऽशः एकैक-स्यामृचि गातव्यः, कुतः ? एकस्य साम्नः तिसृभिर्ऋग्भिर्निष्पा-दनस्य श्रवणात् ; इति प्राप्ते, ब्रूमः— स्तोचियमिति स्तुतिनि-ष्पादकत्वं कृत्स्नस्य साम्नोविधीयते, न तु सामांशानाम् ; स्तुति-र्नाम गुण-कथन-परमेकं वाक्यम्, तच्च वाक्यमेकस्यामृचि सम्पू-र्णम्, ततः कृत्स्नेन साम्ना तद् वाक्यं संस्कार्यमिति प्रत्यृचं सामा-भ्यसनीयम् (३), तथासति द्वितीय-तृतीययोर्ऋचोस्तस्यैव साम्न-आवर्त्तमानतया सामान्तरत्वाभावाद् ऋक्-त्रय-निष्पाद्यत्वमविरु-

---

(१)—उद्गानेऽप्यर्थं न्यायः, अविशेषात्, अत एव तन्नामारण-हेतुस्तु आचार्य एव वेत्ति स्वयम्।

(२)—तृचमिति "ऋचि तुनुघमक्षुतङ्कुत्रुमुग्रां पूरायै"-इति धातु-वचनात् सिद्धम्।

(३)—सामशब्देनात्र स्वरलोभाद्यएव ग्राह्याः, तदाधाराणां तिसृणामृचां परस्पर-पार्थक्यात्। उद्गानस्य उद्गायमानस्य च सर्वाण्येव सामानि एतदुदाहरणानि।

द्वम्; तस्मात् प्रत्यृचं कृत्स्नं साम समापनीयम्"[१५]-इति (१)॥

चतुर्थाधिकरणम्—[१६]"तिसृष्वृक्षूदितं साम विषमासु समासु वा। यथेच्छानियमादन्यः शर-लेशापनुत्तये॥ विषम-च्छन्दस्कासु सम-च्छन्दस्कासु वा तिसृष्वृक्षु स्वेच्छया साम गातव्यम्, इत्थमेवेतिनियामकस्य कस्यचिदभावात्; इति चेत्—मैवम्, शर-लेश-प्रसङ्गस्य नियामकत्वात्। शरोहिंसा, लेशोऽल्पत्वम्, 'शृ'-हिंसायाम् 'लिश्'-अल्पीभावेइत्येतद्धातु-द्वय-दर्शनात्—यद्यधिक-च्छन्दस्कायां योनौ

---

(१)—एतदधिकरणमभिप्रायं हृदयङ्गमयितुं लेखनी न शक्नुते, श्रुतस्तथाविधं सामैकं यथावत् प्रदर्श्यते। अनुत्तरार्चिकक्रम्यं उच्यते, मनेति,एनेति च तिसृणामृचां समुदायः प्रथम-प्रपाठक-प्रथमार्द्धाष्टम-सूक्तात्मकमृचः, तव नामधेयं नामकं साम गीयते तच्च ऊहगानस्यादिमम्, तदेतत्—

"उच्चाता३इजातमन्धसाः। दिवाइसा५१इङ्ग२। मिया २३ददा३। उग्रꣳ शर्मा। महा२३ इ श्रवाउ। वा३ (इति प्रथमांशः)॥ सन आ ३ इन्द्रायायज्यवाइ। वरुणा-ऽ१या२। मरू२३ङ्गिया३। वरिवो वा इत्। परा२३इ-सवाउ। वा३ (इतिद्वितीयांशः)॥ एनावा२३ श्वानि अर्यआ। द्युक्षा नाऽ१इमा२। नृपा२३णाम्। सिपा सन्ताः। वना२३ मंहाउ। वा३ (इति तृतीयांशः) स्तौषे २ म्ट ३ ४ ५। (इति साम-शेष-सूचकोनिधनांशः)

अत्र आधाराणां भेदेऽपि स्वर-स्तोभादीनामभेदः स्फुटम्॥

उत्पन्नं साम, न्यून-च्छन्दस्कयोर्गीयेत, तदा साम-भागेनैव तत्पूर्त्ते-रवशिष्ट-सामभागाश्रयाभावाद्विलीयेत ; यदि योनेरप्यधिकच्छन्द-स्कयोर्गीयेत, तदा साम्नोऽल्पत्वादवशिष्टऋग्भागः साम-रहितः स्यात् ; तस्मात् समान-च्छन्दस्कास्वेव गातव्यम्"[१६]-इति (१)। पञ्चमाधिकरणे प्रथम-वर्णकम्— [१७]"छन्दस्थयो-रुत्तरास्थयोर्वा गीतेरिहाह्वनम्। अविशेषाद् विकल्पः स्यादन्त्यः संज्ञा-बलित्वतः। सामगानामृक्पाठाय द्वौ ग्रन्थौ विदेते, 'छन्दः' 'उत्तरा' चेति (२)। तत्र, छन्दो नामके ग्रन्थे नानाविधानां साम्नां योनिभूता एवर्चः* पठिताः ; उत्तरा-ग्रन्थे ऋचात्मकानि (३) सूक्तानि पठितानि (४) ; एकस्मिंस्तृचे छन्दोगता योन्यृक् प्रथमा, इतरे द्वे उत्तरे।

---

* नानैवर्चः-इति गौ०पु० पाठः।

---

(१)—आधारभूतेषु तिसृष्वृत्सु यद्येका गायत्रीच्छन्दस्का, द्वितीया बृहतीच्छन्दस्का, तृतीया जगतीच्छन्दस्का बृहतीच्छन्दस्कैव वा स्यात्, तर्हि सर्वत्रैकरूप-गाने व्याघातः समुप पद्येत, यतः एकच्छन्दस्कास्वेव तिसृषु आधारत्वेन ग्राह्याः-इत्याशयः अधीयन्ते च प्राय स्तथैव उत्तरार्चिक-ग्रन्थे समस्तासृचाः।

(२)—आरण्यिकस्तु छन्दोग्रन्थ-मध्ये एवान्तर्भूतः। योहि साधवः सामवेदस्य विवरण-कारः पूर्वतनः, तस्य नये वैदिक-व्यवहारे च आरण्यिकस्तृतीयः। एषां त्रयाणामेव साधा-रणमभिधानमार्चिकइति।

(३)—यद्यपि ऋचमिति रूपं न लौकिकं लोकेषु ऋृचमित्येव व्यवहर्तुं युक्तम्, परं सूक्ते तस्य योगरूढितया तदभिप्रायेण तथाव्यवहरेऽपि नदोषः, संज्ञा-शब्दत्वेन सुय-त्वात्।

(४)—तत्र तृचानि सूक्तानीति प्रायोवादः, क्वचित् क्वचित् सूक्ते द्वे, चतस्रः, पञ्च, षट्, सप्त, अष्टौ, नव दश, एकादश, द्वादश च। तथाहि प्रथम प्रपाठक-द्वितीयार्द्धस्य त्रयोदशादि-सूक्तत्रये द्वे द्वे एव, चतुर्थ-प्रपाठक-द्वितीयार्द्धस्य प्रथमसूक्ते द्वादश च।

एवं स्थिते सति रथन्तरमुत्तरयो गायति, यद्योन्यां तदुत्तरयो गायतीत्यत्र हिविधे उत्तरे सम्भविते, रथन्तरस्य— छन्दोग्रन्थे ऽभित्वाशूरेतीयसृग् योनित्वेन पठिता, तस्याऽपरि त्वामिद्धिहवा-महइत्यादयः बृहदादि-साम्नां योनयः पठिताः [३प्र०१ख०१ऋ०], उत्तरा-ग्रन्थे अभित्वाशूरेति सूक्ते (१) तस्याऽऋचऽर्धं नत्वावाए अन्यदित्येषा [१,११,२] साम्नः (२) कस्याप्ययोनिभूता पठिता ; तत्र छन्दोग्रन्थापेक्षया सामान्तरयोर्योनी द्वे रथन्तरस्य स्व-योन्युत्तरे भवतः, उत्तरा-ग्रन्थापेक्षया तृच-गते द्वितीय-तृतीये स्वयोन्युत्तरे भवतः, तत्र विशेष-नियामकाभावात् ययोः कयोश्चि-दुत्तरयोर्गानमिति चेत्— नैवम्, उत्तरेति संज्ञा सहसा बुद्धिस्था भवति प्रतियोगि-निरपेक्षत्वात्, पूर्व-पठितां योनिमृचमपेक्ष्य यदु-त्तरात्वं तद्विलम्बेन प्रतीयमानत्वाद् दुर्बलम्, ईदृशमेवोत्तरात्वं छन्दसि पठितयोः स्व-योन्युत्तर-भाविन्योः सामान्तर-योन्योर्ह्ययो-र्ऋचोः, तृच-गतयोस्तु द्वितीय-तृतीययोरुत्तरात्वं संज्ञया वर्त्तते, अतस्तयोरेव गानम् ; एवं सति पूर्वाधिकरणे निर्णीतं समास्वेव गानमनुगृहीतं भवति ; किञ्च (३) तृचात्मकेषु सूक्तेषु या प्रथमा

(१)—प्रथम-प्रपाठकैकादशतमम् ।

(२)—कस्यापि साम्न-इत्यन्वयः ; न त्वेतस्य गानं गेयग्रन्थे क्वचिदुपलभ्यते, नास्ति च तस्य छन्दोग्रन्थे पाठः-इत्याशयः ।

(३)—किञ्चेत्यादीतीत्यन्तेन 'गानग्रन्थयोर्द्वयोस्तदाधारभूतयोश्च द्वयोर्ग्रन्थयोर्नाम-हेतुं निर्दिशति ; तच्चेदमपि वक्तव्यम्— संहितायाग्रन्थयोः ऋङ्मयत्वात् छन्दोमयत्वाच्च आर्षिकदृति छन्दइति च साधारणं नामु, तथापि एकस्य उत्तरेति-विशेषाख्या अप-रस्य तदभावदृति ।

योनिभूता तन्नाम्ना छन्दोग्रन्थस्य 'योनि-ग्रन्थः'-इति अध्यापकानां समाख्या, इतरस्यतु ऋच-सङ्ग-रूपस्य ग्रन्थस्योपरितनयोर्ऋचो र्नामधेयेन 'उत्तरा'-इति समाख्या ; स एव ग्रन्थः कर्माङ्गसमर्पकं प्रकरणं, पञ्चदश-सप्तदशादि-स्तोमानां ऋचेवेत्यर्थः ; तस्मा-दुत्तरा-ग्रन्थस्थयोस्तृचगतयोर्द्वितीय-तृतीययोरयभूहः"[१७]-इति ॥

द्वितीयवर्णकम्— [१८]"वैशोकेऽतिजगत्यौ द्वे आनेये गीतये ऽथवा। बृहत्या वादिमः साम्यान्नोत्तरालंस्तुतेर्बलात्॥ द्वाद-शाहे चतुर्थेऽहनि वैशोक-नामकं साम [ऊ[१]प्र[२]अ[१२]] विहितम् (१), तच्च विश्वाः पृतना [५प्र०१४सू०१ऋ०] इत्येतस्यामतिज-गत्यामुत्पन्नम्, तस्मिंश्च ऋचे तस्यायोनेरुत्तरे द्वे बृहत्यौ 'नेमिं न यन्तीत्यादिके [५प्र०१४सू०२,३ऋ०] आम्नाते, तत्र बृहत्यावुपेक्ष्य तयोः स्थाने द्वे उत्पत्तिसिद्धे अतिजगत्यौ आनीय तासु तिसृषु गेयम्; तथा सति समासु गानं पूर्वत्र निर्णीतमनुगृह्येत, 'अति-जगतीषु स्तुवन्ति'-इति(२) श्रूयमाणम् अतिजगती-बहुत्वम् अन्यथा नोपपद्येतेति चेत्— मैवम्, उत्तरयोर्गायतोत्पन्नस्य संज्ञा-रूप स्योत्तरा-शब्दस्याधीयमानयोर्बृहत्योर्मुख्यत्वात्, श्रुतिश्च बहुत्व-लिङ्गात् 'समासु गानम्'-इति न्यायाच्च बलीयसी; यदेतदतिजगती-बहुत्वं तदबृहत्योः स्वीकारेऽप्युपपद्यते, एकविंश-स्तोमस्यात्र विहि-

(१)—"वैशोकं ब्रह्म-साम भवति"-इति ताण्डे द्वादशे दशम खण्डे। 'विशोकेन दृष्टं' साम वैशोकं, तद्-ब्रह्म-साम ब्रह्मणः स्तोत्रं षष्ठत्वेन कार्यम्' इति तद्भाष्यम्।

(२)—ताण्ड्य द्वादशे दशम-खण्डे। "अतिजगतीषु द्विपद्याश्चदुत्तरासु जगती-मतीत्य वर्त्तमानासु ऋक्षु 'विश्वाःपृतना' इत्यादिषु स्तुवन्ति"-इति तद्भाष्यम्।

तत्वेन तत्-सिद्धये प्रथमायाः अतिजगत्याः सप्तक्रत्वआवर्त्तनी-यत्वात्; तस्मात् त्रैयोकं साम बृहत्योरूहनीयम्"[१८]-इति। षष्ठाधिकरणे प्रथम-वर्णकम्— [१९] "रथन्तरे ककुब् आह्या यथा वाद्योऽर्धवत्वतः। पुनःपदा-प्रसिद्ध्यादेः* रन्त्योर्थोऽन्यत्र वीक्ष्यताम्॥ इदमाम्नायते (१) 'न वै बृहद्रथन्तरमेकच्छन्दः यत्तयोः पूर्वा बृहती ककुभावुत्तरे'-इति, अयमर्थः— बृहद्रथन्तरं तदेतत् सामद्वयमितर-सामवदेकच्छन्दस्कं न भवति, यस्मात् कारणात् तयोर्बृहद्रथन्तर-साम्नोराद्ययभूतास्वृचु पूर्वा बृहती (२) च्छन्दस्का [३प्र०१२सू०१ऋ०] उत्तरे तु द्वे ऋचौ[३प्र०१२सू० १ऋ०] ककुब् (३) छन्दस्के, इतरेषां वामदेव्यादि-साम्नामाद्ये ऋचे अव-स्थिताः तिस्रऋचः एकच्छन्दस्काः उत्तरा-अन्ये आम्नाताः (४) संशय-विलेख-परिहाराय 'सप्तसु गायेत्'-इति न्यायेन निर्णीताएव (५)

* पुनः पदात् प्रसिद्ध्यादेः-इति गौ० पु० पाठः।

(१)—ताण्ड्यमा० सप्तम-प्रपाठकीय-सप्तम-खण्डे, परं तत्र किञ्चित् पाठ-भेदः।

(२)—षट्त्रिंशदक्षरा, एकाक्षर-न्यूनातिरेको वैदिक छन्दःसु न दोषमावहति, तथाच ताण्ड्य-पञ्चदश-द्वादशे—"न ह्येकस्मादक्षराद्विरमन्ति"-इति।

(३)—अष्टाद्यक्षरा, आर्षादिभेदात् न्यूनातिरिक्ताक्षरा च।

(४)—प्रथमप्रपाठके द्वादशमन्त्रादयः।

(५)—जैमिनीय-नवमाध्याय-तृतीयपाद-चतुर्थाधिकरणे।

इह तु वाचनिकं (१) विषमच्छन्दस्कासु गानमिति तत्र * रथन्तरस्याश्रयतया ह्रचीनोत्तरा-ग्रन्थे समाम्नातः, किन्तर्हि? प्रगाथस्तदाश्रयत्वेनाम्नातः (२); स च द्वाभ्यामृग्भ्यां निष्पन्नत्वात् द्वाचो भवति, तयोश्च द्वयोर्ऋचोः 'अभित्वाशूरेत्येषा [१ प्र० ११ सू० १ ऋ] प्रथमा, सा च बृहती; 'न त्वा वाऽन्योदित्यइत्येषा [१ प्र० ११ सू० २ ऋ०] द्वितीया, सा च पंक्तिः(३) च्छन्दस्का; तथाच सति तां पंक्तिच्छन्दस्कामपनीय तस्याः स्थाने दाशतयी-गते (४) द्वे उत्पत्ति-ककुभौ (५) ऋचौ गृहीतव्ये, कुतः? अर्थवत्वात्,(६) उदाहृतेन 'ककुभावुत्तरे' इति वाक्येन रथन्तर-साम्नः आश्रयत्वेन ककुभोर्विनियुज्यमानयोः ककुबुत्पत्तिरर्थवती भवति, अन्यथा वैयर्थ्यं स्यात्, किञ्च आम्नाताया एकस्याः पंक्तेः स्वीकारे सति ऋचोर्द्वयोरेव लाभात् एकं साम

तत्र-इति सा० रा० पुस्तकयोर्नास्ति।

---

(१)—'पूर्वा बृहती ककुभावुत्तरे'-इति प्रदर्शित-ताण्ड्यादिश्रुत-वचनेन निष्पन्नमिति यावत्।

(२)—प्रग्रथनं प्रगाथः, ऋत्पदमेवैतत्तात्पर्यं स्फुटी भविष्यति।

(३)—चत्वारिंशदक्षरा, विष्टारादिभेदात् न्यूनातिरिक्ता च।

(४)—दशाक्षरचरणका दाशतयी पंक्तिः, तत्र गता कर्त्तव्यत्वेन उपस्थिता, ते। दशतयीति पाठो निरुक्त-सम्मतः, स च तत्र सप्तम-पञ्चमान्त्ये द्रष्टव्यः।

(५)—अत्र एकां पंक्तिं विभज्य द्वे ककुभौ उत्पाद्ये, अत इमे उत्पत्ति-ककुभा वित्युच्यते। एवमग्रेऽपि उत्पत्ति-बृहतीत्यादौ।

(६)—अन्यथा प्रदर्शिता श्रुतिरनर्थिकास्यात्

ऋचे क्रियते स्तोत्रियम्'-इति वचनं विरुद्धेयत, तस्माद्ग्रथनान्तर-सान्निध्ये ककुभावुत्तरे गृहीतव्ये (१); अयमेव न्यायो बृहत्साम्न्यपि योजनीयः-इति प्राप्ते, ब्रूमः— आम्नातयोर्बृहती-पंक्त्योरेव ककुब् ग्रथनीया, तथाहि- 'अभित्वाशूरेत्येषा बृहती प्रथमा स्तोत्रिया, तस्यामविकृतायामेव रथन्तरं गातव्यम्, ततस्तस्यामृचि चतुर्थं पादं पुनरुपादायोत्तरस्याः पंक्तेः पूर्वार्द्धेन सह योजनीयम्, सेय मष्टाविंशत्यक्षरा त्रिपदा द्वितीया स्तोत्रिया, साचैका ककुप् सम्पद्यते; तस्यां ककुभि चरमं पादं पंक्तेरुत्तरार्द्धेन सह प्रग्रथ्य तृतीया स्तोत्रिया कर्त्तव्या, सा च द्वितीया ककुप् सम्पद्यते; प्रग्रथन-प्रकारेण द्वयोर्ऋचोराम्नातयोः तृच-निष्पत्तेर्नास्त्युक्तो-वचन-विरोधः। अस्मिंश्च ग्रथने 'पुनःपदा'-इति श्रौतोक्तिर्लिङ्गम्, तथाच श्रूयते— 'एषा वै प्रतिष्ठिता बृहती या पुनःपदा तद् यत् पदं पुनरारभते तस्माद् वत्सोमातरमभिहिंकरोति'-इति, अयमर्थः— या बृहती पुनःपदा भवति, सैषा प्रतिष्ठिता स्थिरा भवति; पदं चतुर्थः पादः, सोऽप्यृ-गन्तर-सम्पादनाय पुनःपठ्यते, ततः सा बृहती पुनःपदा, सेयमङ्माता, तस्याः पादोवत्सः; तथासति यस्मादत्र चतुर्थं पादम् उद्गाता पुनरारभते तस्माद्

(१)—एवञ्चैवं भवति—"अभि त्वा शूर नोनुमोदुग्धाइव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः"-इति प्रथमा ऋक् बृहतीछन्दस्का, "नत्वा बाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यतो मघवन्नोजसो मघवन्निन्द्र वाजिनो गव्यं तक्त्वा हवामहे"-इति द्वितीया ऋक् पंक्तिच्छन्दस्का, अस्यामेव ऋचीदृग्भागः कर्त्तव्यः, तथाच ककुप्-छन्दस्के द्वे ऋचे सम्पद्येते, तत्राद्या द्वितीया, अपरा तृतीया।

वत्सोमातरमभिवोच्य हिमिति शब्दं करोतीति। न केवलं लिङ्ग-मात्रेण प्रग्रथनं, किन्तु छन्दोगानां प्रसिद्धमपि; ते ह्येवं स्मरन्ति 'काकुभः प्रगाथः'-इति। किञ्च प्रगाथ-शब्दार्थ-पर्यालोचनेनापि ग्रथनं गम्यते— प्रकर्षेण ग्रथनं यत्र स प्रगाथः, प्रकर्षो नाम आम्नातादृक्पाठादाधिक्यम्, तच्च पूर्वोक्त-रीत्या पादाभ्यास-पुरः सरमृगन्तर-सम्पादनेनोपजायते। तस्मान्नीत्पत्ति-ककुभौ ग्रही-तव्ये, किन्तर्हि? प्रग्रथनेन ह्ये उत्तरे ककुभौ सम्पाद्य तासु तिसृषु रथन्तरं गातव्यम् (१), तथा बृहदपि (२), एवं सति पंक्तेः

(१)—तथाच पश्यतु तावत्, ऊह्यगानस्यादिमं साम।

"आभित्वाशूरनोनुमोवा। आ दुग्धाइव धेनव ईशान मस्य जगतः। सुवा२३ईशाम्। आयिशा नमा२३यि-न्द्रा३। सूस्थु२३४षा। औवाई। हा उवा (इति प्रथमांशः)। ईशो वा। नाभिन्द्र सुस्थुषो न त्वा वाऽ अन्योदिवियः। नपा२३र्थिवाः। नजातोना२३जा३। नायिव्या२३४ता। औवाई। हाउवा (इति द्वितीयांशः)। नजोवा। तोनज-निष्यते अश्वायन्तो मघवन्नि। द्रवा२३जिना। गव्यन्त-स्त्वा२३हा३। वामा२३४हा। औवाई। हाउवा। (इति तृतीयांशः)॥

(२) ऊह्यगानस्य प्रथमप्रपाठके पञ्चमं साम।

पाठः सार्थोभवति; नचैवं ककुबुत्पत्ति-वैयर्थ्यमिति शङ्कनीयम्, वाच-स्तोमे तदुपयोगात्; तस्मान्न कापि प्रग्रथने अनुपपत्तिः" १९-इति॥ द्वितीयं वर्णकम्—"यौधाजये रौरवे च बृहत्योरागमोऽथवा। ग्रथनं पूर्ववत् पञ्चौ षष्टि-लिङ्गमिहोच्यते॥ इदमाम्नायते-'रौरव-यौधाजये बार्हते ऋचे भवतः' इति (१) अयमर्थः—रौरव-नामकं किञ्चित् साम (२), तथा, यौधाजय-नामकम परम् (३); तयोः साम्नोर्बृहतीच्छन्दस्कस्तृचआम्नायइति; उत्तरा-ग्रन्थे (४) तु तस्य साम-द्वयस्याम्नायएकः प्रगाथः आम्नातः (५), तस्मिंश्च प्रगाथे 'पुनानः सोमेत्यसावृक् प्रथमा, सा च बृहती; 'दुहानउधर्दिव्यमिति द्वितीया, सा तु विष्टारपंक्तिः; तामेतं विष्टारपंक्तिमपनीय तस्याः स्थाने उत्पत्ति-बृहत्यौ द्वे ऋचौ आनेतव्ये (६) इति पूर्वपक्षः। बृहती-विष्टारपंक्त्योः प्रग्रथन-विशेषेण हे बृहत्यावुत्तरे सम्पादनीये इति राद्धान्तः। तत्रो-भयत्र युक्तिः 'पूर्वन्यायेन द्रष्टव्या। लिङ्गंत्वेवमाम्नायते-'षष्ठि-

---

(१)—स्यष्टमेतत् ताण्ड्य सप्तमप्रपाठकीय तृतीयखण्डे, परं शाखाभेदात् पाठ-भेदः।

(२)—ऊहगानस्य प्रथमप्रपाठकीय-द्वितीयं साम।

(३)—ऊहगानस्य प्रथमप्रपाठकीय-तृतीयं साम।

(४)—द्वयोः साम्नएकएवं तृचः आधारः, स्वरस्तोमादि-भेदात् नाम-भेदः, एतद्वि ताण्ड्य-सप्तम-तृतीय-विधानात् प्रमाणम्, ऊह प्रथमे द्वितीय तृतीय साम-दर्शनाच्च स्फुटम्।

(५)—प्रथम-प्रपाठके अष्टम सूक्तादनन्तरम्।

(६)—एकर्चएव दृश्यत्वं न बुद्धौ धैर्यीतयदत्यर्थः, तथाच तृचः सम्पद्येत, साम-त्रिरभ्यासोऽपि सुकरः।

स्त्रिष्टुभौमाध्यन्दिनं सवनम्'-इति, अयमर्थः — रौरव-यौधाजय-नामके सामनी माध्यन्दिने सवने गीयेते, तस्मिंश्च सवने त्रिष्टुप्-छन्दस्काऋचः षष्टिर्भवन्तीति, सेयं षष्टि-संख्या प्रग्रथन-पक्षे उपपद्यते। तथाहि माध्यन्दिने सवने पवमान एकः (१), पृष्ठस्तोत्राणि चत्वारि (२)। पवमाने त्रीणि सूक्तानि (३)-'उच्चातेजातमित्येकं सूक्तम्, तत्र गायत्रास्तिस्रऋचः (४); पुनानःसोमेति द्वितीयं सूक्तम्, तच्च प्रगाथरूपम्, तत्र पूर्वा (५) बृहती, उत्तरा (६) विष्टारपंक्तिः; 'प्रतुद्रवपरि-कोशमिति तृतीयं सूक्तम्, तत्र त्रिष्टुभस्तिस्रः (७)। पृष्ठ-स्तोत्रेषु 'अभित्वाशूरेति प्रगाथरूपं प्रथमं सूक्तम् तत्र पूर्वा (८) बृहती, उत्तरा (९) विष्टारपंक्तिः; 'कयानश्चित्रइति द्वितीयं, तत्र तिस्रः गायत्राः (१०); 'तंवोदस्मृतीषहमिति तृतीयं प्रगाथरूपं, तत्र बृहती-पंक्त्यौ (११); 'तरोभिर्वो

---

(१)—सोमविशेषः, तत्स्वरूपादिकमनुपदं वक्ष्यति।

(२)—तानि च सूक्तरूपाणि, ताण्ड्य-प्रथम-प्रपाठके दशम-परस्तात् विहितानि।

(३)—उत्तरार्चिक-प्रथम-प्रपाठकस्याष्टम-नवम-दशम-रूपाणि।

(४)—"उच्चातेजा" १, "मनइन्द्रा"२, "एनाविश्वा"३-इति वि-प्रतीकाः।

(५)—"पुनानः सोमधारयेत्यादिः।

(६)—"दुहान उधर्दिव्यमित्यादिः।

(७) "प्रतुद्रव" १, "स्वायुधःपवते"२, "ऋषिविप्रः"३।

(८) "अभि त्वा शूर नोनुमः-इत्याद्या।

(९) "न त्वा वां अन्योदिव्यः"-इत्याद्या।

(१०) "कयानश्चित्रआ"१, "कस्त्वासत्योमदानाम्"२, "अभीषुणः" ३।

(११) "तंवोदस्मृतौ"-इति बृहती, "यु चं सुदा" इति पंक्तिः॥

विदद्दसुमिति प्रगाथरूपं चतुर्थं, तत्रापि बृहती-पंक्त्यौ (१)। एवमन्यस्मिन् सवने सप्त सूक्तानि (२)। तेषु (३) नव सामानि गेयानि; प्रथमे सूक्ते गायत्रमामहीयवं चेति द्वे सामनी (४), द्वितीये रौरवं योधाजयं च, तृतीये औशनम्, चतुर्थे रथन्तरम्, पञ्चमे वामदेव्यम्, षष्ठे नौधसम्, सप्तमे कालेयम्(५)। तत्र, प्रथम-सूक्तस्य साम-द्वय-निष्पत्तये द्विराहृत्तावाश्रयभूता ऋचः षड्गायत्र्यो भवन्ति, पञ्चम-सूक्त-गता वामदेव्य-सामाश्रय-भूताः तिस्रः ऋचः सप्तदश-स्तोम-सिद्ध्यर्थमावर्त्यमानाः सप्तदश गायत्राः-इत्येवं मिलित्वा त्रयोविंशतिर्गायत्राः, षष्ठे सूक्ते बृहती-पंक्त्यौ प्रगथनेन बार्हतस्तृचो भवति, तथा सप्तमेऽपि, तत्रोभयत्र सप्तदश-स्तोमे सति चतुस्त्रिंशद् बृहत्योभवन्ति;

---

(१)—'तरोभिर्वो'-इति बृहती, "नयंदुधा"-इति पंक्तिः।

(२)—यथाय मध्यन्दिन सवने इमानि सप्त सूक्तानि, तथैव प्रातःसवनादावपि-अन्यान्य-सूक्तानि, ताण्ड्यादि-ग्रामनादवगन्तव्यानि।

(३)—प्रदर्शितेषु सप्तसु सूक्तेषु।

(४)—अस्यैव ऋचस्यैतन्नाम अस्मिन्नेव ऋचे एतत्साम गातव्यमित्यादिकं स्वरूपत एव ताण्ड्यादौ स्थितम्, तथाहि—'उच्चातेजातमन्धसस्तुत्योगायत्रोभवन्ति" (१५.९) इत्यादिकं प्रत्येकस्य विधायकम्।

(५)—आमहीयवादि-कालेयान्यन्यौ सामानि ऊहगानारम्भे एव एकादिक्रमेण श्रुतानि; गायत्रं तु न क्वापि गान-ग्रन्थे सम्प्रति समुपलभ्यते, परम् "उच्चातेजातमन्धसोम्"-इत्यादिकं गुरु-मुखादनुश्रूयमाणस्वरूपाकम्, ततस्तत् भारण्डादिकमिव गानग्रन्थान्तरिक्रमिति ज्ञायते। अपिच ऊहग्रन्थे क्वचिदेकं क्वचिद् द्वे इत्येवं 'उच्चा ते-सूक्त-मूलकानि द्वाविंशति-सामानि दृश्यन्ते, परं तेषु गायत्र-लक्षणाभावः, गायत्रादि-लक्षणन्तु ताण्ड्यब्राह्मणादवगन्तव्यम्। तथाहि, तत्र षष्ठ-तृतीयखण्डे-"अष्टाक्षरा गायत्री नवमो हिङ्कारः"-इत्येवमादिः।

द्वितीय-सूक्तेऽपि प्रग्रथनेन बार्हतं ह्वचं सम्पाद्य साम-द्वयार्थं मात्तृत्तौ षड् ह्वहत्योभवन्ति; चतुर्थ-सूक्ते रथन्तर-सामार्थं पूर्व-वर्णोक्त-रीत्या प्रग्रथने सति ककुभावुत्तरे भवतः; प्रथमा तु स्वतःसिद्ध-ह्वहतो, तत्र सप्तदशस्तोमे सति पञ्च ह्वहत्यो द्वादश ककुभश्च सम्पद्यन्ते; (तस्य च स्तोमस्य विधायकं ब्राह्मणमेवमाम्नायते (१)— 'पञ्चभ्योहिङ्करोति स तिसृभिः स एकया स एकया, पञ्चभ्योहिङ्करोति स एकया स तिसृभिः स एकया, सप्तभ्योहिङ्करोति स एकया सतिसृभिः सतिसृभिः इति (२), अयमर्थः— एका स्वतःसिद्धा ह्वहतो, प्रग्रथिते द्वे ककुभावित्येवंविधस्तृचस्त्रिभिः पर्य्यायैरावर्त्तनीयः, प्रथमे पर्याये—त्रिर्बृहतो गातव्या, सकृत् सकृत् ककुभौ; द्वितीये पर्याये—सकृद् ह्वहतो, त्रिवारमनन्तरा ककुप् सकृदन्त्या; तृतीये पर्याये—सकृद् ह्वहतो, त्रिस्त्रिः ककुभाविति; हिङ्करोति हिङ्कारोपलक्षितं गानं कुर्यादित्यर्थः।) तदेवं तृतीय-सूक्त-व्यतिरिक्तेषु षट्सु सूक्तेषु त्रयोविंशतिर्गायत्राः पञ्चचत्वारिंशद् ह्वहत्यो द्वादश ककुभः सम्पन्नाः; तत्र ककुप् अष्टाविंशत्यक्षरा, तस्यां षोड़शाक्षरे गायत्री पाद-द्वये योजिते चतुश्चत्वारिंशदक्षरा त्रिष्टुप्

(१)—ताण्ड्यब्राह्मणस्य द्वितीय-प्रपाठक-सप्तम-खण्डे।

(२)—सप्तदशस्तोमस्य सप्तविष्टुतयो भवन्ति, त्रिधा दशसप्ता, द्विधा सप्तस्थिता, त्रयतो, भक्ता, सर्वविलक्षणा चेति; तत्रेषा आद्या, अत्रोत्तरपर्याये सप्तेति दश च सप्त चेति अस्यामिति विग्रहोत्तं दशसप्तेत्यभिधानं। स्पष्टमेवैतत् समलं तत्रैव सप्तसु खण्डेषु॥

(८१)—सर्वमेतत् स्फुटं विधीयते ताण्डे, दृश्यते चोत्तरार्चिके गीयते चौद्धगाने।

सम्पद्यते ; अनया दिशा द्वादशानां ककुभां त्रिष्टुप्त्व-सम्पादनाय चतुर्विंशतिर्गायत्री-पादायोजनीयाः ; तथासत्यष्टौ गायत्रीगताः, पञ्चदश गायत्रीऽवशिष्यन्ते ; तासां पञ्चचत्वारिंशत् पादाः, तांश्च तावतीषु बृहतीषु संयोज्य त्रिष्टुभः सम्पादनीयाः, तत-एताः पञ्चचत्वारिंशत्, ककुप्सु निष्पन्नाः द्वादश। तृतीये सूक्ते स्वतःसिद्धास्त्रिस्रः-इत्येवं प्रगथन-पञ्चे षष्टि-स्त्रिष्टुभउत्तरा-ग्रन्थे समाम्नाताएव लभ्यन्ते। उत्पत्ति-बृहत्यानयने तु प्रकरणाम्नातानां तावतीनामलाभात् प्रकृत-हानाप्रकृत-कल्पने प्रसज्येयाताम्। तस्मात् त्रिष्टुभः षष्टिरित्येतद्बृहती-प्रगथनस्य लिङ्गम्। प्रगथन-प्रकारस्त्वभिधीयते— 'पुनानःसोमेत्यस्याबृहत्यास्तुर्थ-पादं पुनरूपादाय द्विरभ्यस्य 'दुहानउधर्दिव्यमित्यस्याविष्टारपङ्क्तेः पूर्वार्द्धेन संयोजयेत्, सा बृहती भवति ; एतदीयं चतुर्थं पादं द्विरभ्यस्योत्तरार्द्धेन योजयेत्, सापि बृहती भवति ; तस्माद् यौधाजय-रौरवयोः बृहत्यौ उत्तरे प्रगथनीये। एवं नौधस-कालेययोरपि द्रष्टव्यम्"[२०] इति(१)॥ तृतीयवर्णकम्—[२१]"श्यावाश्वांधीगवेऽनुष्टुवा नेये ग्रथ्यतेऽथवा। पुरेव लिङ्गं जगतो चतुर्विंशति-कीर्त्तनम्। इदमाम्नायते— 'पञ्चकृन्द्राआवापः आर्भवः पवमानः सप्तसामा, गायत्र-संहिते गायत्रे तृचे भवतः, श्यावाश्वांधीगवे आनुष्टुभे तृचे भवतः, उष्णिहि सफम्; ककुभि पौष्कलम्,कावमन्त्यं जगतीषु' इति। अयमर्थः— अस्ति तृतीय-सवने पवमानः आर्भव-संज्ञकः, तस्मिन् पञ्च सूक्तानि, सप्त सामानि ; 'स्वादिष्ठया मदिष्ठा' इत्येकं सूक्तम्

(१) (८९)— एतच्चिक्रोपनेतत्-पर्व-प्रष्ठायां भगाम्नातिता. मैवात्र विवेच्या।

(उ,१प्र,१५), तस्मिन् गायत्रास्तिस्रऋचः(१) तासु 'गायत्रं'(२) 'संहितं' (उ,१प्र,८) चेति द्वे सामनी(३); 'पुरोजितो वो अन्धस'-इति सूक्तान्तरम् (उ,१प्र,१८), तत्रैकानुष्टुबुत्तरे द्वे गायत्रौ (४), तासु 'श्यावाश्वम्'(ऊ,१प्र,११) 'आन्धीगवं' (ऊ,१प्र,११) चेति द्वे सामनी; 'इन्द्रमच्छ सुता'-इत्यपरं सूक्तम् (ऊ,१प्र,१८), तस्मिन्नृषिहस्तिस्रः (५) तासु 'सप्तं' साम; 'पवस्व मधुमत्तम'-इति प्रगाथः (उ,१प्र,१६), तस्मिन् पूर्वा ककुप्, उत्तरा पंक्तिः (६), तत्र 'पौष्कलं' (ऊ,१प्र,९) साम; 'अभिप्रियाणि पवते च नोहित'-इत्यन्त्यं सूक्तम् (उ,१प्र,१९), तत्र तिस्रोजगत्यः (७) तासु 'कावं' (ऊ,१प्र,१३) साम। एतेषां पञ्चानां मध्ये 'पुरोजितोवः'-'पवस्व'-इत्यनयोः सूक्तयोः यद्यपि द्वे द्वे छन्दसी, तथापि समासु गानं निष्पादयितुं प्रयत्ने कृते सति एकमेव छन्दः सम्पद्यते, ततोगायत्रानुष्टुबृषिककुब्जगतीभिः पञ्चछन्दा आर्भव-पवमानोऽस्मिन् सवने आवपनीयइति; तत्र 'पुरोजितोवः'-इत्यस्मिन् सूक्ते श्यावाश्वमान्धीगवं च सम्मत्सु गातुमुत्तरे गायत्रावाग्नाते परित्यज्य द्वे उत्पत्यनुष्टुभा नेतव्ये—इति पूर्व पक्षः। चतुर्थं पादं पुनरुपादाय द्वे अनुष्टुभौ प्रयत्नीये—इति राद्धान्तः। तत्रोभयत्र पूर्व-वर्णक-द्वय-न्यायेन युक्तिर्द्रष्टव्या। लिङ्गं त्वेवमाम्ना-

(१)—"स्तार्दिष्टया" १, "रचोद्दा" २, "वरिवोधातमो" ३।

(२)—ताण्ड्य-ब्राह्मणस्याष्टम-प्रपाठके चतुर्थखण्डे विहितं साधारकं साङ्ग्वरम्।

(३)—अत्र प्रमाणम् ताण्ड्य-पञ्चदशस्यैकादशतमम्, एवं पुरोजितोत्यादौ श्यावाश्वादेश्च।

(४)—"पुरोजितो" १, "योधारया" २, "तन्दुराघ" ३।

(५)—"इन्द्रमच्छ" १, "सुभरा" २ "अस्येदिन्दो" ३।

(६)—"पवस्व" १, "यस्य ते" २, "सप्तप्रकेतो" ३।

(७)—"अभिप्रियाणि" १, "आर्क्यस्य" २, "ऋतस्य" ३।

यते—'चतुर्विंशतिर्जगत्यस्तृतीयसवनएका च ककुबिति' सेयं सङ्ख्या प्रग्रथन-पक्षे उपपद्यते। तथाहि—गायत्र-संहितयोः साम्नो राश्रये गायत्रे दृचे द्विरभ्यस्ते सति षट् गायत्राः भवन्ति, चतुर्विंशत्यक्षरा गायत्री, अष्टाचत्वारिंशदक्षरा जगती (१), ततः षड्भिः गायत्रीभिः तिस्रोजगत्यः भवन्ति, श्यावाश्वान्धीगवयो राश्रयभूताः प्रग्रथिता, द्विरभ्यस्ताः षडनुष्टुभोभवन्ति, ताभिश्च तिस्रोजगत्योभवन्ति, मिलित्वा सप्त जगत्यः सम्पन्नाः। सप्तकस्य पौष्कलस्य च सामान्तरवत्तृचे गानं न कर्त्तव्यम्, किन्त्वेकैकस्यामृचि। तत् कुतोऽवगम्यते? उष्णिहि ककुभौति सप्तम्येकवचनान्ताभ्यां विशेष-विधानात् (२)। अष्टाविंशत्यक्षरयोरुष्णिक्-ककुभोरेका जगती गायत्री-पादश्च सम्पद्यते, ककुभि मध्यमः पादो द्वादशाक्षरः, उष्णिहि च परः पादः—इति तयोर्भेदः। कावस्याश्रयभूताः स्वतःसिद्धा तिस्रोजगत्यः— इति मिलित्वा पवमानेऽस्मिन्नेकादश जगत्योभवन्ति, गायत्री-पादश्चातिरिच्यते। आर्भवपवमानवत्तृतीयसवने यज्ञायज्ञीय-स्तोत्रमेकमस्ति (३), तस्य चाश्रयः 'यज्ञायज्ञावोअग्नये'-इत्यसौ प्रगाथः (उ,१प्र,२०), तत्र पूर्वा बृहती उत्तरा विष्टारपंक्तिः, तयोः प्रग्रथनेन ककुभावुत्तरे

(१)—एतत् मानं ताण्ड्य-षोडशस्यैकादशे— "जगत्योयद्वादशाक्षराणि पदानि"—इत्यादि; एवं सर्वत्र छन्दःसु।

(२)—ताण्ड्योऽष्टम-प्रपाठके 'उष्णिक्-ककुभावेतौ भवतः'—इत्यादि पञ्चखण्डे तत् स्पष्टम्।

(३)—ताण्ड्य-सप्तमस्य सप्तमखण्डारम्भे एवास्ति निर्दिष्टम्।

कर्त्तव्ये (१)। तत्रैकविंशस्तोमः तस्य विधायिका विष्टुतिरेवमाम्नायते— 'सप्तभ्यो हिं करोति स तिसृभिः स तिसृभिः स एकया, सप्तभ्यो हिं करोति स एकया स तिसृभिः स तिसृभिः सप्तभ्यो हिं करोति स तिसृभिः स एकया स तिसृभिः'-इति (२)। अयमर्थः— प्रथमायाः बृहत्यास्त्रिषु पर्यायेषु त्रिवारमेकवारं पुनस्त्रिवारमिति सप्त बृहत्यः, मध्यमायाः ककुभः प्रथम-द्वितीययोः पर्याययोस्त्रिस्त्रिः पाठः, अन्त्ये सकृत्, उत्तमायाः ककुभः आदौ सकृत्, द्वितीय-तृतीययोस्त्रिस्त्रिः, एवं चतुर्दश ककुभः। तासु ककुप्सु द्वादशाक्षराः मध्यम-पादाश्चतुर्दश, तेषु सप्त पादाः सप्तसु बृहतीषु योजनीयाः, ततः सप्त जगत्यो भवन्ति, अवशिष्टाः अष्टाक्षराः ककुभामाद्यपादाअन्त्यपादाश्च, मिलित्वाष्टाविंशतिः, तेषु षड्भिः पादैः एका जगतीत्यनेन क्रमेण चतुर्विंशतिपादैश्चतस्रो जगत्यो भवन्ति; ये तु द्वादशाक्षराः सप्तपादाः पूर्वमवशिष्टाः तेषु पवमान-शेषोऽष्टाक्षरः पादोयोजनीयः, ककुभांशेष्वेष्वष्टाक्षरेषु चतुर्षु पादेषु चत्वार्यक्षराणि योजनीयानि, ते द्वे जगत्यौ भवतः; तदेवं यज्ञायज्ञीय-स्तोत्रे त्रयोदश जगत्यः पूर्वोक्ताः पवमान-गता एकादशेति चतुर्विंशतिर्जगत्यः, चतुरक्षर-वर्जिता यत्वारोष्टाक्षर-पादाः मिलित्वा कवुबेका भवति। अनेन लिङ्गेन श्यावाश्वमान्धीगवं च प्रग्रथित-वृचे गातव्यम्, न तु तत्रो-

(१)—एवमेव बृहत्यै तद् गीतं दृश्यते ऊह-प्रथमस्य चतुर्दशं साम।

(२)—एकविंशस्तोमस्य सैषा सम्पन्नी, उद्यतो, प्रतिष्टुतिः, सूर्य्यांचेति चतस्रोविष्टुतयः सन्ति, तत्राद्यायाः विधायकं वचनमिदम्। सर्वमेतत् ताण्ड्यस्य द्वितीय-प्रपाठकीय-चतुर्दश-खण्डादि-खण्ड-चतुष्टये स्फुटम्।

त्यत्यनुष्टुबानयनमिति स्थितम् इति"[२१] (१)॥ चतुर्थवर्णकम्—[२२]"चतुःशते प्रग्रथनमृचः पादस्य वाग्रिमः। ऋचे मुख्यत्वतो नैवमृगन्यत्वस्य वर्णनात्॥ गवामयने 'ब्रह्म' साम विहितम्—'अभिवर्त्तीब्रह्मसाम भवति'-इति(२), तत्प्रकृत्य श्रूयते(३) 'चतुःशतमैन्द्रावार्हताः प्रगाथाः'-इति (४), चतुरुत्तर-शत-सङ्ख्याकाः इन्द्र-देवताकाः बृहतीच्छन्दस्काः ऋग्द्वयात्मकाः, त्रैष्वेक-प्रगाथगते द्वे ऋचौ द्वितीय-प्रगाथ-गतामेकामृचं च प्रग्रथ्य ऋचे 'अभिवर्त्त'-नामकं साम गातव्यम्, तथा सत्याम्नातानामविकृतानामेव तिसृणामृचां लाभात् ऋचस्य मुख्यत्वं भवति, पूर्वोक्त-रीत्या पादप्रग्रथने तु विकृतत्वादमुख्यस्तृचः स्यात् इति प्राप्ते, ब्रूमः—अन्याः * अन्याः ऋचोभवन्ति तदेव सामेत्यृचामन्यत्वमत्र

* 'अन्याः'-इत्येकएव गौ० पुस्तके।

(१)—स्फुटमेतत् ताण्ड्याष्टम-पञ्चमे "परोजिती वो अश्मन इति पञ्चत्याद्युपक्रमके, 'तासु ख्यावाय्यमित्यादौ, 'अशीतदात्सोमवमित्यादौ च।

(२)—प्रायणीयेऽहनि माध्यन्दिन-सवने ब्राह्मणाच्छंसिनः शस्त्रे स्तोत्रे निवर्तकमेतत् 'तवोदस्यमृतीयपृष्ठमिति योनौ°ताण्ड्य-चतुर्थस्य ऋचोर्थे विहितम्, तच्च ऊहगानस्य षष्ठ-प्रपाठक-द्वितीयार्द्धीयं चतुर्दशतमं साम।

(३)—तत्रैव चतुर्थखण्डे तद्भाष्ये च तदेतत् स्फुटं व्याख्यातम्।

(४)—एषपाठस्तु लाट्यायन सूत्रस्य दशम प्रपाठक-ऋतोक्थ खण्डे दृश्यते, ताण्ड्यपाठस्तु "पञ्चसु मासु बार्हताः प्रगाथा आप्यन्ते"-इति, तद्भाष्ये तु चतुःशतत्वायुक्तमुद्दृत्तमिति लक्ष्यते।

वर्ण्यते (१) तच्च पाद-प्रग्रथने सम्भवति, ऋक्-प्रग्रथने तु येयमृक् पूर्वस्य ऋचस्यान्त्या सैवोत्तरस्य ऋचस्याद्येत्यन्यत्वमृचः न स्यात्; तस्मात् पादस्य प्रग्रथनम्-इति"[२१] ॥

तत्रैव नवम-दशमयोरधिकरणयोः अपर-विशेषौ चिन्तितौ। नवमाधिकरणम्— [२१]"आइ*-भावोयोनि-वशादुत्तरा-वशतोऽथवा। गीत्यर्थत्वादादिमोऽन्त्योवर्णोभिव्यञ्जकत्वतः॥ 'यद्-योन्यां तदुत्तरयोर्गायति'-इति श्रूयते, तत्र 'कयानश्चित्रआभुवत्'-इत्यसाद्वग्योनिः (२), तस्यामृचि 'कया'-इत्यृचरद्वयमाद्यो भागः, 'नश्चित्रआभुवदित्यृचरषट्कं द्वितीयोभागः, तस्मिन् भागे द्वितीयाऽक्षरे चकारस्योपरितनमिकारं विलोप्य तस्य स्थाने आई-भावमाम्नाय गीतिर्निष्पादिता; 'कस्त्वासत्योमदानां मित्यनन्तर्भा-

---

*अधिकरणमाला-पुस्तके प्रायः सर्वत्र 'आयौ'-इत्येवं यकार-मध्यपाठः।

मूले गानग्रन्थे क्वचित् तथा पाठदर्शनं तद्बीजम्; परं "आकारः पूर्वभागः ईकार-उत्तरभागः"-इत्यादि-विरोधादुपेक्ष्यः सदृति मन्यते; गानग्रन्थेषु बहुषु 'आई'-इत्येव-मोकारान्तः पाठः परिलक्ष्यते, अध्ययन-सम्प्रदायाच्च तथैव, यत्र क्वचिद् गाने यकार-मध्योऽपि लिखितः, तच्छुतलिखनानुयायि-गड्डलिका-प्रवाह-मूलकमिति सम्भाव्यते।

---

(१)—तथाहि, ताण्ड्य-चतुर्थ-तृतीये—"समानं साम भवत्यन्योन्यः प्रगाथः"-इति, उक्तेष्वृक्षु समानमेकमेवाभीवर्त्ताख्यं ऋक्-साम भवति, प्रगाथः प्रग्रथनीयस्तदाश्रय-स्तृचस्त्वन्योन्यः प्रत्यहं विलक्षणो भवति"-इति च तद्-भाष्यम्।

(२)—छन्दोग्यस्य द्वितीय-प्रपाठक-षष्ठ-खण्डे पञ्चमी। इयमेव पुनः उत्तरा-ग्रन्थस्य प्रथम-प्रपाठक-द्वादश-खण्डे प्रथमा।

विन्युत्तरा (१), तस्यां योनि-न्यायेन चतुर्थाक्षरे तकारस्योपरितनं यकारमोकारं च लोपयित्वा तयोः स्थाने आई-भावः कार्यः; 'अभीषुणः' असावपरोत्तरा (२), तस्यामपि चतुर्थाक्षरे णकारस्योपरितनं सकारं लोपयित्वा तस्य स्थाने आइ-भावः कर्त्तव्यः (३); अन्यथा गीति-नाश-प्रसङ्गात्—इति प्राप्ते, ब्रूमः—नात्र योनौ वर्णान्तरस्यागमः, किन्तर्हि? विद्यमान एव चकारस्योपरितनः इकारः साम-प्रसिद्धया प्रक्रियया ह्रस्वः सन्नेकारो भवति, तस्य सन्ध्यक्षरत्वात्, 'आकारः पूर्वीभागः, ईकारः उत्तरभागः' (४), तावुभौ विश्लेषेण गीयमानौ आई-भावं प्रतिपद्येते; तथाच सामगाआहुः 'ह्रस्वं तालव्यमाई भवति'-इति (५) तथा सत्युत्तरयोश्चतुर्थाक्षरे नास्ति तालव्य

(१)—उत्तरा-ग्रन्थस्य १प्र० ११सू० २ ऋक्।

(२)—उत्तरा-ग्रन्थस्य १प्र० ११सू० ३ऋक्।

(३) तथाच—"काऽ५ऽया। नश्चाऽइत्वा ३ आभुवात्"-
—इत्यादि प्रथमायारूपम्, एतन्मात्रमिष्टमेव। "काऽ५ऽत्वा।
सत्याऽइमाऽदानाम्"-इत्यादि द्वितीयाया रूपम्,—"आऽ५भो
षुणाऽइसाऽखोनाम्" इत्यादि तृतीयाया रूपं च निपन्नम् भवेत्,
परं तन्नैवेष्टम्, ऊह-प्रथमस्य पञ्चम-साम-विरोधात्।

(४)—अष्टमे तत् व्याकरणस्य पातञ्जल-व्याख्याने महाभाष्ये।

(५)—पुष्पसूत्रादौ। अवेदं तत्त्वम्-पूर्वोत्तरयोर्द्वयोरेव पक्षयोः प्रथमायाः स्वरूपे सत्यप्यविरोधे लोप ह्रस्वयोः प्रकरण-गत विरोधः।

इकारः इत्याईभावः न कर्त्तव्यः (१) 'अभीषुणः सखीना मविता जरितॄणाम्'-इत्येतस्यामुत्तरायां द्वादशाक्षर-गतस्य रेफस्योपरितनः इकारः पूर्ववदाई-भवति (२) तथा सोऽयमाई-भावः उक्त-रीत्या वर्णाभिव्यञ्जकत्वादुत्तरा-गत-वर्ण-वशेन कर्त्तव्यः, गीत्यर्थत्वाभावेन योनि-क्रमेतेन विनापि गीतिर्विनश्यति-इति"[२१]॥ दशमाधिकरणम्—[२४]"स्तोभानोतप्रदिश्यन्ते नागीतित्वेन वर्णवत्। स्वरादिवत् प्रदिश्यन्ते गीति-कालोपयोगतः वामदेव्यसाम्नः योनौ द्वयोर्द्वयोर्मध्ये औकार-द्वयेन हो-शब्देन हायि-शब्देन च निष्पन्नः स्तोभः एवमाम्नातः 'औऽ२हो हायि' *(१)

---

* अधिकरणलायाम् 'औहोहायि'-इति पाठः।

परं तन्न सम्यक्, औकारद्वयेनेति पूर्वोक्तेः; गान-ग्रन्थेषु च एक औकारः प्रथम-स्वरकः, अपरो द्वितीय-स्वरकः स्मृतम्।

---

(१) एवञ्च— "काऽ५पूस्त्वा। सत्योऽमाऽ२दानाम्"——

इत्यादिकम्-प्रथमे चतुर्थानन्तरं श्रुतमविरुद्धम्।

(२) "आऽ५भो। सुणाऽःसाऽ२खीनाम्। आ। विता-जरायि ट्टृ! णाम्" इत्यादिकं रूपं, गीयते चैवमेवेह-गायकैः सामगैः (१,५)।

(२) तथाहि गेय-गानस्य पञ्चम-प्रपाठकस्य पञ्चत्रिंशतितमं साम वामदेव्यम्, "कया नश्चित्रआभुवदुती सदावृधः सखा। कया शचिष्ठया वृता"-इति तस्य योनिभूता ऋक्, अस्याः पूर्वार्द्धं कयेत्यादि, परार्द्धं कयाशचिष्ठयेत्यादि, अनयोरन्तरे स्तोभोऽयं श्रूयते; सच वामदेव्य-गान-श्रवणेनोपलभ्यः, गेय-पञ्चमं च द्रष्टव्यः।

इति; सोऽयं स्तोभः नोत्तरयोः (१) अतिदिश्यते, कुतः? अगीतित्वात्; 'यदुयोन्यां तदुत्तरयोर्गायति'-इति गीति-मात्र मतिदिश्यते; तत्र प्रथमायाऋचः वर्णाः यथा नातिदिश्यन्ते तथा स्तोभाअपि-इति प्राप्ते, ब्रूमः— स्वरोवर्ण-विश्लेषोविरामः इत्येते गीत्युपयोगित्वात् यथातिदिश्यन्ते तथा स्तोभाअपि गीति-काल-परिच्छेदकत्वादतिदिश्यन्ते"२४-इति (२)॥

अष्टमाधिकरण-द्वितीय-वर्णके क्वचिदुत्पन्ना गानाभाव-शङ्का निवारिता— २५"गानस्य नियमोनोत विद्यते वङ्क्रुपस्थितौ। नाम्नानद्वयतोरूपेव प्रकृतत्वाच्छ्रुतेरपि॥ क्वचित् कर्मविशेषे श्रूयते 'अयं सहस्रमानवदित्येततया ह्यनीयमुपतिष्ठते'-इति (३) असाद्वग् संहिता-ग्रन्थे (४) समाम्नाता, प्रगीता गानग्रन्थे (५), ततो वङ्क्रु रूपस्थाने तस्यामृचि गानं न नियतं किन्तु विकल्पितम्-इति प्राप्ते, ब्रूमः— अस्त्येव नियमो गाने, कुतः? सामवेदे गानस्येव प्रकृ-तत्वात्, ऋचां संहिता-पाठोऽत्र गानायैव नह्याधारमन्तरेण गातुं शक्यते। अथोच्येत— 'अयंसहस्रेत्यक् प्रतीक-पूर्वकेण वाक्येनोप-

(१) कस्त्वेत्यभीषुणःसखीत्यनयोर्ऋचोः।

(२) तथाच —"कस्त्वामत्योमदानां संहिष्ठोमत्सदन्धसः' इत्यर्द्धर्चे मूलकस्य, "अभी षुणः सखिनामविता बभूविम"—इत्यर्द्धर्चे मूलकस्य च गानस्योपरिष्टात् "दृढा-चिदा दभे वसु"-इत्यर्द्धर्चे-मूलकस्य "श्रुतभवासूतये"-इत्यर्द्धर्चे मूलकस्य च गानस्य पुरस्तात् "ओऽहो हाइ"-इत्येवं श्रूयतएव ऋग्गान-प्रथमस्य पञ्चमे सामनि॥

(३)—तत्रऽऽपाठस्त्वेवम्—'अयं सहस्रमानवदित्यतिच्छन्दसा ह्वनीयमुपतिष्ठन्ते'-इति, 'अयं सहस्रमानवदिति अतिच्छन्दसा अतिच्छन्दसि ऋचि गीतेन गीरिति निधन वता उद्गातारः वय आह्वनीय उपतिष्ठन्ते'-इति तद्भाष्यम् (४प्र.१ख)।

(४)—छन्दोनामके पञ्चम-द्वितीय-द्वतीय-प्रथमानन्तरम्।

(५)—गेयनामके द्वादश-प्रथम सप्तविंशत्यनन्तरम्।

स्थान-विधानाद् वाऋस्य प्रकरणात् प्रबलत्वाच्चैवोपस्थानम्-इति, तत्र, प्रक्रत-प्रगीत-मन्त्र-वाचिन्या एतयेति सर्वनाम-श्रुतेः प्रबलतरत्वात्। तस्मात् प्रगीतयोरुपस्थानम्"[२५]-इति (१)॥

पञ्चदशाधिकरणादिषु त्रिषु धर्म-साङ्कर्यं चिन्तितम्। पञ्चदशाधिकरम्—[२६]"बृहद्रथन्तरैर्धर्मैः सङ्कीर्णे वा व्यवस्थिते। पृष्ठैक्यात् सङ्करो धर्मे निर्देशादेर्व्यवस्थितिः। ज्योतिष्टोमे विकल्पनं पृष्ठस्तोत्रे * विहितम् 'बृहत् पृष्ठं भवति, रथन्तरं पृष्ठं भवति' इति। तत्रोभयत्र धर्माः श्रुताः—'बृहति प्रस्तूयमाने मनसा समुद्रं ध्यायेत् (२), रथन्तरे प्रस्तूयमाने सम्मीलयेत्'-इत्यादयः (३), ते उभयत्र सङ्कीर्येरन्, पृष्ठ-सिद्धि-लक्षणस्य (४) कार्यस्यैकत्वात्— इति चेत्— न, निर्देश-भेदात्, साङ्कर्ये त्ववैलक्षण्येन बृहदिति रथन्तरमिति च द्वौ निर्देशौ नोपपद्येयाताम्; किञ्चोभय-धर्म-साहित्यं विरुद्धम्—उच्चैर्गेयं बलवद्गेयमिति बृहद्धर्मः (५) —नोच्चैर्गेयं न बलवद्गेयमिति रथ-

---

* 'विकल्पितं पृष्ठस्तोत्रम्'-इति गौ० सा० पुस्तकयोः पाठः।

(१) तदुक्तञ्चैतदाह सूत्रकारः—'अयं महोदाउ'-इति विरुद्धाना गाथेन्निधनमितरावनूपेयातामिति। अत्र 'अयं महोदाउ-इति गेयगानस्य द्वादश-प्रपाठकी-याष्टाविंशतितम साम्नः प्रतीकम्।

(२)—तथाच, ताण्ड्य-सप्तम-सप्तमे—"यद्रथन्तरं प्रवृणीति समुद्रमन्तर्ह्रायोद्गायेद्" -इत्यादि।

(३)—तत्रैव रथन्तरधर्मादि व्यवस्थानन्तरम् "रथन्तरमुद्गातुश्चक्षुः प्रमथितोः प्रस्तूयमाने सम्मीलेत्"-इत्यादि च।

(४)—औदुम्बरी-स्वप्न-रूपस्य।

(५)—"बलवदगेयं वज्रमेव प्रत्नं प्रत्युद्गाटक्षीति"-इत्यादि (ता० ९,३)।

न्तर-धर्मः (१); तस्मादुभयोर्धर्मा-व्यवतिष्ठन्ते"[२१] इति ॥ षोड-शाधिकरणम्— [२७]"तयोर्धर्माः समुच्चेया न वा क्रौञ्चरथन्तरे। हि-स्थानत्वाद् भाष्यआद्योविरोधाद् वार्त्तिकेऽन्तिमः। वैश्व-स्तोमे 'क्रौञ्चरथन्तरं पृष्ठं भवति'-इति (२) श्रूयते, तत्र क्रौञ्चरथन्तराख्य-साम्नः (३) पृष्ठ-स्तोत्र-साधनयोः प्राकृतयोः बृहद्रथन्तरयोरुभयोः स्थाने पतित्वादुभय-संबन्धि-धर्माः समुच्चेतव्याः ; ये तु विरुद्धाः धर्माः उच्चैर्गेयं नोच्चैर्गेयमित्यादयः ते विकल्पयन्ताम् ; समुद्र-ध्यान-निमीलनादीनां विरोधाभावात्, प्रकृताविव निर्देश-भेदस्याभावाच्च समुच्चयः इति भाष्यकारस्य (४) मतम् ; विकल्पितयोरेव हयोः स्थाने पतितत्वाद् विरुद्ध धर्म-स्वारस्याच्च विकल्पएव युक्तो न तु समुच्चयः इति वार्त्तिक-कारस्य (५) मतम् ; तत्रोभयत्र तत्तन्मत-विपरीतः पूर्वपक्षः उन्नेयः"[२७] ॥ सप्तदशाधिकरणम्—[२८] "हि-सामके हयोर्धर्मसाङ्कर्यं वा व्यव-स्थितिः। पृष्ठैक्यात् सङ्करोमैवं धर्माणां सामगत्वतः। 'गोसव उभे कुर्यात्'-इत्यादिना गोसवादौ बृहद्रथन्तर-साम-द्वय-साध्यं पृष्ठस्तोत्रं विहितम्। तत्र पृष्ठस्तोत्रस्यैकत्वेन धर्म-व्यवस्थायाः (६) असम्भवात् बृहत्युभयधर्माः कर्त्तव्याः, रथन्तरेऽप्युभय-

(१)—"चिप्रं गेयं स्वर्गस्य लोकस्य समष्टै"-इत्यादि (ता २,२,)।

(२)—ताण्ड्याष्टादश-प्रपाठकीय-चतुर्थ-खण्डे।

(३)—ऊहगानस्य चतुर्थ-प्रथम-द्वतीयानन्तर-श्रुतस्य।

(४)—(जैमिनि-सूत्रस्य विशेषेण व्याख्यातुः) शबर-स्वामिनः।

(५)—(जैमिनि-सूत्र-न्यूनता-पूरयितुः) भट्टकुमारिलस्य।

(६)—उच्चैस्त्व-नीचैस्त्वादेः।

धर्माः, इत्येवं साङ्कर्यमिति चेत्— नैवम्, नह्येते पृष्ठ-स्तोत्र-प्रयुक्ताः धर्माः किन्तु साम-प्रयुक्ताः, ततः साम्नोर्भेदात् धर्माः व्यवतिष्ठन्ते"-इति व्यवस्थित-धर्मोपेताभ्यां बृहद्रथन्तर-नामकाभ्यां सामभ्यां (१) निष्पन्न-स्तोत्रस्य पृष्ठमिति वैदिकं नामधेयम्; यथा त्रिवृच्छब्दस्यार्थो वेद-प्रसिद्धो गृहीतः तद्वत्"[२८]॥ स च त्रिवृच्छब्दः प्रथमाध्यायस्य तृतीयपादे पञ्चमाधिकरणस्यान्तिमे वर्णके विचारितः—[२९]"लौकिकोवाक्यगोवार्थस्त्रिवृदादेः समत्वतः। उभौ विध्यर्थवादैकवाक्यत्वादस्विहान्तिमः॥ "त्रिवृद्बर्हिष्यवमानम्" (२)-इति श्रुतौ त्रिवृच्छब्दस्य त्रैगुण्यं लोकसिद्धोऽर्थः वाक्यशेषाष्टक्-चयात्मकेषु सूक्तेष्ववस्थितानां बर्हिष्यवमानात्मक-स्तोत्र-निष्पादन-चमाषाम् 'उपास्मै गायतानरः (उ १प्र० १२,३सू०)-इत्यादीनामृचां नवकमर्थः (३); तत्र धर्म-निर्णये वेदस्य प्रबलत्वेपि पद-पदार्थ निर्णये लोक-वेदयोः समान-बलवत्त्वात् उभावर्थौ विकल्पेन गृहीतव्यौ, इतिचेत्— नैवम्, लौकिकार्थ-स्वीकार-पक्षे विधि-वाक्ये त्रैगुण्यमर्थः, अर्थवाद-वाक्ये स्तोत्रियाणामृचां नवकम्, इत्येवं विध्यर्थवादयोर्वैयधिकरण्यादेकवाक्यत्वं न स्यात्; अतः एकवाक्यत्वाय स्तोत्रियाणां नवकमेव विधिवाक्ये नियतोर्थः"[२९]॥ पृष्ठ-शब्दस्य नामधेयत्वं प्रथमाध्याये चतुर्थ-पादस्य तृतीयाधिकरणे-चित्रा शब्दवन्निर्णी-

(१)—ते च सामनी ऊह्य गानस्य क्षुद्र-पर्व-गत-पञ्चदश-षोडशात्मके, तत्र चाद्यं "रथन्तरबृहत्" अपरं 'बृहद्रथन्तरम्'।

(२)—ताण्ड्य-द्वितीय-प्रपाठकस्य चतुर्दश-खण्डे।

(३)—वाक्यशेषस्यायं "नैवैता एकविंशस्तोमा भवन्ति' इति (ता-२.१५)।

तम्—[१०]"यच्चित्रया यजेतेति तद्गुणो नाम वा भवेत्। चित्र-स्तोत्र-गुणौ रूढेरग्नीषोमीयके पशौ। इयोर्विधौ वाक्य-भेदो वैशिष्ट्ये गौरवं ततः। स्यान्नाम पृष्टाज्य-बर्हिष्यवमानेषु तंत् तथा। 'चित्रया यजेत पशुकाम इत्याम्नायते, तत्र चित्राशब्दोनो-द्भिच्छब्दवद्योगिकः (१) किन्तु रूढ्या चित्रत्वं स्तोत्रं चाभि-धत्ते, ततो न पूर्वन्यायेन नामत्वम्, तथा सति अग्नीषो-मीयं पशुमालभेतेति-विहित-पशु-यागमत्र यजेतेत्यनेन पदे-नानूद्य तस्मिन् पशौ चित्रत्व-स्तोत्व-गुणौ विधीयेते, इति प्राप्ते, ब्रूमः— चित्रत्वं स्तोत्रं चेति द्वावेतौ गुणौ, तयोर्विधाने वाक्यं भिद्येत, तथाचोक्तम्—'प्राप्ते कर्मणि नानेकौ विधातुं-शक्यते गुणः। अप्राप्ते तु विधीयेरन् * बहवोऽप्येक-यत्नतः'-इति। अथ वाक्य-भेद-परिहाराय गुण-द्वय-विशिष्टं पशु-द्रव्य-रूपं कारकं विधीयेत, तदा गौरवं स्यात्; तस्माच्चित्रा-शब्दः पूर्व-वत् यजि-सामानाधिकरण्येन याग-नामधेयं भवति, चित्रत्वं च तस्य विलक्षण-द्रव्य-द्वारेणोपपद्यते—'दधि मधु घृतमापोधाना

* 'विधीयन्ते' इति गौ० मा० पुस्तकयोः पाठः।

(१)—उद्भिच्छब्दस्य यौगिकत्वं नैव सम्भवेत्-लक्षणा-भयाद् याग नामधेयत्वम्, तथाहि—"उद्भिदा यजेत पशुकामः" इति वाक्यं न फलं प्रति विधानं तं प्रति च गुण विधान न युज्यते, वाक्यभेदापत्तेः; तत उद्भिदेत्यस्य उद्भिदवतेत्यर्थः कल्पनीयः गत्यन्तर-सत्वे न चामहनीयः, तस्मात् उद्भिन्नामकेन यागेन पशुं भावयेत् इत्येव, तस्यार्थः साधुरित्ययं विचारो जैमिनि-प्रन्यस्य न्यायमालायाः ग्रथमाध्याय-चतुर्थ-पादे लौगाक्षि-प्रभृति-मीमांसा ग्रन्थेषु स्फुटः।

स्तण्डुलास्तत्संसृष्टं प्राजापत्यम्'-इति दध्यादीनि विचित्राणि प्रदेय-द्रव्याणि षडाम्नातानि' (१) तदेत चित्रा नामकस्य यागस्योत्पत्ति-वाक्यम्, याग-स्वरूप-भूतयोः दध्यादि-द्रव्य-प्रजापति-देवतयोः अत्रोपदिश्यमानत्वात्; उत्पन्नस्य तस्य यागस्य 'चित्रया यजेत पशुकामः'-इत्येतत् फलवाक्यम्। एवं सति प्रकृतार्थोलभ्येत, अग्नीषोमीय-पशवनुवादेन गुणविधाने प्रकृत-हानाप्रकृत-प्रक्तिये प्रसज्येयाताम्, लिङ्-प्रत्ययस्य चानुवादकत्वाङ्गीकारान्मुख्योविध्यर्थोबाध्येत। तस्माच्चित्रा-पदं नामधेयम् (२)॥ यथा चित्रा-शब्दे नामधेयत्वं तथा बहिष्पवमान-शब्दे आज्य-शब्दे पृष्ठ-शब्दे च तत्-कर्म-नामधेयत्वं योजनीयम्— एवं हि श्रूयते (३) 'त्रिवृद्-बहिष्पवमानम्, पञ्चदशान्याज्यानि, सप्तदशानि पृष्ठानि; इति। अस्य वाक्य-त्रयस्यार्थोविवियते— सामगानामुत्तरा-ग्रन्थे ऽचात्मकानि सूक्तान्याम्नातानि, तत्र 'उपास्मै गायता नरः'-इत्याद्यं सूक्तम्, 'दविद्युतत्या ऋचा'-इति द्वितीयम्, 'पवमानस्यते कवे'-इति तृतीयम्, ज्योतिष्टोमस्य प्रातःसवनानुष्ठाने तेषु त्रिषु सूक्तेषु गायत्रं साम गातव्यम् (४) तदिदं सूक्त-त्रय-गान-साध्यं स्तोत्रं बहिष्पव

(१)—ताण्ड्य, षड्विंशे च ब्राह्मणे— लाट्यायने च कल्पसूत्रे।

(२)—चित्रा-शब्दस्य श्रुति-लिङ्गादनेक-द्रव्य-परकत्वेन-उद्भिदेति वाक्य-साम्यम्, यागस्य फलसम्बन्धे गुणसम्बन्धे च वाक्यं भिद्येत, तद्-भयान्नामधेयता चेति सारम्।

(३)—ताण्ड्य-विंशतितमे।

(४)—तथाहि—ताण्ड्य-षष्ठस्य नवम-दशम-खण्डयोः "उपास्मै गायतानर इति"-इत्यादिना ऋक्स्वरूपं प्रदर्श्य, सप्तम-प्रथमे "इमे वै लोका गायत्रं त्र्याहद् गेयम्"-इत्यादिना तत्र सामादिकं व्यवस्थापितम्।

मानमित्युच्यते (१) तत्रावस्थितानामृचां पवमानार्थत्वाद्बहिः-सम्बन्धाच्च, न खल्विदं स्तोत्रम् इतर स्तोत्रवत् सदोनामकस्य मण्डपस्य मध्ये औदुम्बर्याः (२) स्तम्भ-शाखायाः सन्निधौ प्रयुज्यते किन्तु सदसोबहिःप्रसर्पद्भिः प्रयुज्यते, (३) तस्य च बहिष्पवमानस्य त्रिवृन्नामकः स्तोमोभवति, तस्यच स्तोमस्य विधायकं ब्राह्मण-वाक्यमेवमाम्नायते (४) 'तिसृभ्यो हिं करोति स प्रथमया तिसृभ्यो हिं करोति स मध्यमया, तिसृभ्यो हिं करोति स उत्तमयोद्यती त्रिवृतो विष्टुतिरिति'। अयमर्थः—सूक्त-चय-पठितानां * नवानामृचां गानं त्रिभिः पर्यायैः कर्त्तव्यम् तत्र प्रथम पर्य्याये त्रिषु सूक्तेषु आद्यास्तिस्रऋचः, द्वितीये पर्य्याये मध्यमाः, तृतीये पर्य्याये चोत्तमाः; तिसृभ्यइति तृतीयार्थे पञ्चमी, हिं करोति गायतीत्यर्थः। स यं यथोक्त-प्रकारोपेता गीतिस्त्रिवृत्-स्तोमस्य 'विष्टुतिः (स्तुति-प्रकार-विशेषः), अस्याः† विष्टुतेरुद्यतो नामेति, एवं परिवर्त्तिनो—कुलायिनीति हे विष्टुती।

* 'सूक्त-चय-गतानाम्' इति पाठः गौ० पुस्तके।

† 'तस्याः' इति पाठः गौ० पुस्तके।

(१) —तदेतद् गानं न क्वचिद् गानग्रन्थेषु दृश्यते, उद्गाद्-प्रयोगाश्च-याज्ञिक-ग्रन्थेषु परिदृश्यते नियोग-मुखेन।

(२) औदुम्बरी लक्षणादिकन्तु . सामतलाण्ड्य पञ्चम-पञ्चमे, षड्विंश ब्राह्मणस्य चतुर्थ-प्रपाठकस्य तृतीय खण्डे "प्रजापतिर्देवेभ्यौदुम्बरीमसृज्यात" इत्यादिना पञ्चविंतम्।

(३) तथाहि ताण्ड्य षष्ठस्य सप्तम-खण्डे – "बहिष्पवमानं सर्पन्ति" इत्यादि, 'ये यज्ञार्थमृत्वाः बहिष्पवमानार्थं सदः-मकाग्राच्चात्वाल प्रतिसर्पन्ति'-इत्यादि तद् भाष्यम्। लाट्यायन-नवम नवमे सूत्रं चैतत्- "बहिर्बहिष्यमानैः स्तुवीरन्" इति।

(४)—ताण्ड्य-द्वितीय-प्रपाठकारम्भ-खण्ड-त्रये।

तयोः परिवर्त्तिन्येवमाम्नायते(१)— 'तिसृभ्यो हिं करोति स पराचीभिः, तिसृभ्यो हिं करोति स पराचीभिः, तिसृभ्यो हिं करोति स पराचीभिः, परिवर्त्तिनी त्रिवृतो विष्टुतिः'-इति। पराचीभिः अनुक्रमेणाम्नाताभिरित्यर्थः। कुलायिन्येवमाम्नायते (२)— 'तिसृभ्यो हिं करोति स पराचीभिः; तिसृभ्यो हिं करोति या मध्यमा सा प्रथमा, या उत्तमा सा मध्यमा, या प्रथमा सोत्तमा; तिसृभ्यो हिं करोति योत्तमा सा प्रथमा, या प्रथमा सा मध्यमा, या मध्यमा सोत्तमा, कुलायिनी त्रिवृतो विष्टुतिः'-इति। अत्र प्रथम-सूक्ते पाठ-क्रमएव, द्वितीये मध्यमोत्तम-प्रथमाः, तृतीये तूत्तम-प्रथम-मध्यमाः-इत्येवं व्यत्ययेन मन्त्राः गातव्याः। तदिदं विष्टुति-त्रयं विकल्पितं। त्रिवृच्छब्दस्येदृगं स्तोम-स्वरूपमर्थः, न तु त्रैगुण्यमिति पूर्वपादे निर्णीतम्॥ उत्तरा-ग्रन्थे बर्हिष्ववमान-सूक्तेभ्यः त्रिभ्यऊर्द्धं चत्वारि सूक्तान्याम्नातानि(३)— 'अग्न आयाहिवीतये' (उ,१प्र,४सू)-इत्याद्यं सूक्तम् — 'आनोमित्रावरुणा' (उ,१प्र५,सू)-इति द्वितीयम्— 'आयाहि सुषुमाहित' (उ,१प्र६,सू)-इति तृतीयम्— 'इन्द्राग्नी आगतं

(१) -परिवर्त्तिनी आवर्त्तिनीत्यर्थः, यथा प्रथमे पर्य्याये अनाम्नाताभिर्गानं तथोत्तरयोरपि, आवृत्ति-मात्र-पर्यवसायित्वात्; ताण्ड्य-द्वितीय-द्वितीये स्पष्टम्।

(२)—'कुलायोनीडं, पक्षिणां निवास-स्थानं, तद्यथा व्यस्त-तृणादि-निर्मितम्, एवं व्यत्यास-युक्ताऋचः कुलायाः, तैस्तृतो कुलायिनी। अस्याः विष्टुतेः परिवर्त्तिनी प्रथमः पर्यायः; द्वितीये पर्याये पराचीभिः प्रयुक्तस्य तृचस्य या मध्यमा सा प्राक् प्रयुज्य प्रथमा कार्या; या प्रथमा सोत्तमा कार्या; तृतीयस्तु पर्यायो निगद-सिद्धएव यथावत् कार्यः। स्पष्टं चैतत् समस्त' ताण्ड्य-द्वितीयस्य तृतीयखण्डे स-भाष्ये।

(३) -एषां विवरणं पूर्वोक्तमेवात्र स्मर्त्तव्यम्।

सुतम्' (उ,१प्र,३सू)-इति चतुर्थम्— तान्येतानि प्रातःसवने गायत्र सान्ना गीयमानानि चत्वार्यार्ष्य-स्तोत्राणीत्युच्यन्ते। तन्निर्वचनं श्रूयते— 'यदाजिमीयुस्तदाज्यानामाज्यत्वम्'-इति (१)। तेष्वाज्य-स्तोत्रेषु पञ्चदश-नामकः स्तोमोभवति, तस्य स्तोमस्य विष्टुतिरेवमाम्नायते— 'पञ्चभ्यो हिं करोति स तिसृभिः स एकया स एकया, पञ्चभ्यो हिं करोति स एकया स तिसृभिः स एकया, पञ्चभ्यो हिं करोति स एकया स एकया स तिसृभिः'-इति (२) एकं सूक्तं विरावर्त्तनीयं, तत्र-प्रथमावृत्तौ प्रथमाया ऋचस्त्रिरभ्यासः— द्वितीयावृत्तौ मध्यमाया— तृतीयावृत्तावुत्तमायाः— सोऽयं पञ्चदश-स्तोमः (३)। उक्तेभ्यश्चतुर्भ्यः सूक्तेभ्यः ऊर्ङ्मुत्तराग्रन्थे त्रीणि माध्यन्दिन-पवमान-सूक्तान्याम्नाय तत ऊर्ङ् चत्वारि सूक्तान्याम्नातानि, तेषु-'अग्निमीळे पुरोहितम् (उ,१प्र,१सू)' इत्याद्यम्-'कया नश्चित्र आ भुवत् (उ,१प्र,१२सू),'-इति द्वितीयम्—'तं वो दस्ममृतीषहम् (उ,१प्र,१३)'-इति तृतीयम्— 'तरोभिर्वो विदद्वसुम् (उ१,प्र,१४)'-इति चतुर्थम्— एतानि क्रमेण 'रथन्तर'-(ऊ०१प्र-१सा) 'वामदेव्य'-(ऊ०१प्र ५सा) 'नौधस'-(ऊ०१प्र६सा) 'कालेय'(ऊ०१प्र७सा) सामभिर्माध्यन्दिन-सवने गीयमानानि पृष्ठ-स्तोत्राणीत्युच्यन्ते। स्वर्गनात् स्थानोत्येवं निरुक्तिर्द्रष्टव्या। तेषु स्तोत्रेषु सप्तदशस्तोमोभवति, तस्य

(१)—"यदाजिमीयुस्तदाज्यानामाज्यत्वम्" इति ताण्ड्यपाठः (ता ७.२)।

(२)—ताण्ड्य-ब्राह्मणस्य चतुर्थादि खण्ड त्रयेषु तिस्रोविष्टुतयः श्रूयन्ते, तासु त्रयमाया, त्रय एकैकस्मिन् पर्याये पञ्चधा भवन्तीति पञ्चपञ्चिनीत्याख्यायते।

(३)—पञ्चदश स्तोमस्य विष्टुति त्रयात्मकत्वात् त्रि प्रकारः, तेषामायाय प्रकारः॥

स्तोमस्य विष्टुतिरेवमाम्नायते— 'पञ्चभ्यो हिं करोति स तिसृभिः स एकया सएकया, पञ्चभ्यो हिं करोति स एकया स तिसृभिः सं तिसृभिः'-इति, अत्र प्रथमावृत्तौ प्रथमायाः ऋचः तिरभ्यासः —द्वितीयावृत्तौ मध्यमायाः— तृतीयावृत्तौ मध्यमोत्तमयोः— सोऽयं सप्तदश स्तोमः(१) ॥ अत्र त्रिष्वपि वाक्येषु त्रिवृत्-पञ्चदश-सप्तदश-शब्दाः गुण-विधायकत्वेन सम्मताः, यदि बर्हिष्यवमानाज्य-पृष्ठ-शब्दाश्रपि गुण-विधायकाः स्युः, तदा प्रत्युदाहरणम्, गुण-द्वय-विधानाद् वाक्य-भेदः स्यात्। तस्माद् बर्हिष्यवमानादि-शब्दाः स्तोत्र-नामधेयानि, तैर्नामभिः कर्माण्यनूद्य त्रिवृदादि-गुणाः विधीयन्ते"[२०]-इति ॥

उक्तस्य पृष्ठादि-स्तोत्रस्य प्रधान-कर्मत्वं द्वितीयाध्यायस्य प्रथम-पादे पञ्चमाधिकरणे निर्णीतम्—[२१]"प्रउगं शंसतीत्यादौ गुणतोत प्रधानता। दृष्टादेव स्मृतिस्तेन गुणता स्तोत्र-शस्त्रयोः। स्मृत्यर्थत्वे स्तौति-शंस्योर्डात्वोः श्रौतार्थ-बाधनम्। तेनादृष्टमुपेत्यापि प्राधान्यं श्रुतये मतम्। ज्योतिष्टोमे श्रूयते—'प्रउगं शंसति', 'निष्केवल्यं शंसति', 'आज्यैः स्तुवते', 'पृष्ठैः स्तुवते'-इति। (प्रउग-निष्केवल्य-शब्दौ शस्त्र-विशेष-नामनी, आज्य-पृष्ठ-शब्दौ तु व्याख्यातौ) अप्रगीत-मन्त्र-साध्या स्तुतिः शस्त्रं, प्रगीत-मन्त्र-साध्या स्तुतिः स्तोत्रम्। तयोः स्तुत-शस्त्रयोर्गुणकर्मत्वं युक्तं; कुतः ? तुष-विमोकवद्दृष्टार्थ-लाभात् (२) पठ्यमानेषु मन्त्रेषु अनुस्मरणेन देवता संस्क्रियते-इति प्राप्ते, ब्रूमः— तेषु अनुस्मरणेन

(१)—अत्र यद् वक्तव्यं तत् पूर्वमेवाभिहितम् ॥

(२)—"लभ्यमाने फले दृष्टे नादृष्ट-फल कल्पना"-इति सिद्धान्तात् ॥

स्तोतव्यायाः देवतायाः स्तावकैर्गुणैः संबन्ध-कीर्त्तनं स्तौति-शंसति-धात्वोर्वाच्योऽर्थः, यदि मन्त्र-वाक्यानि गुण-सम्बन्धाभिधान-पराणि, तदा धात्वोः मुख्यार्थ-लाभात् श्रुतिरनुगृहीता भविष्यति ; यदा तु गुण-द्वारेणानुस्मरणीय-देवता-स्वरूप-प्रकाशन-पराणि मन्त्र-वाक्यानि स्युः, तदा धात्वोः मुख्यार्थो न स्यात्, लोके हि 'देवदत्त-श्चतुर्वेदामित्रः'-इत्युक्ते स्तुतिः प्रतीयते, तस्य वाक्यस्य गुण-द्वारेण देवदत्त-स्वरूपोपलक्षण-परत्वेन गुण-सम्बन्ध-परत्वात् ; यदा तु देव-दत्त-स्वरूप-परता 'यश्चतुर्वेदो तमानय'-इत्यादौ, तत्र न स्तुति-प्रतीतिः, तस्य चतुर्वेद-सम्बन्ध-द्वारेण देवदत्त-स्वरूप-परत्वेन गुण-सम्बन्ध-परत्वाभावात् ; ततश्चाज्यैर्देवं प्रकाशयेत्, पृष्ठैर्देवं प्रकाश-येत्-इत्येवं विध्यर्थ-पर्य्यवसानाद् धात्वोर्मुख्यार्थोबाध्येत; ततोधातु-श्रुतिमबाधितुं स्तोत्र-शस्त्रयोः प्रधान-कर्मत्वमभ्युपेतव्यम्। तत्र दृष्टं प्रयोजनं नास्तीतिचेत्—ततोऽपूर्वमस्तु[२१]-इति (१)॥

तत्रैव द्वितीय-पादे द्वादशाधिकरणे साम-विशेष-प्रयुक्तं कर्मा-न्तरत्वमभिहितम्— [२२]"उक्ताग्निष्टुतमेतस्यवारवन्तीय-साम हि। रेवतीष्वृक्षु क्लृप्तेति श्रुतं पशु-फलाप्तये। रेवत्यादिर्गुणः कर्म पृथग्वा पूर्ववद् गुणः। रेवती-वारवन्तीय-सम्बन्धाख्यः पशु-प्रदः। सौम्यीऽत्र फल-कर्मभ्यां सम्बन्धे वाक्य-भिन्नता। तेनोक्त-गुण-संयुक्तमन्यत् कर्मोच्यते फले॥ 'त्रिवृदग्निष्टोमस्तस्य वायव्याश्च (ऋक्षु एकविंशाग्निष्टोम-साम क्लृप्त्वा) ब्रह्मवर्चस-कामो

(१)—विश्वजिदादिवदित्याशयः।

यजेत'(१)-इत्यस्य सन्निधौ श्रूयते(२)—'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोम साम क्रत्वा पशु-कामोऽग्नेतेन यजेत'-इति। अस्यायमर्थः— अग्निष्टोमस्य विकृति-रूपः कश्चिदेकाहोऽग्निष्टुन्नामकः, स च पृष्ट-स्तोत्रे त्रिवृत्-स्तोम-युक्ततया त्रिवृदित्युच्यते, अग्निष्टोमोक्थादीनां समानां सोम-संस्थानां(३) मध्येऽग्निष्टोम-संस्था-रूपत्वादग्निष्टोमइत्यप्युच्यते। प्रकृतौ तृतीयसवने आर्भव-पवमानस्योपरि 'यज्ञायज्ञीयं' साम गीयते, तेन च साम्ना अग्निष्टोमयागस्य समाप्यमानत्वादग्निष्टोम सामेत्युच्यते, तच्च प्रकृतौ 'यज्ञायज्ञावोअग्नये'-इत्याद्याग्नेयीष्वृक्षु (उ,१प्र,२०सू,१-२-३ऋ)गीयते; अस्मिंस्त्वग्निष्टुति ब्रह्मवर्चस-कामेन वायव्याम्वृक्षु तत् साम गातव्यम्, तच्च प्रकृताविवैकविंश-स्तोम-युक्तम्; पशुकामस्य तु 'रेवतीर्नः सधमादे'-इत्यादिषु रेवतीष्वृक्षु (उ,प्र४,सू ११,२-३ऋ) 'वारवन्तीयं' साम गायेदिति, तत्र रेवतीनामृचां 'वारवन्तीय-नामकेन साम्ना यः सम्बन्धः सोऽयं पशु-फलायाग्निष्टुति विधीयते, एतस्यैवेति प्रकृत-परामर्शकेनैतच्छब्देनान्य-व्यावर्त्तकेनैवकारेणचाग्निष्टुतः समर्प्यमाणत्वात्; यथा पूर्वाधिकरणे इन्द्रिय-फलाय प्रकृतेऽग्निहोत्रे दधि-गुणोविहितः(४) तद्वत्, इति

(१) ताण्ड्यस्य सप्तदश-सप्तमे श्रुतमेतत्. परम् क्रत्वाद-क्रतवेत्यत्र पाठोऽवाधिको लभ्यते, ततस्तस्या एव श्रुतेरभिप्रेतोर्थोऽयं न तु भाचाच्छ्रुतिरिति गम्यते॥

(२) -ताण्ड्य-सप्तदशाष्टमे।

(३)—तथाहि-"अथ सोममस्या. ऽग्निष्टोमो(१)त्यग्निष्टोमो(२) उक्थः(३) षोडश्य(४) तिरात्रो(५) वाजपेया(६) प्तोर्यामः (७)" इति लाट्यायन सूत्रम् (५प्र०४ख०)। अत्र उक्थस्यादित्वाभावेऽपि ताण्ड्ये तस्य पूर्व विहितत्वात् उक्थादीनामिति कथनं नासङ्गतम्।

(४) "दध्नेन्द्रियकामस्य जुहुयात्"-इति वाक्यार्थेन. एवदेव विषयीकृत्य एकादशाधिकरणं रचितमस्ति।

प्राप्ते, ब्रूमः— विषमोदृष्टान्तः, दध्नोहोम-जनकत्वं न शास्त्रेण बोधनीयं तस्य लोकतोऽवगन्तुं शक्यत्वात्। फल सम्बन्धः एक एव शास्त्र-बोध्यः इति न तत्र वाक्यभेदः, इह तु रेवत्यृगाधारक वारवन्तीय-साम्नोऽग्निष्टुत्-कर्म-साधनत्वं फल-साधनत्वं चेत्युभयस्य शास्त्रैक-बोध्यत्वाद् दुर्वारोवाक्य-भेदः; तेन पशु फलकं यथोक्त-गुण-विशिष्ट-कर्मान्तरमत्र विधीयते। एतच्छब्दः एव-कारश्च विधीयमान-कर्मान्तर-विषयतया योजनीयौ"[३२]-इति (१)।

उत्तरस्मिंस्त्वधिकरणे निधन-विशेषाः काम्याः विचारिताः —[३३]"वृष्टान्न-स्वर्ग-कामानां सौभरं स्तोत्रमीरितं। निधनान्यपि ह्येषुर्ग्-इति वृष्ट्यादि-कामिनां। फलान्तरं किं वृष्ट्यादि ह्येषा-दीनामुतोदिते। सौभरे फल-संभिन्ने निधनं विनियम्यते। फलान्तरं चतुर्थ्योक्तं वृष्टि-कामाय ह्येषिति। सौभरस्य फलं वृष्टिर्ह्येषित्युक्त्या विवक्षते। नोक्तं वृष्टान्न-कामानामन्यत्वं प्रत्यभिज्ञया। नियमेऽपि चतुर्थ्येषा तादर्थ्यादुपपद्यते॥ 'यो वृष्टिकामो योऽन्नाद्यकामो यःस्वर्गकामः स सौभरेण स्तुवीत, सर्वे वै कामाः सौभरम् *-इति (२) समाम्नायः ◊ पुनः

* 'सौभरे'-इति पाठोबहु-पुस्तके।

परं सः सर्वोऽप्यर्थ एव, ताण्ड्ये तथा दर्शनात्।

◊ 'समाम्नाय'-इति ल्यवन्तपदं दृश्यते, प्रायः सर्वत्र इदृक्।

परं तत्र समीचीनः ताण्ड्य ब्राह्मण पाठ विरोधात्। तथाहि तत्र सर्वेवैसौभरमित्यनन्तरं सर्वे इत्यादौ ह्येषित्यादिकं पठितम्, न तु सर्वेवैसौभरमित्यनन्तरं सर्वे इत्यादिकं पठित्वा ह्येषित्यादिकमस्ति। ताण्ड्यभाष्ये च न्यायविस्तर-प्रन्थोऽयमकृतः तत्रचैवमेव प्रथमान्तः पाठः।

(१)—एतस्मैवेत्यादि पूर्वदर्शित-वाक्य।

(२)—ताण्ड्याष्टमाष्टमे।

समाम्नातं 'होषिति वृष्टिकामाय निधनं कुर्यात्, उर्गित्यन्नाद्यकामाय, ज-इति स्वर्गकामाय'-इति । 'सौभरं' नाम साम-विशेषं (१), निधनं नाम पञ्चभिः सप्तभि वा (२) भागैरुपेतस्य साम्नोऽन्तिमो भागः (३), तस्मिन्निधने होषादयो विशेषाः सौभर-साम-साध्यास्तोस्र-फलेभ्योवृष्ट्यादिभ्योऽन्यानि वृष्ट्यादि-फलानि जनयितुं विधीयन्ते ; कुतः ? होषादि-विधि-वाक्ये वृष्टि-कामायेत्यादिना चतुर्थी-श्रवणात् ; सा च तादर्थ्ये (४) चयाणां होषादीनां वृष्ट्यादि-काम-पुरुष-शेषत्वं गमयति, तच्छेषत्वं च पुरुषाभिलषित-फल-साधनत्वे सत्युपपद्यते (५) ; ततः सौभरस्य होषिति निधन-विशेषस्य च फलभूते हे वृष्टी भवतः, तदुभय-

(१)—तच्च ऊह-गानस्य प्रथमप्रपाठकीय-षोडशस्तोभम् ।

(२)—साम्न आद्योभागः प्रस्तोता गेयः प्रस्तावः, द्वितीयो भागः उद्गाता गेयः उद्गीथः तृतीयो भागः प्रतिहर्त्ता गेयः प्रतिहारः, चतुर्थो भागः पुनरुद्गाता गेयः उपद्रवः, पञ्चमः सर्वैर्गुणपद् गेयः निधनाख्यः-इति सर्व-वादि-सम्मतम् । केषाञ्चिन्मते—गानारम्भ काले सर्वैर्ऋत्विग्भिः "ओम्"-इत्येवमुच्चार्योद्गारः, तमारभ्य निधनगानान्तं यजमान-स्तुत्यम् "ओम्"इत्येवं प्रणवस्य-इत्येतद् द्वावपि सामाङ्गत्वेन गण्यः ततः पञ्चभक्तिकं सप्त-भक्तिकं वा सामेत्युच्यते, मन्त्र-ब्राह्मणस्य चतुर्थप्रपाठके साम्नः पञ्चभक्तिकत्वं सप्त-भक्तिकत्वञ्च श्रूयते, यज्ञतत्वदीपायामुद्गातृप्रयोगे चास्योदाहरणं वक्ष्यते ।

(३)—तदुक्तम् "प्रस्तावस्तत उद्गीथः प्रतिहारोपद्रवौ तथा । निधनं पञ्चमेत्याऽऽहुर्हिङ्कारः प्रणवश्च च"-इति विवरण-स्थता माधवेन ।

(४)—"तादर्थ्ये चतुर्थी वाच्या"-इति कात्यायन-स्मरणात् ।

(५)—बादरि-नामाचार्यमते क्रियायाः शेषत्वं नास्ति, द्रव्य-गुण-संस्कारेष्वेव शेषत्व-मिति नियमात् । जैमिनि-नये तु पारार्थ्यमेव शेषत्वमिति यस्यासौवास्ति तदिति नियमाभावात् क्रियेत्यादेरपि शेषत्वे न बाधः ; तथा च, तृतीयाध्यायस्य प्रथमपादे शेषाधिकारे चतुर्थ-पञ्चम-षष्ठ-सूत्राणि—"कर्माण्यपि जैमिनिः फलार्थत्वात् । फलञ्च पुरुषार्थत्वात् । पुरुषस्य कर्मार्थत्वात्"-इति ।

मेलनान्महती वृष्टिः। इति प्राप्ते, ब्रूमः— सौभर-विधौ यो वृष्ट्यादि-कामः सएव होषादि-विधौ प्रत्यभिज्ञायते, ततः सौभरस्य फलभूता ये वृष्ट्यादयः तएव होषादि-शास्त्रे श्रूयन्ते इति न फलान्तरम्। अथोचेत नूतन-फलान्तराभावात् होषादीनां च नानाशाखाध्ययनादेव सौभरे प्राप्तत्वादनर्थकोऽयं विधिः इति — तन्न, फल-त्रय-कामानां त्रयाणामनियमेनैव होषादिषु मध्ये यस्य कस्यचित्रिधनस्य प्राप्तौ विधेर्नियमार्थत्वात्, तादर्थ्यन्तु फलान्तराभावेऽपि सौभर-वाक्योक्त-वृष्ट्यादि-फल-साधने सौभरे होषादीनां नियम्यमानत्वादुपपद्यते; तस्मादयं निधन-विशेष-नियमः न विधिः"[३२] इति॥

तृतीयाध्यायस्य तृतीय-पादे प्रथम-द्वितीयाधिकरणयोः सामगाने उच्चत्व-नीचत्व-धर्मौ विचारितौ। तत्र प्रथमाधिकरणम् —[३४]"कर्त्तव्यमुच्चैः सामर्ग्भ्यामुपांशु यजुषेत्यपी। मन्त्राणां वाथ वेदानां धर्मामन्त्र-गतायतः। विध्युद्देश मन्त्र-वाचि-शब्दाः प्रोक्ताः ऋगादयः। ऋग्वेदोक्तेः समुत्पन्नइत्युपक्रम-वेद-गोः। असंजात-विरोधोतस्तद्वशादुपसंहृतेः। नयने सति वाक्येन धर्माणां वेद-गामिता॥ ज्योतिष्टोमे श्रूयते— "उच्चैर्ऋचा क्रियते, उपांशु यजुषा, उच्चैः साम्ना इति। तत्र त्रिधा वाक्ये मन्त्र वाचिनामृगादि-शब्दानां प्रयोगान्मन्त्र धर्माः उच्चस्त्वादयः, तथासति, यजुर्वेदोत्पन्नाः, अध्वर्युणा प्रयुज्यमानाः अप्युचैः उच्चैरेव पठितव्याः; इति चेत्— नैवम्, असंजात विरोधित्वेन प्रबलमुपक्रममनुसृत्य तद्वशेनोपसंहारस्य नेतव्यत्वात्। उपक्रमे हि वेद-शब्दः श्रुतः— 'त्रयोवेदाअसृज्यन्त,' अग्नेर्ऋग्वेदः,

वायोर्यजुर्वेदः, आदित्यात् सामवेदः'-इति (१) अतः उपक्रम-गत-वेदानुसारेण विध्युद्देश-गतानामप्यृगादि-शब्दानां वेद-परत्वे सत्यचोऽपि यजुर्वेदोत्पन्नाः उपांशु पठनीयाः। ननूपक्रमोऽर्थवादत्वाद् दुर्बलः, उपसंहारो विध्युद्देशत्वात् प्रबलः, इति चेत्—वाढम्! लब्धात्मनोहि विध्युद्देशस्य प्राबल्यम्, इह तु (२) प्रथमतोबुद्ध्युत्पादकः उपक्रमः, तदानीमलब्धात्मकत्वान्न तस्य बाधकत्वं, पश्चात्तु वाक्यैकत्वाय तदविरोधेनैवात्मानं लभते; तदेव मुपक्रमोपसंहारैकवाक्यता-बलेन निर्णयाद् वाक्य-विनियोगोऽयम्"[३४]-इति॥ द्वितीयाधिकरणम्—[३५]"यजुर्वेदमाधानं तदंगं साम तत्र किम्। उच्चैरूपांशु वा गानमुच्चैः शीघ्र-प्रवृत्तितः। उत्पत्तेर्विनियोगोऽत्र प्रबलोनुसृतिर्यतः। मुख्यस्याङ्गेन कर्त्तव्या तस्माद् गानमुपांशुता। आधानस्याच मुख्यत्वं गानस्य गुणताथवा। विनियोगस्य मुख्यत्वमुत्पत्तेर्गुणतास्त्विह॥ आधाने वामदेव्यादि सामान्यङ्गत्वेन विहितानि, तत्र यद्यप्येतानि यजुर्वेदगतस्याधानस्याङ्गानि तथापि सामवेदे तेषामुत्पन्नत्वादुत्पत्तेश्च शीघ्रं बुद्धि-हेतुत्वात् सामवेद-धर्मेण गेयानीतिचेत्—न, विनियोगस्य प्रबलत्वात्। स च यजुर्वेदे श्रुतः—'यएवं विद्वान् वामदेव्यं गायति,-इति। गुणेन हि मुख्यस्यानुसरणं न्याय्यम्। कोगुणः? किं मुख्यम्? इति चेत् अधाङ्गित्वादाधानं मुख्यम् साम-गानमंगत्वेन गुणः; तथा सति घर्मः शिरः-इत्यादयः

(१)—षड्विंश ब्राह्मणस्य चतुर्थ-प्रथमेऽपीद मूयते, परं तत् तत्रैवमक्षरशः; तथा छान्दोग्यस्य चतुर्थ प्रपाठकीय-सप्तदश-खण्डे, तत्रापि पाठे भेदः।

(२)—पूर्वोक्तमसङ्गात-विरोधित्वं नेति चच 'स्फुटी भविष्यति।

आधानाङ्गभूताः मन्त्राः यथोपांशु पठ्यन्ते, तथा सामान्यप्याधानानुसारेणोपांशु गेयानि; अथवा विनियोगोऽनुष्ठापक-विधित्वाम्मुख्यः, उत्पत्तिविधिरतथाविधत्वाद् गुणः। तस्मादत्र विनियोग-वेदानुसारेणोपांशु गेयानि"[२५]-इति॥

पञ्चमाध्यायस्य तृतीयपादे चतुर्थ-पञ्चमाधिकरणयोः स्तोमविचारः। तत्र चतुर्थाधिकरणम्—[२६]"स्तोमश्चतुर्भिः किमागन्तो र्मध्येऽन्ति वास्तु मध्यतः। द्वादशाहवदन्यत्र मध्यानुक्रमेण मध्यमः। इदमाम्नायते—'एकविंशेनातिरात्रेण प्रजा-कामं याजयेत्, त्रिणवेनौजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाकामम्'-(१) इति। तत्र प्रकृतौ बर्हिष्यवमान-स्तोत्रे त्रयस्तृचा भवन्ति—"उपास्मै गायतेत्यादिः (उ०१प्र०१सू०१।२।२ऋ) एकः—"दविद्युतत्यारुचेत्यादिः (उ०१प्र०२सू०१।२।३ऋ) द्वितीयः—"पवमानस्य ते कवइत्यादिः (उ०१प्र०३सू०१।२।३ऋ) तृतीयः; तेषु त्रिषु तृचेषूर्द्धं गानेन त्रिवृत्स्तोमो भवति (२) नत्वत्र पञ्चदश-सप्तदश-स्तोमादीनामिवाद्दत्तगानमस्ति, स च बर्हिष्यवमानावित्रुतावतिरात्रे त्रोदकेन प्राप्तः (३), तत्र त्रिवृत्-स्तोमं बाधितुमेकविंशादि-स्तोमाः विहिताः, बर्हिष्यवमाने आद्दत्तगानाभावात त्रिषु तृचेष्ववस्थिताभिर्नवभिर्ऋग्भिरेकविंश-स्तोम-पुरणाभावात् तत्र-पूरणाय चत्वारस्तृचाआगमयितव्याः, त्रिणव-स्तोम-पूरणाय षट् तृचाः,

(१)—एकविंशस्य स्वरूपभेदादिकञ्च ताण्ड्ये द्वितीय प्रपाठके चतुर्दशादिषु चतुर्षु खण्डेषु, त्रिणवस्य तु तृतीय प्रपाठकस्याद्य-खण्ड द्वये, त्रयस्त्रिंशस्य च तत्परस्तात् खण्ड-चतुष्टये श्रुतम्।

(२)—ताण्ड्य-द्वितीय प्रपाठकाद्य-खण्ड तृतीये तत्-स्वरूपादिकं श्रुतम।

(३)—'प्रकृतिवद् विकृतिः कर्त्तव्या'-इति वचनेनेति यावत्। अतिरात्रे विकृति यागः।

त्रयस्त्रिंश-स्तोम-पूरणायाष्टौ ऋचाः; ऋचागमनं (१) चोपरिष्टाद् वक्ष्यते (२)। तेषां चागन्तूनां मन्त्राणां प्राकृत-बर्हिष्यवमान-मध्ये निवेशः कार्यः द्वादशाहे तदर्शनात्। इति प्राप्ते, ब्रूमः—द्वादशाहे हि वचनमेवमाम्नायते 'स्तोत्रियानुरूपौ ऋचौ भवतः, वृषण्वन्तस्तृचाभवन्ति, तत्र उत्तमपर्यासः'-इति (३) अयमर्थः—प्राकृतानां बर्हिष्यवमान-गतानां त्रयाणां ऋचानां स्तोत्रियोऽनुरूपः पर्यासश्चेति त्रीणि नामानि, तत्र चोदकागतयोरनुरूप-पर्यासयोस्तृचयोर्मध्ये वृषण्व-च्छब्दयुक्तास्तृचाः कर्त्तव्या इति, नचैवमतिरात्रे मध्ये निवेशनाय वचनमस्ति। तस्मात् क्रम-क्रममबाधितुमागन्तूनामन्ते निवेशः"[३९]॥ पञ्चमाधिकरणम्—[४०]"आर्भवे साम्नआगन्तोरन्ते मध्येऽथवाग्निमः। पूर्ववत् त्रीणि यज्ञस्येत्युक्त्वा मध्ये निवेशनम्। पूर्वोदाहृतेऽतिरात्रे माध्यन्दिनार्भव-पवमानयोश्चोदक-प्राप्तौ पञ्चदश-सप्तदश-स्तोमौ (४) बाधितुमेकविंशादि-विहव-स्तोमो वचनादनुष्ठीयते, तत्र बर्हिष्यवमानवट्टागागमनं न भवति किन्तु सामागमेन स्तोम-पूरणमिति दशमे (५) वक्ष्यते, तस्य चागन्तोः साम्नः पूर्वोक्तानामृचामिवान्ते निवेशनात् पठितानां ऋचानां मध्ये तत्साम-चरमे ऋचे

(१)—काक्ष्यः आगमयितव्याः-इति।

(२)—अग्निमाधिकरणे, 'ब्रूमः-त्रीणि हि वै'-इत्यादिना।

(३)—ताण्ड्यकादश-षष्ठे द्रष्टव्यम्।

(४)—तथाहि—"एष सन्ततो यज्ञो द्वौ द्वौ हि स्तोमौ सवने वहतः चिष्टत्-पञ्चदशौ प्रातः सवनम्, पञ्चदश-सप्तदशौ माध्यन्दिनं सवनम्, सप्तदशैकविंशौ तृतीयं सवनम्"-इति ताण्ड्य-षोडशस्याद्यखण्डः।

(५)—अधिकरमालायाः।

गातव्यम्। इति प्राप्ते, ब्रूमः—'त्रीणि ह वै यज्ञस्योदराणि गायत्री, बृहती, अनुष्टुप् चात्रस्थेवावपन्त्यतएवोद्यन्ति-इति हि विशेषआम्नायते (१)। अयमर्थः स्तोमस्य विष्टुतये मात्र आकारः (२) क्रियते, ह्रासाय चोद्यापः(३), तावुभावावापो द्यापौ गायत्रादिष्वेव नान्यत्रेति। 'उच्चा ते जातमन्धसः'-इत्येष माध्यन्दिन-पवमानस्याद्यस्तृचः (उ.१प्र.८सू १।२।३ ऋ), 'स्वादिष्ठया'-इत्येषः (उ.१प्र१४सू१।२।३ऋ) आर्भव-पवमानस्य, तावुभौ गायत्रीच्छन्दस्कौ तयोरावापः, न तु विष्टुप् जगती छन्दस्कयोरन्यगोस्तृचयोः सामावपनीयम्[२७]"-इति॥ ॥ तत्रैव पञ्चदशाधिकरणे स्तोम विचारः [२८]"एकस्तोमेऽन्यशब्दः स्याद् बहुस्तोमेऽपि वाग्रिमः। त्रिवृदन्येत्यर्थवादान्नान्यमात्रस्य सम्भवात्॥ अत्र पूर्वोदाहृतोऽन्येनेत्ययमन्य-शब्दः (४) एक-स्तोमके क्रतौ वर्त्तते, कुतः। अर्थवादेन तदवगमात्। 'यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति, यः पञ्चदशः स तं, यः सप्तदशः स तं, यएकविंशः स तम्'-इत्यर्थवादः (५)। अस्यायमर्थः त्रिवृदादयश्चत्वारः स्तोमाः (६) अग्निष्टोमे वर्त्तन्ते, तेषु

(१)—ता०१८प्र०१ख०।

(२)—आवापः आच्चेपः।

(३)—उद्वापः उत्क्षेपः।

(४)—अत्र पूर्वोदाहृत इत्यनेन मीमांसाध्यायस्य पञ्चमाध्याय तृतीयपाद-चतुर्दशाधिकरणं बोध्यः। अन्य-शब्द-घटितं तद्विवाक्यम ताण्ड्य-षोडश-प्रथमे. तथाहि "एष वाव प्रथमो यज्ञानां य एतेनानिष्ट्वाथान्येन यजते गर्त्तपत्यमेव तज्जीयते" इति।

(५)—ता०१८प्र०१ख०।

(६)—त्रिवृत्१—पञ्चदशः२—सप्तदशः३—एकविंशः४।

त्रिवृत् स्तोमोविकृतिरूपं यं यज्ञमाप्नोति स त्रिवृत्-स्तोमः तं यज्ञं दीपयति प्रकाशयति सर्वतोव्याप्नोतीति। स्तोमान्तरस्या प्रवेशाय त्रिवृतएव सर्वस्मिन् यज्ञ-स्वरूपे व्याप्तावयमेक-स्तोमकः क्रतुर्भवति। एवं पञ्चदशादि-स्तोमव्याप्तिर्योजनीया। तथा सत्यर्थवादादेक-स्तोमकानामेव बुद्धिस्थत्वात् तएवान्यशब्देनो च्यन्ते। एकस्तोमकाश्च षट् राचादिष्वाम्नाताः त्रिवृदग्नि-ष्टोमोभवति पञ्चदशउक्थो भवतीत्यादयः। तस्मात् तद्विषयो ऽन्य-शब्दः। इति प्राप्ते, ब्रूमः—स तं दीपयतीत्यत्र प्रकाश-कत्वमात्रमुच्यते, तच्च व्याप्तिमन्तरेण सम्बन्धमात्रादप्युपपद्यते, तस्मात् अग्निष्टोम-प्रतियोगितया बहु-स्तोमैक-स्तोम-साधारण-त्वेन श्रूयमाणस्यान्य-शब्दस्य सङ्कोच-हेत्वभावात् सर्व-विषयोऽय-मन्य शब्दः"[३८]-इति॥

सप्तमाध्यायस्य तृतीयपादे तृतीयाधिकरणे सर्वपृष्ठातिदेश-श्चिन्तितः—[३९]" विश्वजित् सर्वपृष्ठः * किमनुवादोरथन्तरम्। बृहता वा समुच्चेयं यद्वा षाडहिकानि षट्। अतिदेश्यानि तत्राद्योमाहेन्द्रादि-चतुष्टये। पृष्ठ-शब्दाच्चोदकेन सर्वेषामिह सम्भवात्। समुच्चयो वा विधये सर्वत्वं बह्वपेक्षया। न तु हयो रतः षण्णां पृष्ठानामतिदेशनम्॥ 'विश्वजित् सर्वपृष्ठोभवति'-

---

* 'पृष्टः'-इति टकारोपधःपाठ० गो० सा० पुस्तकयोः।

दृष्टैव स्वर्गनात्-इति प्रदर्शित-विग्रहादपि स एवोपलभ्यते, परं न तथापाठ-स्ताण्ड्यब्राह्मण-पुस्तकेषु क्वचिदपि, कन किञ्च तथापाठे जैमिनीयाधिकरणमालायाः षष्ठ षष्ठपत्रमे लिखिता 'श्रुतग्रन्थेन पृष्ठदेशे प्राप्ते'-इत्युक्तिर्विरुध्येत।

इति श्रूयते (१)। तत्र सर्व-पृष्ठ-शब्दोऽनुवादः, कुतः? प्राप्तत्वात्। तथाहि— ज्योतिष्टोमे माध्यन्दिन-पवमानानन्तरभावीनि माहेन्द्रादीनि चत्वारि स्तोत्राणि सन्ति —"अभि त्वा शूरनोनुमः"(१प्र,११सू)"कया नश्चित्र आ भुवत्" (१प्र,१२सू) 'तं वो दस्ममृतीषहम्'(१प्र,१३सू) —'तरोभिर्वो विदद्वसुम्' (१प्र,१४सू) इत्येतेषु चतुर्षु सूक्तेषु तानि स्तोत्राणि सप्तदश-स्तोमतामापाद्य गीयन्ते। एकस्मिन् सूक्ते विद्यमानानां तिसृणामृचां ब्राह्मणोक्त-विधानेन सप्तदशधाभ्यासः सप्तदश-स्तोमः, तादृशेषु स्तोत्रेषु पृष्ठ-शब्दः श्रूयते 'सप्तदशानि पृष्ठानि'-इति, तानि पृष्ठानि विश्वजिति चोदक-प्राप्तत्वात् सर्वपृष्ठ-शब्देनानूद्यन्ते-इत्येकः पक्षः। रथन्तरपृष्ठ-बृहत्पृष्ठयोर्ज्योतिष्टोमे विकल्पितयोरिहापि चोदकेन विकल्प-प्राप्तौ सर्व-शब्देन समुच्चयोविधीयते, तथासत्यनुवादकृतं वैयर्थ्यं न भविष्यति-इति द्वितीयः। सर्वत्वं बहुषु मुख्यं न तु द्वयोः, तस्मादनेन सर्वपृष्ठ-शब्देन षट सङ्ख्याकानि पृष्ठान्यतिदिश्यन्ते, षडहे प्रतिदिनमेकैकं पृष्ठं विहितम्। तानि च पृष्ठानि षट्— रथन्तर-बृहद्-वैरूप-वैराज-शाक्वर-रैवत-सामभिः निष्पाद्यानि (२)। यद्यपि विश्वजितएकाहत्वाद् ज्योतिष्टोमविकृतित्वमेव न तु षडह-विकृतित्वम्, तथापि सर्व-पृष्ठोक्ति बलात् तानि षट् पृष्ठान्यतिदिश्यन्ते"[१९]-इति॥

(१)—ताण्ड्य-नवम-तृतीये, परं तत्र नैव पाठः।

(२)—रथन्तरादय इमे षडेव ऊह्यगानस्तानि।

तत्रैव दशमाधिकरणे स्वर-साम-विकार-चिन्ता— [४०]"न विकारा विकारा वा स्वरसामादयो न हि । वैष्णव-न्यायतो मैवमनन्यगति-लिङ्गतः । गवामयने द्वयोर्मास-षट्कयोर्मध्ये (१) वर्त्तमानं (२) विषुवन्नामकं प्रधानमूतमेकमहर्विद्यते (३), तच्च 'दिवा-कीर्त्यम', (४) तस्मात् प्राचीनास्त्रयः स्वर-साम-नामकाः अहर्विशेषाः ; तथोपरिष्टादपि त्रयः स्वर-सामानः तदेतदभिप्रेत्य श्रूयते 'अभितोदिवाकीर्त्यं त्रयः स्वर-सामानः'-इति (५) तेषु च ग्रह (६)-मान्तत्याय सप्तदश-स्तोमादयो धर्माः विहिताः (७), अन्यच्च

(१)—गवामयनं नाम सवमस्ति, तच्च द्विविधम्, "तासां दशसु मासेषु गृह्णाण्यजायन्त (ता-४-१-१)"-इत्यादि विहितम् दशमास निष्पाद्यं ; "इमौ द्वादशौ मासौ सम्वत्सरमापयामसि (ता-४-१-२)"-इत्यादि-विहितं द्वादश-मास-साध्यञ्च, तत्र शेषविधौ द्वयमुक्तिः ।

(२)—अशीत्युत्तरशततिदिनानन्तरम् ।

(३)—तथाहि ताण्ड्य-चतुर्थस्य षष्ठ-प्रथमे "विषुवानेष भवति"-इत्यादि ।

(४)—दिवाकीर्त्य नामक-सामकम्, तथाहि, ताण्ड्य-चतुर्थस्य षष्ठ-द्वादशे—"दिवाकीर्त्यं साम भवति"-इत्यादि । तच्च साम 'धाजम्','आधाजम्' च तत्रैवाग्रे विहितम्—"धाजाधाजे पवमानमुखे"-इत्यादिना, तच्च ऊह्यगानस्य द्वितीय प्रपाठकीय द्वादशतममाद्यं, विंशतितमञ्चान्त्यम् ।

(५)—तथाहि, ताण्ड्यस्य चतुर्थ-प्रपाठकीय-पञ्चम-खण्डे—"त्रयः पुरस्तात् त्रयः परस्ताद् भवन्ति'-इतिषड्विंशेच तत् स्फुटतरं, तथाहि तृतीय द्वादशे—"त्रयः स्वरसामानः, दिवाकीर्त्यमहः, त्रयः स्वरसामानः"-इति । स्वर-नामक-सामानि विद्यन्ते येषु ते स्वरसामानः । तानि च स्वरसामानि आरण्यिकार्चिकस्य द्वितीय सप्तम्यां 'यज्ञायज्ञा ऋपूर्व्य'-इत्यस्यामृचि उत्पन्नानि आरण्य-तृतीय प्रपाठकीय-द्वितीयार्द्ध-नवमादीनि षट् ।

(६)—ग्रहाः यज्ञीय-पात्र-विशेषाः ।

(७)—ताण्ड्यस्य चतुर्थ-प्रपाठक-गत-तृतीय खण्डे—"सप्तदशाभवन्ति"-इत्यादिना ।

त्वेवं श्रूयते(१) 'पृष्ठः षडहो द्वौ स्वर-सामानौ' इति। तावेतावह विशेषौ पूर्वोक्तानां स्वरसाम्नां न विकारौ, कुतः! वैष्णव-समानत्वात्,(२)यथावैष्णवशब्दो देवता-रूप-गुण-विधानेन मुख्यवृत्तित्वान्न लक्षणया धर्मानतिदिशति, तथा साम विशेष-रूप-गुण-विधायकः स्वरसाम-शब्दः। इति प्राप्ते, ब्रूमः अनन्यगति-लिङ्ग वशात् स्वरसामानौ विकारौ भवतः, तथाहि—षडहौ द्वौ स्वरसामानौ-इत्येवं योऽयमष्टाह उपन्यस्तः तत्र षट्स्वहःसु क्रमेण 'त्रिवृत्' 'पञ्चदशः' 'सप्तदशः' 'एकविंशः' 'त्रिणवः' 'त्रयस्त्रिंशः' इत्येवं स्तोमषट्कं चोदकेन प्राप्तम्, एवं स्थिते तृतीय-षष्ठ-दिवस-गतयोः सप्तदश-त्रयस्त्रिंशयोर्व्यत्यासं * विधाय, सप्तमाष्टमयोरह्नोः सप्तदशस्तोमं मिश्रवत् कृत्वा, त्रिषु चरमेष्वहःसु सप्तदश-स्तोम-नैरन्तर्यमर्थवादेनानुवदति। 'यत्

* 'त्रयस्त्रिंशयोरर्थव्यत्यासम्' इति संस्कृतविद्यालयपुस्तकपाठः।

(१)—विकृति-यागे।

प्रकृतेरतिदेशो विकृतिः यत्र विशेषरूपमेव कर्तव्यं श्रुत्योपदिश्यते, इतरत्तु सर्वं कर्मान्तरादतिदिश्यते सा विकृतिः। स चातिदेशः प्रत्यक्ष श्रुति वचनादु सामर्थ्याद्वा लिङ्गाद् वा अवगन्तव्यः। एतत्सर्वं जैमिनीये सप्तमाष्टमाध्यायाभ्यां बहुधा विचारितम्॥

(२) वैष्णव नामकेदे सामनि, तत्रैकम् उत्तरार्चिकस्य तृतीय प्रपाठक-गत द्वितीयार्द्धस्य द्वादश-सूक्त मूलकम्, ऋङ्गानस्य विंशति प्रपाठक प्रथमार्द्धीयोनविंशतितम; द्वितीयं छन्दोनामार्चिकस्य षष्ठ-प्रपाठक प्रथमार्द्धीय-तृतीय-दशति श्रुत पञ्चमकं मूलकम, ऋङ्गानस्य विंशति-प्रपाठक प्रथमार्द्धीय विंशतितमम्। तदेतद् द्वय साम घटितो विचारो न्यायमालायामत्रैवाध्याये षष्ठाधिकरणे गतः, ततस्माद्विरम्यते।

तृतीयं सप्तदशमहः तत् त्रयस्त्रिंशस्थानमभिपर्या हरन्ति'-इति व्यत्यासविधिः, 'त्रयाणां सप्तदशानामनवानतायाः'-इत्यर्थवादः (१)। तत्र यद्यन्तयोरङ्गोः* सप्तदशस्तोमं स्वरसामग्रह्णोऽति-दिशेत्, तदा नैरन्तर्यमुपपद्यते, नत्वन्यथा। तस्मान्न वैष्णव-न्यायेन गुणः-विधिः किन्तु धर्माणामतिदेशकः[४०९]-इति॥

दशमाध्यायस्य चतुर्थपादे नवमाधिकरणम् — [४१०]"बाध्यं श्लोकादिनाज्यादि न बाध्यः स्तुति-लिङ्गतः। देशसाम्नोर्विधौ भेदो वैशिष्ट्यात्तु समुच्चयः॥ महाव्रते श्रूयते 'श्लोकेन पुर-स्तात् सदसः स्तुवते, अनुश्लोकेन पश्चात्'-इत्यादि (२)। तत्र श्लोकानुश्लोकादिनामकैः सामभिः (३) प्राकृतान्याज्य-पृष्ठादि-स्तोत्र-गतानि रथन्तर-वामदेव्यादि-नामकानि सामानि बाध्यानि,

* 'यद्यन्तयोरङ्गोः'-इति स० वि० पु० पाठः।

(१) तथाचौत्यादि समस्तं ताण्ड्यस्य गवामयन-सत्र-प्रकरणमात्रस्य-समालोचने-नावगन्तव्यम्।

(२) ताण्ड्य-पञ्चम चतुर्थे स्फुटम्। तत्र गेयगानस्यकादश-द्वितीयस्थाने सामनो श्लोकानुश्लोक-संज्ञके तयोर्मूलं छन्दोग्यस्य पञ्चम-द्वितीय-प्रथमार्धा चतुर्थी ऋक्।

(३) आदिपदात् बहुवचनाच्च तत्र च श्लोकानुश्लोक-विधानानन्तर-श्रुतानि यामादीनि बोध्यानि। तत्र छन्दोग्यस्य चतुर्थ-प्रपाठक-प्रथमार्द्धीय तृतीय-दशति-ग नाष्टम्यात्प्रच्युतपन्नम् अरण्यगानस्य तृतीय-प्रथम-तृतीयं साम 'यामम्', किञ्च छन्दआर्चि कस्य पञ्चम-प्रपाठक-द्वितीयार्द्धीय-प्रथम-प्रथमायास्प्रच्युतपन्नं अरण्यगानस्य-तृतीय-प्रथमे त्रयोदशं साम 'आयुः'-संज्ञकम्, अपरम् आरण्यिकार्चिकस्य चतुर्थ-दशति-गतायां 'इरिवरन्द ग्रामण्यौत्येतस्मात्प्रच्युतपन्नम्, अरण्यगानस्य-पञ्चम-प्रथमे द्वाविंशतितमम्-ऋच्यात्तं साम।

कुतः? 'स्तुवते'-इति प्रकृति-लिङ्ग-दर्शनात्, प्रकृतौ (१) आज्यैः स्तुवते, पृष्ठैः स्तुवते'-इति श्रुतम्। नैतत् सारम्। किमत्र स्तुतिमनूद्य देश-साम-गुणौ विधीयेते? किं वा गुणद्वयविशिष्टा स्तुतिः? नाद्यः, वाक्य-भेदापत्तेः। द्वितीये तु कार्य्यभेदेन बाध्याभावात् समुच्चयः स्यात्"[४१]-इति॥ ॥तत्रैवदगमे कौत्सादि-साम्नः प्राकृत-साम-बाधकत्वम्— [४२]"समुच्चीयेत कौत्सादि यद्वा प्राकृत-बाधकम्*। स्तुत्याभावादादिमोऽन्त्यो लिङ्ग-प्रकरण-द्वयात्॥ विकृति-विशेषे न्यूयते— कौत्सं भवति काण्वं भवति-इति (२), तदेतत् कौत्सादि-नामकं साम प्राकृतेन साम्ना समुच्चीयते, कुतः? प्राकृतस्य स्तुति-लिङ्गस्याभावेन कार्य्यैक्याभावात्। नैवम्, प्रकरणात् क्रत्वङ्गत्वे सति ऋगक्षराभिव्यक्ति-सामर्थ्य-लक्षण-प्राकृत-लिङ्गेन कार्य्यैक्यावगमात्। तस्माद् बाध-

---

* 'प्रकृतिबाधकम्'-इति पाठः रा० पुस्तके।

---

(१)— प्रकृतियागे।

यत्र कर्त्तव्यं सर्वं प्रकर्षेण कर्मान्तरनैरपेक्षेण उपदिश्यते सा प्रकृतिः। तत्र चास्ति मूलावान्तरभेदाद् द्वैविध्यम्। सर्वात्मना कर्मान्तरनिरपेक्षा मूलप्रकृतिः, कतिपयेष्वङ्गेषु कर्मान्तरं चापेक्षते स्वयञ्च कैश्चित् कर्मभिः अपेक्षणीयो भवति सा अवान्तर-प्रकृतिः, तत्र तिस्रो मूल-प्रकृतयः, ताश्चाष्टमाध्यायस्य प्रथमपादे तृतीयाधिकरणस्य द्वितीयवर्णके विचारिताः॥

(२)—ताण्ड्य-त्रयोदश-नवमादौ। तेषां स्वरूपाणि गेयगानस्य पौढग्र-प्रथमार्द्धस्य त्रयोदशादीनि तीणि सामानि; तेषामाधारभूमिः छन्दोग्यस्य षष्ठ-द्वितीय प्रथमायाः द्वितीया ऋक्।

कम्"[४२]-इति ॥ ॥एकादशे त्वेकाद्युक्तिः प्रकृत-बाधकत्वम्—[४३]"तत् सर्व-बाधकं सर्वमेक-द्वाद्युक्ति तोऽथवा। अविशेषा-दादिमोऽन्त्यएकाद्युक्ति-विशेषतः॥ तत् पूर्वोक्तं कौत्सादि-साम-विषयः। तत्र, किं 'कौत्सं' साम प्राकृत सर्व-साम-निवर्त्तकम्, 'काण्वमपि तथेत्येकैकस्य सर्व-निवर्त्तकत्वमुच्यते? आहोस्विदेक-वचनान्त-निर्दिष्टमेकस्य निवर्त्तकं, द्विवचनान्त-निर्दिष्टं द्वयोः, बहुवचनान्त-निर्दिष्टानि बहूनाम्? तत्र नियामकाभावादाद्यः पक्षः प्राप्नोति, एकादि-वचन-रूपाणां श्रुतीनां नियामकत्वा-दन्त्यः पक्षोऽभ्युपेयः। तथाहि 'कौत्सं भवति' (१), 'वसिष्ठस्य जनित्रे भवतः' (२) 'क्रौञ्चानि भवन्ति' (३)-इति निवर्त्तकेषु श्रूयमाणानि एक-द्वि-बहुवचनानि निवर्त्यानां तत्सङ्ख्यावत्वं प्रत्यासत्या बोधयन्ति, किञ्च एवं सति अबाधित-साम-विषय श्रोदकोऽनुग्रहीतोभवति, कृत्स्न-बाधे तु सर्वश्रोदको निरुध्यते; तस्मान्न सर्व-बाधकः"[४२]-इति ॥ ॥द्वादशे स्तोम-हृद्यहृद्यौः प्राकृत-बाधिका—[४४]"स्तोमस्थयोर्वृद्यहृद्यौः प्राकृतः किं निवर्त्तते।

---

(१)—ताण्ड्यस्य तृतीयपञ्चिकायां विभिन्नस्थलयोर्द्वयोः। कौत्स-स्वरूपन्तु जङ्ग-गानस्य प्रथमप्रपाठक-द्वितीयार्द्धीय-दशमं साम, तन्मूलन्तु उत्तरार्चिकस्य प्रथमस्य द्वितीये द्वादशं सूक्तं; काण्व-स्वरूपन्तु जङ्गगानस्य प्रथम-प्रथमान्त्रं साम, तन्मूलन्तु उत्तरार्चिकस्य प्रथमस्य द्वितीये तृतीयं सूक्तम्।

(२)—ताण्ड्य-चतुर्दशैकादशे। स्वरूपविवरणादिकन्तूक्तमेव।

(३)—ताण्ड्योनविंशस्य तृतीये। तत् स्वरूप गेयगानस्य पञ्चदशप्रपाठक-द्वितीया-र्द्धस्याष्टम-नवमे सामनी; तयोराधारभूता ऋक् तु छन्दोग्यस्य पञ्चम-प्रपाठक-प्रथमा-र्द्धस्य चतुर्थ-दशत्यां पञ्चमी।

अहद्वावेव वाद्यः स्यात् सामोत्पत्युपयोगतः अहद्वावुपयोगाय प्राकृतस्य निवर्त्तकम्। हद्वौ पूर्वोपयोगित्वात् हद्वौ तु न निवर्त्तकम्। सन्ति हद्व-स्तोमकाः अहद्व-स्तोमकाश्च विकृति-रूपाः क्रतवः, तत्रोभयत्रापि यानि सामान्युपदिष्टानि तैरतिदिष्टानां साम्नां निवृत्तिः स्यात्, अन्यथा सामोत्पत्ति-वैयर्थ्यात् इति पूर्वपक्षः। सिद्धान्तः स्पष्टार्थः"[४४]॥ ॥त्रयोदशे स्तोत्रे छन्दो विशेषत आवापः— "[४५]क्वापि स्तोत्रऋचि क्वापि स्यादावापस्त्रयोदृतिः। पवमानेषु गायत्र्यादिष्वेवाता विशेषतः। आद्यो नो परिसङ्ख्यानादत्र ह्येवेति तद्विधेः। विध्यन्तरशेषरूपमपूर्वं तद्विधीयते। अहद्व-स्तोमकेषु प्राकृतस्यातिदिष्टस्य साम्नउद्वापः, प्रत्यक्षोपदिष्टानामावापः, हद्व-स्तोमकेष्वावापः; इति स्थितं पूर्वाधिकरणे। तावेतावावापोद्वापौ यस्मिन् कस्मिंश्चित् स्तोत्रे यस्यां कस्याञ्चिदृचिस्याताम्, कुतः? नियामकाभावात्; इति पूर्वपक्षः। नो खलेतद् युक्तम्, एव कारेण प्रकृत-पवमान-व्यतिरिक्तेष्वाज्यादि-स्तोत्रेषु गायत्री-बृहत्यनुष्टुब्व्यतिरिक्तास्वृक्षु आवापोद्वापयोः परिसङ्ख्यात्वात्। एवकारस्यैवमाम्नायते—'त्रीणि ह वै यज्ञस्योदराणि यद् गायत्री बृहत्यनुष्टुप् च, अत्र ह्येवावपन्त्यतएवोद्वयन्ति' इति। ननु मास्तां मन्त्रावापोद्वापौ, विवक्षित-देशेषु कथं प्राप्नुते?-इति चेत्— अनेन वाक्येन तद्विधानात्-इति प्राप्ते ब्रूमः— नचायमर्थवादः, अनन्य-शेषत्वात्। नाप्यनुवादः अपूर्वार्थत्वात्। तस्मात् पवमानेष्वेव गायत्र्यादिषु आवापोद्वापौ"[४५]॥ ॥ चतुर्दशे तु "कण्वरथन्तरं" स्व-योनावेव— [४६]"बृहद्रथन्तरैकीय-योनौ कण्वरथन्तरं। रथ-

न्तरस्यैवयोनौ किं स्व-योनावुताग्रिमः। चोदकस्याविशेषेण द्वितीयोनाम-साम्यतः। अनङ्गत्वान्नातिदेशः स्व-योनौ पठित-त्वतः। वैश्य-स्तोमे पृष्ठ-स्तोत्रे साम-विशेषोविहितः—'कण्व-रथन्तरं पृष्ठं भवति' (१) इति, प्रकृतौ पृष्ठस्तोत्रे बृहद्र-थन्तर-सामनी विकल्पिते, 'त्वामिद्धि हवामहे (ऋ०३-१-५-२)' इतीयसृक् बृहतो योनिः— 'अभि त्वा शूर (ऋ०३-१-५-१)' इति रथन्तरस्य— 'पुनानः सोम (ऋ०५-१-३-१)'-इति कण्व-रथन्तरस्य। तत्र बृहद्रथन्तरयोरन्यतरस्य साम्नोयोनौ कण्व-रथन्तरं गेयम्, कुतः? चोदक-प्राप्तयोर्विशेष-नियामकाभावात्। अथवा रथन्तरस्यैव योनौ गेयम्, कुतः? रथन्तरेति-नाम-साम्यस्य धर्मातिदेशार्थत्वेन नियामकत्वात् (२)। नैतद् युक्तम्, बृह-द्रथन्तर-साम्नोरेव प्रकृतावङ्गत्वेन विधानम्, न तु तद्योन्योः, अतो नास्ति तयोः (३) अतिदेशतः प्राप्तिः। तस्मात् स्व-योनौ गेयमिति परिशिष्यते (४)। प्राप्तिश्च सामगानामुत्तरा-ग्रन्थ-पाठाद्वगन्तव्या (५)। एवं सतिश्रुत-हान्यश्रुत-कल्पने न भवि-

(१)—नाष्ठाग्राष्टादशप्रपाठकस्य षष्ठखण्डे। तत्स्वरूपम् ऊहगानस्य चतुर्थ-प्रथ-मस्य चतुर्थं साम; तदाधारभूमिस्तु उत्तरार्चिकस्य प्रथम-प्रथम-षष्ठ्यां प्रथमं सूक्तम्।

(२)—प्रकृतिवद् विकृतिः कर्त्तव्या तिशास्त्रादिति यावत्।

(३)—तद्-योन्योः श्रव कदा प्राप्तिः स्यात्, यदि प्रकृतियागे तयोः स्तुतिरूपांगत्वे न विधानं, न च तथेति न तयोरेव विकृतावतिदेशः।

(४)—स्व-योनौ पुनानः सोमेत्यस्यामृचि कण्वरथन्तरं गेयम्, तच्च गेयगानस्य चतु-र्दश-प्रथमस्योनविंशतमं साम। कण्वरथन्तरश्चैतन्तु ऋचनिष्पायम् ऊह प्रविष्टम्।

(५)—उत्तरायन्य-पाठक्रमेण—त्वमिद्धीति १,१,११,१, त्वामिद्धिहवामहे २,१,१२,१; पुनानः सोमेति १,१,९,१।

श्रुतः"[४६] ॥ ॥ पञ्चविंशे तु कण्वरथन्तरं स्वकीययोरेवोत्तरयोर्गेयम्—[४७]"सन्देह-निर्णयौ पूर्ववदेवोत्तरयोर्ऋचोः। योनि-त्यागः समश्नेत्र हृच-शब्देन बाधमात्॥ 'एकं साम हृचे क्रियते'-इति श्रुतेः कण्वरथन्तर-साम्नः ऋचां त्रयमाश्रयः, तत्रैका स्व-योनिः इतरे स्व-योन्युत्तरे। एवं बृहद्रथन्तर-साम्नोर्द्रष्टव्यम्। तत्र बृहदुत्तरयोः रथन्तरोत्तरयोर्वा अतिदेश-प्राप्ताविशेषेण स्वेच्छया गेयमित्याद्यः पक्षः। नाम-साम्याद्रथन्तरोत्तरयोरेव गेयमिति द्वितीयः पक्षः। प्रकृताहृचोः * साक्षादङ्गत्वाभावेऽपि साम-द्वारकमङ्गत्वमङ्गीकृत्य चोदक-प्राप्ता पक्ष-द्वयोपन्यासः। योनि-वदुत्तरयोर्ग्रन्थ-पठितत्वात् स्व-योन्युत्तरयोर्गेयमिति हृतीयः पक्षो राद्धान्तः। (१) बृहद्रथन्तरोत्तरयोः स्व-योन्युत्तरयोर्वा गीय-ताम्, सर्वथापि स्व-योनृक्-त्याग ऋगन्तर-परिग्रहश्च समानः; तथा सति चोदकोऽत्र प्रापकः-इति (२) पूर्वपक्षिणोऽभ्यधिका शङ्का। हृच-शब्दः समानच्छन्दस्कानामेकदेवत्यानामृचां त्रये

* 'ऋचः'-इति पाठः रा० पुस्तकस्य।

(१)—पूर्वाधिकरणादत्र विशेषः कोविचारः—इति दर्शयति बृहदित्यादिना।

(२)—अत्तरविशिष्टस्य स्वरादेर्नाम्नि मामत्वमपि स्वरादेरेवेति पूर्वं भिद्वान्ति-तम्, तथाच पुनान-इति सूक्तस्य दृहान-इति द्वितीयायामृचि अपश्यामिति तृतीया-यामृचि च कण्वरथन्तर-गानकाले पुनान इत्याद्यामृचं त्यजति एवेति स्वयोनित्याग ऋगन्तरपक्षे गत्वे पतित एव, एवञ्च अपरामृचमपि आधारतया ग्रहणे नाम्नि वैषम्य-मिति प्रकृतिवद्विकृतिरिति चोदकबलात् प्रकृतिसाम्ने श्रुतस्य रथन्तरस्य बृहतश्च योनौ यस्य आधारभूते भवितव्ये-इति पूर्वपक्षाशयः।

प्रसिद्धः (१) ; अतस्तृच-सुत्या प्रत्यक्षया, चोदक-प्राप्तस्य बाधः-इति राद्धान्ताशयः इति"[४७]-इति ॥

पञ्चम-पादस्य द्वितीयेऽधिकरणे तिसृष्वित्यधिमस्तृचोविवक्षितः—[४८]"तृचाद्यासु तृचेवाद्ये तिसृष्वित्युच्यतेऽग्रिमः । विच्छन्दस्त्वात् प्राकृतं स्यात् क्रमादत्र तृचोऽखिलः ॥ एक-सङ्ख्यायास्ति-सङ्ख्यायाश्च व्यतिषङ्ग-विधानात् 'एकत्रिक-नामकः' कश्चित् क्रतुर्भवति, सचैवं श्रूयते—'अथैषएकत्रिकस्तस्यैकस्यां बर्हिष्यवानं (२) तिसृषु होतुराज्यम् (३) एकस्यां मैत्रावरुणस्य (४) तिसृषु

---

(१)—ताण्ड्यादौ ।

(२)—एतत्स्वरूपं तदाधार-स्वरूपादिकञ्च पर्वं वर्णितम् ।

(३)—"पान्तमावो अश्वसः"-इति छन्दोग्रन्थस्य द्वितीय-द्वितीय-द्वितीये प्रथमा ऋक् अस्यामुत्पन्नानि त्रीणि सामानि श्रुतानि, तानि च गेयगानस्य चतुर्थ-द्वितीये षोडशादीनि 'वैतत्त्रय'-नामकानि, तवान्त्यमोकोनिधनं यद् वैतत्त्रयं तन्नाम ग्राह्यं, तिसृष्वित्यर्थः, अपितु उक्थगानस्य प्रथम-प्रथमे श्रुतमष्टादशमोकोनिधनाख्यमेव ग्राह्यम्, तदाधारभूतसूत्रेषु, उत्तरग्रन्थस्य प्रथम-द्वितीये प्रथम-सूक्तात्मकः, तव प्रथमा "पान्तमावो" इत्याद्या छन्दसि श्रुतैव, द्वितीया "पुरश्चरुं पुरश्चरुमित्याद्या, तृतीया "इन्द्रद्यो"-इत्याद्या । इति प्रथम पर्यायो होतुराज्यम् । द्वितीयपर्यायो "अयन्नद्रिभोम"-इति उत्तरग्रन्थस्य प्रथम-द्वितीये पञ्चमं तृचात्मकं सूक्तम्, तव तिसृषु गोतमभृग्वन्थस्य प्रथम-द्वितीये द्वितीयं साम दैवोदासाख्यम् । तृतीयं "इद ह्यन्वोजसा"-इति उत्तरग्रन्थस्य प्रथम-द्वितीयेत्यृचात्मकं नवमं सूक्तम्, तव तिसृषु गौतमभृग्वन्थस्य—माधुच्छन्दसाख्यं साम । अत्र प्रमाणं ताण्ड्यं नवम-द्वितीयं खण्डम् ।

(४)—अस्ति "प्रवदन्नायमादनम्"—इति छन्दोग्रन्थस्य द्वितीय-द्वितीय-द्वितीय-द्वितीया ऋक्, अस्यामुत्पन्नानि षट् सामानि, तानि च गेयगानस्य चतुर्थ-द्वितीये उनविंशादीनि, तव तृतीयं "गौरीवीतं" तदेवात्र प्रथमपर्यायो मैत्रावरुणस्य । अस्ति "आतूनइन्द्रक्षत्रमत्"—इति छन्दोग्रन्थस्य द्वितीय द्वितीय तृतीये तृतीये ऋक्,

ब्राह्मणाच्छंसिनः (१) एकस्यामच्छावाकस्य (२) तिसृषु माध्यन्दिनः पवमानः'-इति । सन्ति प्रकृतौ माध्यन्दिन-पवमानस्य त्रयस्तृचाः—'उच्चा ते जातम्'-इत्ययं (उ,१प्र,८सू,२।३ ऋ) प्रथमो-गायत्रीच्छन्दस्कः, 'पुनानः सोम' इत्ययं (उ,१प्र,९सू,१।२।३ ऋ) द्वितीयोबृहतीच्छन्दस्कः, 'प्र तु द्रवा'-इत्ययं (उ,११प्र,१०सू,१।२। ३ऋ) तृतीयस्त्रिष्टुप्-छन्दस्कः । एतदेवाभिप्रेत्य श्रुतम्, 'त्रिच्छ-

---

स्यामृत्पन्नानि चत्वारि सामानि, तानिच गेयगानस्य पञ्चम-प्रथमे षोडशदीनि, तच तृतीयमाकुपारम, तदेवाच द्वितीयपर्य्याये मैत्रावरुणस्य । अस्ति "आत्वेतानिषीदत" इति छन्दोग्रन्थस्य द्वितीय-द्वितीय-द्वितीये दशमो ऋक, अस्यामृत्पन्नं गेयगानस्य पञ्चम-प्रथमे श्रुतं 'दैवातिथं'-नामकं साम, तदेवाच द्वितीये पर्याये मैत्रावरुणस्य। अत्र प्रमाणं ता.९.२। किञ्च "प्रवन्द्राग्नेत्याद्या ऋचः सन्ति चोत्तरा ग्रन्थे, सन्ति च तदाधारकानि गानानि तन्नामभिः प्रसिद्धानि ऊहग्रन्थे, परं तान्यच न गृह्यन्ते एकस्यामिति श्रवणात् ।

(१)—अस्ति "वयमुत्वात्तदिदर्थाः"—इतिउत्तराग्रन्थस्य प्रथम द्वितीये तृतीयं तृचम्, तच ऊहगानस्य प्रथम-प्रथमान्त्यं काण्वनामकं साम, तदेवाच प्रथमपर्याये। अस्ति "अभित्वा शूषभासुतः"—इत्याद्याः उत्तराग्रन्थस्य प्रथमद्वितीये सप्तमसप्तात्मिकाम्बृचः, तत्रोहगानस्य प्रथम-द्वितीये पञ्चमार्षभाख्यं साम, तदेवाच द्वितीयपर्याये। अस्ति "योगेयोगेतवस्तरम्" इत्याद्याः उत्तराग्रन्थस्य प्रथम-द्वितीये एकादश-सप्तात्मिकाम्बृचः, तत्रोहगानस्य प्रथम-द्वितीये श्रुतं दशमं कौत्सनामकं साम, तदेवाच तृतीयपर्याये गृह्यते ।

(२)—अस्ति "इन्द्रायमद्वने सुतम्" इति छन्दोग्रन्थस्य द्वितीय द्वितीय-द्वितीये चतुर्थी ऋक्, अस्यामृत्पन्नानि त्रीणि सामानि, तानि च गेयगानस्य चतुर्थ द्वितीये सप्तविंशत्यादीनि, तत्र, तृतीयं गौतकच्छाभिधं साम, तदेवाच प्रथम-पर्याये। अस्ति "इदं वसो सुतमन्धः"—इति द्वितीय-प्रथम-तृतीयायां दशमी ऋक, अस्यामृत्पन्नानि त्रीणि "गार"-नामकानि गेयगानस्य तृतीय-द्वितीये एकविंशत्यादीनि सामानि, तत तृतीयमिह द्वितीय-पर्याये, ऊहग्रन्थे प्रथम-द्वितीये तस्यैवगारमिति प्रथितत्वात्।

न्द्राग्नावापोमाध्यन्दिनः'-इति (१)। एवं सति एकचिकस्य माध्यन्दिन-पवमाने तिसृष्विति यदुक्तं तत्र त्रयाणां ऋचानामाद्यास्तिस्रः ऋचो ग्राह्याः? किं वा प्रथम-ऋच-स्थाः क्रम-पठितास्तिस्रः? इति संशयः। तत्र त्रिच्छन्दस्त्व-श्रुत्या प्रबलया दुर्बलं पाठ-क्रमं बाधित्वा प्रथम-पञ्चो ग्राह्यः—इति प्राप्ते, अभिधीयते—यदेतत् त्रिच्छन्दस्त्वं तदेतत् प्राकृतम्, तत्र छन्दस्त्वयोपेतस्य ऋच-त्रयस्योपदिष्टत्वात्। विकृतावपि तत्सर्वमति दिष्टमिति चेत्— वाढम्! अतएव पाठ-क्रमोऽप्यतिदिष्टः, तथासति प्रक्रान्त-गायत्री-छन्दस्कस्य-ऋचस्य समाप्तौ सत्यां पश्चाद् बृहतीच्छन्दस्के ऋचे प्रथमायाः ऋचः प्रारम्भावसरः स चारभस्तिसृषु-इति विशेष-विधानेन बाध्यते; तस्मादाद्यस्तृचोनिखिलोग्राह्यः"[४८] (२)॥ ॥ ऋतीये धूर्गानमेकस्यामृचि कर्त्तव्यम्—[४९]"ऋचे स्यादृचि वैकस्यां धूर्गानं प्रकृतावि व। ऋचे भवेदिहैकस्यां श्रुत्यावृत्ति-विधानतः। एकचिकएव क्रतौ व्यति-

---

ऋचि"इन्द्रसुतेषु सोमेषु"—इति इन्दोगस्यस्य चतुर्थ-द्वितीये पञ्चम्यां प्रथमा ऋक्, अस्यामुत्पन्नानि त्रीणि सामानि, तानि च गेयगानस्य दशम-प्रथमे चतुर्विंशत्यादीनि, तत्र तृतीयं "कौत्स"-नामकं, तदेवात्र तृतीयपर्याये ग्रहणीयं भवति। अत्र सर्वत्र मानं ताण्ड्यनवमद्वितीयमार्षेयञ्च ब्राह्मणम्।

(१)—तदेतत् स्फुटं ताण्ड्यमप्तमतृतीये, तथाहि-"त्रिभिस्त्र इन्दोभिः"—इत्यादि, "त्रिभिः गायत्री त्रिष्टुब् बार्हतैरिति तद्भाष्यम्।

(२)—तत्र "उच्चातेजातमन्धसः"-इत्यादिः प्रथमा, "सनदिन्द्रा यथऋषे"-इति द्वितीया, "एनाविश्वान्यर्यआ"-इति तृतीया ऋक्। गानञ्चैतत् ऊहगानस्य द्वादश प्रथमस्य प्रथमं प्रसिद्धम्। त्रिच्छन्दस्त्वन्तु त्रिभिःपर्यायैरुपपद्यते नत्वेकस्मिन्नेव पर्याये इति सिद्धान्तार्थः।

षड्विंशैकस्यां च स्तोत्रेषु सम्याद्यमानेषु यद्धूर्गानं तत् किं ह्रचे स्यात्? उतैकस्यामृचि? इति संशयः। तत्र चोदकेन ह्रचे भवेदिति प्राप्ते, ब्रूमः—इहैकविंक-क्रतौ एकस्यामृचि धूर्गानं भवेत्, कुतः? 'आवृत्तं धूर्षु स्तुवते'-इति आवृत्ति-विधानात्। ह्रचे गानेऽपि साम्नस्त्रिरावृत्तिर्भवेत्? न, आवृत्तेः स्तुति-विशेषणत्वात्। गुण-सङ्कीर्त्तन-परः पद-समूहः स्तुतिः, तच्च ऋगावृत्तिं विना तिसृष्वप्यृक्षु न सिध्यति। तस्मादेकस्यां धूर्गानम्"[४९]॥ ॥षष्ठे स्तोम-ह्रद्विरागमाद् भवेत्—[५०]"स्तोम-ह्रद्विः किमभ्यासादागमाद्वाश्रियो यतः। न काल्यामश्रुतं मैवं सङ्ख्यावापादि-लिङ्गतः। विह्रद्व-स्तोमकः क्रतुरेवमाम्नायते, 'एकविंशेनातिरात्रेण प्रजा-कामं याजयेत्, त्रिणवेनौजस्कामम्, त्रयस्त्रिंशेन प्रतिष्ठा-कामम्' इति। प्रकृतिगतेभ्यः (१) विह्रत्-पञ्चदशादिस्तोमेभ्यो विह्रदाः एकविंश-त्रिणव-त्रयस्त्रिंश-स्तोमाः (२), तेषु किं प्राकृतानां (३) साम्नाम् अभ्यासाद् ह्रद्भिर्भवति? किं वा सामान्तरागमात्? इति संशयः। अश्रुतस्य सामा गमस्य कल्पयितुमशक्यत्वाद् अभ्यासाद् ह्रद्भिः इति प्राप्ते, ब्रूमः—(४)-अभ्यासोऽपि न मात्राच्छ्रुतेः, किन्त्वेकविंशादि-सङ्ख्या-

(१)—प्रकृतियागोक्तज्योतिष्टोमादि-तन्त्रेभ्यः।

(२)—एषामुपजनिः ताण्ड्य-षष्ठ-द्वितीयादौ। अत्र ताण्ड्य दशम-प्रथमस्थानि वाक्यानि ध्येयानि, तथाहि—"आदित्य एवैकविंशस्यायतनम्"-इत्यादि, "त्रिष्टुदेव त्रिणवस्यायतनम्"-इत्यादि, "देवता एव त्रयस्त्रिंशस्यायतनम्"-इत्यादि।

(३—प्रकृतियागगतविह्रदादिस्तोममूलकानाम्।

(४)—यदुक्तं पुरस्तात् पञ्चमाध्याय-तृतीयपाद-पञ्चमाधिकरण व्याख्याने" किन्तु सामागमेन स्तोमपूरणमिति दशमेवर्च्यते" इति तदेवात्र अभ्यासोपोत्थादिना वक्ष्यति।

पूरणाय कल्पते, सङ्ख्या च द्रव्य-गता, भिन्न-द्रव्यैरेव पूर्यते नत्वेकद्रव्यावृत्या, नह्यष्टकृत्वएक-घटमानीय मद्गृहे सन्त्यष्टौ घटाः-इति व्यवहरन्ति; ततः स्तोमावयव-द्रव्यगता सङ्ख्या तदवयवभूतानां साम्नां पदार्थानां भेदं गमयति, स च भेदः सामान्तरागम-लिङ्गम्; अत्र ह्येवावपन्तीत्यावापोद्देशेन देशविशेष-विधिरपरं लिङ्गम्— सामान्तरोत्पत्त्यर्थमन्यल्लिङ्गम्; तस्मादागमेन वृद्धिः"५० (१)॥

सप्तमे बर्हिष्यवमान-वृद्धावृचआगमः—५१"किं बर्हिष्यवमानर्द्धौ साम्नर्चा वाभिपूरणम्। साम्ना पूर्वोक्तितोमैवं सामैकत्व-पराक्त्वतः॥ प्रकृतौ प्रातः सवने बर्हिष्यवमानस्य अविवृद्धः स्तोमः, तस्य विकृतिषु वृद्धौ सत्यां पूर्वोक्त-रीत्या सामान्तरागमे प्राप्ते, ब्रूमः—'एकं हि तत्र साम'-इति बर्हिष्यवमानं प्रकृत्य सामैकत्व माम्नायते, अतो न सामान्तरागमः सम्भवति। एवं तर्ह्यभ्यासेन सङ्ख्या-पूरणमस्तु- इति, न वाच्यम्, 'पराग् बर्हिष्यवमानेन स्तुवन्ति'-इति (२) पराक्-शब्देनाभ्यास-प्रतिषेधात्; तस्मादृगागमः"५१॥

---

(१)—ताण्ड्यस्य द्वितीयप्रपाठक-चतुर्दशादि-खण्डत्रयाणां तृतीयप्रपाठक-प्रथमादि-सप्तखण्डानाञ्च परिदर्शनात्, अपिच "वर्तमानेषु स्तोमेषु प्रथमस्य पर्यायस्य प्रथमा तृचभागा तस्यास्निर्वचनम्, मध्यमावापस्थानम्, उत्तमा परिचरा ह्यचभागावापस्थानम्"-इति लाट्यायन-सूत्रपर्यालोचनात्, एष विचारो भवेद् बोधविषयोऽविवादः।

(२)—श्रुतिपाठस्तु नैवम्, परमर्थत एषएव, तथाहि—"अमुष्मै वा एतल्लोकाय स्तुवन्ति यद् बर्हिष्यवमानम् सप्तर्द्धिं ह्यताभिः पराचीभिः स्तुवन्ति"-इत्यादिः, पराचीभिर्बर्हिष्यवमानीभिः स्तुवते"-इत्यादिश्च ताण्ड्य-षष्ठाष्टमे।

षष्ठपादस्याद्येऽधिकरणे एकं साम ह्वचे गेयम्—[५२]"सामैकस्यां ह्वचे वास्यादाद्यः स्वाध्यायवद् भवेत्। वचनाल्लिङ्गसंयुक्तात् स्तोत्रे साम ह्वचे भवेत् पवमानाज्य-पृष्ठादि-स्तोत्रे पुनर्यद् विहितं रथन्तर-बृहद्-वैरूपादि-साम अध्येतारः एकस्यामृचध्यीयते, तत् किं स्तोत्र-प्रयोग-कालेऽप्येकस्यामृचि गेयम्? किं वा ह्वचे गेयम्? इति संशयः (१) अध्ययनस्यानुष्ठानार्थत्वाद् यथाध्ययनमेकस्यामृचि मात्रः कृतं तथैकस्यामेव साम गेयम् * इति पूर्वपक्षः।

---

* "यथाध्ययनमेकस्यामृचि सामगेयम्"-इति न्यून-पाठः गौ० मा० पुस्तकयोः।

---

(१)—अत्रेदं तत्वम्—अग्नि इन्दोग्यस्य तृतीय-प्रथम पञ्चम्यां प्रथमा ऋक्,तस्यां गीतं रथन्तरम्, तच्च अरण्यगानस्य द्वितीय-प्रथमे एकविंशतितमं साम; तथा इन्दोग्यस्य तृतीय-प्रथम पञ्चम्यां-द्वितीया ऋक्, तस्यां गीत बृहत तच्च अरण्यगानस्य प्रथम-प्रथमे सप्तविंशतितमं साम; तथा इन्दोग्यस्य तृतीय-द्वितीय चतुर्थ्यां षष्ठी ऋक्, तस्यां वैरूपमज्ञात्यष्टौ सामानि, तत्र प्रथमम् अजोवैरूपम्, द्वितीयं ह्रस्ववैरूपम्, तृतीयं बृहदोपशवैरूपं पशुनिधनवैरूपं वा, चतुर्थम् पणिधन वैरूपम, पञ्चमं सप्तनिधनवैरूपम्, षष्ठम अष्टानिधनवैरूपम्, सप्तमं द्वादश निधनवैरूपम्, अष्टमम पृथ्यवैरूपम्; (अत्र मानमार्षेयब्राह्मणस्य तृतीयप्रपाठकाष्ट मंखण्डम्) तानि च अरण्यगानस्यारम्भे एव श्रुतानि। एवम अग्नि उत्तरग्रन्थस्य प्रथम-प्रथमैकादशे प्रथमस्तृचः, तत्र च गीत रथन्तरम्, तद्धि ऊह्यगानस्यादिमं साम; तथा उत्तरग्रन्थस्य द्वितीय प्रथम-द्वादशे प्रथमस्तृचः, तत्र च गीत बृहत्, तद्धि ऊह्यगानस्य प्रथम-प्रथमे पञ्चमं साम; तथा उत्तरग्रन्थस्य द्वितीय-द्वितीयैकादशे प्रथम स्तृचः, तत्र च गीतं "(पञ्चनिधनं) वैरूपम्", तद्धि ऊह्यगानस्य प्रथमे सप्तमं साम। तदत्र रथन्तरं गेयमिति विहिते अरण्यगाने श्रुतं इन्दोग्यस्थैकस्यामृचि प्राप्तं गातव्यमाहोस्वित् ऊह्यगाने श्रुतम् उत्तरग्रन्थीयतृचवोजकं गातव्यमिति ग्रन्थरूपः। एवं बृहद्वैरूपयोरन्यत्र च बोध्यम्।

'अष्टाक्षरेण प्रथमायाः ऋचः प्रस्तौति, द्व्यक्षरेणोत्तरयोः'-इति(१) तिसृष्वृचु प्रस्तोता गातव्य-भागो निरूप्यते, तदिदं ऋचस्य लिङ्गम्—'ऋक्सामेवावमिथुनौ सम्भवाव'-इत्यादौ ऋग्देवता-सामदेवतयोः संवाद-रूपेऽर्थवादे साम-देवतैकात्म्यं द्वे ऋचौ च प्रत्याख्याय तिस्रः ऋचोऽङ्गीचकार, तदिदम् अपरं लिङ्गम्; ताभ्यां लिङ्गाभ्यामुपबृंहिताद् एकं साम ऋचे गीयते स्तोत्रियम्'-इतिवचनात् ऋचे गातव्यमिति" ५२॥ ॥द्वितीये स्वर्ष्टक्-शब्दो मीलनावधिः—५३"स्वर्ष्टक-शब्दे वीक्षणे च किं स्यादङ्गाङ्गिताथवा। मीलनावधिताद्योस्तु भिन्न-वाक्येन तद्विधेः। प्रतिशब्देनावधिर्हि द्योत्यो वाक्यं न भिद्यते। सत्येवं मीलनस्यापि विधिर्नोत्तरयो र्भवेत्। अस्ति रथन्तर-साम्नोयोनौ 'अभित्वाशूर'-इत्यस्यामृचि स्वर्ष्टक्-शब्दः 'ईशानमस्य जगतः स्वर्ष्टम्'-इत्याम्नातः (२) अस्ति चोद्गातुः कर्तृता ऋचे 'रथन्तरे प्रस्तूयमाने सम्मीलयेत्

(१)—नैवमानुपूर्विकः श्रुतिपाठः; तथाहि—"पशवो वै बृहद्रथन्तरे अष्टाक्षरेण प्रथमाया ऋचः पूर्वौत्यष्टाश्रफांस्तत् पशूनवरुन्धे, द्व्यक्षरेणोत्तरयोर्ऋचोः प्रस्तौति द्विपाद् यजमानो यजमानमेव यज्ञे पशुषु प्रतिष्ठापयति. पञ्चाक्षरेण रथन्तरस्य प्रतिहरति पाङ्क्तांस्तत् पशूनवरुन्धे"-इति ताण्ड्य ब्राह्मण-सप्तम-सप्तमाध्यायभागः।

(२)—तद्यथा,

"अभि त्वा शूर नोनुमो दुग्धाइव धेनवः।
ईशानमस्य जगतः स्वर्ष्टमीशानमिन्द्रतस्थुषः"-

इति ऋग्वेदाग्नेय-तृतीय-प्रथम-पञ्चम्यां प्रथमा ऋक्, इयमेव उत्तराग्नेयस्य प्रथम-पृथमैकादशस्य तृचस्याद्या। अत्रारण्ये यद् गीत तदेकर्ङ्मूलकत्वात् एकर्चं रथन्तरम्, यद्वि ऊह्य-प्रथम-पृथमे गीत तत्तृचमूलकत्वात् तृचं रथन्तरमिति व्यपदिश्यते

स्वर्दृशं प्रति वीक्षेत'-इति (१) श्रुतेः। तत्र संशयः। किं स्वर्दृक्-शब्दोच्चारण-वीक्षणयोरङ्गाङ्गिभावोऽत्र विधीयते ? किं वा विधीयमान-सम्मीलनावधित्वेन स्वर्दृक्-शब्दोच्चारणं निर्दिश्यते ? इति। तत्र सम्मीलन-वाक्याद् वीक्षण-वाक्यं भिन्नं ततो न मीलनावधित्वेनान्वयः सम्भवतीति। किञ्च वीक्षेतेति लिङ्-प्रत्ययोऽत्र विधायकः श्रूयते, ततः स्वर्दृक् शब्दोच्चारणं वीक्षणाङ्गम्, वीक्षणं वा तदङ्गम्-इत्यङ्गाङ्गिभावोऽभ्युपेयः (२)। तथा सति स्वर्दृक्-शब्दरहितयोर्ऋचोर्गीयमाने रथन्तरेऽपि विहित-सम्मीलनानुवृत्तिः फलिष्यतीति पूर्वपक्षः। मर्दृशंप्रतीत्यनेन कर्म प्रवचनीयेन (३) प्रतिशब्देन स्वर्दृक्-शब्दोच्चारणस्य मीलन कालावधित्वं द्योत्यते। न चात्र भिन्न-वाक्यत्वम्, एक वाक्यत्वमभ्युपेयात्। तथाहि विरोध-परिहाराय स्वतएव प्राप्तत्वाद् वीक्षणं न विधेयम्। तथा सति आ स्वर्दृक् शब्दोच्चारणात् सम्मीलयेदित्येकं वाक्यं सम्पद्यते। एवंसत्युत्तरयोर्ऋचोर्मीलन-विध्यभावः फलिष्यतीति राद्धान्तः''५२ (४)॥ ॥ तृतीये बृहद्रथन्तरयोर्दिन-भेदेन

(१) ताण्ड्य-भाष्ये सप्तमे। अस्यैव श्रुतेः सम्मीलयेदित्यस्य नवमाध्याय-द्वितीय-पाद-पञ्चदशाधिकरण-व्याख्यायां (४२५०) पूर्वमादृष्यत्वमेकदा।

(२)—अयमेवाङ्गाङ्गिभावः शेषशेषीभावो-गुणगुणीभावश्चेत्युच्यते। यद् यस्योपकारकं तत्तस्याङ्गम् इत्यङ्गलक्षणं शेष लक्षणञ्च, तदाह "शेषः परार्थत्वात (जै०३,१.२)"

(३)—"लक्षणेत्थंभूताख्यानभागविषमासु प्रतिपर्यनवः (१,४,८०) इति पाणिनिस्मरणात्, अत्र लक्षणार्थे कर्मप्रवचनीय-मज्ञा, तथाच स्वर्दृशंशब्दं मलक्ष्य यावत् स्वर्दृशमिति न गीयते तावत्काले सम्मीलनेन भाव्यमिति तस्याः श्रुतेरर्थः सम्पद्यते।

(४)—परमत्रार्थे ताण्ड्य भाष्य-विरोधो दृढात प्रतीयते, तथाहि—"तस्मिन् प्रलूयमाने चक्षुः 'सम्मीलेत' मुकुलितं कुर्यात्, पुनः 'स्वर्दृशं' स्वर्दृशमिति पद गायमान 'प्रतिवीक्षेत' अवलोकयेत" इति (८६०-५)।

प्रयोगः—[५१]"गावामयनिके * पृष्ठाः षडहे प्रत्यहं हयं। बृह-द्रथन्तरं चोत भवेत् किञ्चित् क्वचिद्दिने। द्वन्द्व-गर्भ-बहुव्रीहे राद्योऽन्त्येऽपि समोह्यसौ। अन्योन्य-निरपेक्षस्य चोदकादन्ति-मोभवेत्। द्वादशाहे (१) पृष्ठाः षडहउत्पन्नः (२) तत्र षष्ठा-मयङ्कां क्रमेण रथन्तर-बृहद्-वैरूप-वैराज-शक्कर-रैवतानि सा-मानि (३) विहितानि (४)। गवामयने (५) तु विकृतिरूपोयः

* "गावामायनिके" इत्युभयपदवृद्धि पाठः गौ पुस्तके।

(१)—द्वादशाहस्रावद् द्विविधः, सवात्मकोऽहीनात्मकश्च; पुनरपि प्रत्येकं द्वेधा समूढोव्यूढश्च. यत्र कामस्यूहनाभावः स आद्यः तदन्योद्वितीयः। इह सवात्मकः ताण्ड्य दशम-तृतीयखण्डादिना विहितः, संवत्सरमाधो ग्राह्यः। तत्र च अहःशब्देन सवन-यथात्मकः सोमयागः, तं द्वादशाह-संज्ञं सोमयागसमष्टिकामोऽत्यतिष्ठदिति स्फुटम्।

(२)—संवत्सरमाध्यस्य यागमात्रस्य द्वौ षडहौ भवतः अभिप्लवः पृष्ठ्येति; तत्र एकस्मिन् मासि आभिप्लविव-षडहाः चत्वारः, पृष्ठ्याः षडहः एकः, इत्थं षडह-पञ्चकैस्त्रिंश-द्दिनानि भवन्ति। स्पष्टमेतत् ताण्ड्य-चतुर्थ-प्रथम-खण्डादौ।

(३)—पृष्ठ्याडहे याः स्तोत्रियाः सामानि च, तेषामसाङ्कर्याय प्रत्यहं विभिन्नानि रूपाणि ताण्ड्य दशमाध्याय-षष्ठ-खण्डानन्तरं षड्भिः खण्डैः प्रदर्शितानि, तदादित्रिभिः स्तोत्रियाणां रूपाणि, ततस्त्रिभिः सामां रूपाणीति विवेकः।

(४)—एतदाकाराः उद्गानस्य प्रथम-पञ्चम-सप्तम-दशम-पञ्चदशाष्टादश संख्य-क गानदर्शनाद्बोध्याः।

(५)—गवामयननामकं सत्रमस्ति, तत्र द्विविधम्; "गावो वा एतत् सत्रमासत तासां दशसु मासु गृह्णाण्यजायन्त"-इत्याद्याख्यायिकया दशमासनिर्वर्त्यम्; तासां द्वादशसु मास्सु गृह्णाणि प्रावर्त्तन्त"-इत्याद्याख्यायिकया द्वादशमासनिर्वर्त्यञ्च; श्रूयते चेतत् समस्तं ताण्ड्य-चतुर्थ-प्रपाठकारम्भ खण्डे। तत्र अहर्नियमस्त्वेवम्—प्रायणी-योऽतिरात्रः प्रथममहः, चतुर्विंशो द्वितीयमहः, उक्थ्यस्तृतीयमहः ज्योतिगा-चतुर्थ-महः, आयुर्गौरिति पञ्चममहः, आयुर्ज्योतिरिति षष्ठाहः. एवमेव षडहः आभिप्लवि-

पृष्ठ्यः षडहः, तत्र श्रूयते— "पृष्ट्याः षडहोबृहद्रथन्तरसाम," इति चोदक-प्राप्तयोः बृहद्रथन्तरयोः पुनर्विधानात् वैरूपादि-निवृत्तिः। ततः शिष्यमाणं बृहद्रथन्तरं सामद्वयं किं प्रत्यहं कर्तव्यम्? किं वा केषुचिदहःसु बृहत्, केषुचिद्रथन्तरम्? इति

कउच्यते; एवं चतुर्भिराभिप्लविकैश्चतुर्विंशत्यहानि भवन्ति, ततः विष्टम्-स्तोम-साध्याः एकाहः पञ्चदशस्तोम-साध्यो द्वितीयाहः, सप्तदश स्तोम-साध्यस्तृतीयमहः, एकविंश स्तोम साध्यश्चतुर्थाहः, विंशव-स्तोम-साध्याः पञ्चमाहः, त्रयस्त्रिंश-स्तोम-साध्याः षष्ठाहः, सोऽयं षडहः पृष्ठ्यउच्यते; पूर्वेविष्टत आभिप्लविकषडहश्चतुर्थैः सहास्यायोगे त्रिंशदहिनात्मकएक मासः सम्पद्यते। द्वितीय-तृतीय-चतुर्थ-पञ्चम-सामास्त्रयस्त्रयस्त्रिंशेव। षष्ठसामस्याद्याष्टादशहिनानि आभिप्लविकषडहवयात्मकानि, उनविंशत्याद्याःपृष्ट्याः षडहः-इति चतुर्विंशतिः, पञ्चविंशतितममहोऽभिजित्, ततस्त्रीणि दिनानि पृथमादि-स्वर-साम त्रय-साध्यानि, उनविंशत्तमाहः प्रायणीयः, त्रिंशत्तमश्चतुर्विंशात्मकम्। इतश्च मध्यस्य पूर्वार्द्धं श्रेष्ठम। उत्तरषण्णामानां पृथमसामस्य पृथममहस्तृतीयस्वरसामसाध्यम्, द्वितीयमहोद्वितीय स्वरसामसाध्यम्, तृतीयमहः पृथम-स्वरसाम-साध्यम्, चतुर्थमहोविश्वजिदाख्यम्, (पञ्चमादीनि षट् दिनानि पृष्ठ्य-संज्ञकानि तव) त्रयस्त्रिंशस्तोमसाध्यं पञ्चममहः, विंशवस्तोमसाध्यं षष्ठमहः, एकविंशस्तोमसाध्यं सप्तममहः, सप्तदशस्तोमसाध्यमष्टममहः, पञ्चदशस्तोमसाध्यं नवममहः, त्रिष्टस्तोमसाध्यं दशममहः, ततोऽभिप्लवा षडहास्त्रयः-इत्येकविंशतिः, उनविंशतममहोऽहानाख्यं, अतिरात्राख्यश्च त्रिंशत्तमम्। द्वितीयादिषु सामचतुष्टये पृथमदिनषटकं पृष्ठ्यषडहः ततः पूर्वोक्त प्रतिलोमेनानुष्ठितास्त्वारः आभिप्लविकाः षडहाः अन्त्यसामस्य तृयोभिप्लविकाः षडहाः पृथमाः, तथाचाष्टादशदिनानि निष्पन्नानि,गौष्टोमसाध्यमुनविंशतितमम्,आयुष्टोम-साध्यं विंशतितमम दंशरात्रस्यदिवसादश इति त्रिंशत्। इतश्चमध्यस्य मध्यमसामसाध्यं श्रेष्ठम्। अनयोर्मासषटकयोः मध्यिष्ठानम अशीत्युत्तरशतदिनान्तरम् अशीत्युत्तरशतदिनापूरकाश्च विद्यमानमहः विष्णुवन्नामकम्, तदिदमेकषष्ट्युत्तर-त्रिशद् दिन निर्वर्त्य गवामयनं सत्रं ताण्ड्यस्य छत्रस्थेन चतुर्थप्रपाठकेन विहितम्; विष्टत्र ततः परः परः। तदयं श्लोकः— 'शतानित्रीणि षष्टिश्च विष्णवांश्च चतुर्थके। प्रोक्तानि सर्वसत्रस्य सत्त्याहानि क्रमादिह'।

संशयः। बृहच्च रथन्तरञ्च बृहद्रथन्तरे ते च सामनी यस्य इति द्वन्द्व-गर्भिते बहुव्रीहावितरेतरयोग-द्वन्द्वे न साहित्यं प्रतीयते, ततः प्रत्यहं सामद्वयम्—इति पूर्वपक्षः। ते सामनी यस्याङ्गः-इ त्यङ्गोय व्यन्यपदार्थत्वं तदा भवदुक्तमेव स्यात्, इह तु षडहोऽन्य पदार्थः; तथासति षडहे द्वयोः साम्नोः साहित्यं सिद्धान्तेऽपि समानम्। प्रकृतौ साम्नोरन्योन्य-निरपेक्षत्वादिहापि निरपेक्षत्वमेव सामचोदकेनातिदिश्यते। तस्मात् केषुचिदहःसु किञ्चित साम-इति राद्धान्तः"॥५३॥ ॥पञ्चमे सर्वपृष्ठे यथोक्तदेशे प्राप्तानि—"किं सर्वपृष्ठे सर्वाणि पृष्ठदेशे यथोक्ति वा। पृष्ठ-शब्दात् पृष्ठ-देशे वचनात् तु व्यव-स्थितिः॥ इदमाम्नायते—'विश्वजित् सर्वपृष्ठः'-इति। षडहे षट्स्वहःसु क्रमेण 'रथन्तरं' 'बृहद्' 'वैरूपम्'-इत्यादिभिः सामभिः पृष्ठ-स्तोत्रं, निष्पादितम् तानि सर्वाण्यपृष्ठ-सामानि यस्मिन् विश्वजिति सोऽयं सर्व-पृष्ठः; तत्र माध्यन्दि न-पवमान-मैत्रावरुणसाम्नोरन्तरालभूते पृष्ठस्तोत्रदेशे किं सर्वाणि पृष्ठ सामानि कार्याणि? किं वा यथावचनं देश-व्यवस्था?-इति संशयः। पृष्ठ-कार्य्यगमकेन पृष्ठ-शब्देन पृष्ठ-देशे प्राप्ते, वचनेन देश-विशेषोव्यवस्थाप्यते, वचनं चैवमाम्नायते—'पवमाने रथन्तरं करोत्यर्भवे बृहन्माध्यन्दिनराणि वैरूपं होतुः पृष्ठं वैराजं ब्रह्म-साम शाक्करं मैत्रावरुणस्य रैवतमच्छावाकस्य'-इति; वचनं हि न्यायाद् बलीयः, तस्माद्देशविशेषो व्यवस्थितः"॥५४॥ ॥षष्ठेवैरूप-वैराजे उक्थ-षोड़शिनोः पृष्ठ-गते—५५"कात्स्न्यार्द् वैरूप-वैराजे उक्थ-षोड़शिनोरुत। पृष्ठे स्यात् क्रतु-संयोगादाद्योन्तः पृष्ठ-लिङ्गतः॥ इदमाम्नायते—'उक्थ्यो वैरूपंसामैकविंशः षोड़शी वैराजसामेति। तत्र

क्रत्वे उक्थे 'वैरूपं' साम, क्रत्वे षोड़शिनि 'वैराजम्' ; 'वैरूपं' साम यस्मिन्नुक्थे क्रतौ—'वैराजं' साम यस्मिन् षोड़शिनि क्रतौ-इत्येवं क्रतु-सम्बन्धः प्रतीतेः। मैवम्। प्रकृतौ रथन्तर-साम बृहत्साम-इत्येवंविधस्य निर्देशस्य पृष्ठ-स्तोत्र-विषयत्व-दर्शनादत्रापि तन्निर्देशेन पृष्ठ-लिङ्गेन पृष्ठ-कार्ये वैरूपं वैराजं च भवितुमर्हति; क्रतु-सम्बन्धस्तयोः पृष्ठ-द्वारेणोपपद्यते"[५५] ॥ ॥ सप्तमे त्रिवृदग्निष्टुति स्तोमएव—[५६]"त्रिवृदग्निष्टुदित्येतत् सर्वत्र स्तोमएव वा। आद्यस्त्रैगुण्य-वाचित्वादन्त्य-स्तोमेऽस्य रूढितः। एवं श्रूयते—'त्रिवृदग्निष्टुदग्निष्टोमः'-इति (१)। किं त्रिवृत्वमग्निष्टुति क्रतौ सर्वेषु साधनेषु संबध्यते? किं वा स्तोम-मात्र-सम्बन्धि तत्? त्रिवृद्रज्जुरित्यादौ त्रिवृच्छब्दस्य त्रैगुण्य वाचित्व-दर्शनादत्रापि क्रतु-साधनेषु या सङ्ख्या श्रूयते सा सर्वा त्रिवृत्वेन विधियते इति प्राप्ते, ब्रूमः यद्यपि त्रिवृच्छब्दोऽवयव प्रसिद्धया लोके त्रैगुण्यं ब्रूते, तथापि वेदे रूढया स्तोम-वाचकः, त्रिवृदबहिष्पवमानः इत्युक्त्वा स्तोत्रियाणां नवानामृचामनुक्रमणेन स्तोम-विषयमेव त्रिवृत्वम्"[५६] ॥ ॥ अष्टमे संसवादौ पृष्ठत्वम् [५७]"संसवादौ हयोरेकं पृष्ठं यद्वा समुच्चितम्। एकं प्रकृतिवद् विश्वजिदन्यत्र चेतरम्। वचनाद् विश्वजित्येते सान्नी द्वे स्तोत्रयोर्द्वयोः। नेहास्ति तत् पृष्ठएव साहित्यं स्यात् पुनर्विधेः॥ इदमाम्नायते—'संसवउभे कुर्यादु, गोसवउभे कुर्यादु, अभिजित्येकाहः उभे बृहद्रथरे कुर्यात्'-इति। किमत्र बृहद्रथन्तरयोरेकं पृष्ठ-स्तुतौ इतरदन्यस्तुतौ स्यात्? किं वा समुच्चितमुभयं पृष्ठ-स्तुतौ? इति

(१)—ताण्ड्यस्य तृतीयपञ्चिकायां षष्ठतः।

संशयः। प्रकृतौ हयोर्विकल्पितत्वादेकस्मिन् प्रयोगे एकस्य पृष्ठत्वा दन्यत्रापि तथात्वं युक्तम्, तथा सत्यवशिष्टं साम सर्वपृष्ठ-विश्व-जिन्नायेन स्तोत्रान्तरे प्रयोक्तव्यम्-इति पूर्वपक्षः। तादृग्वचना भावेनात्र विश्वजिद् वैषम्यात् प्रकृतिवद् विकल्पे सति पुनर्विधान-वैयर्थ्यात् समुच्चयः-इति राद्धान्तः"[५७]॥

सप्तम-पादस्य षोड़शाधिकरणे बृहद्-यव-खादिराः नियताः —[५८]"बृहद्-यव-खादिराश्च * विकल्पानियताउत। विकल्पा श्चोदक-प्राप्तेर्नियताः स्युः पुनर्विधेः॥ क्वचिद् विकृतौ श्रूयते 'बृहत् पृष्ठं भवति'-इति, त्रैधातवीये श्रूयते—'यवमयो मध्यमः'-इति, वाजपेये श्रूयते—'खादिरो यूपोभवति'-इति; तत्र बृहद्रथन्तरयोः व्रीहियवयोः खादिर-वैल्वादीनाञ्च प्रकृतौ विकल्पितत्वादत्रापि चोदकेन विकल्पिता इति चेत् न, पुनर्विधान-वैयर्थ्यात्। परिसंख्या तु दुष्टत्वात् (१) न शंक्या। तस्मान्नियताः। कोद्यन्तरं (२) त्वर्थान्निवर्त्तते"[५८]॥

अष्टम-पादस्य षष्ठाधिकरणे विप्र-गानं (३) विकल्पितम्—[५९] "उन्नेयोब्रह्म-गानस्य निषेधोविहितस्तुतिः। विकल्पितोवा शून्यो

* "बृहद् यवः खादिरश्च" इति पाठः रा० पुस्तके।

(१)—तदुक्तम—"श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाध इत्येवं परिसङ्ख्या निदर्शना"-इति। परिसङ्ख्या-लक्षणन्त्वत्र श्लोके स्फुटम् तथाहि—"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते"-इति।

(२)—रथन्तरस्य पृष्ठत्वेनात्र ग्राह्यत्वं वैल्वादीनां यूपत्वेन च तथात्वमिति यावत्।

(३)—विप्र उद्गाता, तत्कर्तृकं वामदेव्यादि-साम्नां गानम्।

ऽपि वपोत्खेदइव स्तुतिः। विध्यनन्वयतोऽस्तोत्रं ब्रह्मोद्गाता तथा सति। विषयैक्याद् विकल्पोऽत्र षोड़शि-ग्रहवन्मतः। आधाने वामदेव्यादि-साम्नां गानानि विहितानि, आधानं एवेदमपरमाम्नायते— 'उपवीता वा एतस्याग्नयोभवन्ति, यस्या ग्न्याधेये ब्रह्म-सामानि गायति'-इति। उप-शब्दः सामीप्यं ब्रूते, विगताः काल-विलम्बमन्तरेण परैस्त्यक्ताइत्यर्थः। अनया निन्द्यया ब्रह्मणः (१) साम-गान-निषेधउच्यते, म निषेध उद्गातुर्विहितं वामदेव्यादि-साम-गानं स्तौति। नन् ब्रह्मणः सामगानमप्रसक्तं (२) ततस्तन्निषेधोऽत्यन्तमसम्भावित त्वाच्छश-विषाणवत्कूत्यः, न हि वन्ध्या-पुत्रो वा तद्वधो वा सम्भावयितुं शक्यते, तथासति तादृशेन कथं स्तुतिः? इति चेत्-वपोत्खेदवत्, इति ब्रूमः। 'सआत्मनोवपामुदखिदत्' इत्यनेनात्य-न्तासम्भावितार्थेन यथा प्राजापत्यस्य तूपरस्य(३) अजस्य विधिः स्तूयते, तद्वत्- इति प्राप्ते ब्रूमः—नेदं वामदेव्यादि-साम-विधीनां स्तोत्रं भवितुमर्हति, विधीनामनेकत्वेन स्व-स्व-सन्निधि-पठितैरर्थवादैर्निराकांक्षत्वेन च तदन्वयायोगात्। का तत्रास्य-

(१)—ब्रह्मा यज्ञीयऋत्विग्विशेषः, स हि सर्वेषामुद्गातादीनामृत्विजां कार्य-दोषोपशमनकारी सर्वद्रष्टा।

(२)—ब्रह्मणा इदं गायेत-इत्येवं विधे क्वचिदप्यदर्शनात।

(३)—तूपरः शृङ्गहीनः, मत्र° अजातशृङ्गः पतितशृङ्गोवा. तथाहि ताण्ड्य चतुर्थ-प्रपञ्चे "ताः सर्वमन्नाद्यमाप्नुवन्ता एतान्परताः"-इत्यस्यभाष्ये "ताः पतितशृङ्गाः गावः सर्वान्नं-भवमन्नाद्यमदनीयमन्नं प्राप्नुवन, ता गावस्परताः शृङ्गहीनाः दृश्यन्ते" इति।

वाक्यस्य गतिः? इति चेत्, उच्यते—ब्रह्म-शब्दोऽत्र विप्रत्व-जाति-द्वारेणोद्गातारं ब्रूते, यस्य च गानं तस्मिन्निषेधे सति विधि-निषेधाभ्यामेक-विषयाभ्यामुद्गातुर्गानं विकल्प्यते"[५९] ॥

एकादशाध्यायस्य द्वितीय-पादे द्वादशेऽधिकरणे ब्रह्मसाम-न्युत् कर्षः—[६०]"पर्यग्निकरणे त्यागआलभ्योब्रह्म-सामनि। कर्म-शेष निषेधश्च कर्मान्तर-विधिर्भवेत्। किं वोत्कर्षोऽग्निष्टस्य ह्यारण्योक्तिवदादिमः। अदृष्ट-वाक्य-भेदाभ्यां द्रव्याभेदेन चान्तिमः॥ वाजपेये 'सप्तदश-प्राजापत्यान् पशून् सञ्ज्ञपयति'-इति प्रकृत्य श्रूयते—'तान् पर्यग्निकृतानुत्सृजति'-इति, 'ब्रह्म-साम्नालभते'-इति, सप्तदशसु पशुषु पर्यग्निकरणेऽनुष्ठिते सत्युत्तरकाल-भावी कर्मशेषः उत्सर्ग-शब्देन निषिध्यते, अश्वमेधे 'पर्य्यग्नि कृतान् आरण्यानुत्सृजति'-इत्यत्र कर्मशेष-निषेधस्य प्रतिपन्न त्वादत्रापि तथात्वेन सप्तदश पशवः पर्यग्निकरणान्ताः समाप्याः, आलभतिना च ब्रह्मसाम-काले कर्मान्तरम्-इति प्राप्ते, ब्रूमः कर्मान्तर-विधौ सप्तदश-जन्यादृष्टाद् भिन्नं किञ्चिददृष्टं कल्पेत, वाक्यभेदश्च प्राप्नुयात्, किञ्च 'ब्रह्मसाम्नालभते'-इत्यत्र द्रव्य-देवतयोरश्रवणात् न कर्मान्तर-विधिः सम्भवति (१)।

(१)—अत्रेदं तत्त्वम्— शब्दान्तरम् १ अभ्यासः२ सङ्ख्या३ गुणः४ प्रक्रियाः५ नामधेयम्६-इति षट् कर्म-भेद-हेतवः स्वीकुर्वन्ति जैमिनीयाः। तथाहि, जैमिनीये द्वितीय-द्वितीये प्रथमं सूत्रम्—"शब्दान्तरं कर्मभेदः कृतानुवन्धत्वात्"-इति। यजति जुहोति, ददातीत्येवमादयो बहवः क्रियाशब्दाः श्रूयन्ते, तत्र सर्वत्रैव भावयेत्-इति समं प्रतीयते, एवञ्च भावनावाचकत्वांशे एकत्वेऽपि 'कृतानुवन्धत्वात्' यजादि धातु रूपानुवन्धकृतभेदात् शब्दान्तरत्वं स्वीकार्यमेव, सत्येवं कर्मभेदोऽप्यागतः-इति तदर्थः,

तस्मात् पर्यग्निकरणानन्तरमेव कार्यस्य सप्तदश पशूनामालभ्यादि-शेषस्य ब्रह्म-साम-काले उत्कर्षो दिधीयते, तथासति अर्थप्राप्तः, पर्यग्निकरणानन्तर-भावि-कर्म-व्यापारोपरमउत्सर्ग-शब्देनानूद्यते"[१०] (१)॥

मन्त्र-लक्षणमारभ्य ब्रह्मसामोत्कर्ष-पर्यन्तैः पूर्व-मीमांसा गतैः* द्वि-षष्टि-संख्याकैर्विचारैः सामवेदस्य क्रतुषूपयोगो विस्त-

---

* 'जैमिनीयैः'-इति सा० पु० पाठः।

'सोमेन यजेत' 'हिरण्मयेन पात्रेण दक्षिणा दद्यात्' 'दक्षिणानि जुहोति'-इत्यादि तद्दा हरणम्। तदेतन्न्यायेनावक्रमेभेदशङ्का- -अपवादपादगत-विंशतितम-सूत्रानुसारेण च समाधानम्। तद्धि सूत्रम्—"अद्रव्यत्वात् केवले कर्मशेषः स्यात्"-इति। 'केवले' द्रव्यदेवतारहितवाक्ये 'कर्मशेषः स्यात्' कर्मणः उक्तस्य शेषः अनुवादादिरूपः स्वीकार्यो भवति। कुतः? 'अद्रव्यत्वात् (द्रव्यमित्युपलक्षणं देवताया अपि केवले इति सम्बन्धात्) द्रव्यदेवतयोरश्रवणात्-इति तदर्थः। अतएवोक्तम्—'ध्रौवं साधारणं द्रव्यं देवता मान्त्रवर्णिकी। रूपवन्तौ ततो यागौ विधेयौ तेऽथकृत्नयौ'-इति।

(१)—अत्र हि—प्रजापतिर्देवता यस्य पशोः स प्राजापत्यः-इति तद्धितान्तं प्रातिपदिकं व्युत्पाद्य पश्चात् तद्धितान्त-प्रातिपदिकार्थस्य प्रजापतिदेवताविशिष्ट पशोः कर्म-बहुत्वविवक्षायामुत्पन्ने प्रथमे द्वितीयाविभक्ति-बहुवचने, तत्र प्रथमभाविन्या द्वितीयाविभक्तेरेव नावत्तद्धितोत्पत्तिवेलायामन्वयो नास्ति, कुतः पश्चाद्भाविनो बहुवचनस्यान्वयः? एवं सति प्राजापत्येत्यनेन तद्धितान्तप्रातिपदिकेन एकपशुद्रव्य मेकदेवतोपेतं यागस्य रूपं समर्पते, तादृशानां बहुत्वाय बहुवचन; बहुत्वविशेषः सप्तदश इति निर्दिश्यते—तस्मादिह सङ्ख्यया कर्मभेदः। सत्येवमेकस्मिन् पशौ दुष्टे स एवावर्त्यते, न हि पशुः पश्वन्तरमाकाङ्क्षति; अन्यथा एकस्मिन् पशौ दुष्टे क्रतुस्थः पशुगणश्चावर्त्येत तदाद्यर्थमभविष्यत। विचारोऽयं जैमिनीय-द्वितीय-द्वितीय-विंशतितमे सूत्रे (तद्भाष्ये) भाषितं द्रष्टव्यम्।

ष्टीक्रतः (१) । अतः (२) स प्रयोजनवत्वाद्ऋग्वेदादिवदेवावश्यं व्याख्यातव्यः ॥

नन्वस्मिन् सामवेदे ब्राह्मणभागस्य व्याख्यातुं योग्यत्वेऽपि मन्त्रभागस्य न व्याख्यान-योग्यतास्ति, तत्रत्यानां मन्त्राणां गीतिमात्रात्मकत्वात्—न खलु पद-वाक्य-व्यतिरिक्तायां स्वरस्तोभादि-साध्यायां गीतौ क्रिया-कारक-योजनाभिव्यङ्ग्यः कश्चिदर्थोऽस्ति यस्याभिव्यक्तये भवता गीतिर्व्याख्यायेत । यत्तु स्वरादि-लक्षण विशेष-कथनेन गीति-व्याख्यानं तत्पूर्वाचार्यै (३) रेव तत्त लक्षण-मन्त्र ग्रहणेषु सम्पादितम्-इति न तत्र त्वया यतितव्यम्, अतः कथं भवतः मन्त्रभाग-व्याख्यानम् ? अत्रोच्यते--न तावद् गीतिर्निराश्रया, तस्याः ऋच्याश्रितत्वात् ; अतएव छन्दोगा उपनिषद्येवमामनन्ति 'तस्माट्टचधूढं साम गीयते'-इति (४)गीत्याश्रयभूता सेयमृगपि मन्त्रएव, 'तेषामृग्यत्रार्थवशेन

(१) अवेदं वेद्यम् दर्शितानामेषां द्विषष्टिसङ्ख्याक-विचाराणां जैमिनीय न्यायविस्तरादौ च तथा परः परः पाठादर्शनम्, प्रत्युत दृश्यते च तत्र सर्वत्र तेषां बहु-विधविषयक-बहुविचार-व्यवाय कृतं मिथो विभिन्न-देश-संस्थानम् । यदि च क्वचित् क्वचित् चतुर्णां पञ्चानामधिकरणानां वा साहित्यमस्ति, परं न तथा सर्वेषाम्, अध्याय-पादाधिकरण-व्यवायस्य तत्र तत्रात्र च स्फुटदर्शनात् । तथाच सामवेद-कृतु-विषयक-विचार-सङ्ख्या-निर्द्धारणे एवास्य तात्पर्यम्, मन्त्रलक्षणादाब्राह्मसामोत्कर्षमिति कथनं न नैरर्थ्यपरम् ।

(२)—प्रत्यारम्भे एव नन्विति योविचार उपक्रान्तः तमिदानीमुपसंहरति ।

(३)--पुष्पसूत्रकारादिभिः ।

(४)—छान्दोग्य-प्रथमप्रपाठक-षष्ठखण्डे ।

पाद-व्यवस्था'-इति मन्त्र-विशेषत्वेन सूचितत्वात्(१); ऋगात्मकस्य तु मन्त्रस्य क्रियाकारकान्वयाभिव्यङ्ग्योऽर्थो विद्यते, स च क्रत्वनुष्ठान-कालेऽनुस्मर्त्तव्यः—इति ऋग्-व्याख्यानमवश्यं कर्त्तव्यम्"[११]"मन्त्रैरर्थानुस्मरणं तु प्रथमाधायस्य द्वितीयपादे चतुर्थाधिकरणे निर्णीतम्—मन्त्रा उरुप्रथस्वेति किमदृष्टैक-हेतवः। यागेषूत पुरोडाश-प्रथनादेश्च भासकाः। ब्राह्मणे नापि तद्ज्ञानान् मन्त्राः पुरुषैकहेतवः। न तद्-भानस्य दृष्टत्वात् दृष्टं वर मदृष्टतः। उरुप्रथस्वेत्ययं कश्चिन्मन्त्रः, तस्यायमर्थः भो पुरोडाश! त्वं उरु विपुलता यथा भवति तथा प्रसर इति। एवमादयो मन्त्राः यागप्रयोगेषूच्चार्य्यमाणाः अदृष्टमेव जनयन्ति, न त्वर्थ-प्रकाशनाय तदुच्चारणम्, पुरोडाश-ग्रथन-लक्षणस्यार्थस्य ब्राह्मण-वाक्येनापि प्राप्तत्वात् ('उरुप्रथस्वेतिपुरोडाशं प्रथयति' इति हि ब्राह्मण-वाक्यम्) नैतद् युक्तम्, अर्थ प्रत्यायनस्य दृष्ट-प्रयोजनसम्भवे सति केवलादृष्टस्य कल्पयितुमशक्यत्वात् (२)। तस्मात् दृश्यमानार्थानुस्मरणमेव याग-प्रयोगे मन्त्रोच्चारणस्य प्रयोजनम्, ब्राह्मण-वाक्येनार्थानुस्मरण सम्भवे मन्त्रेणैवानुस्मर

(१)—पूर्व मीमांसायां द्वितीय-ग्रथमे मन्त्रविचारप्रक्रमे द्वात्रिंशत्तम सूत्रम्। 'तेषाम्' मन्त्रभागानां यत्र भागे 'अर्थवशेन पादव्यवस्था' विद्यते स ऋगाख्यः; इह ह्यत्र अर्थवशेनेत्यविवक्षितमिति श्वरभाष्ये स्फुटम्, अन्यथा 'अग्निमीळे पुरोहितम्'-इत्यत्र स्यादृत्वम्, अत्र न स्यात् 'अग्निः पूर्वेभिर्ऋषिभिः' इति; तस्माद् यत्र पादरूपता व्यवस्था स मन्त्र ऋगाख्यः इत्येव सारम्।

(२)—तदुक्तम्—'लभ्यमाने फले दृष्टे नादृष्टफलकल्पना'।

णीयमिति योनियमः तस्य दृष्टा*सम्भवात् अदृष्टं प्रयोजनमस्तु"[६१] ॥ अस्मिन्नेवाधिकरणे (१) मतान्तरेण (२) पूर्वोत्तर-पक्षावाह — [६२]"मन्त्रब्राह्मणयोर्यद्वा कलहोविनियोजने। न मन्त्र-लिङ्ग-सिद्धार्थमनुवक्तीतरद् यतः। अस्य मन्त्रस्य लिङ्गेन विनियोगे ब्राह्मण-वाक्यम् अविवक्षितार्थं स्यात्, वाक्येन विनियोगे मन्त्र-लिङ्गं न विवक्ष्येत—इत्युभयोर्विरोधादप्रामाण्यं चोदनायाः-इति पूर्वपक्षः (३)। नायं विरोधः, प्रबलेन लिङ्गेन विनियोग-सिद्धौ वाक्यस्यानुवादकत्वात्-इतिराद्धान्तः"[६२] ॥

(इति ऋत्सूत्रस्य भाष्यस्यावतरणिका समाप्ता)

---

* 'दृष्टार्थो'-इति स० वि० पु० पाठः।

(१)- उरुप्रथस्व इति विषयवाक्यस्यैकादधिकरणैक्यम्।

(२)—आसीत् कथन भट्टरत्नस्यादि-मीमांसा-जीवन-ग्रन्थ-निर्मातुः यागपद्धति-प्रथयितुश्च मीमांसक वरस्य भट्टेति प्रसिद्धस्यान्त वासी कान्यकुब्जो ब्राह्मणः प्रभाकर नामकः गुरु-दत्त-गुरूपाधिकः तस्य मतेनेति यावत्। आलिकनाथीय-प्रकरण पञ्चिकादौ ऋत्सूत्रं तन्मतं स्फुटतरम्।

(३)—प्रमाणाध्यायसङ्गत्या प्रामाण्याप्रामाण्यएव विचारोपयुक्त इति गुरोराशयः।

(१) अर्थानुस्मरणाय व्याख्यातव्याः साम-योनि-भूताः ऋचः संहिता ग्रन्थे (२) छन्दोनामके समाम्नाताः, ताः सर्वाः ऋचः आम्नात-क्रमेणेह व्याख्यायन्ते(३)॥

(४) न च तासां क्रतुषु स्वातन्त्र्येण विनियोगोऽस्ति ब्राह्मणेन सूत्रेण च विनियुक्तानां साम्नामाश्रयतया (५) तदुपयोगात् तस्माद् ऋग्वेद-व्याख्यानद्वैतद्व्याख्याने विशेषेण विनियोगोनान्वेषणीयः (६)। सामान्येन तु विनियोगो यद्यपि ब्रह्मयज्ञ(७)-विषयोऽस्ति तथाप्यसौ कृत्स्नस्य वेदस्यैकएवेति नान्वेषण-प्रयासोऽस्ति(८)। नन्वेवमप्यृचामपि-च्छन्दोदैवतान्यवगन्तव्यानि, अन्यथा प्रत्यवाय-प्रसङ्गात्; तथाच छन्दोगा आमनन्ति— 'यो ह वा अविदितार्षेय-छन्दोदैवत-ब्राह्मणेन याजयति वाध्यापयति वा स्थाणुं

(१)—अथ पूर्व-संहिता-मूल-रूप-छन्दोनामार्चिकमायस्य भाष्यस्यावतरणिका।

(२)—उक्तं पुरस्तात् सामगानां संहितायन्यौ द्वौ, तत्रार्थ इति विवक्षायः।

(३)—अथ तत्र ज्ञातव्य-विषयावाह-न चेत्यादि।

(४)—यदिच विश्वदादि-सामात्मकानामृङ्मात्राणामपि नियोगो दृश्यते, परं न ता ऋचः छन्दोग्रन्थ-पठिताः।

(५)—आश्रयतौमात्रमेवेति भावः।

(६)—परन्तु यथा ऋग्वेदीयानामृत्विजामुपकाराय ऋग्भाष्ये ऋचां प्रत्येकस्य विनियोगो ज्ञापितः, इह तथा अस्मात्सिद्धे इदं गानं तस्य तत्र विनियोग इति सामां विनियोगः कथं न भाषितः -इति निष्प्रत्यूहकल्पः प्रश्न उज्जृम्भते।

(७)—ब्रह्मयज्ञो वेदपारायणः। तथाहि मनुः—

"अध्यापन ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् होमोदैवो बलिर्भौतो नृयज्ञोऽतिथि पूजनम्" (३ अ० ७० श्लो०) 'अध्यापन-शब्देनाध्ययनमपि गृह्यते अपो ऽनं ४अ० श्लो०) इति वक्ष्यमाणत्वात्, अतोऽध्यापनमध्ययनञ्च ब्रह्मयज्ञः" इति तत्र कुल्लूकः।

वर्कति गर्त्त वा पद्यति प्रवामीयते पापीयान् भवति यातया मान्यस्य छन्दांसि भवन्त्यथ यो मन्ते वेद सर्वमायुरेति श्रेयान् भवत्ययातयामान्यस्य छन्दांसि भवन्ति, तस्मादेतानि मन्ते मन्ते विद्यात्'-इति (१)। एवन्तर्हि तासामृचां क्रम-व्यत्यासेन बह्वृचैः (२) अप्यधीयमानत्वात् (३) तदीयानुक्रमणिकोक्तान्यृष्यादीन्यत्रानुसन्धेयानि (४)॥

---

(१)—आर्षेयब्राह्मणस्य प्रथम-प्रथम-खण्डे। छन्दोगदृति तु सामगानां यौगिकं नाम।

(२)—बह्वृच-शब्दः ऋग्वेदपरः, ऋक्परः, तदभिन्नपरश्च तथाचात्र ऋग्वेदीयरिति बोध्यम्।

(३)—स्वकीयसंहितायन्य इति शेषः।

(४)—साम्नां छन्दो नास्ति परमृषिदेवते ऋग्भ्यः प्रविभिन्ने आर्षे यद्दैवतयोर्ब्राह्मणयोर्विज्ञानात् स्वएव, वक्तव्ये च ते भाष्यकारस्य, तद्दमे च कथं नोक्ते? इत्यपि प्रश्नोऽनवद्योऽभ्युपेयोऽभ्युपगम्यवादिभिः।

छन्दआर्चिकः।

अथ प्रथमप्रपाठके प्रथमार्द्धः।

हरिः ओम्।*

(१)आग्नेयमैन्द्रं पावमानमिति काण्ड-त्रयात्मकोयोऽयं छन्दोनामकः संहिता-ग्रन्थः सोऽयमारण्यकेनाध्यायेन षट् सङ्ख्यापूरकेण सह षड्भिरध्यायैरुपेतः (२)।

* वेदाध्ययनाध्यापनारम्भ-सूचकमेतद् वाक्यम्, वैदिक-सम्प्रदाय-सिद्धम्। अध्ययनारम्भावसानयोरोङ्कारोच्चारणं मन्वादि-विहितञ्च, तथाहि— "ब्रह्मणः प्रणवं कुर्य्यादादावन्ते च सर्वदा। "स्रवत्यनोङ्कृतं सर्वं परस्ताच्च विशीर्य्यति"—इति मनुः २अ० ७४ श्लो०।

(१) अथ ग्रन्थमधिकृत्य किञ्चिद् ब्रूते।

(२)—संहिता-लक्षणं त्वेवमुक्तम् नैरुक्त-प्रथमाध्याय चतुर्थ-पादादिखण्डे 'परः सन्निकर्षः संहिता, पद-प्रकृतिः संहिता, पदप्रकृतीनि सर्वचरणानां पार्थदानि'-इति। अत्र भाष्यम् —"परः' प्रकृष्टोयः 'सन्निकर्षः' संधः यः परस्परेण स्वराणां स्वराधिरूढानां व्यञ्जनाञ्च, सा 'संहिता' इत्युच्यते। सा च पुनरियं 'पदप्रकृतिः संहिता' अत्र द्विविधा वर्णयन्ति— पदानां या प्रकृतिः सेयं पद प्रकृतिः संहिता, विकारस्य संहितानोहि पदानि प्रक्रियन्ते, तस्मात् संहितैव प्रकृतिः, विकारः पदानि-इत्येवमेके मन्यन्ते; अपरे पुनः 'पद-प्रकृतिः संहिता' इति पदानि प्रकृतिर्यस्या सेयं पद-प्रकृतिरिति, किं कारणम्? पदान्येव हि संहित्यनया संहिता भवति, तस्मात् पदान्येव प्रकृतिः

तत्र प्रथमे खण्डे(१) याज्ञवल्क्यस्ताः क्रमेणोदाहृत्य(२) व्याख्यायंते ॥

विकारः संहिता-इति। एवञ्च कृत्वा 'पद-प्रकृतीनि सर्वचरणाम् पार्षदानि' सर्वेषां चरणानां सर्वशाखान्तराणामित्यर्थः; किम्? 'पार्षदानि' स्व-चरण-पर्षदेव यैः प्रति-शाखा-नियतमेव यदावयद्वं प्रगृह्य क्रम-संहिता-स्वर-लक्षणमुच्यते तानीमानि 'पार्ष-दानि' प्रातिशाख्यानीत्यर्थः; आह किं तेषाम्? इति, उच्यते—तानि 'पद-प्रकृतीनि पदं येषु संहितायाः प्रकृतित्वेन चिन्त्यते तानीमानि पद-प्रकृतीनि' तेषामपि स एव समयः-इत्यभिप्रायः॥ आह किमुत्तरत्र साधीयः? पदानां प्रकृतित्वम्, संहिताया विकारत्वम्? उत वा विकारत्वम् पदानाम्, प्रकृतित्वं संहितायाः?-इति; उच्यते—संहितायाः प्रकृतित्वं ज्यायः। आह किं कारणम् उच्यते—मन्त्रोच्चाभिव्यज्यमानः पूर्वस्वभावमन्त्रदृग्भः संहितैवाभिव्यज्यते, नपदैः। अतश्च संहितामेनं पूर्वमध्यापय-न्त्यनूचानाः ब्राह्मणा ऋषीयते चाध्येतारः। अपिच यज्ञकर्मणि संहितैव विनि-युज्यन्ते मन्त्राः, न पदैः। यदि हि पदानि प्रकृतिरभविष्यत्, संहिता पदैरेव मन्त्रैरभिव्यज्येत? पदान्येव च पूर्वमध्यापयिष्यन्, ब्राह्मणाः ऋषेयुश्च चाध्येतारः, पदैरेव विनियोक्ष्यन्त मन्त्राः कर्मसु। न त्वेतत् सर्वमस्ति। तस्मात् एतैर्विशेषैः हेतुभिः संहितैव प्रकृतिर्न पदानीति पश्यामः"-इति॥ संहित्य पठिताः यत्र मन्त्राः, सा संहितेति स्फुटार्थः। अस्य हि सामवेदस्य चत्वारः संहिताग्रन्थाः, तत्र वेदसामोह-गाननामकौ गानग्रन्थौ द्वौ मुख्यौ, छन्दउत्तराभिधौ आर्चिकग्रन्थौ द्वौ तदुपजीव्यौ तत्र छन्दोनामके पूर्वार्चिके काण्डत्रयात्मके संहिताग्रन्थे अध्यायाः पञ्च वर्त्तन्ते, आर-ण्याभिधयापरोऽध्यायः क्रोडपत्रमिव च, स षष्ठः; तदयं छन्दो ग्रन्थः षडध्यायात्मकः सम्पन्नः। तत्रात्र प्रथमेऽध्याये यावन्तो मन्त्रा विद्यन्ते ते सर्वे एव अग्निमनुकूलयितुं क्रतुषु नियुज्यन्ते, ततस्तत्समुदायः आग्नेयं काण्डमित्युच्यते, अग्निर्देवता अस्येति विग्रहे 'मास्यदेवता'-इत्यधिकारे 'अग्नेर्ढक्'-इति अग्निशब्दात् ढक्प्रत्यये विहिते तथारूपं तथाविधं शब्दं प्रतिपद्यते: एवं द्वितीयाद्यध्यायत्रयात्मकमैन्द्रं, पञ्चमाध्याया-त्मकं पावमानम्, षष्ठमारण्यकम्, चरणेऽधीयतेऽतएव तस्य तथाविधं नामधेयम।

(१)—प्रथमाध्याये द्वादशखण्डाः सन्ति, तत्र प्रथमे दश ऋचोविद्यन्ते।

(२)—न हि विवरण-ग्रन्थवदिदं मन्त्रप्रतीकमात्र-इदंनमपित्ववकलः तत्तन्मन्त्र-पठ एव यथाक्रममुद्दर्शोभिगन्तॄणां सुखबोधायेति भावः।

अग्नआयाहीत्येषा(१) भरद्वाजेन दृष्टा(२)गायत्री(३) आग्नेयी(४)।

---

(१)—ननु गानग्रन्थारम्भे गायत्रीसामैव श्रुतम्, तदयोन्यृगेव आदौ व्याख्यातुं युक्तमिति चेत्-न, तस्याउत्तरा(६,३.१०,१) श्रुतत्वेन अतत्स्थानत्वात्; गानारम्भे श्रुति स्तु लोकशास्त्रयोरनुशासनादिति ध्येयम।

(२)—भरद्वाजादि नामधेयं पङ्कजादिवद् योगरूढम्। तथाहि—वाजस्यान्नस्य भरणाद् 'भरद्वाजः', यष्टुमस्त्वस्य मेधा प्रिया इति 'प्रियमेधः', भर्जनाद् 'भृगुः' अवेदमस्मि इत्तम—प्रजापतिना आत्मीयं शुक्रमग्नौ हुतम् ततोऽर्चिषि ज्वालायां समङ्गिरर्षिरुत्पन्नः, अपगते तस्मिन्नर्चिषि योऽङ्गारेषु जातः सः 'अङ्गिराः', अवैव अङ्गारेषु जातस्तृतीयः 'अचि', वृतं कर्म महि महत अस्य इति 'महिव्रतः' - इत्येवं नामारूपत्वात् 'विरूपः' इत्यादिकमभिधान-निर्वचनम्। स्फुटमेतत् निरुक्त-तृतीय तृतीयान्ते तद्भाष्ये च। एतदकप्रयोग-फलं भरद्वाजर्षिः साक्षात् पश्यन् ऋग्वेभ्योऽस्या उपदेशं ददौ-इत्यर्थः। तथाहि, निरुक्त-प्रथम षष्ठ-षड्विंशतितमे—'साक्षात कृतधर्माण ऋषयो बभूवुः, तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान सम्प्राहुः' इति। अत्र धर्मपदेन तज्ज्ञानं फलं ग्राह्यं तस्यामूर्तत्वेनादृश्यत्वात्-इति, ऋषन्ति परिणामं पश्यन्ति इति ऋषयः इति च तवैव तद्भाष्ये विवृतम् विस्तारतः। "उच्चावचैरभिप्राये र्ऋषीणां मन्त्रदृष्टयो भवन्ति"-इति निरुक्त सप्तम-प्रथम तृतीयेच। उच्चावचैरित्यस्य कर्मणां स्तुति निन्दास्तुत्यपकृष्टयोधकैरित्यर्थः॥

(३)—गीयन्ते स्तूयन्ते देवता अनयेति गायत्री, तदुक्तम्, नैरुक्त-सप्तम-तृतीय षष्ठे—'गायत्री गायतेः स्तुति कर्मणः' इति। सैषा अष्टाक्षरात्मकै स्त्रिभिः पादैर्निबद्ध-छन्दोविशेषः, तत्परिस्फुटम् छन्दोग्रन्थस्य द्वितीयखण्डे 'छन्दः' इत्यधिकारे 'गायत्र्या-यमवः'-इत्यायुक्तितः, तवैव निरुक्ते 'विगमना' इत्युक्त्या च छन्दस्त्वं चास्याः नियताक्षरादि-सन्निवेश-रूपच्छदनात्, तथाहि तवैव नैरुक्तम् 'छन्दांसि छदनादिति'।

(४)—आग्नेयी, अनया ऋचा अग्निर्देवोपास्य इत्यर्थः। तथाहि, निरुक्त सप्तम-प्रथम-प्रथमे—"यत्कामऋषिर्यस्यां देवतायामार्थपत्यमिच्छन स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति"-इति। आर्थपत्यमर्थपतेर्भावम्, अमुष्य देवतायाः प्रसादेन अहममुष्यास्य पतिर्भविष्यामीत्याकारमित्यर्थः।

मैत्रा प्रथमा।

२ ३ १ २ ३ १ २ ३ २ २ ३ १ २

* अग्न आ याहि वीतये गृणानो हव्यदातये।

१ २ २ २ ३ १ २

नि होता सत्सि बर्हिषि ॥ १ ॥

४ २ २ २ १ २ १

१॥ ओग्ना इ। आयाहोइ वीइतोया२इ। तोया२इ।

१ २ २ २ १ १ २ १ २ १

गृणानोह। व्यदातोया२इ। तोया२इ। ना इहोतासा

हे 'अग्ने' अङ्गनादि-गुण-विशिष्ट! (१)त्वम् 'आयाहि' अस्मद्यज्ञं प्रत्यागच्छ। किमर्थम्? 'वीतये' (२) हविषां चरु-पुरोडाशा-

* इयमेव ऋक् उत्तरार्चिके १,१,४,१,।

॥ इमानिवोणि अग्नआयाहीति प्रकृतायामृचुत्पन्नानि गेय-गानारम्भे एव पठितानि, तत्रहि छन्दःश्रुतास सर्वास्वेव ऋचु यथाक्रममसाम-श्रुतिः। तत्र च क्वचिदेकं क्वचिद्बह्वनिच; तेषां ऋषिनिर्णयं नामकीर्त्तनञ्च आर्षेय-ब्राह्मणान्वेषणेन लभ्यम्। तथाहि— 'गोतमस्य पर्क्कावभितः कश्यस्य बर्हिष्यम्'—इति तदुद्धितोपखण्डारम्भे। तदिदं निष्पन्नम्—अस्यमान्त्रः गोतम-ऋषिः पर्क्क इत्यभिधानम्।

(१), तथाहि नैरुक्तम् "अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्य प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणी र्भवत्यग्रं यज्ञेषु प्रणीयतेऽग्रं नयति मन्यमानोऽग्रोपनो भवतीति स्थौलाष्ठीविर्नक्तोपयति नक्तेहयति, विभ्यै आप्यानेत्यो ज्ञायत इति शाक-पूणिरिताद्दक्षाद् दगधाद्दानोतात् स खल्वे नेरकारमादत्ते गकारगनक्तेर्वा दहतेर्वा नो.. परलस्यैषा भवति। ७-४-१।

(२) "मन्त्रे वृषेषपचमनविदभूवीदाभ्य उदाक्तः (पा०३ ३.९३)"-इति क्विन्।

२३। त्मा२इ। वा२३४ औहोवा। हो२३४षी ॥१॥

२* अग्नआयाहोवी। तयाइ। गृणानोहव्यदाता। २३याइ।
निहोतासत्सिवर्हा२३इषि। वर्हा२इषा२३४औहोवा।
वर्हो३षी२३४५॥२॥१

३† अग्नआयाहि। वायूइतयाइ। गृणा नोहव्यदा-
१ता३ये। निहोता२३४सा। त्मा२३४इवा३। हा२३३
४इषोई३हाइ ॥३॥

दोनां भक्षणाय। कोदृशः सन्? 'गृणानः' अस्माभिः स्तूयमानः (व्यत्ययेन कर्मणि कर्तृ-प्रत्ययः) पुनश्च किमर्थम्? 'हव्यदातये'(१)। देवेभ्योहविः प्रदानाय आगत्य च 'होता' देवानामाह्वाता सन् 'बर्हिषि' आस्तीर्णे दर्भे 'निषत्सि'(२) निषीद-(सदेश्छान्दसः शपोलुक्) (३) ॥१॥

---

* कश्यपऋषिः, बर्हिस्थम्।

† गोतमऋषिः, पर्क्कः।

(१)—"मन्त्रे (३,३,९१) इत्यादिना क्तिनि दातिः सिद्धति।

(२)—"छन्दसिपरेऽपि"-इति छन्दस्यधिकारे व्यवहिताय (१,४,८२,-इति पाणिनिस्मरणात् हौतेति-पद-व्यवहितस्यापि नीत्यस्योपसर्गत्वम्।

(३)—"अदिप्रभृतिभ्यः शपः"-इत्यधिकारे "बहुलं छन्दसि (२,४,३९)"-इति सूत्रात्।

त्वमग्ने-इत्यस्या ऋष्याद्याः पूर्ववत्।

सैषा द्वितीया।

११ ११ १ २ १ १ २ ११
*त्वमग्ने यज्ञानाꣳ होता विश्वेषाꣳ हितः।
११ ११ २ ११ १
देवेभिर्मानुषे जने ॥ २ ॥

४ ५ २ ४२ ५२ ४ ५ ४ २ १ २ २ २ २ २
१† त्वमग्नेयज्ञानाम्। त्वमग्नाइ। यज्ञानांहोता। विश्वेषां
२ २१२ २ ३ २ १ १ २ ४ ५
हाꣳइताः। देवैभाꣳइर्मा। नुषेजना। औ३होवा।
४
होयुइ। डा ॥४॥

हे 'अग्ने' त्वं 'विश्वेषां यज्ञानाम्' अग्निष्टोमाद्यग्निष्टोमादीनां सम्बन्धी 'होता' होम-निष्पादन-शीलः (जुहोतेस्ताच्छीलिकस्तृन्) यद्वा, 'यज्ञानां' यष्टव्यानां 'विश्वेषां' देवानां 'होता' आह्वाता। एवं भूतस्त्वं 'मानुषे' मनोरपत्य-भूते यजमान-लक्षणे 'देवेभिः' देवैः (छान्दसोभिसऐसभावः) देवनशीलैर्ऋत्विभिः 'हितः' निहितः गार्हपत्यादि-रूपे संस्थापितोभवसि। यद्वा। देवैर्देवेन्द्रादिभिरुक्त-लक्षणः सन् यज्ञानां निष्पादनाय यजमाने नियुक्तोसि ॥ २ ॥

---

* इयमेव उत्तरार्चिकस्य ६,३,१४,१।

† विश्वमना ऋषिः, सौपर्णम्।

अग्निन्दूतमित्येषा कण्वपुत्रेण मेधातिथिना दृष्टा,
छन्दोदेवते पूर्ववत्।

मैधा तृतीया।

३ २३१ २ ३ १ २ ३१२
अग्निन्दूतं वृणीमहे होतारं विश्ववेदसम्।
३ २ ३१२ ३१ २
अस्य यज्ञस्य सुक्रतुम् ॥ ३ ॥ ३

५ २ २१२ २२ १२ ३
अग्निन्दूताम्। वृणीमहाइ। होतारा२३०वि।
१२ २ १ २ २ २
श्ववेदसाम्। अस्य या२३ज्ञा। आ। औ३होवा।
१ २ १ २ १
स्यासुक्रतुम्। इडा२३भा३४३। ओ२३४५इ। डा ॥५॥ ३

'दूतम्' देवानां दौत्ये विनियुक्तम् 'अग्निं देवम्' 'वृणीमहे' स्तुतिभिर्हविर्भिः सम्भजामहे [अस्य च दूतत्वं तैत्तिरीयके समाम्नातम्—"अग्निर्वै देवानां दूतआसीदुशनाकाव्योऽसुराणाम्"-इति] कथम्भूतम्? 'होतारं' साधुदेवानामाह्वातारं [ह्वयतेः साधुकारिणि ल्तन्(१), 'बहुलं छन्दसि (६,१,३४)'-इति सम्प्रसारणम्] 'विश्ववेदसं' विश्वानि वेत्तीति विश्ववेदाः, तम्

३-इयमेव उत्तरार्चिकस्य २, १, ६, १।

१ भारद्वाजऋषिः, बृहद्।

(१)—'वाक्येसत्यौशल-तदर्म्म-तत्साधुकारिषु। ल्तन् (३, २, १३४-१३५)'।

अग्निर्वृचाणीत्येषा भरद्वाजेन दृष्टा, छन्दोदेवते पूर्ववत्।
सैषा चतुर्थी।

३ २ ३ १ २ ३ १ २ ३ १ २
अग्निर्वृचाणि जङ्घनद् द्रविणस्युविपन्यया।
१ २ ३ १ २ ३ २
समिद्धः पूक्र आहुतः ॥ ४ ॥ ४

[वेत्तेरसुन् (१)] यद्वा, वेद-इति धन-नाम(२) विश्वं सर्वं वेदो धनं यस्य, तम् ['बहुव्रीहौ विश्वं संज्ञायाम् (६,२,१०६)'-इति(३) पूर्वपदान्तोदात्तत्वम्] 'अस्य' प्रवर्त्तमानस्य यज्ञस्य (४) 'सुक्रतुम्' निष्पादकत्वेन शोभन-कर्माणम्(५) [अथवा क्रतुरिति प्रज्ञा-नाम (६)] शोभन-प्रज्ञं वा। तं त्वां वृणीमहे-इति पूर्वेण सम्बन्धः ॥ ३ ॥ ३

'द्रविणस्युः' द्रविणं धनं (७) स्तोतृणामिच्छन् [छन्दसि परे-

४-इयमेव उत्तरार्चिकस्य ६, २ ७, १ ।

(१)—विदज्ञाने।

(२)—'धन नामान्युत्तराण्यष्टाविंशतिः'-इति नैरुक्तम् १, २, १०। तच्च वदतीति चतुर्थस् निघण्टु द्वितीय-दशम-पाठात्।

(३)—'बहुव्रीहौ प्रकृत्या पूर्वपदम् ६, २, १'-इत्यस्यापवादः।

(४)—'षष्ठी-निर्देशात् परिमाणार्थमिति वाक्यशेषः'-इति विवरणम्।

(५)—'कर्मनामान्युत्तराणि षड्विंशतिः'-इति नै० २, १, १। तच्चैकादशतमम् नि० १, १।

(६)—'प्रज्ञानामान्युत्तराण्येकादश'-इति नै० २, ३, १४। तच्च पञ्चमम् नि० ३, ९।

(७)—नै० २, २, १०। तच्च द्रविणं पञ्चविंशतितमम् नि० २, १०।

५ १ ३ ५२ २ ३
I अग्निर्व॑ त्रा। णा२यि जा२३४ औ॒हो॒वा। घा २ ३
५ २ १ २ १ २३ १ २
४नात्। द्रविणस्युर्विपन्यया२। ओयिसमिद्धा२३: ग्नू।
१ २ १ १ २ १
क्रायाऊतः। इडा२३भा३४३। ओ२३४५इ। डा॥ ६॥

३ २ ३२ ४ ५ ५ ४ ५ १ २ २ ५ २
II अग्निरौ॒हो॒वा हायि। वृ॒त्राणि। जाङ्घ्ना३नात्। औ॒हो
२ १ ३ ५ १ १ २ १ २
३वा३। द्रविणा२३४स्यूः। ओयिवोयिपन्यया २। समायें३।
१ ३ ५ २ २ २ ३ १ १ १ १
धा२:ग्र२३४औ॒हो॒वा। क्रयाऊना२३४५:॥ ७॥

४ ५ २ १२ ३२ २ ३ ५
III ओग्नीः। वृ॒त्राणि जङ्घ्नात्। औ॒हौ॒हो२३४ वा।
२ १ २ १ ३२ २ ३ ५ १ २ १
द्रविणस्युर्विपन्यया। औ॒हौ॒हो२३४वा। समिद्धः शुक्र
३२ २ ३ ५ ४ ५
या। औ॒हौ॒हो२३४वा। हो५नो६हायि॥ ८॥ ४

क्काया॑ कच(२)। प्रा॑ पदिकेभ्यः इच्छायां क्वचि सुगागमः(३)।
यद्वा। हविर्लक्षणं धनं तदात्मनइच्छन्निः 'विपन्यया' [पनतिः

I,II,III चयाणामेषाम् ओम्नर्षम् नाम, ऋषिस्तदनुगतः कल्पाः।

(२)—क्वच्प्रकरणस्य वार्त्तिकमेतत्।

(३)—'दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ३, ४, ३६' इति सूत्रेण। 'क्याच्छन्दसि ३,२, १७०' इति उप्रत्ययश्च।

प्रेष्ठं वइत्येषा उशनसा दृष्टा, छन्दोदेवते पूर्ववत्।
सैषा पञ्चमी।

१२ ३ १२ ३२ ३ १ २ ३ २
प्रेष्ठं वो अतिथिꣳ स्तुषे मित्रमिव प्रियम्।
१२ २ ३ १ र २र
अग्ने रथं न वेद्यम्॥ ५॥ ५

स्तुत्यर्थः (४)] अस्माभिः क्रियमाणया स्तुत्या स्तूयमानः सन्(५) 'वृत्राणि' बलेन जगतामावरकाणि रक्षः प्रभृतीनि, तमांसि वा(६) 'जङ्घनत्' भृशं हन्तु [हन्तेर्यङ्लुगन्ताल्लिङर्थे लेट् (३,४,७)] कीदृशोऽग्निः ? 'समिद्धः' समिदादिभिर्हविर्भिः सम्यग्दीपितः। अतएव 'शुक्रः' दीप्यमानः(७)। 'आहुतः' हविर्भिराहुतः॥ ४॥ ४

हे 'अग्ने'(१)'वः' त्वां [पूजार्थे बहुवचनं(२)] 'स्तुषे'(३)स्तौमि,

---

५-इयमेव उत्तरार्चिकस्य ५, १, १८, १।

(४) -'अर्चति-कर्माणउत्तरं धातवश्चतुश्चत्वारिंशत्'-इति नै ३, ४, १०। तत्रेद षोडशतमम् नि० ३, १४।

(५)--'वि शब्दोवैविध्यार्थः, विविधया स्तुत्या, तृतीया-निर्देशात् स्तुतः सन्निति वाक्यशेषः'-इति विवरणकारः।

(६) -'वृत्राणि शत्रु-कुलानि स्तोतुः यद्वृत्र' इति वि०।

(७) 'शुक्रः शुक्लवर्णः' इति वि०।

(१) 'सम्बुद्ध्येकवचनं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्'—इति वि०।

(२—'एकं वचनं न युञ्जीत गुरावात्मनि चेश्वरे'—इति शासन-मूलकमित्यर्थः. परं नेत्थमत्र सर्वत्र।

(३) स्तुषे नेदं लडात्मनेपद-मध्यमपुरुषैकवचनम्, किन्तर्हि ! पञ्चमस्य

I प्रेष्ठ वाः। अता२३यिथीम्। स्तौषेमित्रम्। दूवप्रा
२३याम्। अग्नायिरा३थाइम्। नावा२३ह्वा३४३यि। दा
२३४योर्ह्वायि॥ ९॥

II प्रेष्ठं वाः। ओह्वायि। अता२३यिथीम्। स्तुषा यि।
मित्रा३म्। दूवा२प्रा२३४याम्। औह्वो३यि। अग्ने
राथा२३म्। ना२३वेइ। दा३४५योर्ह्वा। यि॥ १०॥

III प्रेष्ठं वोह्वाउ। अतिथायिम्। स्तुषेमित्रमिवप्रा२३
याम्। अग्नायेइ। रा२थाइ२३४औह्वो वा। न वेदिया२३४
५म्॥ ११॥ ५

अहमुशनाइति शैषः। कीटृशम्? 'प्रेष्ठं' स्तोतृणामस्माकं धन

I,II,III, त्रयाणामेषामुशना ऋषिः, शैरिषं नाम।

लकारस्यात्मने पदे उत्तमपुरुषैकवचनम्- इति वि०। तथाहि 'सिब्बहुलं लेटि ३. ४, ७५' 'लेटोऽडाटौ ३. ४. ९४' इति मूलद्वयाभ्यां साधनीयम्।

त्वं न इत्येषा सुदीति-पुरुमीढाभ्यां तयोरन्यतरेण वा दृष्टा, छन्दोदेवते पूर्ववत्।

सैषा षष्ठी।

१ २ ३ १ २ २ १ २२३ १२
त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः।
३२ ३१२ २ २
उत द्विषोमर्त्यस्य ॥ ६ ॥ ६

दानेन प्रियतमम्। 'अतिथिं' सर्वैरतिथिवत्पूज्यम्। यद्वा [अत सातत्य-गमने। ऋतन्यञ्जीत्यादिना अतेरिथिन्] सततं देवानां हविः प्रदातुं गच्छन्तम्। 'मित्रमिव' सखायमिव 'प्रियं' स्तोतुः प्रीणन-करं। 'रथं न'(४) रथमिव 'वेद्यं' वेदोधनं धन-हितं लाभ-हेतुं, यथा रथेन धनं लभते, तद्वत्, स्तोत्तारोऽनेन धनं लभन्ते, तादृश-धन-लाभ-कारणम्॥

"अग्ने"-इति छन्दोगानाम्, "अग्निम्"-इति बह्वृचानां पाठः॥ ५ ॥ ५

हे 'अग्ने' त्वं 'नः' अस्मान् 'महोभिः' पूजाभिः महद्भिर्धनैर्वा 'पाहि' रक्ष। कस्याः पाहि? 'विश्वस्याः' बहुविधात् 'अरातेः

६ नास्तोयमुत्तरार्चिके।

(४)—'प्रतिषेधार्थीयः पुरस्तात् * * * उपमार्थीयउपरिष्टात् १,२,६,-इति नवकाशासनादव परस्ताच्छ्रुतस्य न, अन्यः इवार्थः।

५ र २र १र२ १र २ २ १र र २र
I त्वन्नोया ग्ने मह्होभिः। पाह्होयि वी३श्वा। स्या अरातेः।
१ २ १ २ १ २ १ :
उताद्दा१ऽयिषा२ः। मर्त्यस्य। इडा२३भा३४३। ओ३४इ।
डा॥ १२ ॥

४र ५र र ४ ५ ५ २र १ २ २
II त्वान्त्वन्नोअग्नेम। ह्वोई भाई३ः। पाह्वो वीश्वा। औ३ह्वो।
१ २ २ १ २ १ २ - १ २
स्या औ३ह्वो। आरातेः। उताद्दा१ ईषाः२। मर्त्ता२या२३४
५र र २ १ १ १ १
औह्वोवा। स्या२३४५॥ १३ ॥ ६

अदातुः सकाशात् अदानाद्वा (१) पाहि। त्वमेव महदनं दत्वा अदातुरदानाद्वा सकाशाद्रक्षेत्यर्थः। यद्वा महोभिः (२) युक्तस्त्वमिति योज्यम्। 'उत' अपिच। 'द्विषः' द्वेष्टुः 'मर्त्यस्य' मर्त्यात्मकाशात् पाहि अस्मभ्यं बलं दत्त्वेति भावः। अथवा मर्त्यस्य द्विषो द्वेषाद्रक्षेति सम्बन्धः। अरातेरित्यस्य अदानादितिपक्षे तत्रापि मर्त्यस्यादानादिति सम्बन्धनीयम्(३)॥ ६ ॥ ६

I साकमश्वऋषिः, साम्बर्गम्।
II स एव ऋषिः, वार्त्रघ्नम्।

(१)—'अरातिः शत्रुः, स्तोलिङ्गनिर्देशो जात्यपेक्षः, सर्वस्याः शत्रुजातेः सकाशात्' इति वि०।

(२)—'कैः? सामर्थ्यात् पालनैः'-इति वि०।

(३)—विवरणपक्षे तस्मात् प्राक् 'अग्निर्मूर्द्धा (ह०१,१,१,२-उ०७,१,१८,१)'-इत्येषा

एह्यूषिल्वेधा भरद्वाजेन दृष्टा, छन्दोदेवते पूर्ववत्।

सैषा सप्तमी।

२ १ १ २ २ २ ३ १ २ १ २ १ २
एह्य षु ब्रवाणि तेऽग्न इत्थेतरा गिरः।
२ १ १ २ ३ १ २
एभिर्वर्द्धास इन्दुभिः॥ ७॥७

५ २ २ २ ४ २ ५ ५ १ २ २
। एह्यूषू३ ब्रवाणाऽयि तायि। अग्नइत्थेतरागा२
१ २ २ १ १ २ १ ५
गिराः। एभा२यिर्वर्द्धा। सया२३ह्या३४३यि। दू२३४भोऽ
५
ह्यायि॥ १४॥

५ २ २ २ १ ५ २ २ २ २
।। एह्युषु ब्रवो ह्वोणायिनायि। अग्न इत्थेतरा१ऽगी३राः।
२ ३ ५ १ २ १ ५ ५
एभिर्वा२३४र्द्धा। सया२३ह्या३४३यि। द२३४भोऽह्यायि॥
१५॥ ७

हे 'अग्ने' 'एहि' आगच्छ 'ते' तुभ्यं त्वदर्थं 'गिरः' स्तुतीः

---

७ इयमेव उत्तरार्चिकस्य १, १, २१, १।

। ।। अनयोर्वत्सऋषिः, शौनःशेपम् नाम।

व्याख्याता, दृश्या च तत्र यास्कावतरणिका-'अग्निर्मूर्द्धादिवः परापररूपेण व्यवस्थितोऽग्निर्वा ऋचि अग्निः स्तूयते। अग्निर्मूर्द्धा दिव इति मन्त्रः अवत्सो न भवति, 'वत्सो अग्न मच्छोभिरित्यादिरवत्सः, अयमित्यभिनयेन दर्शयति'—इति।

आ ते वत्सइत्येषा कण्वगोत्रेण वत्सेन दृष्टा।
छन्दोदेवते पूर्ववत्।
सैषा अष्टमी।

१ २ ३१ २२ ३ १ २३१ २
आ ते वत्सोमनोयमत्परमाच्चित्सधस्थात्।
३ १ २ ३ २
अग्ने त्वाङ् कामये गिरा ॥ ८ ॥ ८

'इत्था' (१) इत्थमनेन प्रकारेण (२) 'सु' (३) सुष्ठु 'ब्रवाणि' इत्याशास्यते। ताः स्तुतीः शृणुत्वित्यर्थः। 'उ' (४) इत्येताः 'इतराः'(५) असुरैः ता:, स्तुतीः शृणुतिशेषः। [तथाच ब्राह्मणम्— "अग्निरि इतरागिरइत्यसुर्थाच्च वा इतरागिरः" इति] अपि च। आगतस्व 'एभिः' एतैः 'इन्दुभिः' सोमैः 'वर्धाम' वर्धस्व ॥७॥७

'वत्स' 'ते' एतन्नामा ऋषिः 'ते' तव 'मनः' 'परमाच्चित्' उत्-

८ इ यमेव उत्तरार्चिकस्य ४,२,१२,१।

(१)—'इ त्थाः सत्याइत्यर्थः' इति वि०। इत्थंशब्दस्य एव निघण्टु-नृतौ सत्य नामसु पठि तः।

(२)—इ त्थमित्यव्ययस्य छान्दसमलोपे 'निपातस्य च ६. ३. १३६' इति दीर्घरूपम।

(३)—इ मन्त्रे 'षु'-इति 'सुञः ८. ३, १०७'-इति मूर्धण्यं रूपम। एतच्च पादपूरणार्थमेवाच प्रयुङ्क्तमिति विवरणमतम्।

(४) 'उ'-इत्येतच्च पादपूरणे इति वि० मतम।

(५)—इ तराः सत्यतोऽन्याः असत्याः' इति वि०।

५ २ २ १ २ २ १ २ ३ १ २
। आनेवत्मा:। मनोयमत्। परमात्। चित्सधा२३स्थात्।

१ २ ३ ४ ५ ४ ५ १६॥
अग्नायित्वा३ड्का३। मयो वा। गा३५यिरो६च्चायि॥

५ २ ५ २ ५ २ ४ ५ २ १ २ सधस्था
॥ आनेवत्सोमनोयमत्। ऐयाच्चायि। परमाच्चित्

१ २ १ २ २ २ १ २ १ २ १ २ ोदया।
दैया२३च्चोदया। अग्ने त्वाड् कामय ऐया२३च्च

२ २ १ २ १ ३ ४ ५ १ ७॥८
गिरा। इडा२३भा३४३। ओ२३४५इ। डा।

मत्' (१)
शष्टं (२)
। मय्येव

क्षष्टादपि 'मधस्थात्' सहस्थानात् द्युलोकात् (१)'आ य
आ यमयति। केन साधनेन? 'गिरा' स्तुत्या।
प्रत्यक्षकृतम् (४)। हे 'अग्ने' 'त्वां कामये' त्वदीयं मनो
नियक्तामीति प्रार्थये।

"-इति

"त्वाड् कामये" इति छन्दोगाः। "त्वाम् कामये
बह्वृचाः, सुवन्तत्वादवग्रह्य पठन्ति॥ ८॥८

॥ इयोरेवानयोः काण्वऋषिः,
अभिधानन्तु ऋषिनामानुगतमेव कल्प्यम्।

सहसधौ

(१) 'सह तिष्ठन्ति यत्र देवाः सः सधस्थः स्वर्ग उच्यते'-इति वि०।
पर्यायशब्दौ।

लङ्।

(२) 'ङ्दमि लङ् लुङ् लिटः'-इति तृतीयाध्यायीयवचनात् इह लङर्थे
(३) --कृगुतरदलम्।

प्रकाश २।

(४) तिसिधाः ऋचोभवन्ति, परोक्षकृताः १, प्रत्यक्षकृताः २, आध्यात्

त्वामग्नइत्येषा भरद्वाजेन दृष्टा, छन्दोदेवते पूर्ववत्।

सैषा नवमी।

१२६ १२३१ २२३ १२
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत।
१२२ २२ ३ १२
मूर्ध्नो विश्वस्य वाघतः ॥ ८ ॥ ९

५२ २ ५२ ५२ .१ २ २ १ ७
I त्वामग्ने पूष्काद्ऽराधी। आथर्व्वा। नाधिः। अमा२
२ ५ २ ५ २ ५ ४ ५
न्था२३४ता। मू२३४र्द्धी। वा२३४यिश्वा। स्य वो वा।
४ ५
घाऽऽनोद्ऽधायि ॥ १८ ॥ ९

हे 'अग्ने' 'अथर्वा' एतत्संज्ञऋषिः 'त्वां' 'पुष्करादधि' पुष्करे

९ नास्तीयमुत्तरार्चिके।

I वाध्र्यश्विः सुमित्र ऋषिः।

तत्र प्रथमपुरुषादिनिर्देशेन परोक्षार्थेषु नियुक्ता पर्चा, यथा - 'अग्निर्द्यावापृथिवी जजानत्' इति पुरुषाद्वता, इदमेव 'आ ते वर्तमानमो यमत'-इति पूर्वदलक्ष्य। मध्यमादि निर्देशेन यत्र देवः प्रत्यक्षीक्रियतेऽनुद्दिश्यते सा द्वितीया, यथा 'अग्नआयाहि वीतये' इति प्रथमा, इदमेवोत्तरदलक्ष्य। आत्मानमेव स्तोतव्यमधिकृत्य अभिधत्ते तृतीया, यथा— 'अहमिदिवितुष्परि मेधामृतस्य जग्रह। अहं सूर्य इवाजनि। ऋ०२.५,१,८' विवृतमेतत् समस्तम्—नैवात्र तद्धार्थे च मन्त्रम् प्रथम प्रथमार्द्धवर्थे।

सैषा दशमी।

२१ १२३१ २१ १ १२१२ २१
अग्ने विवस्वदाभरास्माभ्यमूतये महे।
३१२ २२ ३१
देवो ह्यसि नो दृशे॥ १०॥ १०

पुष्कर-पर्णे 'निरमन्थत' अरण्योः सकाशादजनयत्। कीदृशात्पुष्करात्? 'मूर्ध्नः' मूर्धवद्वारकात्। 'विश्वस्य' सर्वस्य जगतः 'वाघतः' वाहकात् ["पुष्करपर्णे हि प्रजापतिर्भूमिमप्रथयत् तत् पुष्करपर्णे प्रथयत्"इति श्रुतेः। भूमिश्च सर्वजगताधार-भूतेति पुष्करपर्णस्य सर्व-जगद्धारकत्वम्। अत्र पुष्कर-शब्देन पुष्कर-पर्णमभिधीयते, इत्येतच्च तैत्तिरीयके विस्पष्टमाम्नातम्-"त्वामग्ने पुष्कराद्धीत्याह, पुष्करपर्णे ह्येनमुपश्रुतमविन्दन्त"-इति(१)॥ ९॥९

१० इयमेव उत्तरार्चिकस्य ९,१,६,१।

(१)—विवरणकारस्त्वेवान्यथैव व्याख्याता, तथाहि-"अत्र निदानमाचक्षते—सर्वमिदमम्भसमासीत्, अथ मातरिश्वा वायुः आकाशे सूक्ष्ममग्निमपश्यत् स तम् मथ्नात्। अथर्वा ऋषिः तदेतदुच्यते—हे अग्ने! त्वाम् पुष्करमित्यन्तरिक्षनाम (नि०१,३,१३)। तस्मात्, अधिशब्दश्च 'अधिपरी अनर्थकौ १,४.९२' इति कर्मप्रवचनीयः पादपूरणः। 'निरमन्थत' नितरां मथितवान्। कीदृशात्सकाशात्? उच्यते—'मूर्ध्नः' प्रधानभूतात्। कस्य? उच्यते—'विश्वस्य' सर्वस्य 'वाघतः' ऋत्विङ्नामैतत् (नि०३,१८,३) अग्नेर्नीतमर्थश्चाव दृश्यम् ऋत्विग्योयजमानस्य च, षष्ठीनिर्देशात् अर्थायेति वाक्यशेषः" इति।

४ ४२ ४ ४ १२ ५ ४ ४ ५ २२ २ १
I अग्ने विवस्वदाभरो। वाइ३हायि। अस्मभ्यमूताऽइयायि
२२ १ ५ ६ १ २ २ १ २ :
मघे। ओऽ। वाइ३हायि। ओ ऽ। वाइ३हायि। दायिवोऽ१

पूर्वोक्तासु ऋक्षु बह्वृचानामनुक्रमणिका-ग्रन्थं पर्य्यालोच्य तत्रोक्ता ऋषिछन्दोदेवता योजिताः। एव मुत्तरास्वपि योजनीयाः॥ अग्ने विवस्वदित्येषा तु बह्वृचैर्नाम्नाता, तथाप्यस्याः छन्दोदेवते पूर्ववदिस्यष्टे, ऋषिस्तु वामदेवइति ग्रन्थान्तरादवगतः (*)॥

हे 'अग्ने' त्वम् 'अस्मभ्यम्' अस्माकं (१) 'मघे' मघते रक्षणाय [अव रक्षणे-इति धातोः ऊति-यूति-जूतीति (२) सूत्रेण निपातितं रूपम्] 'विवस्वत्' (३) स्वर्गादि-लोकेषु विशेषेण निवासस्य हेतुभूतमिदं कर्म 'आभर' सम्पादय। [हृ-ग्रहोर्भश्छन्दसीति भत्वम्] 'हि' यस्मात् त्वं 'नः' अस्माकं 'दृशे' दर्शनार्थं 'देवः' द्योतमानः 'असि'। [इन्द्रादयोनास्माभिर्दृश्यन्ते, त्वं तु गार्हप-

I वध्र्यश्वऋषिः अनूपो वा।

(*)—नैगेयादिग्रन्थात्।

(१)—षष्ठ्यर्थे चतुर्थी '२, ३, ६२'-इति कात्यायनवचनम्।

(२)—'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' ३, ३, ९७।

(३)—'विवासनवत्, तमसां विवासनकरम्, किम्वत? सामर्थ्यात् ओणिः' इतिवि०।

३ १ २ २ १ २ २ १
चिया २। ओऽ। वाइचायि। ओऽ। वाइचाइयि। साइयि
३ ४र र २
नाइ३४ औचो वा। दृशेऽ१॥ १८॥ १०

इति प्रथमा दृशति*॥

त्वादिदेशेऽतिद्योतमानः प्रत्यक्षेण दृश्यसे तस्मात्त्वां विशेषेण प्रार्थयामहे-इत्यभिप्रायः॥ १०॥१०

इति सायणाचार्यविरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य प्रथमः खण्डः॥

---

* मूले महीधरेषु षडधिकपुस्तकेषु सर्वत्रैव 'दृशति'-इत्येव पाठः। उदीच्यमुद्रितेऽपि तथैव। विवरणपत्रे 'दृशत्या'-इत्येवम्। सायण-मते तु खण्डइत्येव साधुः। इह मूलानुरोध एवाश्रितः।

अथ द्वितीयखण्डे

मेयं प्रथमा।

(आयुङ्क्ष्वाहिर्ऋषिः) *।

२ २ ३ १ २ ३ १ ४ ३ १ २
नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः।
१ २ ३ १ ३
अमैरमित्रमर्दय॥ १॥ ११

४ ५ २ ४ ५ १ २ १ ३
I नमस्तो। ह्वोग्नायि। ओजसाऽयि। गृणा२न्ता२३४
५ १ ७ १ २ १ ३ ५ २ २
यिदे। वाकृष्टया २ः। अमायेऽः। आ२मा२३४ औह्वोवा।
२ ३ १ १ १ १
त्रमर्दया२३४५॥ १॥ ११

हे 'अग्ने! देव'! 'ते' (१) तुभ्यं 'नमोगृणन्ति' नमस्कार-शब्द-

११ इयमुत्तरार्चिकस्य ८,१,१२,१।
I ऋषिरविदितः संवर्गानाम।

* इत आरभ्य खण्डद्वये भाष्यकृता ऋष्यादिकं नोल्लिखितम्। तत्र छन्दसं देवतायाश्च प्रथमखण्डतो वैलक्षण्याभावादकीर्त्तनं मुख्यर्षिस्मृतम्, परमर्षिनामा प्रकटने कोऽपि हेतुर्नोपलभ्यते; प्रत्युत तत्प्रकाश एव उचितः इति विवरणमूल्य दृष्ट्वेह सर्वत्र वेष्टन-चिह्नान्तर्गतः कृतः।

(१)—षष्ठ्येकवचनमिदं द्वितीयैकवचनस्य स्थाने दृष्टव्यम्-इति वि०।

सैषा द्वितीया।

(वामदेवऋषिः।)

११ २ ३ १० ३ २ ३ १२
दूतं वो विश्ववेदस᳡ हव्यवाहममर्त्यम्।
१ १ ३ २
यजिष्ठमृञ्जसे गिरा॥ २॥ १२

५ २ ४ २ १ ५ २ १ २ १
। I दूता३०वो३ विश्ववेदसाम्। हव्यवाहाम्। अमा२
५ ५ १ २ १ २ २ २ १
र्त्ता२३४ याम्। याजिष्ठम्। हा। जसे३हाये। गिरा।
२ १ ५ ५
औ३होवा। हो३५३ड्। डा॥ २॥ १२

मुच्चारयन्ति। किमर्थम्? 'ओजसे' बलाय (२)। के? 'क्षत्रियाः' मनुष्याः (३) यजमानाः [अतोऽहमपि स्तुत्यामोत्यर्थः] त्वं च 'अमैः' बलैः (४) 'अमित्रं' शत्रम् 'अर्दय' नाशय॥ १॥ ११

हे अग्ने! 'विश्ववेदसं' विश्वं समस्तं वेदोधनं यस्यासौ विश्ववेदाः तम्, सर्वविदं वा। 'हव्यवाहं (५)' देवेभ्योहविषां वोढारम्।

१२ नास्तोयमुत्तरार्चिके।

(२)—ओजइति बलनाममु पठितम्-नि० २, ९, १।

(३)—क्षत्रिरिति मनुष्यनाम, नि० २, ३, ८।

(४) 'रोगैर्भयैर्वा' इति वि०।

(५)—'वहश्च ३, २, १४'-इतिपिवः।

मैधा तृतीया।

(प्रयोगऋषिः)।

१२ १ २ ३ २ १ २ ० २
उप त्वा जामयोगिरोदेवशनीर्हविष्कृतः।
० १२ २ २
वायोरनीके अस्थिरन् ॥ ३ ॥ १३

'अमर्त्यम्' अमरण-धर्माणं 'यजिष्ठम्' अतिशयेन यष्टारं। 'दूतं' देवानाम्। 'वः' त्वां 'गिरा' स्तुति-रूपया वाचा 'ऋञ्जसे' (१) यजमानोऽहं प्रसाधयामि वर्धयामीत्यर्थः [ऋञ्जतिः प्रसाधन-कर्मा (६,२,४)-इति यास्कः (२)॥ २ ॥ १२

हे अग्ने! 'हविष्कृतः'(१)यजमानार्थं 'गिरः'(२)स्तुतयः 'जामयः'(३) स्वमारदव 'देदिशतीः' (४) तव गुणान् दिशन्त्यः 'त्वा' (५) त्वाम्

१३ इयमुत्तरार्चिकस्य ७, २, १४, १।

(१)—'मध्यमपुरुषैकवचनमिदमुत्तमपुरुषस्य स्थाने द्रष्टव्यम्'-इति वि०।

(२)—यास्कोनिरुक्तकारः। निघण्टौ नैगमकाण्डे च पदमृतिः।

(१)—'हविषा याः क्रियन्ते ताः हविष्कृतः, कथम्पुनर्हविषा ताः क्रियन्ते। आज्य हि प्रक्षिप्यमाणो यज्ञोभवति प्रत्यक्षमेतत्'-इति वि०।

(२)—'गिरन्ति भक्षयन्ति हवींषि ताः गिरः भक्षयितव्याः'-इति वि०।

(३)—'जामयः भगिन्यः, काः पुनरत्र भगिन्यः। ज्वालाः'-इति वि०।

(४)—'अत्यर्थं ददत्यः, किं ददत्यः? सामर्थ्याद् धनम्'-इति वि०।

(५)—'त्वा'-इत्येतद् द्वितीयैकवचन षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम्, तव'-इति वि०।

५ र १२र ऽ१ २१ ७ २१ २
। उपत्वाजा। मयो२गि। रञ्ञोयिययू२:। दाधिदोग्र-
र १ २१ ७ २र १र २ ३ २
तिर्हविष्कृ। तञ्ञोऽयिययू२:। वायोरा२३ नी। कया३
४ ५ १ २ १र १ १ १ १
स्याऽ५यिरा६५६न्। अस्वा३गावा२३४५:॥ २२॥ २

५ र र ५र १ २ १
।। उपत्वाजामार्६योगिराः। दाऽयिदिग्र। नाऽयिः।
२ ३ ५ ५र र र र ४ ५ १ २
ह्वी२ष्का२३४त्ताः। वायोरनाद्यायिकाया। स्थायिरा।
३र ५ ४ ५
औच्चो२३४वा। ई डा॥ २३॥ १३

उपतिष्ठन्ते। 'वायो'ः (६) 'अनीके' (७) समीपे त्वां समेधयन्त्यः 'अस्थिरन्' (८) अतिष्ठंश्च॥ ३॥ १३

। आभम्।

।। औष्टीयम्।

(६) -वाति गच्छति 'ज्ञवापाजिमिस्वदिसाधश्यश्यवप' (उ० १, १, १) वायुः। 'वायुर्गत्वा, सर्वयज्ञसामगट्टहान् प्रति गच्छत्विव'-इति वि०।

(७) -'अनीक-शब्दोमुख-वचनः'-इति वि०।

(८) -'छन्दसि लङ्लुङ्लिटः (३, ४, ६)' इति काल-सामान्येलङ्, 'प्रकाशन स्थेणाख्ययोश्च (१. ३. २७)-इति आत्मने पदं व्यत्ययेन भस्य रम्।

सैषा चतुर्थी।

(मधुच्छन्दऋषिः)

१२ ११ २३ २ ३२१२
उप त्वाग्ने दिवे दिवे दोषा वस्तर्धिया वयम्।
२३ १२ ३१२
नमोभरन्तएमसि ॥ ४ ॥ १४

२१ ४२ ५२ १ १ २१२
1 उपात्वा२३ग्नेदिवेदिवायि। दोषा२वास्ता२ः। धिया-
१ १ २१२ २ १
वयम्। नामो२भारा२। तयेमा२३सा३४३यि। ओ२३४
पुङ्। डा ॥ २४ ॥ १४

हे 'अग्ने' 'वयम्' अनुष्ठातारः 'दिवे दिवे' प्रतिदिनं 'दोषावस्तः' (१) रात्रावहनि च 'धिया' बुध्या 'नमोभरन्तः' नमस्कारं सम्पादयन्तः 'उप' समीपे 'त्वा एमसि' त्वामागच्छामः ॥ [उप-शब्दस्य निपात-स्वरः २]। 'त्वामो द्वितीयायाः (८,१,२३)' इति

१४ नास्तीयमुत्तरार्चिके। ४
1 वैश्वामित्रम्।

(१)—'दोषेति रात्रेर्नाम (नि० १, ७, ९) वस्ता आच्छादयित्री, रात्रौ यः स्वेन ज्योतिषा तमांस्याच्छादयति सदोषावस्ता, तस्य सम्बोधनम् हे 'दोषावस्तः'' इति वि०।

(२)—'निपाता आद्युदात्ताः (१, ११)'-इति प्राप्तस्वरम्।

अथ पञ्चमी।

(शुनःशेपऋषिः)।

१२ ३१२ ३२२ ३१२
जराबोध तद्विविड्ढि विशे विश्वे यज्ञियाय।
११ ३१२ ३२
स्तोमꣳरुद्राय दृशीकम् ॥ ५ ॥ १५

युष्मच्छब्दस्यानुदात्तस्वादेशः। दोषा-शब्दोरात्रि-वाची (नि०-१,७,६)। वस्तः-इत्यहर्वाची (नि०१,६,१)। इन्द्रसमासे कार्त्तकौजयादित्वादाद्युदात्तः (३)। सावेकाचइति धियोविभक्तिरुदात्ता (४)। नमः-इति निपातः, (५); यद्वा, नव्विषयस्येत्याद्युदात्तः (६)। भरन्तइत्यत्र शपः पित्वात् (७) शतुर्लसार्वधातुकत्वाच्च (८) अनुदात्तत्वे सति धातु-स्वरः (९) शिष्यते (१०)।

---

१५ इयमुत्तरार्चिकस्य ८, २, ३, १।

(३)—'कार्त्तकौजपादयश्च (६, २, ३७)'-इति प्राग्निरुदयम्।

(४)—'सावेकाचस्तृतीयादि विभक्तिः (६, १, १६८)'-इति पा०।

(५)—तथाच निपातस्वर आद्युदात्तः।

(६)—'नञ्विषयस्यानिसन्तस्य (६, ३)'-इति पा०।

(७)—'शप्यितावनुदात्तौ (३, १, ४)'-इति पा०।

(८)—'नाम्यनुदात्तेङ् ङिदुपदेशाज्जसार्वधातुकमनुदात्तमङ्कितोः (६, १, १८६)'-इति पा०।

(९)—'धातोः (३, १, १६२)'-इति पा०। अन्तोदात्तः स्यात्।

(१०)—'सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः'-इति नियमादिति भावः।

I जारा। बोधा२ बोधा२। तद्विविड्ढायि। विश्ववा
यिश्वे२। यज्ञा२३। याया३४ओहोवा। स्तोमऽ० रुद्राय
दृशीकाम्॥ २५॥

II जराबोधोवा। तादिविड्ढायि। विश्वायिवा२३
यिश्वे। यज्ञियाया। स्तोमाऽ०रुद्रा२३याऽ। दृशीकोइ४५
इ। डा। २६॥ १५

एमसीति 'इदन्तोमसि (७,१,४६)'-इत्यनेन इकारः, 'तिङः-इति (११) निघातः] ॥ ४॥१४

हे 'जराबोध' जरया स्तुत्या बोध्यमानाग्ने! 'विश्वे विश्वे' तत्तद्यजमान-रूप-प्रजानुग्रहार्थं 'यज्ञियाय' यज्ञ-सम्बन्ध्यनुष्ठानसिध्यर्थं 'तद्' देवयजनं 'विविड्ढि' प्रविश। यजमानोपि 'रुद्राय' क्रूरायाग्नये तुभ्यं 'दृशीकं' दर्शनीयं समीचीनं स्तोत्रं करोतीति शेषः।

I, II इे इमे जराबोधीये।

११)—'निङनिङः' ८, १, २८ -इति पा०।

अत्र, यास्कएवं व्याख्यातवान्—"जरास्तुतिः, जरतेः स्तुतिकर्मणः, तद्वद्यतया बोधयितरिति वा तद्विविड्ढि तत्कुरु, मनुष्यस्य यजमानाय स्तोमं रुद्राय दर्शनीयम् इति" (१०,१,८)। जराबोध, 'जृष् वयोहानौ' अत्र तु स्तुत्यर्थः(१)। "षिद्भिदादिभ्योऽङ् (३,३,१०४)" इत्यङ् प्रत्ययः, अतष्टाप् (४,१,४), जरया स्तुत्या बोधयितव्यासौ जराबोधः; यद्वा, जरया बोध्यते इति जराबोधः, कर्मणि (२) आमन्त्रिताद्युदात्तत्वम् (३)। विविड्ढि 'विश् प्रवेशने' लोटोहिः (३,४,८,७), 'बहुलं छन्दसि (२,४,७६)'-इति शपः श्लुः, अभ्यास-हलादिशेषौ (६,१,४।७,४,६०) 'हुझल्भ्यो-हेर्धिः (६,४,८७)' इति हेर्धिरादेशः, षत्व-ष्टुत्वे (८,२,३६।८,४,४१); यद्वा, विष्लृ व्याप्तावित्यस्य लोपे मध्यमैकवचने अभ्यासस्य गुणाभावः। विशे विशे, सावेकाचइति (६,१,१६८) चतुर्थ्याउदात्तत्वम्। 'अनुदात्तञ्च (८,१,३,)-इत्यामेडितानुदात्तत्वम् (४)। यज्ञियाय, 'यज्ञर्त्विग्भ्यां घ-खञौ (५,१,११)'-इति घः। दृशीकम्, अनिदृशोभ्यांचेति कीकन् प्रत्ययः, नित्वादाद्युदात्तः (५)(०)॥५ ॥१५

---

(१)—निघण्टौ तृतीयस्य चतुर्दशे अर्चतिकर्मसु षडनन्तरपाठात्।

(२)—'अकर्तरि च कारके सञ्ज्ञायाम् (३, ३, १९)'-इति सूत्रात्।

(३)—'आमन्त्रितस्य च (६, १, १९८)'-इति सूत्रेण।

(४)—'तस्य परमाम्रेडितम्'-इति ८, १, २।

(५)—'अत्यादेर्नित्यम् (६, १, ११७)'-इति सूत्रात्।

(०)—"अर्चतिचासमाचक्षते—अग्निः ग्लानःश्रेष्ठमुवाच—यद्वं स्तुहि, रौद्रा हि पशवः; स तं प्रत्युवाच—नाहं जानामि यद्वं स्तोतुम्, त्वमेव चैनं स्तुहीति। तदेतदृचा व्याख्यायते।" * * * हे 'जराबोध'! यन्नामवोचः तत्त्वमेव 'विविड्ढि' वेत्थ

अथ षष्ठी।

(मेधातिथिर्ऋषिः)।

२१ १ ५२ १ १ २ १ १ १२
प्रति त्यञ्चारु मध्वरं गोपोथाय प्रहूयसे।
२१ २ १ १ २
मरुद्भिरग्न आ गहि॥ ६ ॥१९

२१ ४२ ५ २२ २ १२ २ १
I प्रतित्या२३ञ्चारुमध्वराम्। गोपोथा। याऽ। प्राऽहूया
५ २१२ १ २२ १ १ ४ ५
२३४साधि। मरुद्भिः। आग्ना आगहा। औ३होवा।
४
होऽ५ इ॥ डा॥ २७॥ १९

१९ नाम्नीयमुत्तरार्चिके। ५

I मारुतम्।

जानामि, नाहम्; अथवा 'विविक्ति' विस्मृत्याप्राप्नित्यस्य रूपम्, अथवा धातुः, वेपदति कर्मतामस्य पाठात् नाम्नां चाख्यातवत्वात्, कर्माणि च करोत्यर्थस्य .सम्भवात् करोत्यर्थोपि आप्नुयर्थ एवेति गम्यते, तत् कुर्वित्यर्थः। किमत्? उच्यते 'यज्ञविशे' मनुष्याणामर्थाय, 'यज्ञियाय' यज्ञसम्पादिनोऽर्थाय 'स्तोमम्' स्तोमम् 'वदाय' 'दृशीकम्' दर्शनीयम्। अथवा रोदन क्रियायोगात् अग्निरेवात्र वद उच्यते, जागर्षीत्यपि जागरणस्य सम्बोधनम्। प्रैषम्। ये महीयाजरालम्' कुरु—किमम्। सर्वं मनुष्याणां यज्ञसम्पादिनः अग्नेरर्थाय स्तोमम्"-इति,वि०।

अथ सप्तमी।

(शुनःशेपऋषिः)।

२ ३ २ ३ १२ २१ २ ३ १ २र
अश्वं न त्वा वारवन्तं वन्दध्याग्निन्नमोभिः ॥
३ १ २ २१ २
सम्राजन्तमध्वराणाम् ॥ ७ ॥ १७

[त्यच्छब्दः सर्वनामस्तच्छब्द-पर्यायः] हे 'अग्ने' योयम् चारुः अङ्ग-वैकल्य-रहितः 'त्यम्' तथा वधं 'चारुम् अध्वरं' 'प्रति' लक्ष्य(१) 'गोपोथाय' सोम-पानाय 'प्र ह्रयसे' प्रकर्षेण त्वं ह्रयसे। तस्मादस्मिन्नध्वरे त्वं मरुद्भिर्देवगणैः सह 'आ गहि' आगच्छ ॥ [सायणभाष्यस्त्वेवं व्याख्याता—"तं प्रति चारुमध्वरं सोमं पानाय प्रह्वयसे सोऽग्निर्मरुद्भिः सहागच्छ"-इति (१०,३,१२) ॥ ६ ॥१६

अध्वराणां यज्ञानां 'सम्राजं तं' सम्राट्स्वरूपंस्वामिनमग्निं त्वां 'नमोभिः' स्तुतिभिः 'वन्दध्यै' वन्दितुम् (१) प्रवृत्ता इति

---

१७ इयमुत्तरार्धिकस्य ८, १, ७, १।

(१)—'प्रतीत्येष लक्षणे कर्मप्रवचनीयः'-इति वि०। 'लक्षणेत्थम्भूताख्यान भागवीप्सासु प्रतिपर्यनवः' १, ४, ९०।

(१)—'तुमर्थे—से, सेन, असे, असेन् क्से, क्सेन्, ध्यै, अध्यै न, कध्यै, कध्यैन, अध्यै, अध्यैन, तवै, तवेङ्, तवेनः (३, ४, ९)'-इति पा०।

१ २ ३र ४ १ २ ३र ४
I आश्वा। औहो२३४वा। नात्वा। औहो२३४वा।
४र५ ४ १२ ३र ४ ४५र
वारंवन्तंवन्दध्या। अग्ना। औहो२३४वा। नमोभिः
४र५ ४ १ २र२ १ ४ ४ ४
सम्राजन्ताम्। आध्वराणाम्। औ२३हो वा। हो५ई।
डा॥ २८॥

४ ५ ४ ४र४र५ ४ २१ र र
II अश्वन्नत्वावारवन्ताम्। वन्दध्या अग्निन्नमोभायिः।
० १र २ २ ३र ४र ५ १३ ४
मम्म्राजम्। तमाध्वरा३औहोवा। दूहा२३४हाइ।
३र ० ० ४र र ०
औहो३१२। या२३४औहोवा। णा३४५म्॥ २९॥

४ र र ४ ५ २ ३ ४ ११
III अश्वन्नत्वाऔहोहायि। वारावा२३४नताम्। वन्दा-
५ १ ० ३र र ५ १३
ध्या२३४हायि। अग्नायिन्नमा३४। औहोवा। दूहा २३४
५ २ ३ ४ २ १र २ १ ७ ६
हायि। उक्तवा२३४भीः। सम्म्राज। न्ता३मध्वरा३४।
३र४७ ५ १ ७ ४ ३र २
औहोवा। दूहा२३४हायि औहो३१२३४। णाम्।
४र ५ ४
एहियाईहा। हो३५दुडा॥ ३०॥ १७

I, II, III अयाणामिवैदां भृगुःशुनःशेपोवा ऋषिः.
वारवन्तीयं नाम।

अथाष्टमी।

(प्रयोगऋषिः)।

२ १ २२ ३ १ २२
और्वभृगुवच्छुचिमग्निमप्नवानवदाहुवे।
३ १ २३ १२
अग्निꣳसमुद्रवाससम् ॥ ८ ॥ १८

शेषः (२)। अग्नेर्दृष्टान्तः 'वारवन्तं' वालयुक्तम् 'अश्वं न' अश्वमिव। अश्वो यथा वालैर्व्यथकान् मशक-मक्षिकादीन् परिहरति तथा त्वमपि ज्वालाभिरस्मद्विरोधिनः परिहरसीत्यर्थः॥ ७ ॥ १७

'समुद्रवाससं' समुद्रमध्य-वर्तिनं वाड़वं (१) 'शुचिं' शुद्धम् अग्निम् 'और्वभृगुवत्' यथा और्वभृगुः 'अप्नवानवत्' यथा अप्नवानः, तथा 'आहुवे' (२) अहमाह्वयामि ॥ ८ ॥ १८

---

१८ नाम्तीयमुत्तरार्चिके। ६

(२)—'इच्छामहे ति वाक्यशेषः'-इति वि०।

(१) 'समुद्रवासस्-अन्तरिक्ष-नाम (नि० १, ३, १५) तत्र निवासोऽस्य स समुद्रवासाः, तं समुद्रवाससम्, अन्तरिक्षनिवासमित्यर्थः; वैद्युतात्मा ह्यसौ तत्र निवसति। अथवा ❀ ❀'-इति वि०।

(२)—'बहुलं छन्दसि (३, १, ३४)'-इति श्नः सम्प्रसारणम्।

५र ४ ३ ५ १ २१
I और्वभृगुवत्। औचथ्यि। शू२३४चीम्। आप्नवान
१ १२१ १ १ १२ १
वदा२ऽहवा२यि। ऊवओयि। अग्मा२यि४ऽसमू२समुओ।
११ १ १११
द्रवाससा३१ऊवा२३४५॥ ३१॥

२५ ४ ५ ४ ४ १ २१
II और्वभृगुवच्छुचिम्। ए५५। भृचीम्। आप्नवान
११ ३३२ २१ ७ २३२ १ २ १
वदा२ऽहवायि। ऊवा२३यि। ऊवए। अग्मायिऽसा३मू।
२१ २३२ १ १ २ २१ २ १ १
समू२३। समूए३। द्रा२वा२३४औचोवा। ससा३मे२३-
११
४५॥ ३२॥ १८

अथ नवमी।

(प्रयोगऋषिः।)

३ १ २३ १ १२३ १ २ ३ १ २
अग्निमिन्धानोमनसाधियऽसचेत मर्त्यः।
३ १ २ ३ १ २
अग्निमिन्धे विवस्वभिः॥ ९॥ १९

I और्व ऋषिः, सामुद्रं समुद्रस्य वासो वा।

II वैधारय ऋषिः, सामुद्रं समुद्रस्य वासो वा।

१९ नास्तोयमुत्तरार्चिके। ७

५ ४ ५ २ ४ ५ २ ५ ३ ४ ५ २
I अग्निमिन्धानोमनसा। धीमँसचे-
२ २८ १ १ १
तसा। हो३ह्वा३। हो२३४र्त्तियाः। अग्नये३म्।
१ ५ २ २१ ३ १११
आयिन्धा२३४ओहोवा। विवस्वभो२३४५ः॥ ३३ ॥ १९

'मर्त्यः' मनुष्योऽग्निमिन्धानः काष्ठैः प्रज्वलयन् मनसा एव श्रद्दधानः 'धियं' कर्म (१) 'सचेत' काले भजेत। 'विवस्वभिः' ऋत्विग्भिश्च (२)अग्निम् एव 'इन्धे' प्रज्वलयति॥

बह्वृचानाम् "ईधे"—इति पाठः॥ ९॥ १९

अथ दशमी।

(वत्सऋषिः।)

३ ३ २ ३ १ २ ३ १ २ ३ १
आदित्प्रत्नस्य रेतसोज्योतिः पश्यन्ति वासरम्।
३ २ ३ ३ १ २ ३ २
परोयदिध्यते दिवि॥ २०॥ २०

I अत्रिऋषिः, असङ्गम्।

२० नास्तीयमुत्तरार्चिके। ८

(१)—धीरिति निघण्टौ द्वितीय-प्रथमे कर्मनामसु त्रिंशत्यनन्तरं पठितम्, तृतीय-नवमे प्रज्ञानामसु च षडनन्तरं पठितम्। "अथवा धीरिति प्रज्ञानाम, तम्, सचेत सम्भजेत लभेतेत्यर्थः"-इति वि०।

(२)—'तमसां विवासयितृभिर्ऋत्विग्भिः' इति वि०।

४२ २४ १२ २
। आदित्प्रत्नाᳬस्य रेतसः। ज्योतिः पश्यन्ति वासा२
१ २१२ १ २ १
राम्। पराया२दिध्यताइ। दिवि। होइ। होइ।
२२१२ २२ १ १ १
औहो औहोवा२३४५हा उ। वा॥ ३४॥ २०

इति द्वितीया दशतिः॥

'परोदिवि' (१) दिवः परस्तात् [व्यत्ययेन सप्तमी (३,४,८८)। बह्वृचानां दिवेति लतोयान्तेन व्यत्ययः, दिवि द्युलोकस्योपरि] 'यद्' यदा अयं वैश्वानरोऽग्निः सूर्यात्मना 'इध्यते' दीप्यते 'आदित्' अनन्तरमेव (२) 'प्रत्नस्य' चिरन्तनस्य 'रेतसः' गन्तुः ['रो' गति-रेषणयोः, असात् 'सरीभ्यां तुट् वेत्यतुसन् तुडागमश्च। यद्वा, रेतसदित्युदकनाम (नि० १,१२,१६) रेतस्विनउदकवतः, सामर्थ्यान्मत्वर्थीलच्यते] इष्टगस्येन्द्रस्य सूर्यात्मनः 'वासरं' (३) नियामकं

। प्रजापतिर्ऋषिः, निधनकामम्।

(१)—'व्यत्ययेन पुंलिङ्गम्, नपुंसकलिङ्गं कर्त्तव्यम्, परमदृश्यते दीप्यते। दिवि द्युलोके' इति वि०।

(२)—'यात्-इत्-द्वावपि पादपूरणौ' इति वि०।

(३)—'वाशब्दः वैविध्ये वर्त्तते, सर इति सर्तेर्गत्यर्थस्य रूपम्, विविधं यद् गच्छति

* इति ग्रामे गेय-गाने प्रथमस्यार्द्धः प्रपाठकः॥

वासरस्य निवास-हेतु भूतं वा 'ज्योतिः' द्योतमानं तेजः 'पश्यन्ति' सर्वे जनाः। [यद्वा वासरमित्यत्यन्तसंयोगे द्वितीया (२,३,५), क्लृप्तमहः उदयप्रभृत्यास्तमयात् ज्योतिः पश्यन्तीत्यर्थः 'दृसुसोः सामर्थ्ये (८,३,४४) इति विसर्जनीयस्य षत्वम्॥१०॥ २०

इति सायणाचार्यविरचिते माधवीये सामवेदार्थप्रकाशे छन्दोग्याख्याने प्रथमस्याध्यायस्य द्वितीयः खण्डः॥

तद् वासरम्; किम्पुनस्तत्? तदेव सूर्याख्यं ज्योतिः, तद्धि दिवा उष्णेन गच्छति रात्रौ शीतेन। ❀❀। अथवा वासरं गमनं तत् करोतीति णिच्, वासरयति वासरयते, अथ वासरं गमयितृ इत्यर्थः; वैद्युतं हि ज्योतिः मेघात् यत् पृथिवीं प्रति उदकं गमयति नयति।—'ये पश्यन्ति जनाः, यच्च वासरम्, यच्च परम् दृश्यते दिवि, तत् पुराणस्योदकस्य सम्भवो'-इति वि०।

अथ तृतीये खण्डे—

मैषा प्रथमा।

(प्रयोगऋषिः)

अग्निं वोवृधन्तमध्वराणां पुरुतमम्॥
अक्षा नप्त्रे सहस्वते॥ १॥ २१

I अग्निंवोवृधान्ताम्। आध्वराणाम्। पुरुतामौ।
होवाइहाइ। आच्छा२नाप्त्रे२३। सहो२३४वा। स्वा-
पुतोईहाइ॥ १॥

II अग्निंवाईए। वृधन्ताम्। अध्वराणाम्। पुरुतम-
मच्छा२होइइ। ना२३प्त्रे। सहास्वा२३४पुनाईपुईइ।
ईई२३४तो॥ २॥

III अग्निंवः। ओहाइ। वृधा२३न्ताम्। अध्वराणाम्।

२१ इयमुत्तरार्चिकस्य ३, १, २०, १।
I, III, II इमानि त्रीण्येव सैन्धुचिह्नानि।

अथ द्वितीया।

भरद्वाजऋषिः।

३ २ ३ १ २ ३ २ ३ २ ३ १ ३ १ २
अग्निस्तिग्मेन शोचिषा यꣳसद्विश्वꣳन्यत्रिणम्।
३ १ २ २ ३
अग्निर्नो वनꣳसते रयिं॥ २॥ २२

१ २ २ ३ ४ ५ १ २ ३
पुरु१त्रा३माम्। अच्छानग्नो१३४त्रा३। मात्रा३त्रा।
१ २ ४ ५ ॥
स्वना। औ३त्रोमा। त्रोयु३। डा॥ ३॥ २१

'अध्वराणाम्' अहिंस्यानां बलिनां 'नमे' बन्धुं 'सहस्वते' बलवन्तं [विभक्ति-व्यत्ययः (१.४.२८) 'द्युक्तम्' ज्वालाभिर्वर्द्धमानम् 'पुरुतमम्' अतिशयेन बहुमन्तिं हे ऋत्विजः! 'वः' युष्मम् 'अक्रां' (१) अभिगच्छत (२)॥ १॥ २१

'अग्निम्' 'अग्नि' 'तिग्मेन' तीक्ष्णेन 'शोचिषा' तेजसा 'विश्वं'

---

२२ नास्तोयमुत्तरार्चिके। ९।

(१)—'निपातस्य च (६, ३, १३६)'-इति दीर्घः।

(२)—'अध्वराणाम्' यज्ञानां 'धनम्' वर्द्धयितारम् 'वः' त्वाम् अग्निम् 'सहस्वते मन्यवे' बलवत्पुत्र-लाभाय 'अक्रं' आगमनाय 'अक्रां' आगमनाय वि०-सायणः।

१ २ ३ ५ २ ३ १ २ ३
। आग्नाओ२३४वा। तिग्मेनाऽग्ना। चाइषाओ२३४
५ १ २ ३ ५ १ २ ३
वा। याऽसाओ२३४वा। वा इऽस्वानिया। चाइणाओ२३४
५ २ १ ४ ३ ३ २
वा। अग्निर्नाऽव ऽसतेरयी१म्॥ ४॥

४ ५ ४ ५ ३ ५ १ २ ३
॥ ओत्ता। ओग्नीं। ता२३४इग्मे। नाग्नोचा३२४
५ १ ३ ५ २ ३ ५
इषा। य ऽसा२दा२३४इस्वाम्। नियत्रा२३४इणाम्।
२ १ ३ १ २ ३ ५ ३ ३ २ ५
अग्निर्नाऽ। वा२ ऽसा२ना२३४ओत्तोवा। रा२३यीम्॥ ५॥

सर्वम् 'अचिग्मं' अत्तारं रात्रसादिकं 'नियंसत्' (१) निहन्तु [बह्वृचा अनुस्वार स्थाने आकारं कृत्वा "यामत्" इति पठन्ति] अपिच 'नः,' अस्मभ्यमग्निः 'रयिं' धनं (२) 'वंसते' ददात्॥

"वंसते"-इति छन्दोगाः। "वनते" इति बह्वृचाः॥ २॥२२

I, II अनयोर्हर इति नाम, ऋषिरविदितः।

(१)—यच्छतेर्लेटि रूपम्।
(२)—निघण्टौ द्वितीय दशमं धननामसु पठितमष्टमम्

अथ तृतीया।

(वामदेवऋषिः)

१२ ३२ ३२ ३ २३१ २३ १२ २२
अग्ने मृड महाँ२ असय३श्चा देव युज्ञनम्।
३१२ ३ २३१२
इयेथ बर्हिरासदम् ॥ ३ ॥ २३

५ ४ ५ ४२ ५ २ ४ ५२ ४ १
III अग्निस्तिग्मेनशोचिषा। दूह्वा। यऽसदिश्वं
१२ १ २ १२ १
न्यत्रिणा२म्। दूह्वा। अग्निर्नावऽसना२इ। दूह्वा३रा२
५ ५
३४योऽहाइ ॥ ६ ॥ २२

१ ७ ३२ ३ ५ १
I अग्राइमृडा२ऽ०। महाँ२ आ२३४सो। अय
२० ३२ ३ ५ १२ ३२
आदा२इ। वयुज्ञा२३४नाम्। इयेथबा२३। हिरा३
५
साप्रदाइपूइम् ॥ ७ ॥

---

२३ नास्तीयमुत्तरार्चिके। १

III दूहवदुवामदेव्यम्।

I यामम्।

२४र २४ ३र ४ ५ ३र २ ४ ५ २४ ३र ४र
॥ अग्नेमृडमहाऽ०असि। ओहा३ओहा। अयआदे-
२४ ५ ३र २ ४ ५ २१र २ ३ २ ४
वयुज्जनम्। ओहा३ओहा। इयेथा२३ब। बिरा ३साधू
दा६धू६म्॥ ८॥ २३

५ र २ ४र४र ४ ५ १ र २ १ ५
। अग्नेरा३ज्ञाणो अ॰हसाः। प्रतिस्मदेवरिषा२३ताः।
१ २ १ र २ १
मपाद्दुष्टा२३दुरा। जरौदा२३हा३४३। ओ२३४५६।
डा॥६॥ २४

हे 'अग्ने'! 'मृड' अस्मान् सुखय। स त्वं 'महान् असि' प्रभूतो भवसि। 'यः' त्वम् 'अयः' गन्ता 'देवयुं' (१)देवानां कामयितारं 'जनं' यजमानं 'बर्हिः' दर्भम् (२)'आसदम्' यज्ञे आसत्तुम् (३) 'आ इयेथ' (४) आगच्छसि॥

"अयः"-इति छन्दोगाः। "ययोम्"-इति बह्वृचाः॥ ३॥२३

॥ इदमपियामम्।

। राज्ञोघ्नम्।

(१)—देवान् यष्टुमिच्छतीति क्यचि 'आच्छन्दसि (३, २, १७०'-इति उः।

(२), (३)—'बर्हिः'—इतीयैकवचनमिदं सप्तम्यै कवचनस्य स्थाने दृष्टव्यम्, बर्हिषि। 'आसदम्'-इदमपि द्वितीयैकवचनं चतुर्थ्यै कवचनस्य स्थाने दृष्टव्यम्. आसदे आसदनायेत्यर्थः'-इति वि०।

(४)—'छन्दसि लङ् लुङ् लिटः (३, ४, ६)'-इति लिट्।

अथ चतुर्थी।

(वसिष्ठऋषिः)

२३ १२ ३ १ २ ३ १२ ३२
अग्ने रक्षा णोअ॒ꣳहसः प्रति स्म देव रीषतः।
१२ ३१२
तपिष्ठैरजरोदह ॥ ४ ॥२४

हे 'अग्ने' ! त्वं 'नः' अस्मान् 'अंहसः' पापात् 'रक्षा' पाहि [संहितायां (१) दीर्घश्छान्दसः(२)] अपिच हे 'देव' द्योतमानाग्ने ! 'अजरः' (३) जरा-रहितस्त्वं 'रीषतः' हिंसतः शत्रून् [संहितायां दीर्घश्छादसः] 'तपिष्ठैः(४)' अतिशयेन तापकैस्तेजोभिः 'प्रति दह स्म' (५) भस्मीकुरु ॥

स्मेति सकारस्य संहितायां 'प्रति स्म" इति षत्वं (६) बह्वृचाः कुर्वन्ति ॥ ४ ॥ २४

२४ नास्तीयमुत्तराचिके ।११

(१)—'अग्ने रक्षाणो' इत्यादौ चक्रपाटे।

(२)—'द्व्यचोतस्तिङः (६, ३, १३५)'-इति सूत्रेण। तथैव रक्षाणइति णत्वमपि 'नश्च धातुस्थोरुषुभ्य ८,४, २७)'-इति छान्दसम।

(३)—'जरा स्तुतिः, मा यस्य कर्म व्यत्ययेन विद्यत (तान् नास्तिकान्)'-इति वि०

(४)—'अन्येषामपि दृश्यते (६, ३, १३७)' इति सूत्रेण।

(५) 'स्म इति पादपूरणः'-इति वि०।

(६)—अनादिष्टस्यापि 'पदपदात् (८, ३, २०६)' इति षत्वम्।

अथपञ्चमी।

(भरद्वाजऋषिः)

१ २ ३ १र २र ३ १ २
अग्ने युङ्क्ष्वा हि ये तवाश्वासोदेव साधवः।
३ १ २ ३ १ २
अर वहंत्याशवः ॥ ५ ॥ २५

५ र २ ४र ५ ४र ५ १ र र र १र २
। अग्ने यू३ऽङ्क्ष्वाहियेतवा। अश्वासोदेवसाधा२३वाः।
१ २ १र १
अरंवा२३हा। तियाशा२३वा३४३:। ओ२३४५६।
डा ॥ १० ॥ २५

हे 'देव' द्योतमान! 'अग्ने!' तानश्वान् 'युङ्क्ष्व' आत्मीये रथे योजय [बहृचास्तैत्तिरीयाश्च विकरण-प्रत्ययस्य लोपं कृत्वा "युक्ष्व" इति पठन्ति] ये 'तव' त्वदीयाः 'साधवः' साधकाः सुशीलावा 'अश्वासः' (१) अश्वाः 'आशवः' शिघ्रगामिनः (२) 'अरम्' अलं पर्याप्तं त्वदीयं रथं 'वहन्ति' (३)॥

२५ इयमुत्तराचिकस्य ६,२,२,१।
। इयमपि राज्ञीयम्।

(१)—'आज्जसेरसुक' (७, १, ५०) इत्यसुकि रूपम।
(२—नि० २, १५, १६।
(३)—अस्माच्चि द्योति पादपूरणार्थः।

अथ षष्ठी।

(वशिष्ठऋषिः)

१ २ ३ १ २ ३ १
नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम्।
३ १ २
सुवीरमग्न आहुत ॥ ६ ॥ २६

५ ४ २ ४ ५ १ ३ १
I नित्वा। क्षोऽइ। न। क्षिया। वाइश्पताइ। द्युम-
२ १ २ ३ ५ ४ २२ १ २२
न्तम्। धाइ। माक्षेवा२३४याम्। सुवाक्षाइ। रामग्ना
१ ५ ४ ५
ऽौ२३वा। क्षोऽूनोऽक्षा इ ॥ ११ ॥ २६

"वक्षन्त्याशवः"-इति क्रुन्दोगाः। "वक्षन्ति मन्यवः"-इति बह्वृचाः ॥ ५ ॥ २५

'नक्ष्य'! उपगन्तव्य! [नक्षतिर्व्याप्ति कर्मा (१)] 'विश्पते' विशां पते! (२) 'आहुत' सर्वैर्यजमानैरभिहुत! हे 'अग्ने!'

---

२६ नास्तोयमुत्तरार्चिके। १.२
I वैश्वमनसम्।

(१)—निघण्टु-द्वितीयाध्याये यज्ञकर्मसु 'नमस्ये २' इति पाठात्।
(२)—निघण्टु-द्वितीय-तृतीये मनुष्यनामसु 'विशः'-इति षष्ठं पदम्।

अथ सप्तमी।

(विरूपऋषिः)

३ २३ २ ३२ ३१२ २२ ३ २ ३२
अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याअयम्।
३१ २२
अपाꣳरेताꣳसि जिन्वति ॥ ७ ॥ २७

५ २२ ५ १ १ १२
। अग्निर्मूर्द्धादीइवःककूत्। पातीइःपार्थी२। विया
१ १ १ २
अयाम्। आपा२ꣳराइता२। सिजिन्वा२३ता३४इ।
१
ओ२३४५इ। डा ॥ १२ ॥ २७

'दामन्तं' दीप्तिमन्तं 'सुवीरं' कल्याण-स्तोत्रकं (१) 'त्वा' त्वां वयं 'नि धीमहे' निहितवन्तः॥

"धीमहे वयम्"-इति छन्दोगाः। "देव धीमहि"-इति बह्वृचाः॥ ६ ॥ २६

'मूर्द्धा' दिनानां श्रेष्ठः 'दिवः' द्युलोकस्य 'ककुत्' उच्छ्रितः

२७ इयमुत्तरार्चिकस्य ७, १, १६, १।

। आर्षेयम्।

(१)—'शोभनाः वीराः पुरुषाः ऋत्विग्भ्याः यस्मिन्यज्ञकर्मणि तस्मिन्शोभनो यस्य स सुवीरः, न सुवीरम्, शोभनैर्वीरैः सम्बद्धमित्यर्थः'-इति वि०।

अथाष्टमी।

(शुनःशेपऋषिः।

३ २ ३ २उ ३ १ २ ३ १ २ ३ १र २र
इममू षु त्वमस्माकꣳसनिं गायत्रं नव्याꣳसम्।
१ २ ३ २ ३ १ २
अग्ने देवेषु प्र वोचः ॥ ८ ॥ २८

५ र २ १ ५ १ १
। इममूषू। त्वमास्मा२३४काम्। सानी२ꣳहोइ।
१ १ २१ ५ १ १
गाया२हो। नव्या२३ꣳसाम्। आग्ने२होइ। दाइ-
१ २१ ३ १
वा२हो। षुप्रावो२३चा३४२ः। ओ२३४५इ। डा ॥ २८॥

'पृथिव्याः' च 'पतिः' 'अयम्' अग्निः 'अपां रेतांसि' (१) स्थावर-जङ्गमात्मकानि भूतानि 'जिन्वति' प्रीणयति ॥ ७ ॥ २७

हे 'अग्ने'! त्वम् 'अस्माकम्' अस्मत्सम्बन्धिनम् ["अस्माभ्यम्"-इति

---

२८ इयमुत्तरार्चिकस्य ७, १, ४, १।
I सोमसाम।

(१) 'अप इत्यन्तरिक्षनाम (नि० १, ३, ८); रेतइत्युदकनाम (नि० १, १२, १६); अन्तरिक्षस्य मध्यस्थेन अन्तरिक्षस्य सारभूताः। अथवा अपां वीर्याणि रेतांसि तानीत्यर्थः। 'जिन्वति' प्रीणयति। कुत एतत्? 'अग्निर्वा इतोवृष्टिं समीरयति' इति श्रुतेः' इति वि०।

अथ नवमी ।

(गोपवनऋषिः) ।

१ २ ३ १२ ३१२ २१

तं त्वा गोपवनोगिरा जनिष्ठदग्ने अङ्गिरः ।

१ २ ३ १ २

सपावक श्रुधी हवम् ॥ ८ ॥ २९

तैत्तिरीयाः] 'इममूषु' (१) पुरोदेशेऽनुष्ठीयमानमपि 'सनिं' हविर्दानं 'नव्यासं' नवतरं ["नवीयांसम्" इति तैत्तिरीयाः] 'गायत्रं' स्तुति-रूपं वचोपि 'देवेषु' देवानम् अग्ने 'प्रवोचः' प्रब्रूहि (२)॥ ८ ॥ २८

हे 'अग्ने' । 'तं' 'त्वा' 'त्वां' 'गोपवनः' ऋषिः 'गिरा' स्तुत्या 'जनिष्ठत्' जनयति वर्धयति [स्तूयमाना हि देवता वर्धन्ते] तादृशाग्ने

२९ नास्तीयमुत्तरार्चिके । १३

(१)—'ऊ षु-इति द्वावपि पादपूरणे'-इति वि० । 'सुञः (८, ३, १७७)' इति षत्वम् ।

(२)—'षणुदाने' तनादिः, तस्य रूपम् । 'छन्दसि वनसनरक्षिमथाम (३, २, ६७)'-इति इनि रूपम् ।

(३)—'पूर्वः छतसिन् यौ च (५, ४, १३२)'-इति य-प्रत्यये नव्यम्, तस्यातिशय्ये 'नव्यांसम्' ; 'देवेषु' देवेभ्यइत्यर्थे । तथाच हे अग्ने ! पूर्वैः छतं नवतरं स्तोत्रम् अस्मद्वृत्तं परोडाग्रादिदानञ्च देवेभ्यः 'प्रवोचः' प्रकर्षेण ज्ञापय-इत्यर्थो वि० मन्यतः ।

(१)—अभिगतावित्यस्य रूपम् । 'अङ्गिरा जाठरोग्निः तस्य सम्बोधनम्, हे अङ्गिरः ! शरीरस्थितिहेतोः ' अभिनयौतरभस्य कर्म ' इत्यर्थः' इति वि० ।

अथ दशमी।

(वामदेवऋषिः)।

२ ३ १ २ ३ २ ३ २ ३ १ २
परि वाजपतिः कविरग्निर्हव्याः न्यक्रमीत्॥
२ ३ १ २ ३ १ २
दधद्रत्नानि दाशुषे॥ १०॥ ३०

५ २ २ १ २ ५ २ १ २ १
। तं त्वागोपा। वानो२गा२३४दूरा। जनाइष्ठदा।
७ २ ५ २ ३ ५ २ १ ३
ग्नया२ङ्गा२३४दूराः। सपौवाओ२३४वा। कौवाओ२३४
५ ४ ४
वा। शृधीयुहवाम्। हो ५३। डा॥ १४॥ २९

'अङ्गिरः' (१) सर्वत्र गन्तः, अस्थिरसां पुत्रो वा हे 'पावक' शोधक! गोपवनस्य 'हवम्' आह्वानं 'शृधि' (२) शृणु॥

"तं त्वा"-इति-"जनिष्ठत्"-इति च छन्दोगाः, "यं त्वा"-इति "जनिष्ठत्"-इति च बह्वृचाः॥ ९॥ २९

---

३० नास्तीयमुत्तरार्चिके। १४

। गोपवनम्।

(१)- [illegible] पूर्वपृष्ठायाम्——(१)

(२)—'शृ शृणु पृ[illegible]दभ्यश्छन्दसि (३. ४, १७२)'-इति सिद्धम्।

ऋचैकादशी।

(कण्वऋषिः।)

२१२ १ १२ १ १२ १ १२
उदु त्यं जातवेदसं देवं वहन्ति केतवः।
१ १२ २ २ १ २
दृशे विश्वाय सूर्यम्॥ ११॥ ३१

४५२ ४ ५ २१ २ १ २ २
I पर्या। ह्वोइवाजा। पताइः का१वी२ः। अग्निर्हव्या
१ ७ १ १ २ ५२ २
नायक्रमीत्। दधात्। रा२त्ना२२४ओह्वावा।
२ २ १ २ १ १ १ १
निदाशुषे२३४५॥ १५॥ ३०॥

'वाजपतिः' वाजानामन्नानां (१) पतिः पालकः [परि वाजपतिः कविरित्येष हि वाजानां पतिरिति ब्राह्मणम्] 'कविः' क्रान्तदर्शी मेधावी वा। 'दाशुषे' हविर्दत्तवते यजमानाय 'रत्नानि' रमणीयानि धनानि 'दधत्' प्रयच्छन् 'अग्निः' 'हव्यानि' हवींष्यपि 'पर्यक्रमीत्' परिक्रामति (४) व्याप्नोतीत्यर्थः॥ १०॥ ३०

३१ नास्तोयमुत्तरार्चिके। १५
I सूर्यवर्चावा वसुरोचिर्वा ऋषिः, सूर्यसाम।

(१)—वाजशब्दस्यान्ननामसु पठितस्य, निघण्टु-द्वितीय-सप्तमं प्रथमानन्तरम्।
(२)—मेधाविनामसु दशमं कविरिति नि० ३, १५।
(३)—'दाशान् शाक्वान् मीढ्वांश्च (६, १, १२) इति शित्वम्।
(४)—'नोतवानित्यर्थः। कमप्रति? सामर्थ्यात्—देवान्' इति वि०।

४ ५ ४ १ ० १ ५
I उदुत्यम। ओ३हाइ। जा। तवे२दा२३४साम्।
२२१ २ ३ ५ १ २ ५ १ २२ १२
देवंवहा। तोकेता२३४वाः। दा२३४र्शंहाइ। वाइश्वायसू।
४ ५ ४
र्यांम्। औ२३हावा। हेयुइ। डा॥ १॥ ३०

इयं सौरी। (१) आग्नेय-समाख्यानं छत्रिणोगच्छन्तीतिवत् (२) प्राणभृतउपदधातीतिवच्च (३) द्रष्टव्यम्(४)॥

I अस्यापि सूर्यवर्चावसुरोचिर्वा ऋषिः, इदमपि सूर्यसाम।

(१)—यद्यपीयं सौरी, तथाप्यग्नेर्वोष्टधन्नमिति खण्डेऽस्मिन् प्रथमादि-मन्त्राणामग्नि-प्रदोपेतत्वात् तस्यैव प्राधान्यात् तत्समवायात् इयमाग्नेयीत्युपचर्यते। तत्र दृष्टान्तमाह—

(२)—लौकिकदृष्टान्तमेतत्। छत्रिसहितसेनासु गच्छत्सु छत्रिणः प्राधान्यस्य समवायात् उपचारात् अप्रधानानां हि सेनानां यथा छत्रिशब्देन ग्रहः तथा अत्रापीत्यर्थः; तदुक्तम्—"तास्थ्यात् तथैव तादर्थ्यात् तत्सामीप्यात्तथैव च। तत्साहचर्य्याच्च तादर्थ्यात् गौणी वै लक्षणा वुधैः"; तत्र चेयमजहत्स्वार्था।

(३)—वैदिक-दृष्टान्तमेतत्। अस्याग्न्याधाने दृष्टकोपधानविधिः तदेवं श्रूयते—"प्राणभृत उपदधाति"; तत्र "अयं पुरोभवस्य प्राणोभौवायनः"-इत्येकस्यैव प्रथमस्यास्य मन्त्रस्य प्राणशब्दोपेतत्वेऽपि "तत्सिद्धि-जाति-सारूप्य-प्रशंसा-भूम-लिङ्ग-समवायात् (१, ४, १९)"-इति जैमिनि-न्यायेनात् प्राण-लिङ्गक-तन्मन्त्र-समवेताः अन्येऽपि प्राणभृच्छब्देन लक्ष्यन्ते, तथा चोक्तम्—"तत्सद्धि जाति-सारूप्य-प्रशंसा-लिङ्ग-भूमभिः। षड्भिः सर्वत्र मन्त्राणां गौणी वृत्तिः प्रकल्पिता" इति।

अथ द्वादशी।

(मेधातिथिर्ऋषिः)

१२ ११ १२ २२ ११२ १२
कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे।
११२ ११ २
देवममीवचातनम् ॥ १२ ॥ ३२

'केतवः' प्रज्ञापकाः (५)सूर्याख्याः [यद्वा, सूर्य-रश्मयः] 'सूर्यम्' सर्वस्य प्रेरकमादित्यम् 'उद्वहन्ति' ऊर्ध्वं वहन्ति' उ' इति पाद-पूरणः। [उक्तञ्च—"मिताक्षरेष्वनर्थकाः कमोमिदिति" (६)] किमर्थम ? 'विश्वाय' विश्वस्मै (७) सर्वस्मै भुवनाय 'दृशे' द्रष्टुं। यथा सर्वे जनाः सूर्यं-पश्यन्ति तथोर्ध्वं वहन्त्योत्यर्थः। कीदृशं सूर्यम् ? 'त्यं' तं प्रसिद्धम्, 'जातवेदसं' जातानां प्राणिनां' वेदितारं, जात-प्रज्ञं, जात-धनं वा, 'देवं' द्योतमानम् [अत्र निरुक्तम्—'उद्वहन्ति जातवेदसं देवमखाः केतवारश्मयोवा सर्वषां भूतानां सन्दर्शनाय सूर्यम् (१२, २, ४)-इति ॥ ११ ॥ (८) ३१

---

३२ नास्तीयमुत्तरार्चिके। १६

(५)—प्रज्ञा-नामसु केतुरिति द्वितीयम् नि० ३.९।

(६)—अथ नैरुक्त-प्रथमाध्याय-द्वितीयपाद-चतुर्दश-खण्डे। मिताक्षरेषु अन्येषु कम्, इम्, इत्, उत्-इति चत्वारः पद पूरणाः-इति तदर्थः।

(७)—'षष्ठ्यर्थे एषा चतुर्थी'-इति वि०।

(८—'एकएवेदं ओति' विश्वा विभक्तुमित्येवमर्थं 'यत्सप्तसप्तिर्यद्धम' इति वि०

अथ त्रयोदशी।

(सिन्धुद्वीपोऽम्बरीषो वा ऋतम्नाम्नो वा ऋषिः)

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
अग्नोदेवीरभिष्टये अग्नोभवन्तु पीतये।
२ ३ १ २
अंयोरभिस्रवन्तुनः॥ १३ ॥ ३३

५ ३ १ १ २ ३ ५ २ २
[कविमग्निमुप३२। स्तु२च्छा२३४औच्छोवा।
१ २ १ २ १ २ २ २ १ २
सत्यधर्माणमध्वरे। देवम्। अमोवचाता२३ना३४३म्।
१
ओ४५३। डा॥ १७ ॥ ३२

हे स्तोतृसङ्घ! (१) 'अध्वरे' क्रतौ 'अग्निम्' 'उपस्तुहि' उपेत्य, स्तुतिङ्कुरु कीदृशम्? 'कविं' मेधाविनं 'सत्य-धर्माणम्' सत्य-वचन-रूपेण धर्मेणोपेतं (२) 'देवं' द्योतमानम् 'अमोवचातनम्' अमोवानां हिंसकानां शत्रुणां वा घातकम्॥ २॥ ३२

---

३३ नास्तीयमुत्तरार्चिके। १७
[वसुरोचिर्ऋषिः, कावम्।

(१)—'अस्मदात्मनश्चायं प्रेषः। हे मदीयान्तरात्मन्!'-इति वि०।
(२)—'सत्यकर्माणम्'-इति वि०।

५ र र २ १ २ ५ र २ १र
I ग्नन्नोदेवीः। अभिष्टा२३या३४इ। ग्नन्नोभवा। तुपी
२ ५ र २ १ १
ना२३या३४इ। ग्नंयोरभी। स्रव। तू२। ना२३४।
५र र ३ ५
औहोवा। ऊ२३४पा॥ १८॥

३ २ १ र ५र र ४ ५ ३ २
II हुवा३हो२३४इ। ग्नन्नोदेवीः। अभिष्टयाइ। हुवा३
१ र ५ ४ र ५ ३ २ १
हो२३४इ। ग्नन्नोभव। तुपीतयाइ। हुवा३हो२३४इ।
र ५ ४ ५ २ २ १ ३ ५र र
ग्नंयोरभि। स्रवन्तुनाः। हुवा३हो२। वा२३४औहोवा।
३ ५
ऊ२३४पा॥ १८॥ ३३

'नः' अस्माकं पापापनोद-हारेण 'ग्नं' सुखं (१) भवन्तु। 'देवीः' दैव्यः आपः 'अभिष्टये' (२) अस्मद्यज्ञाय भवन्तु, यज्ञाङ्गभावाय च भवन्त्वित्यर्थः। अपिच, 'नः' अस्मत्सम्बन्धिने 'पीतये' (३) पानाय च

I, II अनयोः पारावतिर्ऋषिः,
काग्नोतं कापोतं वा सामन्दं वा नाम।

(१)—निघण्टौ सुखनामसु ग्ना द्वादशम (३. ६)।

(२)—'अभिष्टये अभिगमाय, अपांहि किमभिगमनम्। स्नानादिभिर्गतपुनरागमनम् तदर्थम् इति वि०।

(३—'स्थागापापचोभावे (३, ३. १५), इति क्तिनि रूपम्।

अथ चतुर्दशी।

(उशनाऋषिः)

१ २ ३१२ २२ ३ १ २
कस्य नूनं परीणसि धीयोजिन्वसि सत्पते।
१ २ ३ १ २ ३ १ २
गोषाता यस्य ते गिरः॥ १४॥३४

१ २ ३ ३ १ ५ १ २
I कस्यानू१ना२म्। परीणा२३४सी। धियोजिन्वा२।
३ २ ३ ५ १२२२ २ १ १ ३ ५२ २
सिसत्वा२३४ताइ। गोषाताया२३। स्या२ता२३४औह्वो-
२ ३ ५
वा। उप्। गो२३४राः॥ २०॥३३

'शं' सुखंभवन्तु। तथा, 'शम्' (४) उत्पन्नानां रोगाणां शमनम् 'योः' यापनम् अनुत्पन्नानां पृथक्करणं च कुर्वन्तु। अपिच, 'नः' अस्माकम् 'अभि' उपरि स्रवन्तु, अत्यर्थं सिञ्चन्तु॥

"शन्नोभवन्तु"-इति छन्दोगाः। "आपोभवन्तु"-इति बह्वृचाः तैत्तिरीयाश्च॥ ३॥ ३३

---

३४ नास्तोयमुत्तरार्चिके।१८

(४)—'शमनं शम्, यापनं युः अपनयनमित्यर्थः, इ चणेते प्रथमैक वचने चतुर्थ्येक वचनस्य स्थाने दृष्टव्ये; शमनाय, कस्य? सामर्थ्यात् रोगाणाम्; यापनाय, कस्य? सामर्थ्याद् भयानाम् अभित्रस्य'-इति वि०।

२र र १ २१२ ८ ४ २र ३
II औहोइवुऽवा३२इ। हुवए। कस्यनूनाऽमपाऽरोण-
५ २र र १ २१२ ८ ४
सि। औहोइवुऽवा३२इ। हुवए। धियोजिन्वाऽसी

हे 'मत्पते' सतां पते ! अग्ने ! 'नूनम्' इदानीं 'कस्य' कोट्टगस्य जनस्य 'परीणसि ब्रह्मणि (१) 'धियः' कर्माणि (२) 'जिन्वसि' प्रीणयसि। 'यस्य' 'ते' तव सम्बन्धिनः 'गिरः' स्तुतयः 'गोषाता' गोसातौ (३) गवां लाभे भवन्तु खलु। तस्मात्त्वं कुत्र तिष्ठसि ? अस्माकमिदानीं गवेच्छा प्रवर्तते ॥

यद्वा। हे अग्ने ! त्वमिदानीं कस्य कर्माणि प्रीणयसि ? न कस्यापीत्यर्थः। अस्माकमेव कर्माणि प्रीणयेतिभावः (४) ॥

I, II अनयोः गौराङ्गिरसोगोतमोवा ऋषिः, मनाज्यं नाम।

(१)—परीणसीति बहुनामसु निघण्टु-तृतीय-प्रथमेऽष्टमम्।

(२)—धीरिति कर्मनामसु एकविंशतितमम् नि २, १।

(३)—'ऋतियूनीत्यादिना (६, ३, १३) सिद्धम्। 'मनोर्नलोपः (८, ३, १०८)'-इति षत्वम्।

(४)—"कस्मिन् मुख्यनाम (नि ७, १, ३) मत्य मुख्यस्यार्थः। 'नूनं' नियतम्। 'परीणसि' सप्तम्येकवचनमिदं द्वितीयाबहुवचनस्य स्थाने व्यत्ययेन, परीणसः बहूनित्यर्थः। 'धियः' प्रज्ञाः। 'जिन्वसि' प्रीणयसि पूरयसि, प्रज्ञा-मुख्यां पूरयसः मुखिनः करोतीत्यर्थः। 'मत्पते' सतां पालयितः !। कस्य पुनः प्रज्ञा-मुखेन पूरयसि ? उच्यते 'गोषाता यस्य ते गिरः' गो शब्देनात्र मोक्ष उच्यते, माताऽत्रापि मनोतेः मज्ञाजनार्थस्य

१ ३५ २ २ १ २११ २ २ २
३सन्पनाइ। औचोइद्धू३वा३२इ। द्युवए। गोषाताय।

३ २ ४
स्यता३इगापुइरा६५६ः ॥ २१ ॥३४

इति तृतीया दशतिः।

"परीणसि"-इति "सन्पते"-इति च छन्दोगाः; "परिणसः" इति "दस्पते" इति च बह्वृचाः ॥१४॥३४

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोग्याख्याने प्रथमस्याध्यायस्य तृतीयः खण्डः ॥

कृपम, सोमान् याः सम्भजन्ते ताः गोषाताः, सोमानां सम्भङ्क्त्र्यः, सोमैः सह याः क्रियन्ते इत्यर्थः। 'यस्य' यजमानस्य 'ते' तव मम्बन्धिन्यो 'गिरः' स्तुतयः सोमेन सह, ताभिः यस्यां स्तौतीत्यर्थः" इति वि०।

यज्ञायज्ञेति-खण्डेषु त्रिकेष्वष्टौ च विंशतिः।
ऋचोबृहत्य (१) आग्नेय्यस्त्यक्ता तिस्रइमाऋचः॥ १
अधश्मो अधवेत्यैद्री प्रैवित्यृग् ब्रह्मणस्पतेः।
ऊर्ध्वऊषिति यूपस्य तं स्तुतिरग्नेरपोतराः (२)॥ २
समाख्या प्राणभृन्नायादिति पूर्वमुदीरितम् (३)।
तदा तदा ऽभिधास्यन्ते ऋषयः पूर्ववत् क्रमात्॥ ३

अथ चतुर्थ-खण्डे—

सेयं प्रथमा।

प्रयुर्ऋषिः।

३ १ २ ३ १ २ ३ १ २ ३ १ २
यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे।
१ २ ३ १ २ ३ १ २ ३ १ २ ३
प्र प्र वयमृतं जातवेदसं प्रियं मित्रं न शंसिषम्॥ २॥ ३५

---

३५ उत्तरार्चिकस्य १, १, २०, १।

(१)—'बृहती परिवर्धनात्'- इति नै० ७, ३, ८। उक्तं पुरस्तात् 'गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टुभोभवति' तथाच पूर्वार्ता अनुष्टुभेव परिवर्द्धिता बृहती भवतीति तदर्थः।

(२)—यज्ञायज्ञा वोऽग्नये इत्यार्षं खण्डम्, तत्र मिलिता ऋचोदश; एनायोऽग्नि-मित्यादि द्वितीयम्, तत्रापि दश; देवोवोद्रविणोदादिति तृतीयम्, तत्राष्टौ; एवं मिलिता अष्टाविंशत्यृचो द्वयोः, बृहतीच्छन्दस्काः। तत्र एनेति खण्ड-गता 'अधश्मो-अधवेत्यश्मो ऋक्, देवोवोद्रविणोदेति-खण्ड-गता प्रैवित्यिति द्वितीया, ऊर्ध्वऊषिति तृतीया,

I यज्ञायज्ञा। वो अग्नयेऽइ। गिरा२गिरा३४। चा
हो३इ। चादत्ता२३४साऽ। प्रप्रा२वयममृतज्ञा। ता
वे१दामा२म्। प्रियमित्राम्। नशँसिषाम्। एचि-
या। औहोचो२३४५ऽइ। डा॥ २२॥

II यज्ञायज्ञा। चोइ। वो३अग्नयऽ३४चिया। गिरागिरा।
चा२दत्तमाऽ। प्रप्रावयाम्। अमृतज्ञा३। तवे२दा
२३४साम्। प्रियमित्राम्। नशँसिषाम्। एचिया
औहोचो२३४५ऽइ। डा॥ २३॥

हे स्तोतारः 'वः' यूयं 'यज्ञा यज्ञा'(१) यज्ञे यज्ञे सर्वेषु

I, II अनयोः भरद्वाजऋषिः, उपहवम्।

एतास्विमोवर्जयित्वा अवशिष्टाः आग्नेय्यः; तासु च तिसृषु प्रथमा ऐन्द्री, द्वितीया ब्रह्मणस्पति-देवताका, अन्त्या यूपस्य स्तुत्यात्मिकेति-स्फुटार्थः।

(२)—पूर्वम् उदुत्यमित्येकर्चि इत्तमर्गेयाख्यानावसरे।

(१)—'सुपां सुलुक्पूर्वसवर्णाच्छेयाडायाजालः (७, १, ३९)' इति सप्तम्येकस्यालम्। 'नित्यवीप्सयोः (८, १, ४)'-इति वीप्सायां द्विर्वचनम्।

१ २ १ १ २
III याज्ञायाज्ञा२। वो अग्नाया२इ। गाइरागाइरा२।
१ ७ १ १ २
चादृक्षासा२इ। प्रप्रानाया२म्। अमृत ऋजा३।
१ २ ५ १ १ ७
नवे२दा२३४साम्। प्रायस्माइत्वा२म्। नाग्ंसा२३
२ १
इ षा३४३म्। ओ२३४५इ। डा ॥ २४ ॥

यागेषु 'दत्तसे' प्रह्लादाय 'अग्नये' (२) 'गिरा गिरा' स्तुतिरूपया वाचा स्तोत्रं कुरुतेतिशेषः ['च'-शब्दोभिन्नक्रमोवइत्यस्मात्परोद्रष्टव्यः(३)]यूयं च स्तोत्रं कुरुत, वयमपि तमग्निं 'प्र प्र शंसिषम्' ['प्रसमुपोदः पादपूरणे (८,१,६०)'-इति प्र-शब्दस्य द्विरुक्तिः पादपूरणार्था। व्यत्ययेनैकवचनं (३,४,८८)। छान्दसोलुट् (४) प्रशंसामः] कीदृशम्? 'अमृतं' मरणरहितम्। 'जातवेदसं' जातानां वेदितारं जात-प्रज्ञानं जात-धनं वा। 'मित्रं न' सखि-

---

III भरद्वाजऋषिः, अग्नीष्टोमौ।

(२)—'क्रियार्थोपपदस्य च कर्मणि स्थानिनः (२, ३, १४)'-इति कर्मणि चतुर्थी तथाचाग्निमनुकूलयितुमित्यर्थः।

(३)—'च-शब्दः समुच्चयादेरर्थस्यासम्भवात् पादपूरणः'-इति षि०।

(४) 'छन्दसि लुङ्लङ्लिटः (३, ४, ६)' भालपथाभ्यां मस्यङ्मसकालेष्वेते।

४ ३ ४ २ ४ ५ १ २ २
IV यज्ञाऽऽयज्ञ्य। ज्ञाऽवोऽग्नायाऽइ। गाऽइरागिरा। चा
१ २ २ १ ८ ऽ १ २ १ १
ऽदाऽत्ताऽऽसाऽइ। प्रप्रा२वयममृतम्। जाताऽऽवा। ऊ-
१ २ १ ३ २
म्माऽइ। दाऽऽसाम्। प्रायम्मित्रन्नशा२ऽऽसिषा उ। वा
१ १ १
३४५॥ २५॥ ३५

भूतमिव प्रियमनुकूलम्। [यङा व्यत्ययेन त्वमित्यस्य वसादेशः (३,४,९८)। अग्नयइति च कर्म्मणि चतुर्थी, क्रिया-ग्रहणमपि-कर्त्तव्यम्, इति कर्म्मणः सम्प्रदानत्वात्। च शब्दश्च णिति (५) निपातयेदर्थे वर्त्तते। दत्तसइति दत्तेर्ह्वदि-कर्म्मणः अन्तर्भावित-ण्यर्थाल्लटि रूपम्। 'चण्-योगान्निपातैर्यदादिहन्त'-इति निघात-प्रतिषेधः (६)। तत्रायमर्थः—हे स्तोतस्त्वं यज्ञे इममग्निं गिरा स्तुत्वा दत्तसे च वर्द्धयसि चेत् वयमपि अमृतत्वादि-गुणकं तं प्रशंसामः(७) ॥१॥ ३५॥

IV भरद्वाजऋषिः, यज्ञायज्ञीयम्।

(५)—णकारानुबन्धोपनोयः सर्वाचगृह्यते इतिभावः।

(६)—'तिङतिङः (८,१,२८)'-इति निघाते प्राप्ते 'निपातैर्यदयदिहन्तकुविन्नेच्चण् कचिद्ययद्यद्धम् (८,१,३०)'-इति निषेधइत्यर्थः।

(७)—'अमृतं', 'जातवेदसं', 'दत्तसे' बलवन्तं 'वः' त्वाम् 'अग्नये' अग्निम् यज्ञे यज्ञे प्रियमिवप्रिय 'गिरा प्रशंसिषम्' स्तुत्यामित्याभाषार्थे-इति वि० सम्मतोऽर्थः।

अथ द्वितीया।

भर्गऋषिः।

३ १ २ ३१२ ३ २ २ ३१२
पाहि नो अग्नएकया पाह्यू३त द्वितीयया।
३ २ ३ २ ३१२ ३ १ २३१२
पाहि गोर्भिस्तिसृभिरूर्जाम्यतेपाहि चतसृभिर्वसो॥२॥३६

५र २ ४ ५ ५र ५ १ २ १ १
। पाहिनो३अग्नएकया। पाह्ययुत। द्वितायाया१या२।
१ १र र १ २ १ २
पाहिगोर्भिस्तिसृभिः। ऊर्जाम्या१ता२इ। पाहिचतो
१ २ २ १ २ १
३। रो३वा। सृभिर्वा२३सा३४३उ। ओ२३४५इ।
डा॥ २६॥

हे 'अग्ने!' 'नः' अस्मान् 'एकया' (१) ऋचा गिरा 'पाहि' रक्ष। 'उत' अपिच। 'द्वितीयया' (२) ऋचा 'पाहि' पालय। 'तिसृभिः'

---

३६ उत्तरार्चिकस्य ७, २, ४, १।

[भरद्वाजऋषिः, कार्त्स्यग्नम्।

(१)—ऋग्लक्षणया, तृतीयानिर्देशात् स्तुतः सन्निति वाक्यशेषः'-इति वि०।

(२)—यजुर्लक्षणया'-इति वि०।

५र र र ५ २र १ २ १
II पाहिनोऽग्नएकयाऽए। पा। हो३। उ। ता।
२ १ २ २ १र ३ ५ १ २ र
हिनायाऽया। पाहो२३गा२३४इभीः। ताइहभीः। ऊ
१ २ ३र र ५ १ ५ २ १ २
र्जाम्याता। औहौहो२३४वा। पा२३४हिहाइ। चताहभा।
३र र ५ १ ऽ ५र ५ ४
औहौहो२३४वा। वा२३४सा उ। एहियाऽहा। हो५इ।
डा ॥ २७ ॥

४र ३ ४र ५ र ३ २ १ ५ र
III पाहिनो अग्नए। कयाऽ। पा२३४। हियुनहिनो।
४ ५ ४र ३ ४र ३ ४ ३ ४ ५र र ३ २ २र
याया। पाहिगोभिस्तिहभिरूर्जाम्। पाऽताइ। पाहो
३ २ ५र ४ ५ १ २ र १ १ १ १ १
इचाऽताऽ४। हा ओवा। हभिर्वसो। उपा२३४५॥२२॥२९

'गोभिः' (३) स्तुतिभिः 'ऊर्जाम्' अन्नानां (४) बलानां (५) वा

II भरद्वाजऋषिः, नार्मेधम्।

III भरद्वाजऋषिः, कार्त्तयेशम्।

(३)—'ऋग्-यजुः-साम-लक्षणाभिः'-इति वि०।

(४)—निघण्टौ २, ७, सप्तदशानन्तरं पठितम् ऊर्क्-इति।

(५)—निघण्टौ द्वितीय-नवमे चैकविंशतितमसूचितम्।

अथ तृतीया।

शंयुऋषिः *।

३१२ ३१२ ३१२ ३१२
बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा। भरद्वाजे
३१२ ३१२
समिधानोयविष्ठ रेवत्पावक दीदिहि ॥१॥ ३७

हे 'पते!' स्वामिन्! तथा 'पाहि'। हे 'वसो!' (१) वासक! अग्ने! 'चतसृभिः' (२) गीर्भिः 'पाहि' ॥ २ ॥ ३६

हे 'देव!' दानादि-गुण-युक्त! 'यविष्ठ' युवतम! 'पावक' शोधक! अग्ने! 'शुक्रेण' निर्मलेन 'शोचिषा' तेजसा 'भरद्वाजे'

---

३७ नास्तोयमुत्तरार्चिके। १६

(१)—'लुप्तमत्वर्थञ्चैतद् द्रष्टव्यम्—'वसो' हे धनवन्!' इति वि०।

(२)—'ऋग्-यजुः-साम-निगद-लक्षणाभिः' इति वि०। 'उच्चैर्निगदेन' 'उपांशु यजुषा', इति धर्म-पार्थक्य-श्रवणात् निगदस्यानर्थः। वेदानां तथिले साधनीये तु ऋक्-सामान्य तमत्वमेव यजुष्टवमिति तस्यापि यजुष्टवम्। सप्तविचारो जैमिनीय-द्वितीयाध्याय-प्रथम पाद-गत-पञ्चदशादि-सप्त-सूत्रग्रामधिकरणमालादौ च द्वितीय-प्रथम चयोदशाधि करणे सुपरिस्फुटः। 'प्रोक्षणोरामादय', 'इध्मबर्हिरुपसादय', 'अग्नौदग्नौ विहर'-इत्येवमादयः, पर-सम्बोधनार्थासन्त्राः निगदाः॥

* 'तृणपाणेरार्षम्-इति वि०।

२१ ४र ५ २१ २र र १२र
I बृहाङ्गी२३रग्ने अर्चिभिर्हा उ। शुक्राङ्णदेवशोचिषा

१ २ १ २ २ १ २र १ ७
भरद्वा१जे२३। हेवा३हाइ। समिधानः। याविष्टि-

१ २ २ र १ २ १ २ १र
ष्टिया२३। हेवा३हाइ। रेवात्पो१वा२३। हेवा३हाइ।

१ र २ १ २ १
का दीदिहि। दूडा२३भा३४३। ओ२३४५पूइ। डा ॥२९॥

५ र ५ २१ २र र १२र १
II बृहद्भिरग्नेअर्चिभीर्हरे। शुक्राङ्णदेवशोचिषा। भरा-

२ २ १ १ २र १ ७
द्वा१जे२३। ओ३वा। समिधानः। याविष्टिया२३।

२ १ र १ २ २ १ र २
ओ३वा। रेवात्पा१वा२३। ओ३वा। कादीदिहि।

१ २ १
दूडा२३भा३४३। ओ२३४५पूइ। डा ॥ ३० ॥३७

अस्मद्भ्रातरि (१) 'समिधानः' (२) समिध्यमानस्त्वं 'बृहद्भिः' महद्भिः स्तेजोभिः 'नः' अस्मदर्थं 'रेवत्' (३) धन-युक्तं यथा भवति तथा 'दीदिहि' (४) दीप्यस्व ॥

I, II अनयोः भरद्वाजऋषिः, पृश्निनाम।

(१)—'मयि यजति'-इति वि०।

(२)—'तार्च्छिल्योऽयं चानस्'-इति वि०।

(३)—'रयेर्मतौ बहुलम् (६, १, ३४)-इति कात्यायन-वचनात् सिद्धम्।

(४)—दीधिङ्दीप्तिम-धातोः रूपमिदम्॥

अथ चतुर्थी।

वसिष्ठऋषिः।

१ २ ३ १ ८ ३ १ २ ३ २ ३ २
त्वे अग्ने स्वाहुतः प्रियासः सन्तु सूरयः। यन्तारोये
३ १ २ ३ १ २ ३ १ २ २ २ १ २
मघवानो जनानामूर्वं दयन्त गोनाम्॥ ४॥ ३८

"रेवत्पावक"-इति छन्दोगाः। "रेवन्नः शुक्र दीदिहि द्युमत् पावक"-इति बह्वृचाः)॥ ३॥ ३७

हे 'अग्ने!' 'स्वाहुत' यजमानैः सुष्ठुभिः हुत! 'त्वे' (१) तव 'सूरयः' प्रेरकाः स्तोतारः (२) 'प्रियासः' (३) प्रियाः 'सन्तु' भवन्तु। किञ्च। 'ये' 'मघवानः' धनवन्तः 'यन्तारः' (४) प्रदातारः जनानाम् अस्मदीयानाम् 'ऊर्वम्' समूहम्। 'गोनां' (५) गवां

---

३८ नास्तीयमुत्तरार्चिके। २०

(१)—युष्मदः परस्य षष्ठ्येकवचनस्य "सुपां सुलुक् पूर्वसवर्णाच्छे-याडाड्यायाजालः (७, १, ३९)"-इति ङे-भावे "ङेर्छन्दसि बहुलम् (६, १, ७०)"-इति ना-देशे प्ररूपे रूपम्।

(२)—स्तोतृ-नामसु निघण्टु-तृतीय-खोडशे षष्ठम्।

(३)—'आज्जसेरसुक् (७, १, ५०)'-इत्यसुकि रूपम्।

(४)—'सुतिभिर्देविभिर्यो दुर्योदारः'-इति वि०।

(५)—"गोः पादान्ते (७, १, ५७)"-इति नुकि रूपम्।

१र ४र र ५ २ १र २ र १ २ १
I त्वेआ२३ग्नेस्वाऽऊतद्दाउ। प्रियासः सन्तुसूरयः। यन्ता
२ ३ ४र ५र ४ ५र ६ १ ०
रो१या२३४इ। मघवानोजना। नाम्। ऊर्वंदया२३
२ १र ३र १ २ १
न्ना। तगोना२म्। इडा२३भा३४३। ओ२३४५इ।
डा॥ २१ ॥ ३८

च ऊर्वं (६) समूहं 'दयन्त' प्रयच्छन्ति, ते च तव प्रियाः सन्ति-
ति पूर्वेणान्वयः(७)॥

"ऊर्वम्"-इति छन्दोगाः। "ऊर्वान्"-इति-बह्वृचाः॥ ४॥ ३८

अथ पञ्चमी।

भारद्वाजऋषिः।

२ ७ १ २ ३ १ २ ३ १ २ ३ १ २ १ २
अग्ने जरितर्विश्पतिस्तपानोदेव रक्षसः। अप्रोषि-
३ १ २ ३ २ ३ १ २ ३ २
वान् गृहपते महाँ२असि दिवस्पायुर्दुरोणयुः॥ ५ ॥३९

I उरोराङ्गिरसस्य साम।

३९ नास्तीयमुत्तरार्चिके। २१.

(६)—ऊर्वमिति नित्य-बह्वचनान्तस्य बहु-वाचकस्योरुशब्दस्य छान्दसैकवचनेऽपि 'वाच्छन्दसि (६, १, १०६)'-इति सम्बन्धात् पूर्वरूपाभावे सांहित-दीर्घे च रूपम्।

(७) अस्मदीयानां गवां समूहम् एवमन्वयेनार्थः सि० सम्मतः।

४५र४५ ४ ५ र ४ ५ र
I अग्नेजरितर्विश्पतिः। औहोवा। एहिया। हाउ।
२ र १ र ऽ १ २ १ २ १ २
तपानोदेवरक्षसः। अप्रोषा१इवा२न्। गार्हपता३इ।
१ २ ३ ५ १ २ ३ ५ २
माहाꣳआ२३४सी। दिवाः। पायौवाओ२३४वा। हा
२ ४ ४
३हाइ। दुरोपूणयूः। होपूइ। डा॥ ३२॥

३ ४र३ ४५ ३ २ १ र र५र ४ ५
II अग्नेजरितर्विश्पतोः३। ता२३४पानोदेवर। क्षसाः।
१ र र र २ २ १ १ १ ५
तापानोदेवरक्षसो। अप्रोषो३वान्। गृहपताइ। माहा
३ ५ ३ ५ ३ २ ५ २र १ १ १ १ १
ꣳआ२३४सी। ओ४हा। हहाइ। दिवस्पायू२३४पुः।
३ ५ ३ २ ३ १ २ १ १ १ १ १ ३ ५ ३ २
ओ४हा। हहाइ। दुरोणयू२३४पुः। ओ४हा। हहा
१
३४३इ। ओ२३४पुइ। डा॥ ३३॥ ३९

हे 'अग्ने! देव!' 'जरितः' स्तोतः! (१)स्तुत्येत्यर्थः। 'विश्पतिः' प्रजानां (२) पालकः 'रक्षसः' राक्षसानां 'तपानः' सन्तापकः

I, II अनयोः गौतमऋषिः, पौरुमहम् नाम।

(१)—निघण्टु-तृतीय-चतुर्दशेऽपि निकमस् 'जरिता'-इति मनुष्यनामसु पठितम्।
(२)—नि० २. ३. मनुष्य नामसु विश्शब्दः निपठितम्।

अथ षष्ठी।

प्रस्कण्व ऋषिः।

२ १ १ २ १ १ १ १ २ १ २ २ १ १ २
अग्ने विवस्वदुषसश्चित्रꣳराधो अमर्त्य। आदाशुषे
१ २ १ १ २ १ १ १ २
जातवेदोवहा त्वमद्या देवाꣳउषर्बुधः॥ ६॥ ४०

'असि'। हे गृहपते' यजमान-गृहस्य पालकाग्ने! त्वम् 'अग्नो-धिवान्' यजमानस्य गृहमत्यजन् 'महान्' अतिशयेन पूज्योऽसि। 'दिवः' द्युलोकस्य 'पायुः' पाता। 'दुरोणयुः' (३) यजमान-गृहस्य मिश्रयिता सर्वदा वर्तमानः इत्यर्थः। तादृशस्त्वं महानसीत्यन्वयः (४)॥

"तपान" "तपान"-इतिपाठो। "गृहपते" "गृहपतिः"-इति च॥ ५॥ ३९

हे 'अग्ने'! त्वम् 'उषसः' उषोदेवतायाः (१) सकाशात्

---

४० उत्तरार्चिकस्य ८, १, ६, १।

(३)—'दुरोणः-इति गृह-नाम (नि० ३, ४, ८), तद् यदृच्छति सदुरोणयुः (पा० ३, २, १७०'-इति वि०।

(४)—'यस्य विश्रपतिः राजसान् तपानः मृहानसि, यस्य अग्नोधिवान्; यस्य दिवस्पायुः, यस्य दुरोणयुः, तं त्वां हे अग्ने! अरितः! देव! गृहपते! लौमीति अग्नेः'-वि० ज्ञातोऽन्वयः।

(१)—उषा-नामके च हे देवते। या मेघादुदकादि विवासयति सा वायवी अग्नि-रन्तरिक्षदेवतासु चतुःषष्टितमा; या तु षष्ठेः कान्तिकर्मणोरूपमिति निरुक्तप्रसिद्धा,

५ २ २ २ १२ २ १ ३ २
I अग्नेविवाच्चाउ। स्वा३दूषा३सः। चाद्दुवा२३च्चा
१ २ २ १ ३ ५ १ २
दू। राधो३च्चा३इ। अमा२र्त्ता२३४या। आदा१शुषे२।
१ २२ २ १ २ १२ २
जातवेदः। वच्चातू१वा२म्। अद्याच्चोइ। दा२३इवाए
१ ३ ५ २ २ १ ३ १ १ १ १
उषः। बू२धा२३४औच्चोवा। च्चुवेवसू२३४५॥ ३४॥

५ २ ४ ५ २ १ २ २ १ २ ३
II अग्नेविवस्वदुषासः। चित्रंराधोअमा२र्त्तिय।
१ २ १ ३२ १ १२
आदा१शुषे२। जातवेदः। वच्चात१वा२म्। अद्यादा
२ १ ३ ५ २ २ २ १ ३
२३इवाए। उषः। बू२धा२३४औच्चोवा। विदावस
१ १ १ १
२३४५॥ ३५॥ ४०

'राधः' (१) धनं 'दाशुषे' (२) हविर्दत्तवते यजमानाय 'आवह' (४)

I, II अनयोः जामदग्नऋषिः, माण्डवं नाम।

सा सूर्या, स्व-स्थान-देवतासु तृतीया (भेदेऽपि निरूक्तपर्य्यालोचनादगन्तव्यः; ततश्चा एकादश-चतुर्थ-द्वादशे; द्वितीया द्वादश-प्रथम-पञ्चमे)।

(२)—धननामसु अष्टादशतमम्—नि० २, १०।

(३)—निघण्टु-तृतीय-विंशे दानकर्मसु द्वितीयम्। दाश्वानिति (६, १, १२) सिद्धम् क्वसुनम्, तस्य चतुर्थ्यां रूपमिदं दाशुषे इति।

(४) वच्चादिति मन्त्रे 'अचोऽन्त्यादि' (८, ३, १३४)-इति दीर्घः।

अथ सप्तमी।

तृणपाणिर्ऋषिः।

१ २ ३ २ ३ २उ ३ १ २ ३ २
त्वन्नश्चित्र ऊत्या वसोराधाꣳसि चोदय। अस्य
३ १र २र ३ १ २ ३ २ ३ २ ३ १र ४ २र
रायस्त्वमग्नेरथीरसि विदा गाधन्तु चेतु नः ॥७॥४०

आनीयप्रापय। सोऽग्निर्विशिष्यते। 'अमर्त्य' मरण-रहित! हे 'जातवेदः' जातानां वेदितः! कीदृशं राधः? 'विवस्वत्' विशिष्ट-निवासोपेतम्। 'चित्रं' नानाविधम्। किञ्च। 'अद्य'(५) अस्मिन् दिने 'उषर्बुधः' उषःकाले प्रबुद्धान् देवानावह (६) ॥ ६ ॥ ४०

हे 'वसो' वासक! अग्ने! 'चित्रः' दर्शनीयस्त्वं 'ऊत्या' (१) रक्षया सह 'राधांसि' धनानि 'नः' अस्मभ्यं 'चोदय' प्रेरय। 'अस्य' लोके परिदृश्यमानस्य 'राधः' धनस्य त्वं 'रथीः' (२)

४१ उतरार्चिकस्य ८, १, ३, १।

(५)—अद्या इति 'निपातस्य च (६, ३, १३६)'-इति मन्त्रे दीर्घः।

(६)—हे अमर्त्य, जातवेदः, अग्ने! राधः स्वरूपं विवस्वत् तमसां विवासनकरम् उषसः स्वभूतं चित्रं विचित्रं पूज्यं वा द्योतिः, अन्यांश्च उषर्बुधोदेवान् दाशुषे यजमानाय अद्य त्वम् आवह-रत्यर्थो वि० सम्मतः।

(१)—ऊतयेः रूपम् ऊतियुतीत्यादिना सिद्धम्। सहार्थे तृतीया (२, ३, १९)।

(२)—रथीरिति रंहते रूपम्, रंहतिश्च गतिकर्मसु पञ्चविंशतितमः—नि० २, १४।

१ १ ५र २१ २ १२
I त्वन्ना२३श्चित्र ऊत्या। वसोराधा। सिचोदा१या२३
१ २, ३ ५ १ २र १ २ १२, ३
आस्थारा२३४याः। त्वमग्ने। रथाइरासा३इ। वोदागा
५ २१ २ १ २ ४ ५ ४
२३४धाम्। तुचा२३ह्वाइ। तुना। औ३ह्वोवा। ह्वोपू
इ। डा ॥३६॥ ४१

असि' रक्षिता नेता भवसि। अतः कारणात् अस्मभ्यं धनानि प्रेरयेत्यर्थः। अपिच 'नः' अस्माकं 'तुचे' [अपत्यनामैतत् (नै०२,२,१) अपत्याय अपतन-हेतु-भूताय पुत्राय 'गाधं' प्रतिष्ठां (२) 'तु' क्षिप्रं (३) 'विदाः' लम्भय (४) ॥ ७ ॥ ४१

1 भारद्वाजऋषिः, गाधम्।

इह विवरणकारः—"रथी-शब्दः सारथि-वाची, स इह प्रेरकत्वसामान्यात् अग्नौ प्रयुक्तः, प्रेरयितासि दातासीत्यर्थः"।

(२)—"गाध-शब्दोऽयमगायमुदकमित्येवमादिषु प्रयोगेषु उदकमध्ये या भूमिःपाद योरास्थत्वं प्रतिपद्यते, तस्याः वाचकः; इह तु स्थानसामान्यादाश्रयस्थाने प्रयुक्तः" इति वि०।

(३)—"तु-इति पादपूरणः"-इति वि०।

(४)—"विदाः वेत्थ जानीहि, ज्ञानेनात्र दानं लक्ष्यते, देहीत्यर्थः"-इति वि०।

* इति ग्रामे गेय-गाने प्रथमः प्रपाठकः ॥१॥

अथाष्टमी।

(विरूपऋषिः)

२उ ३ १ २ ३ १ २ ३ २ ३ २ १र २
त्वमित्सप्रथा असि्यग्ने त्वातर्हतः कविः। त्वां विप्रासः
३ १ २ ३ १ २
समिधान दीदिव आ विवासन्ति वेधसः॥ ८॥ ४२

५र र १ र २र १
I ह्वाउत्वमित्सप्रथाअसिह्वाउ। आग्नेत्वातः। ऋतः
० २र २ १र २र १ २र
कवा२३४इः। ह्वाहोइ। त्वांविप्रासः समिधा।
१ र २ ३र ३ १ २ ३र २ ३ १
नादीदिवा३४ः। ह्वाहोइ। आविवासा३४ह्वाहोइ। तिवो
५ ४ ५
२३४वा। धापूसोई्ह्वाइ॥ १॥

५ ५ २ १ २ ३ ५
II त्वंत्वाई्मे। इग्ग्राइथायासाइ। आ२३४सो।
१ र २र १ ० ३ ५ १र २र
आग्नेत्वातः। ऋतःकवा१इः। का२३४वीः। त्वांविप्रासः

हे 'अग्ने'! 'त्वातः' रक्षक! 'ऋतः' (१) सत्यभूतः 'कविः

I, II अनयोः गौतमम् नाम।

४२ नास्तोयमुत्तरार्चिके। २२

(१)—ऋतमिति सत्यनाम्सु षष्ठम्—नि०६,१०।

अथ नवमी।

(शुनःशेपऋषिः।

१ २ ३ १ २ ३ १ २ ३ १ २ १ २
आ नो अग्नेवयोवृधꣳरयिम्पावकशꣳस्यम्। रास्वा

१ २ १ २ ३ ४ १ २ १
समिधा। नादोदिवो। दा२३४दुवाः। आविवासा२३

२ १ २ १
द्या। तिवेधा२३सा३४ः। ओ२३४५३। डा ॥२॥ ४२

क्रान्तप्रज्ञः (१) 'त्वमित्' (२) त्वमेव 'सप्रथाः' (४) सर्वतः पृथुः 'असि' भवसि। हे 'समिधान' समिध्यमान! हे 'दोदिवः' दीप्ताग्ने! (५) 'त्वां' 'विप्रासः' (६) विप्राः मेधाविनः (७) विधातारः स्तोतारः 'आविवासन्ति' (८) विचरन्ति ॥८॥४२

---

(१)—कविरिति मेधावि नामसु दशमम्—नि० ३, १५।

(२)—"इदिति पादपूरणः"-वि०।

(४)—प्रथतेरसुनि रूपम् सुविस्तीर्ण इत्यर्थः। "सप्रथाः सर्वतः पृथुः" इति नै० ६, १, ८।

(५)—दोर्दीप्तं तद् विद्यते यस्येति मतुपि 'छन्दसोरः (८, २, १६)'-इति वत्वे दीदिवत्, तस्य सम्बोधने 'मतुवसोरःसम्बुद्धौ छन्दसि (८, ३, १)' इति वत्वं रूपम्। "दानवन्"-इति वि०।

(६)—विप्र इति मेधावि-नामसु प्रथमम्—नि ३, १५। ऋक्तुकि (७, १, ४०) रूपम्।

(७)—वेधः-शब्दो विधातृ-पर्यायः प्रसिद्धः, विधातृ-पदं च मेधावि-नामसु दशमम्; इह स्तोतृत्वं-प्रतिपादकः। "वेधसः मेधाविनः ऋत्विजः"-इति वि०।

(८)—आविवासन्तीति परिचरण कर्मसु अन्यम्—नि० ३, ५।

३ २ ३ १२ ३१२
चन नुपमाते पुरूस्पृहꣳसूनीतो सुयशस्तरम् ॥८॥४३

२र ४र ५ र र ४ ५ २ ३२ १११
। आनोअग्नेवयोदधम्। ए३४। रया३४५दूम्।

१र १ ७ २ १र २र १ २र र १ ७
पावा३काशाꣳसा२३याम्। रास्वाचनउपमाते। पूरू-

१ २ २ ३ २ १
स्पृहा२म। सुनाइताइस्व३हाइ। यशस्तराम्। औ२३

४ ५ ४
हावा। हो५इ। डा॥ ३॥४३

हे 'अग्ने'! 'पावक' शोधक! 'वयोदधं' अन्नस्य धारकं 'शंस्यं' स्तुवन्तं 'रयिं' धनं 'नः' अस्मभ्यम् आभरेति शेषः। आहृत्य च हे 'उपमाते! उपास्मात्समीपे मातिर्गृहीतमित्युपमातिः, हे तादृश! अग्ने! (१) 'नः' अस्मभ्यं 'सुनीतो' सुनीत्या शोभन-नयनेन (२) 'पुरुस्पृहं' बहुभिः स्पृहणीयं 'सुयशस्तरम्' अत्यन्त-स्वभूतं कीर्ति-धनं 'रास्व' (३) देहि॥

---

४३ नास्तीयमुत्तरार्चिके। २३

। अग्निऋषिः, आयुः।

(१)—"उपमातिः उपमाता निर्माता, तस्य सम्बोधनम्, हे उपमाते! स्रष्टः! इत्यर्थः। एतदुक्तं भवति—त्वमेवास्मकं स्रष्टा, त्वमेवास्मभ्यं शरीरस्थित्यर्थः धनं देहीत्यर्थः"—इति वि०।

(२)—"नीतिशब्दोमार्गवचनः, तस्मादिदं तृतीया, सुनीत्या सुमार्गेण प्रतिग्रहादिनेत्यर्थः"—इति वि०।

(३)—रातिदान-कर्मसु चतुर्थः नि० १, २०।

अथ दशमी।

सोभरिऋषिः।

५उ २ १ २ ३ २ ३ १ २ ३र २र २ १र
योविश्वादयतेवसुहोता२मन्द्रोजनानाम्। मधोन्न
२र ३ १ २ ३ १र २र ३ ३ १२
पात्रा प्रथमान्यस्मै प्रस्तोमायं न्वृग्मये ॥ १० ॥ ४४

५र २ ४र ५ ४र ५ १ १ १ र
I योविश्वा३दायतेवसू। होता२मांद्रो२। जना-
र १ १ १र र र
नाम्। माधो२र्नापा२। त्राप्रथमान्यस्मै। प्रास्तो२
१ २ १ ५ ४ ५
माया२३। तुवी२३४वा। ग्राप्युयो३ष्टाइ ॥४॥

५र र र १ १
II योविश्वादयतेवसूष्टाउ। होता२। मांद्रो२।
१ र र २ १ २ १ १ १र
जनानाम्। ओवा। ओवा। माधो२र्नापा२। त्राप्र-
र र १ २ १ २ १ १ २ १
थमान्यस्मै। औवा। औवा। प्रास्तो२माया२३। तुवो
५ ४ ५
२३४वा। ग्राप्युयो३ष्टाइ ॥ ५ ॥ ४४

"सुयशस्तर"-"स्वयशस्तरम्"-इति पाठौ ॥ ८ ॥ ४३

४४ उत्तरार्चिकस्य ७. ३. ५ १।

I, II अनयोः अग्निऋषिः, हरीनाम ।

III योविश्वादयतेवस्वोद्दाओद्दाई३ए। होता२मंद्रोजना
२नाम्। ओ३द्दा। ओ३द्दाइ३ए३४म३४धोर्नपा। आप्रथ-
मानायस्माइ। ओ३द्दा। ओ३द्दाइ३ए३४। प्रस्तो३४माया
३। तुवो२३४वा। ग्राप्रयोई३द्दाइ॥ ६॥

IV योविश्वादयतेवसुई३ए। होतामंद्रोजनानाम्। मा
धो१र्नापौ। वा३२। आप्रथमान्यस्मै। प्रास्तो१मायौ।
वा३२। त्वग्नये। इडा२३भा३४३। ओ२३४५इ। डा॥७॥

'होता' देवानामाह्वाता 'मन्द्रः' मोदनः(१)यः अग्निः 'विश्वा' (२) सर्वाणि 'वसु' (३) वसूनि धनानि 'जनानां' (४) जनेभ्यः 'दयते'

III, IV अनयोः अग्निऋषिः, दैर्घश्रवसम्।

(१)—'मदि' स्तुति-मोद मद-स्वप्न-कान्ति-गतिषु-इत्यस्य रूपम्। "मन्द्रः स्तुत्यः"-इति वि०।

(२)—सुपां सु लुगित्यादिना (७, १, ३९) शस आत्वे रूपम्।

(३)—"एकवचननिर्दं बहुवचनस्य स्थाने"-इति वि०। परं, 'सुपां सुलुगिति (७, १, ३९) शसीलुक्यपि सिद्धति।

(४)—'चतुर्थ्यर्थे बहुलं छन्दसि'(२, ३, ६२)'-इति षष्ठी। वि० मते तु जनानां स्तुत्यः-इत्येवमन्वयः।

इति चतुर्थी दशति ॥

प्रयछति । तस्मै 'अस्मै' अग्नये 'मधोः (५) न' मदकरस्य सोमस्येव 'प्रथमानि' मुख्यानि 'पात्रा' पात्राणि 'स्तोमाः' स्तोत्राणि 'प्र यन्ति' गछन्ति ॥१०॥ ४४

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने प्रथमस्याध्यायस्य चतुर्थःखण्डः ॥ ४ ॥

अथ पञ्चम-खण्डे—

मेधं प्रथमा ।

(वामदेवऋषिः)

३ १ २ ३ १र २र ३ १र २र ३ १ २ ३ १र
एनावो अग्निन्नमसोर्जानपातमाऽवो । प्रियं
२र ३ १ २ ३ १र २र ३ २ ३ १ २
चेतिष्ठमरतिꣳस्वध्वरं विश्वस्य दूतममृतम् ॥१॥ ४५

४५ उत्तरार्चिकस्य १, २, १३ १ ।

(५) –'तृप्तिकृत्तृपयच्छब्दनिर्देश' इति (३ ४, ८८) भाष्यस्थवचनात्, इह लिङ्ग-व्यत्ययेन रूपम् ।

I एनावोअग्निन्नमसा। ऊर्ज्जोनपा। तामा१ हुवे२। प्रायच्चेतिष्ठमरतिम्। सुवाध्वा१रा२म्। विश्वा स्मा१दू२। तामम्रतम्। इडा२३भा३४३। ओ३३४५ इ। डा॥ ८॥

II एनावोअग्निन्नमसाहाउ। ऊर्ज्जोनपा। तामा १हुवे२३। हाउ। प्रायच्चेतिष्ठमरतिम्। सुवाध्वा१ रा२३म्। हाउ। विश्वास्मा१दू२३। हाउ। तामम्रतम्। इडा२३भा३४३। ओ२३४५इ। डा॥ ९॥

III एनावोअग्निमेधनमसा। ऊर्ज्जोनपातमाहुवे। प्रा२३याम्। चाइतिष्ठम्। आरतिम्। सुवाध्वा१ रा२म्। विश्वास्मा१दू२। तामम्रतम्। इडा२३भा ३४३। ओ२३४५ इ। डा॥ १०॥

I, II अनयोः गोतमऋषिः, आग्नेयं नाम।

५र ४र ५र ४ र ५र ४ ५ १ र २र
IV एना वो अग्निन्नमसो। जोनपोवा। तामाहुवे।
१ २ १ २ १ २ १
प्रा२३याम्। चाहूतिष्ठम। रा२३तीम्। स्वध्वरम्।
२ १ २ १ २ १
विश्वस्या२३दूं। तामम्रुतम्। दूडा२३भा३४३। ओ२३४५दूं।
डा ॥११॥४५॥

'ऊर्जः' (१) बलस्य 'नपातं' पुत्रं 'प्रियम्' अस्माकं, 'चेतिष्ठम्' (२) अतिशयेन ज्ञातारं प्रज्ञातारं प्रज्ञापकं वा। 'अरतिं' गन्तारं स्वामिनं वा 'स्वध्वरं' सुयज्ञं, 'विश्वस्य' सर्वस्य यजमानस्य 'दूतम्' 'अमृतं' नित्यम् 'अग्निम्' 'एना' (३) एनेन 'नमसा' स्तोत्रेण [यद्यप्यत्रान्वादेशोनास्ति तथापि छान्दसत्वादिदं शब्दस्यैनादेशः] हे स्तोतारः! 'वः' युष्मदर्थम् 'आहुवे' (४) आह्वयामि ॥१॥४५॥

III, IV अनयोः गोतमऋषिः, मनाज्यं नाम।

(१)—"ऊर्क् अन्नम्, तस्य नपातं पौत्रम्; कथं पुनरसौ अन्नस्य पौत्रः। अन्नाद्धि बलं जायते, बलात्प्रयमानस्य जायते, एवमग्नेरन्नस्य पौत्रम्"-इति वि०।

(२)—चेतरति प्रज्ञा-नामसु तृतीयम्, नि० ३. ९। अथवा 'चिती सञ्ज्ञाने' अस्य, तृचि 'तुश्छन्दसि (५, ३, १११)'-इतोष्ठनि रूपम्।

(३)—सुपां सुलुगित्यादिना तृतीयाया आत्वे रूपम्।

(४)- सम्प्रसारणं बाऊलकात् ६, १, ३७।

अथ द्वितीया।

भर्गऋषिः।

१ १२ १ २ ३ २ १ १ १ १ २
शेषे वनेषु मातृषु सन्वा मर्त्तासइन्धते। अतन्द्रो
१ १ २ १ २ १ २ ३ १ १ २
हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि॥२॥४६

४ २ २ २ ४ १ २ २ १ २ २ १
। शेषेवनाषूइषु मातृषू। सात्वामर्त्तासः। इन्धा२३
१ १ २ २ १ २ १ ० १ ५
ताइ। आतंद्रोहव्यंवह। साइ। हवी२ष्का२३४र्त्ता:।
१ २ २ १ २ १ २ १
आदिद्देवाइ। षुराजा२३सा३४३इ। ओ२३४षुइ।
डा॥१२॥४६

हे 'अग्ने' 'वनेषु' 'मातृषु' च 'स्वपिषि' वर्तसे। तथा भूतं 'त्वा' त्वां 'मर्तासः' मनुष्याः अध्वर्यादयः मत्यनेनोत्याद्य 'मभिन्धते'। पश्चात्त्वद्वत्स्वं 'अतन्द्रः' अनलसः सन् 'हविष्कृतः' यजमानस्य 'हव्यं' हविः 'वहसि' देवान् प्रति। 'आदिद्' अनन्तरमेव 'देवेषु' मध्ये 'राजसि' दीप्यसे (१)॥

---

४६ नास्तीयमुत्तरार्चिके।२४

I गोतमऋषिः, दैवराजम्।

(१)—हे 'अग्ने' ! यस्त्वम् 'अतन्द्रः' अनलसः देवान् प्रति 'हव्यं' हविः, 'हविष्कृतः'

अथ तृतीया।

सौभरिर्ऋषिः।

१२ ३१२३१२ २१ २ ३२ ३२
अदर्शि गातुवित्तमोयस्मिन् व्रतान्यादधुः। उपोषु
३१२ २२ २ ३१२ ३ १२
जातमार्यस्य वर्द्धनमग्निं नक्षन्तुनोगिरः॥ ३॥ ४७

५ २ ५ १ २१२ १२ १
I अदर्शि गातुवित्तमाऽहे। यास्मिन् व्रतानि यादधुः।
२ २ २ २ १२ २ १२ १
उपोषु जाऽइ। हाऽइहाइ। तमारि यस्य वर्द्धनम्। अग्ना-
२ २ २ २ १२ १ २ १
इन्नक्षाऽइ। हाऽइहा। तुनोगिरः। इडा२३भाऽइ३ ओ२३
५
४५इ। डा॥ १३॥४७

"मात्रेषु", "मात्रोः"-इति पाठो। "च्यं", "च्य"-इति च॥ २॥४६

'यस्मिन्' अग्नौ 'व्रतानि' कर्माणि (१) 'आदधुः' यजमानाः

---

४७ उत्तरार्चिकस्य ७, १, ११, १।

I कौशिककृषिः, गाथिनम्।

इविषा सह क्रियमाणाः स्तुतीश्च 'वह्निषु', 'देवेषु' राजसि च—'मर्त्तासः' तं 'त्वाम्' 'अग्ने' अपत्याय, 'मातृषु' जगतोनिर्मातृभूतेषु 'वनेषु' उदकेषु उदकार्थञ्च मथिष्यते-इति वि०-सम्मतोऽर्थः। अग्ने-इति अपत्य-नामसु षष्ठम्, नि० २, २; वर्नन्युदकनामसु नवमम्, नि० १, १२।

(१)—व्रतमिति कर्म-नामसु सप्तमम्, नि० २, १।

अथ चतुर्थी ॥

मनुः प्रार्थयते।

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १
अग्निरुक्थे पुरोहितोग्रावाणोबर्हिरध्वरे। ऋचा
२ ३ २ ३ २ ३ १ २
यामि मरुतो ब्रह्मणस्पते देवाअवोवरेण्यम् ॥४॥४८

आहितवन्तः। 'गातुवित्तमः' (२) अतिशयेन मार्गाणां ज्ञाता सोग्निः 'अदर्शि' प्रादुरभूत्। किञ्च। 'सुजातं' सम्यक् प्रादुर्भूतं अस्य 'आर्यस्य' उत्तम-वर्णस्य 'वर्धनं' वर्धयितारं 'अग्निं' 'नः' अस्माकं 'गिरः' स्तुति-रूपाः वाचः 'उपो (३) नक्षन्तु' उप गच्छन्तु [नक्ष गताविति धातुः (४)॥

"नक्षन्तु नोगिरः"-इति छन्दोगाः। "नक्षन्त नोगिरः" -इति बह्वृचाः॥ १ ॥४७

---

४८ नास्तीमुत्तरार्चिके। २५

(२)—गातुरिति पृथिवी-नामसु पोठमम्, नि० १, १। रक्ष तान्त्स्थात् ताच्छब्द मङ्गीकृतं भाष्यकृता। विवरणकारस्तु—"कैर्गैरे शब्दे-इत्यस्य रूपम्, गातुः शब्दयिता स्तुतीनाम् उच्चारयिता, तं यो वेत्ति सगातुवित्, अतिशयेन गातुवित् गातुवित्तमः, स्तुतीनामुच्चारयितृतिशयेन वेत्तेत्यर्थः"।

(३)—"उप, उ, सु त्रयोपि पादपूरणाः"-इति वि०।

(४)—"नक्षतिः व्याप्तिकर्मा"-इति वि०। नक्ष व्याप्तिकर्मसु द्वितीयम्, नि० ९, १८

५ ३ २ ४ ५ २२१२२१ ३ २
I अग्निरुक्थाइ। पुरोऽहाइताः। ग्रावाणोब। घिराइ
४ ५ २१२२ २ ७ १
ध्याराइ। ऋचायामिमरुतोब्रह्माणस्पाता२इ। दाइवा२
१ २१ ५ ४
आवा२३ः। वरो२३४वा। णापुयोऽहाइ॥ १४॥

५ २ २ ४ ५ ३ २ ५ ४
II अग्निरुक्थाऔहोहोहाइ। पुरौवाओ२३४वा। घि
२२१२२१ ३ २ २ ५ ४ २ ऽ २
ताः। ग्रावाणोब। घिरौवाओ२३४वा। ध्वराइ। ऋचौऽहो
१२ २ ७ १ १ २१
यामिमरुतोब्रह्माणस्पाता२इ। दाइवा२आवा२३ः। वरो
५ ४ ५
२३४वा। णापुयोऽहाइ॥ १५॥४८

'उक्थे' स्तोत्र-शस्त्रात्मके 'अध्वरे' हिंसा-रहिते अस्मिन् यज्ञे 'अग्निः' 'पुरोहितः' यज्ञात्पुरतः उत्तरवेद्याम् ऋत्विग्भिर्निहितोऽभूत्। तथा 'ग्रावाणः' सोमाभिषवार्थं पुरतोनिहिताः। 'बर्हिः' च पुरतोनिहितम् आसादितम्। एवं सामग्र्यां सत्यां हे 'मरुतः' एकोनपञ्चाशन्मरुद्गणाः! हे 'ब्रह्मणस्पते' स्तोत्रस्य पालक! एतन्नामक! देव! हे 'देवाः'. द्योतनादि-गुण-युक्ताइन्द्रादयः! 'वरेण्य' वरणीयं भजनीयम्. 'अवः' रक्षणम् 'ऋचा' सूक्त-रूपया

I, II अनयोः वार्हदुक्थं नाम।

अथ पञ्चमी।

सुदीतिर्ऋषिः पुरुमीढोवाष्कश्मोवा।

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
अग्निमोडिष्वावसे गाथाभिः शीरोशोचिषम्। अग्निꣳ
३ १ २ ३ २३ ३ १ २ २ १ २ ३ २
राये पुरुमोडः श्रुतन्नरोग्निः सुदीतयेकर्दिः ॥५॥४९

स्तुत्या 'वः' युष्मान् 'यामि' मनुरहं याचामि (१) [याचतेर्लटि रूपम्। वर्णलोपश्छादसः (२)] ॥

"मरुतोब्रह्मणस्पतेदेवाः"-इति त्रीण्यामंत्रितत्वेन छन्दोगाः पठन्ति। मरुतोब्रह्मणस्पतिं देवान्"-इति द्वितीयान्तत्वेन वह्वृचाः॥ ५॥४८

हे 'पुरुमोढ!' त्वम् (१) 'अग्निम्' 'अवसे' रक्षणाय 'ईडिष्व' स्तुहि 'गाथाभिः' [गाथेति-वाङ्नाम (१,११,३६)। मन्त्ररूपा

---

४९ नास्तीयमुत्तरार्चिके।२६

(१)—यामीति याच्ञाकर्मसु द्वितीयमस्ति पठितम् (नि० २, १९), तदनुरोधेन याचतेर्लोपायासः कथं स्वीक्रियतइति चिन्तनीयम्।

(२)—रक्ष उक्थे अधरे पुरोहितमग्निं, ग्रावाण, बर्हिः, मरुतः, बह्मणस्पतिः। अत्र बहुवचनयः स्वीकार्यः।

(१)—'हे पुरुमीढ! बहोयान्नरान्!'-इति वि०।

५ ४५२ १२ २२ ४२५ २ २२ १२२२
I अग्निमीडिष्वा३४औचोवा। आवसे। गाथाभिःगी।
१२ २ १ २ २
रणोचा२३इषाम्। अग्निंरायाइ। पुरुमा२३इदो।
१ १ २ १
अुतनरो। अग्निःसू२३दो। तयाइच्छा२३४५दीर्ध५ईः।
१ २ १११११
दत्ता३या२३४५॥ १६ ॥४९

भिर्वाग्भिः] कीदृशम्? 'शोरशोचिषं' शयन-स्वभाव-रोचिषं (२) तथा 'राये' धनाय ईडिष्व। 'अुतम्' (३) एनं 'नरः' अन्येपि यजमानाः (४) स्तुवन्ति स्वार्थम्। तस्मात् 'सुदीतये' (५) मह्यम् 'अग्निः' (६) त्वयाभिष्टुतः सन् 'कृदिः' गृहं (७) प्रयच्छत्वित्येवं सुदीतिः पुरुमीढं ब्रूते॥

I पौरुमीढम्।

(२)—'शोरं व्यापि, शोचिर्दीप्तिः; व्यापिनी दीप्तिर्यस्यासौ शोरशोचिः, तं शोरशोचिषम्, व्यापि-दीप्तिमित्यर्थः। अथवा जठरात्मना आश्रयणीया दीप्तिर्यस्य'-इति वि०। "अनुशायिनमिति वा आशीनमिति वा"-इति नै० ४, २, १४। शेते अग्नीतेर्वेति भावः।

(३)—'अुतं विख्यातम्'-इति वि०।

(४)—नरइति मनुष्य-नामसु बहुवचनान्तं चतुर्थं पदम्, नि० २, ३ 'नरः प्रथमैकवचनमिदं (नि० २, ३, २) द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्, नरं नराकारम्, इति वि०'।

(५)—'शोभनस्य दानस्यार्थाय'-इति वि०।

(६)—'अग्निः प्रथमैकवचनमिदं द्वितीयैकवचनस्य स्थाने'-इति वि०।

(७)—कृदिरिति गृहनामसु उनविंशतितमम् नि० ३, ४। 'कृदिः प्रथमैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम्, कृदिर्ये गृहस्यार्थायेति'-यावत्'-इति वि०।

अथ षष्ठी।

प्रस्कण्व ऋषिः।

२ १ २ २ १ २ २ १ २ १ २ १ २
श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः। आ सी-
२ १ २ २ १ २ १ २ १ २ २ २
दतुबर्हिषिमित्रो अर्यमाप्रातर्यावभिरध्वरे ॥६॥

२ २ १ ५ ४ ५ २१२
I श्रुधी३। श्रू२३४। धिश्रुत्कर्ण्व। ह्निभाइः। देवै-
२ १ २ २ २ १२ २ २ २
रग्ने सयावा२३भीः। आसीदतुबर्हिषिमित्रोअर्या२३मा।
२ १ २ १ ५ २ २ २ २
प्रातर्या२३वा३। भा२इरा२३४औहोवा। ए२३। ध्वर
आ ॥१७॥५०

"अग्निः सुदीतये कर्दिः"-इति छन्दोगाः। अग्निं सुदीतये कर्दिः-इति बह्वृचाः ॥ ५ ॥४९

हे 'श्रुत्कर्ण' श्रवण-समर्थाभ्यां कर्णाभ्यां युत! अग्ने! अस्मदीयं वचनं 'श्रुधि' (१) शृणु। यः 'मित्रः' देवश्च 'अन्यैः' 'प्रातर्यावभिः' प्रातःकाले देव-यजनं गच्छद्भिः 'देवैः' सर्वैः 'सयावभिः'

---

५० नास्तीयमुत्तरार्चिके। २७

I कार्ण्यवसम्, प्रास्कण्वं वा।

(१)-"अ शृणुपृ उदात्तयण हल्परे (६, ४, १०२)"-इति हेर्धिः।

अथ सप्तमी।

सौभरिर्ऋषिः।

१र२र ३२३९३ ३ २ ३१ २ १ ५
प्र दैवोदासो अग्निर्देव इन्द्रो न मय्यना *। अनु
३१९ ३१र २र ३१र २र३ १ २
मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥७॥५१

५ र र र ४ ५ २र१ २१
ह्वा३द्। वा३ओ२३४वा। व्या२३४युम् ॥ २१ ॥ ८२

'यदि' यदा 'यस्य' मनुष्यस्य 'वीरः' पुत्रः 'स्यात्' भवति, तदा सः 'मर्त्यः' 'अग्निमिन्धीत' आधानमादधीत कुर्वीत। किञ्च। 'आनुषक्' अविच्छिन्नं यथा भवति तथा 'हव्यम्' 'आ जुह्वत्'

---

८२ नास्तीयमुत्तरार्चिके। ५२

I बृहत्, आग्नेयम्।

अथ तृतीया।

द्वयोर्भरद्वाजऋषिः।

१ १२ १ १ २ १ २उ १ १र २र
त्वेषस्ते धूम ऋण्वति दिवि सञ्छुक्र आ ततः।
१ २उ १ २उ १ १ २ १ १ २
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ३ ॥ ८३

२र १ ४र ५ २ १ २
I त्वेषास्ते३धूमऋण्वतिदिवि३सञ्छुक्रा३आतातानाम्

आभिमुख्येन जुहोति। अपिच। 'दैव्यं' देव-सम्बन्धि 'शर्म्म' गृहं सुखं वा 'भक्षीत' भजेत सेवेतेत्यर्थः(१) ॥ २ ॥ ८२

हे 'अग्ने'! 'त्वेषः' दीप्तस्य 'ते' तव 'शुक्रः' शुक्लोनिर्मलः शुभ्र-वर्णोवा 'धूमः' 'दिवि' अन्तरिक्षे 'आ ततः' विस्तीर्णः 'सन्' 'ऋण्वति' मेघात्मना परिणतोगच्छति। अपिच। हे 'पावक!'

---

८३ नास्तोयमुत्तरार्चिके। ५३
I यामम्।

(१)—'यदि' 'मर्त्यः' 'इयम्' 'आनुषक्' आनुपूर्व्येण 'आजुह्वत्' अग्निम् 'इक्षीत', नहि 'घोरः' 'स्यात्', किन्तु 'दैव्यं' 'शर्म' 'भक्षीत' लभेतेत्यर्थः, अन्विति पाद-पूरणः इति वि०-सम्मतोऽर्थः।

अथ चतुर्थी।

१र २र३१र २र ३१र २र
त्वꣳ हि चैतवद्यशोऽग्ने मित्रो न पत्यसे।
१ २ ३ २३ १ २ ३१र २र
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ ४ ॥ ८४

४रर ५ २१ २ ४र ५
३:। सूरोनदीहाउ। द्युतात्वा३म्। क्रपापवाहाउ।
१ २ १र २ १
करोचा२३सा३४३इ। ओ२३४५इ। डा ॥ २२ ॥ ८३

शोधक! अग्ने! 'सूरोन' सूर्यइव 'क्रपा'(१) स्तोतव्याभिमुखीकरण समर्थया स्तुत्या स्तूयमानस्त्वं 'द्युता' दीप्त्या 'रोचसे' हि प्रकाशसे खलु।

"दिवि सन्"--इति, "दिवि षन्"-इति च पाठौ(२)॥३॥८३

हे 'अग्ने'! 'त्वं हि' त्वं खलु 'चैतवत्' क्षितिः क्षयोऽ क्षयः तत्सम्बन्धि चैतं शुष्क-काष्ठं, तद्युक्तं 'यशः' अन्नं (नि०२,७ हविर्लक्षणं 'पत्यसे' अभिपतसि गच्छसि। तत्र दृष्टान्तः—'वि

---

८४ नास्तोयमुत्तरार्चिके। ५४

(१)—'क्रपा'-इति निघण्टु-तृतीय-चतुर्दशे अर्चति-कर्मसु द्वादशं पदम्, त क्रपामित्यादिना (३,१.३९) तृतीयायामुक्।

(२)-'पूर्वपदात् (८,३.१०६)'-इति षत्वं वैकल्पिकं सिद्धमेव।

I त्वꣳहि चैतवद्यशः। इयदुयाहाइ। अग्नाइमि।
चो। नापत्या२३४साइ। आआ३४ह्वो। इयाहाइ।
त्वंवि। चा। षणो२आ२३४वाः। आआ३४ह्वो। इया-
हाइ। वासा३उवा। पु। ष्टाइम्। नापुष्या२३४सी।
आआ३४ह्वो। इयाहा। ह्वो५इ। डा॥ २३॥ ८४

त्वोन' अहरभिमानी मित्रोदेवः(१) सइव [यद्वा। चयइति गृह-नाम (नि०३,४) 'चैतवत्' चैतं निवासकं हविर्लक्षणमन्नं तद्युक्तम् यजमान-गृहं मित्रभूतः पुरुधाभिपतसि। यद्वा। पत्यतिरैश्वर्य-कर्मा, (नि०२,२१) ईप्सितमन्नं 'पत्यसे' ईशिषे] अतः कारणात् हे 'विचर्षणे!' विशेषेण सर्वस्य द्रष्टः! 'वसो!' वासकाग्ने! त्वं 'अवः' अवनीयमन्नम् (नि०२,७) अत्र-कार्य-भूतां 'पुष्टिं' च पुष्यसि वर्धयसि॥ ४॥ ८४

I बृहच्चैवाग्नेयम्।

(१)—स च चतुरिक्षाः, नैरुक्ते (१०,२,८-९) वायुादिषु परिगणितत्वात्। 'मित्रो जनान्यातयति ब्रुवाणोमित्रोदाधार पृथिवीमुतद्याम्। मित्रः कृष्टीरनिमिषाभिचष्टे मित्रायेदं घृतवज्जुहोत'-इति ऋक् च तत्रैवोदाहृतम्।

अथ पञ्चमी।

सूक्त*-वाहादितऋषिः।

३ २ २ १ २ ३ २ २ १ २ ३ १ २
प्रातरग्निः पुरुप्रियो विश्वस्तवेतातिथिः।
३ २ ३ १ २ ३ १ २ २ ३ १ २
विश्वे यस्मिन्नमर्त्ये हव्यं मर्त्तास इन्धते॥ ५॥ ८५

५ २ २ ५ २ १ २ २ १ २
। प्रातरग्नाइः पूरुप्रियाः। विश्वास्तवे। ता२३। अ-
३ २ १ २ १ ३ ५ १
तिथाइः। वाइश्वेयास्मीइन्। अमा२र्त्ता२४याइ। हव्या

'पुरुप्रियः' बहु-प्रियः 'विशः' यजमाने धनस्य निवेशकः(१) 'अतिथिः' यजमानानां गृहान् प्रति [तिथिषु न अभ्येतीत्यतिथिः। तथाह यास्कः—"अतिथिरभ्यतितो गृहान् भवत्यभ्येति तिथिषु पर-कुलानीति पर-गृहाणीतिवा(४,१,५)" इति] एवं विधोऽग्निः 'प्रातः' 'स्तवेत' स्तूयते। 'अमर्त्ये' अमरण-धर्मके 'यस्मिन्'

८५ साम्नोयमुत्तरार्चिके। ५५

* सूक्त-इति वि०-पाठः।

। बृहतश्च कौमुदस्य साम।

(१)—'विशः', प्रथमा-बहुवचनमिदं तृतीया-बहुवचनस्य स्थाने द्रष्टव्यम्, विड्भिः यजमान मनुष्यैः; 'स्तवेत' लिङर्थे लडर्थे द्रष्टव्यः कर्मणि च विड्भिः स्तूयते-इति वि०।

अथ षष्ठी।

वसूयवआत्रेयाऋषयः।

१२ ९२ ३ २ ३ १ २ ३ १ २
यद्वाहिष्ठं तदग्नये बृहद्वर्च विभावसो।
१ २ ७ २ २ २७ ३ १ २
महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ६ ॥ ८६

१ २ १ २१ २ १
२३७ह्वोइ। मर्त्ता३ह्वो। सइन्धा२३ता३४३इ। ओ२३
४५इ। डा ॥ २४ ॥ ८५

अग्नो 'विश्वे' सर्वे 'मर्तासः' मर्ताः मनुष्याः 'हव्यम्' 'इन्धते' दीपयन्ति दधतइत्यर्थः(१) ॥

"विश्वे यस्मिन्नमर्त्ये हव्यं मर्त्तास इन्धते" इति छन्दोगाः, "विश्वानि यो अमर्त्यो हव्या मर्त्तेषु रण्यति" इति बह्वृचाः ॥ ५ ॥ ८५

'वाहिष्ठं' वोढृतमं 'यत्' स्तोत्रं 'तत् अग्नये' क्रियते। अतः हे 'विभावसो" (१)प्रभो धनाग्ने ! 'बृहत्' बहुलं धनं च 'अस्मे'

८६ नास्तीयमृत्तरार्चिके। ५६

(२)-'विश्वे यस्मिन् इति परस्माद् यच्छब्द आवर्तात् पूर्वस्मिन्नृग्वर्धे तच्छब्दोऽध्याहर्तव्यः। पाठक्रमादर्थक्रमस्य बलीयस्त्वात् पूर्वं द्वितीयोऽर्धर्चो व्याख्यातव्य' इति वि०। एवञ्च यस्मिन्नग्नौ विश्वे मर्तासोऽग्निमिन्धते, सोऽयं विद्वद्भिः स्तूयतइति भावार्थः।

(१) वसु धनं, तद् यस्य विविधं भाति दीप्यते स विभावसुः।

४ २ ५ ४ १ २ १ २ २
I यद्वाऽहिष्ठं तदा। ग्नयाइ। बृहद्वर्चविभावा२३साउ।
१ १ १ २ १२ २
माच्चि२षाइवा२। त्वद्रयिः। त्वद्वा२३जाः। उद्दीरा२३ता
१
३४३इ। ओ२३४५इ। डा ॥ २५ ॥

४ २ ५ ४ ५ ४ ५ २ २ ४ ५ २ १
I यद्वाऽहिष्ठं तदग्नये। यद्वाऽहिष्ठोवा। तदग्नयाइ।
२ १२ २ १
बृहदा२३र्चा। विभावसाउ। महिषा२३इवा। त्वद्रयिः।
२ १२ २ १
त्वद्वा२३जाः। उद्दीरा२३ता३४३इ। ओ२३४५इ। डा
॥ २६ ॥ ८६

अस्मभ्यं प्रयच्छ। कथमस्मान्-धन-प्रदातृत्वमित्यपेक्षायामाह—यतः 'त्वत्' त्वत्तः सकाशात् 'महिषी' महती(२) 'रयिः' धनम् 'उदीरते' उद्गच्छन्ति(३)। 'इव'-इति पाद-पूरणः(४) ॥ ६ ॥ ८६

I,II अग्निऋषिः, यद्वाऽहिष्ठीये यन्मऽहिष्ठीये वा।

(२)—महन्नामसु 'महिषः'-इति षष्ठं पदम् (नि० ३, ३)।

(३)—'त्वद्वाजा'-इत्यस्य व्याख्यानमिह नोपलभ्यते। विवरणकारस्तु 'त्वद्रयिः'-इत्यस्य तथा सह धनम् इति व्याख्याय 'त्वद्वाजा' तथा सह अन्नानि इति व्याख्यातम्। भाष्य-नये खलु 'त्वत्' त्वत्तः सकाशात् 'वाजा' अन्नानि इत्यर्थः सम्भवपरः।

(४)—'एतद्वै भवति—यस्मादग्निर्नो दत्तं धनमन्नं च तथा सङ्गच्छते, यस्मा-

अथ सप्तमी।

गोपवनऋषिः, सप्तर्चाश्विनौ।

१ १ २ १ २ १ १ २ १ १ २
विशो विशो वो अतिथिं वाजयन्तः पुरुप्रियम्।
१ १ १ २१ १२ १ १ २ २ १ १
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ७ ॥ ८७

५ २ २ २ ५ १२ २
I विशोविशोऽम्वोऽतिथाइम्। वाजयन्ताः। पू
१ १ २ १ १ १ २
रुप्रीऽयाम्। अग्निंवो२। दूरा२३याम्। चुम्माइ।
२ २ १ २ ५ १ १ २ २ ५
वाऽचाऽः। स्तू२३४षेचाइ। ओ। चुवाइ। शू२३४षा।
१ २ २ १ ऽ ५२ ५ ४
चुम्मा। स्याऽमाऽ। म्मा२३४भाइ। ण्चियाऽचा। चो
युइ। डा ॥ २७ ॥ ८७

हे ऋत्विग्यजमानाः! 'वः' यूयं 'वाजयन्तः' अन्नमिच्छन्तः

---

८७ उत्तरार्चिकस्य ७,२,१२,१।

I अग्निऋषिः, विशोविशोयम् ऐडं वा।

इग्निना दर्शेन धनेनान्नेन च लक्ष्मीवन्तोऽपि। (कथम्भूतं धनमन्नानि च तथा सङ्कल्पो उच्यते—'सङ्किपीव' यथा राजभार्यां तनैव मह सङ्कल्पते तद्वदित्यर्थः)' इति वि०। अतः 'अग्नये' अग्निम् 'अर्च' इति योजना।

अथाष्टमी।

पुरुराट्रेयऋषिः।

३ १२उ ३ २ ३ १र २र ३ २ ३ १ २
बृहद्वयो हि भानवे ह्वादेवायाग्नये।
३ १र २ २र ३ १ २ ३ २ ३ २
यं मित्रं न प्रशस्तये मर्त्तासो दधिरे पुरः॥ ८॥ ८८

५ २ १र २ १ र २र १र २
I बृहद्वयाः। हिभानाऽ३वाट्। आर्चादेवा। य-

'विशोविशः' सर्वस्याः प्रजायाः 'पुरू-प्रियं' बहुप्रियम् 'अतिथिं' पूज्यम् 'अग्निं' स्तुत्या परिचरतेतिशेषः। अहं च 'वः' युष्मदर्थं 'दुर्यं' गृह-हितम्(१) अग्निं 'वचः' 'स्तुषे' स्तौमि 'शूषस्य' सुखस्य(२) लाभाय। कैः साधनैः? 'मन्मभिः' मननीयैः स्तोत्रैः॥ ७॥ ८७

यज्ञे 'भानवे' दीप्तिमते 'अग्नये' 'बृहत्' महत् 'वयः' हवी-

---

८८ नास्तीयमुत्तरार्चिके। ५७

(१) 'दुर्य्याः'-गृहाणाम्'-इति नि० ३, ४,२९। 'दुर्यं' यज्ञं गृह-द्वारि भवम्'-इति वि०।

(२)—'शूषम्'-इति निघण्टु तृतीय-षष्ठे सुख-नामसु एकादशतमम्। लाभायेति षष्ठी भवन-सामर्थ्याद् गम्यते।

१ २ १ ७ १ २
अग्गा२३याइ। यम्मित्रन्न। प्राशस्तायाऽइ। मर्त्तासो-
२ ४ ५ ४ ५
३दा३। धिरोवा। पुपूरो६ढाइ ॥२८॥

५ २ २ ४ १ २ २ २ १
॥ बृहद्वयोच्छिभानाढ्वाइ। आर्चादेवा। यअग्गा२३
२ १ २ १ ७ १ २ २ १
याइ। यम्मित्रन्न। प्राशस्तायाऽइ। मर्त्तासोढ। धा-
२ २ ३ २ २ २ ५ २ २ १ १
दूरे१पूरा। औहोवाहा३४औहोवा। वा३हा २३
११ १२
४५: ॥ २८ ॥ ८८

रूपमन्नं(१) दीयते 'हि' अतस्त्वमपि 'देवाय' द्योतमानायाग्नये वयः 'अर्च' प्रयच्छ। 'मर्तासः' मनुष्याः 'यम्' अग्निं 'मित्रं न' सखायमिव 'प्रशस्तये'(२) प्रकृष्ट-स्तुतये अस्मदर्थं देवानग्निः स्तौतीति 'पुरः' 'दधिरे' पुरस्कुर्वति(३)॥

"प्रशस्तये"—"प्रशस्तिभिः"-इति पाठो॥ ८॥ ८८

I,II शार्ङ्गप्रजापतिऋषिः, कनीनिके हे।

(१)—'वयः'-इत्यन्न-नामसु द्वाविंशतितमम्। नि० २,७।

(२)—'प्रशस्तये' चतुर्थ्येकवचनमिदं तृतीया-बहुवचनस्य स्थाने द्रष्टव्यम्, प्रशस्तिभिः स्तुतिभिः; स्तुवन्तीति वाक्यशेषः'-इति वि०।

(३)-'पुरः' पूर्वस्यां दिशि 'दधिरे' धारयन्ति आहवनीयाग्नेति वि०-सम्मतोऽर्थः।

अथ नवमी।

गोपवनऋषिः।

१२ ११२३ १२३१२ २२
अगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम्।
१ २ ३ ११ २ ३११ ३१२
यः क्ष्म श्रुतर्वन्नार्क्षे बृहदनीक इध्यते ॥ ८ ॥ ८९

५ २ १ २ २ १ २ १
I अगन्मवृ। त्राऽहन्ताऽमाम्। ज्याइष्ठम। ग्निमा-
२ २ १ १ २१ २
नाऽवाम्। यक्षाऽरऽहोइ। श्रुतर्वन्नार्क्षाइ। बृहाऽऽ-
१ २ २ ५ २
नीकयाऽ१उवायेऽ। ध्याऽऽ४तेऽ॥ ३० ॥ ८९

'वृत्रहन्तमं' पापानामतिशयेन हन्तारं 'ज्येष्ठं' प्रशस्यम् 'आनवं' मनुष्य-सम्बन्धिनं, तेषां हित-कारिणम्(१) 'अग्निम्' 'अगन्म' गन्ता 'वयं' [पूजार्थं बहुवचनम्] अग्निः 'यः' 'आर्क्षे' ऋक्ष-पुत्रे 'श्रुतर्वन्' नाम्नि राजनि(२) निमित्तं 'बृहत्' महान् 'अनीकः'

---

८९ नास्तीयमुत्तरार्चिके। ५८
I अत्रिऋषिः, श्रौतर्वणम्।

(१)—'आनवः मनुष्याः' नि० २, ३, २०। 'अनुर्मनुष्यः तस्यापत्यम् मनुष्येण हि सम्बन्धेन अग्निर्जन्यते, तेनासौ आनवः, अनुस्य आनवम्' इति वि०।

(२)—'श्रुतर्वा नाम ऋषिः' इति वि०।

अथ दशमी।

वामदेवः कश्यपोवा मारीचोमनुर्वा वैवस्वतउभौवा।

३ १२ २२३ १ २ ३ २ ३ १ २ ३ १ २
जातः परेण धर्मणा यत्सवृङ्भिः सहाभुवः।

३ २उ ३ १ २ ३ २ ३ २ ३ १२ २२ ३ २
पिता यत् कश्यपश्चाग्निः अद्धा माता मनुः कविः ॥१०॥ ९०

२२ २ १ ३ २ १ ३ २ ३
। जातः परेणा३धा। इ॒हा। मणा। इ॒हा। यो

५ १२ २ १ ३ २
२३४नीम्। योनिमिन्द्र अगक्थः। यत्सवृङ्भिःसा३हा। इ॒हा।

ज्वाला-समूहः सन् 'इध्यते स्म' प्रज्वलो भवत्। [लट् स्मे (३,२,११८) इति भूते लट] तमग्निमागताइति समन्वयः। एवं श्रुतर्वाणं भिक्षणायागतो गोपवनः अग्निं स्तौति॥

"अगन्म"—"आगन्म"-इति च पाठौ। "यः स्म श्रुतर्वन्नार्चे बृहदनीकइध्यते"-इति छन्दोगाः; "यस्य श्रुतर्वा बृहन्नार्चेऽनीकेऽधते"-इति च बह्वृचाः॥ ९॥ ८९

९० नास्तीयमुत्तरार्चिके। ५९

। कश्यपस्य च स्वयोनीन्द्रस्य वा, इन्द्रियम्। इन्द्रस्य वा प्रियम्।

१ ३ २ ३ ४ १ २ २
भुवाः। इन्द्रा। योऽ३४नीम्। योनिमिन्द्रश्वगक्थः।
२ १ ३ २ २ १ ३ऽ ३ ४
पितायक्तश्याऽ३पा। इन्द्रा। स्याग्राइ। इन्द्रा। योऽ३४नीम्।
१ २ २ २ १ ३ २ १
योनिमिन्द्रश्वगक्थः। अङ्गामातामाऽ३नूः। इन्द्रा। कवा-
३ २ ३ ४ १ २ ३ १ १ १ १
इ। इन्द्रा। योऽ३४नीम्। योनिमिन्द्रश्वगक्थाऽ३४५ः॥
३१॥ ९० *

इति चतुर्थ-दशतिः॥

हे 'अग्ने' त्वं 'परेण' उत्कृष्टेन 'धर्मणा'(१) आधानादि कर्मणा 'जातः' प्रादुर्भूतोसि। 'यत्' यः 'महद्भिः' यज्ञे सह वर्तन्ते इति सहतः ऋत्विजः, तैः सह 'अभुवः' भुमि-सम्बन्धि-यज्ञे वर्तसे [ऋश्यपस्याग्निरित्येतयोः परस्परं विभक्ति-व्यत्ययः(२)] 'यत्' यस्या

---

(१)—धर्म इति यज्ञ-नामसु चान्यम् निः ३, १७।

(२) विवरण-ग्रन्थे तु यथा विभक्ति व्याख्यानं दृश्यते। तद्यथा—'यत्' यः 'अग्निः', 'ऋश्यपस्य' ऋषेः 'पिता' पालयिता, 'अङ्गा' अदिति मत्य-नाम (निः ३, १०, २), तस्य धारयिता, 'माता' दृष्टि-प्रदान-द्वारेण सर्वस्य जगतो निर्माता, 'मनुः' ज्ञाना धिकारस्य भक्तृतया अभक्तृतया वा, 'कविः' मेधावी; यस 'महद्भिः' सह विद्यमानैर्देवैः 'सहाभुवः' सहैव प्रादुर्भवति: सोयम् 'परेण' उत्कृष्टेन 'धर्मणा' कर्मणा 'जातः' प्रादुर्भूतः। इति विवरण-निष्पन्नोर्थः।

* इति ग्रामे गेय-गाने द्वितीयः प्रपाठकः। २।

ग्नेः 'कश्यपः' 'पिता' 'श्रद्धा' देवी 'माता' च 'मनुः' 'कविः' क्रान्त-कर्मा मेधावी वा ["मनुर्वैवस्वतः स्रोतासीत् सोऽग्निः यजमानायाभीष्टं फलं प्र यच्छत्" अनेन सुचितमुपाख्यानं ब्राह्मणान्तरे द्रष्टव्यम् ॥ १० ॥ ९०

इति सायणाचार्य्य विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोऽभ्याख्ये पञ्चमस्याध्यायस्य नवमखण्डं ॥ ९ ॥

अथ दशमे खण्डे

मेयं प्रथमा।

अग्निस्तापसऋषिः*।

२ ७ १२ ३ १ २ ३ २ ७ १ २
सोमꣳ राजानं वरुणमग्निमन्वारभामहे।

३ २७ ३ १ २ ३ १ २ ३ २ ७ १ २
आदित्यं विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ १ ॥ ९१

४ ४ ५ ४ ४ ४ २ १ ३ २
ओम्। सोमꣳ राजानं वरुणम्। अग्निमन्वारभाम

* 'वामदेवस्यार्षम्'-इति वि०।

९१ नास्तीयमुत्तरार्चिके। ६०

। वार्हस्पत्यम्।

१ २ २ २ १ २ १२१ १ २
हे३। हो वा३ हा३। आदित्य विष्णु सूर्यम्। हो वा३
२ १२ २ १ २ २ १ ऽ २
हा३। ब्रह्माणा२३च्चा३। हो वा३ हा३। बृहा३उवा३।
५ ८
पा२३४तीम् ॥ १ ॥ ९१

'राजानं'(१) राजमानमीश्वरं वा 'सोमं'(२) 'वरुणं'(३) च 'अग्निं' च 'गौभिः' स्तुतिभिः 'अन्वारभामहे' रक्षणार्थम् आश्रयामहे। तथा 'आदित्यम्' अदितेः पुत्रं'(४) 'विष्णु'(५) च 'सूर्यं'(६) च 'ब्रह्माणं'(७) च बृहस्पतिं'(८) च अन्वारभामहे(९) ॥ १ ॥ ९१

(१)—राजानमिति सोममित्यादेर्विशेषणम्।

(२)—"चन्द्रमसो वैतस्य वा 'सोमं मन्यते' * * सोमोरुपविशेषैरोषधिवन्द्रमा वा" इति नै० ११,१,१—५।

(३)—"वरुणो वृणोतीति * * वृष्टिर्गुनक्ति भूमिम् इत्यादि नै० १०,१,४-५।

(४)—यद्यप्यादित्यः सूर्यइति प्रसिद्धः "सूर्यमादित्यम्" इति नैघण्टुके (१,१,१६) परमिह सूर्यमिति पृथक्पदमुपः अदितेः पुत्र-विशेषस्य इन्द्रादेरस्य वाचोर्थकथनमित्याशयः, तथोक्तम् तत्रैव नैरुक्तैः—"अदितेः पुत्राः * * अन्यासामपि देवतानामादित्य-प्रवादाः स्तुतयो भवन्ति" इति।

(५)—"विष्णुर्भवति * * 'इदं विष्णुर्विचक्रमे"-इत्यादि नै० १२,१,८।

(६)—"सूर्यः * * उदुत्यं जातवेदसम्"-इत्यादि नै० १२,१,१-५।

(७)—"ब्रह्मा सर्वविद्यः, सर्वं वेदितुमर्हति"-इति नै० १,२,१२। नाथं दैवतकाण्डे देवतासु परिगणितः।

(८)—"बृहस्पतिर्बृहतः पाता"-इत्यादि नै० १०,१,११।

(९)—आश्रयामइत्यर्थः। इह मन्त्रे त्रित्यपत्नेजोमरुद्व्योममूर्ध्वचन्द्रमश्चानामयजमानेत्यृक्पर्युपासनं ध्वन्यतइति बोध्यम्।

अथ द्वितीया।

वामदेवोद्दयोः।

१ २ ३ २ १ १ २ १ २ १ २ २
इत एत उदारुहन्दिवः पृष्ठान्यारुहन्।
१ २ २ १ १ २ १ १ २ २
प्रभूर्जयो यथा पथो द्यामङ्गिरसो ययुः॥ २॥९२

१ २ १ २ १ २ १ २
I आरोऽहान्। ३। इत एतऊऽउदारु१हा२न्। दिवः
१ २ १ २ १ २
पृष्ठानोऽयारू१हा२न्। प्रभूर्जयोयाऽअथापा१था२। उ
१ २ १ २ १ २
द्यामङ्गिराऽअसोया१यू२:। आरोऽहान्२। आ२३।
१ २ १ २ १ २
रो२। हा२३४। औहोवा। ऊ२३४पा॥ २॥९२

एते अङ्गिरसः 'यथा' 'उत्' मार्गेणैव 'द्यां दिवं 'प्र ययुः' प्रापुः। कोदृशाः? 'भूर्जयः' [भृज्जतिः पाक कर्मा] कविषां पक्तारः(१)। तत्र दृष्टान्तः--'पथा' मार्गेण जना ग्रामादीन्

---

९२ नास्तोयमुत्तरार्चिके। ९१

I आरुढ़वत् आङ्गिरसं यामं वा।

(१)--नेदं व्याख्यानं साधु मन्यते. 'भूः, जयः' इत्येव पदकारव्याख्यानयत्व दर्शनात, न हि भृज्जतेर्भुर्जयतिरूपे 'भूः, जयः'-इत्येवमूपग्रहः सम्भवति, नापि तदर्थोन्न स्वर श्रुतिः। विवरणकारस्तु - 'भः पृथिवी तां ये महावीराख्यानामुग्रामेन जितवन्तः ते' इत्याह।

अथ तृतीया।

एतस्याः कश्यपोऽसितोदेवलोवा*।

३ १ २ ३ २ ३ १ २ ३ १ २
राये अग्ने महे त्वा दानाय समिधीमहि।

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
ईडिष्वा हि महे वृषन्द्यावा होत्राय पृथिवी ॥ ३ ॥ ९३

I ५ ४ ५ ४ ५ ४ १ २ २ २
राये अग्नेमहाइ। त्वा। दानायसमिधीमा२३

१ १ १ १ १ १
द्वी। आइडी२ष्वाहो२। महेवृषन्। द्यावा२होत्रा२।

१ १ १ १ १ १
यपोवाइ ओ२३४वा। थापृथ्वोइहाइ ॥ ३ ॥

II २ १ ४ ३ २ २ ५ १ २ २ ३
रायाया२३ग्नेमहेत्वाहाउ। दानायसमिधीमा२३

गच्छन्ति, तथा इतः भूमेः सकाशात् 'उदारुहन्' उदगच्छन्। आगत्य च 'दिवः' स्वर्गस्य 'पृष्ठानि' स्थानानि 'आरुहन्' प्राक्रमन्ति ॥ २ ॥ ९२

---

* 'वामदेवस्यार्षम्'-इति वि०।

९३ नास्तोयमुत्तरार्चिके। ६२

I, II इमे आसिते।

अथ चतुर्थी।

भार्गवहुतिः सोमो वा ऋषिः* ।

१ २ ३ २ १ २ ३ २ १ २ ३ २ १ २
दधन्वे वा यदीमनु वोच ब्रह्मेति वेरु तत् ।
२ ३ १ २ ३ १ २ १ २ ३ १ २
परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥ ४ ॥ ९४

१ १ २ २ १ २ ३ ५ १ २
ह्वाइ। आइडाइघाइ ह्वाइ। माहेवा३ ३४र्षान्। द्यावा
१ २ २ १ ५ ४ ५ ८
ह्वोइ३वाइ। यपो२ ३४वा। थापृइवोइ ह्वाइ ॥ ४ ॥ ९३

हे 'अग्ने'! 'त्वा' त्वां 'महे' महतः 'राये'(१) धनस्य 'दानाय' दानार्थं 'समिधीमहि' वयं सम्यग् दीपयामहे। 'वृषन्' वर्षितः। अग्नये 'महते' 'होत्राय' अग्निहोत्रार्थं(२) 'द्यावा' दिवं 'पृथिवी' च 'ईडिष्व' स्तुहि ॥ ३ ॥ ९३

---

* 'रत्नमदस्यार्षम्'-इति वि०।

९४ नास्तीयमुत्तरार्चिके। ६३

(१)—'राये मह इति यस्मान्ने इत्यर्थे इति वि०। एवञ्च क्रमः ग-भावे रूपमिति ध्वनितम्।

(२)—'ह्रियते तदिति होत्रं सोमद्रव्यम्, हे यजिर्वेत्यादेर्धात्वर्थे चतुर्थी, महतो होत्रद्रव्यस्यार्थायेत्यर्थः। होत्र-ग्रहणञ्चात्र प्रदर्शनार्थम्, सर्वासां दानादि क्रियाणां सम्बन्धिनो द्रव्यस्यार्थायेत्यर्थः'-इति वि०।

४ र र४ १र र र
। दधन्वेवापूयदीमनू। वोचद्ब्रह्मेतिवे-रुतत्। पारि-

१र २ ३ ५
विश्वा२। निकाव्या। नाइमिश्चक्रौवा। ई२३४वा।

२१ ४ ५ ४ ६
भुवात्। औ२३होवा। होपूइ। डा॥ ५॥९४

'वा' अथवा 'ईम्' एनं यज्ञम् 'अनु' लक्षीकृत्य(१) 'यत्' हविरादिकं 'दधन्वे' धारयत्यध्वर्यादिः(२) यद् 'ब्रह्म' स्तोत्रम् 'अनुवोचत्' अनुवक्ति होत्रादिः [अत्र वा अन्वित्येतद्योज्यम्]। 'तत्' सर्वं 'वेरु' (३) वेरेव कामयते जानाति वा स्वयमनुष्ठातुम्। अयमग्निः 'विश्वानि' सर्वाणि 'काव्या'(४) काव्यानि 'कवयः' मेधाविनऋत्विजः तत्-सम्बन्धीनि कर्माणि 'पर्यभुवत्' परिभवति स्वायत्तानि करोति व्याप्नोतीत्यर्थः। व्याप्तौ-

---

। त्वाष्ट्रीसाम।

(१)—'वेति पाद-पूरणः'-इति वि०। 'ईम्', 'अनु' द्वायपि पाद-पूरणौ-इति च वि०।

(२)—'दधन्वे धारयति, अश्रुतस्य धारणं न सम्भवति अतः धारणेनाव श्रवणं लक्ष्यते शृणोतीत्यर्थः, किम्पुनः शृणोत्यग्निः। उच्यते'-इत्यादि वि०।

(३)—रुद वेः, उ—इतिछेदः; उ-शब्द स्वार्थः।

(४)—'वेः, मध्यमपुरुषस्यैकवचनमिद प्रथमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्; यद्वा जानातीत्यर्थः।

(४)—'शालं सुपामित्यादिना। 'काव्यानि अति-वर्चांसि हव्यानि वा'-इति वि०।

अथ पञ्चमी।

पायुर्ऋषिः।

१२१ १२१ १२ २ १ ३ २१ १२
प्रत्यग्ने हरसा हरः शृणाह्यत्रिं विश्वतस्परि।
१ १२ २२३ २१क २२ २क २२
यातुधानस्य रक्षसो बलं न्युज्ञ वीर्यम्॥ ५॥ ९५

१ ४५२ २ २४ २ ४ ५ १ १२ २ १
I प्रत्यग्ने। हो३इ। हरसाहरा६ए। शृणाह्यत्रिवा२
३ २ ३ ५ २२ १२ २ १ ३२
इ। श्वता३४५ः। पा२३४री। यातुधानस्यरक्षसो३।
१ २ १ २१ ५ ३ ५ ६
बा२३लाम्। नियुज्ञवो२३४वारी२३४याम्॥ ६॥ ९५

दृष्टान्तः—'नेमिः' वह्निर्वेष्टन वलयः 'चक्रमिव' रथाङ्गं यथा कात्स्न्येन व्याप्नोति तद्वत्॥

"ब्रह्म"-इति "ब्रह्माणि"-इति च पाठो। "'भुवद्"-"भवत्"—इति च॥ ४॥ ९४

हे 'अग्ने!' त्वं 'हरसा' त्वदीयेन तेजसा क्रोधेन वा(१)

---

९५ नास्तीयमुत्तरार्चिके। ६४

I अगस्त्यऋषिः, रक्षोघ्नम्।

(१)—'निघण्टौ'—प्रथम-सप्तदशे 'अरुत्' पर्यायः, द्वितीय तथोदशे 'क्रोध' पर्याये चेत्युभयत्र पाठात्।

अथ षष्ठी।

प्रस्कण्व ऋषिः।

१२५ १२ ३२ ३१ २ ३ २ ३२
त्वमग्ने वसूँरिह रुद्राँआदित्याँ उत।
१२ ३२३ ३१ २ ३ १२
यजा स्वध्वरञ्जनं मनुजातं घृतप्रुषम् ॥ ६ ॥ ९६

४५२ ४५४ २१२ २
त्वमग्ने। त्वमग्नाइ। वसूँरिहा। रुद्राँआ२३
२ १२ २ २ १
दो। नियाँउता। यजासू२३वा। ध्वरञ्जनम्। मनु

[तथाच यास्कः—हरोहरतेर्ज्योतिर्हरउच्यते-इति। 'यातुधानस्य' राक्षसस्य 'हरः' हरणशीलं बलं 'विश्वतः' सर्वतः 'परि' गतं प्रति 'मृणाहि' नाशयेत्यर्थः। तथा, 'रक्षसः' राक्षसस्य 'वीर्यं' च 'न्युञ्ज'(२) निःशेषेण रुज भञ्जयेत्यर्थः॥

"मृणाहि"—"मृणीहि"—इति पाठौ। "बलं न्युञ्ज वीर्यम्"-"बलं विरुज वीर्यम्"-इति च॥ ५॥ ९५

हे 'अग्ने' त्वम् 'इह' कर्मणि वस्वादीन् 'यज'। 'उत'

---

९६ नास्तोयमुत्तरार्चिके। ६५

। मानवम्।

(२)—न्युञ्ज. भृज्जं कुर्वित्यर्थः-इति वि०।

२ १२ १ २ १
जा२३नाम्। घृतप्रुषम्। इडा२३भा३४३। ओ२३४
५
पुइडा ॥ ७ ॥ ९६

इति पञ्चम-दशतिः ॥

अपिच 'जनम्' अन्यमयि देवता-रूपं प्राणिनं(१) यज। कीदृशम्? 'स्वध्वरं' शोभन-याग-युक्तं 'मनुजातं' मनुना प्रजापतिना उत्पादितं 'घृतप्रुषं' उदकस्य सेक्तारं(२) यजेति सम्बन्धः(३) ॥६॥ ९६

इति सायणाचार्य्य विरचिते सामवेदार्थप्रकाशे छन्दोव्याख्याने
प्रथमस्याध्यायस्य दशमखण्डः ॥ १० ॥

---

(१) प्राणोवायुः, तदेकस्थानतया तदवत्वं प्राणिनम् आकाशावरपर्यायं प्रजापति-देवमित्यर्थः। "वायुर्वेन्द्रोवान्तरिक्षस्थः" इति हि नैरुक्तम (१२,१), प्रजापतेश्चान्तरिक्षस्थानेषु परिगणनञ्च स्पष्टं निघण्टु, शेषे काण्डे तृतीये खण्डे: आकाशो हि प्रजापतिरिति च शवरस्वामिना स्पष्टमुक्तम (१.२.१०)। अस्याश्च ऋचि वस्वादीनां सर्वासामेव देवगणानामुक्तेः खः परिदृश्यते, प्रजापतेश्चाखण्डावयवित्वेन तत्तत्सम्बन्ध एव योज्यते। एवञ्चोपपन्नमेतत् सर्वासामेव वयस्त्रिंशत्संख्याकानां देवतानां यजनमिति ध्येयम्।

(२)—घृतमित्युदकस्य नाम, निघण्टु-प्रथम द्वादशे तस्य दशम पदत्वात्। उदक सेचनञ्च वायोः कर्म,-तदुक्तं भगवता निरुक्तकारेण- "वायव्यं वै क्षिप्रदानं, हव वधः"-इत्यादि (७,१.३) "हव वधो मेघ वधः"-इति च तद्भाष्यम। वायुरिन्द्रश्चाभिन्न "वायुर्वेन्द्रोवेति याज्ञोक्तेः ७,१,१। वायुरिन्द्रश्चैक एव यथा हन्मः करदिति" तद्भाष्यञ्च।

(३)—'इदं तत्वम्-"वयस्त्रिंशद्देवताः"-इति हि ताण्ड्यादि-श्रुतिः, तत्र च

॥ इति छन्दआर्चिके प्रथम-प्रपाठकः ॥ १ ॥

खण्डयोर्ऋपुरुत्वेति ककुभोऽष्टौ दशोष्णिहः।
जज्ञानः पावमानी स्यादुतस्येत्यदितेः स्तुतिः।
शिष्टाः षोडश चाग्नेयः समाख्या ऋत्विणीति वत्(०)॥

अथैकादश-खण्डे--

मेयं प्रथमा।

दीर्घतमा ऋषिः।

२ १ २ २ १ २ ३ १ २ ३ १ २ ३ २
पुरु त्वा दाश्वाङ्* वोचे रिरग्ने तव खिदा।
३ १ २ ३ २ उ ३ १ २
तोदस्येव शरण आ महस्य॥ १॥ ९७

*"दाश्वान्"-इतिपाठो बह्वृचां निरुक्त-सम्मतश्च(५,३,८)।

९७ नास्तीयमुत्तरार्चिके। ६६

"अष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः, इन्द्रश्चेति द्वात्रिंशत्, प्रजापतिश्चयस्त्रिंशत मात्रा-पूरकः"-इत्यादि भाष्यम्। ते च सर्वे मनु-जाताः, तथा च-"इति स्तुतासो जसथा दिशा दशो ये स्थ चयस्थ त्रिंशच। मनोर्देवा यज्ञियासः"-इति ऋग्वेदीया श्रुतिः (८,४,१०,२)। तत् सर्वं यज।

(०)-'पुरु त्वा'-इत्यादिरेकादश-खण्डः, तत्र ऋचोदश, 'प्र संहिताय'-इत्यादि द्वादश खण्डं तत्र ऋचोऽष्टौ; अनयोरुभयोः खण्डयोः सङ्कलनया अष्टादश ऋचः सूयन्ते। तासु द्वादश-खण्डात्मकाष्टौ ककुप्छन्दस्काः, एकादश-खण्डात्मकासु द्वादश उष्णिक्छन्दस्काः किन्तु एकादश-खण्डीय जज्ञानदित्याद्या पञ्चमी ऋक् पवमान-देवताका, तदव्यवहित-सूक्ता उतस्यैत्याद्या षष्ठी अदिति-देवताका, अवशिष्टासु सर्वाः आग्नेय्यः। नन्वनाग्नेय-मन्त्र-संस्पर्शेऽपि कथमस्याग्नेय-पर्वत्वं न नश्यति? इति शङ्कामपनोदयितुमाह,—'समाख्या ऋत्विणीति वत्' एकस्मिन्नेव प्रधाने ऋत्विणि राशि-शब्दे यथा, अप्रधानभूतास्तु

I पुरू। त्वादाशिवाꣳवोचायेऽ। आरोराग्नाइ।
तावस्विदा। तोदस्येवशरणआ२३ह्वोइ। मह्वा२३ह्वोयें
३। स्यो। या२३४औह्वोवा। ई२३४५॥ ८॥

II पुरुत्वादाशिवाꣳवो। चे। आरोरा२३४ग्नाइ।
तावस्वा२३४इदा। तोदस्येवशर। णयो२३४ह्वाइ। मा
३ह्वा३। हुम्मायेऽ। स्यो। या२३४औह्वोवा। ई२३
४५॥ ९॥

हे 'अग्ने'! 'त्वा' त्वां 'पुरू' बहु 'वोचे' [यद्वा बहु दाश्वानित्यस्यान्वयः] पुत्रं देहि, वित्तं देहि इत्याद्याशासनानि ब्रवीमीत्यर्थः। किन्तूष्णीम्? नेत्याह—यतः 'दाशिवान्' दाश्वान्(१) अभिमतं हविर्दत्तवानस्मि, अतो वोचे। इतर-साधारण्येन ब्रुवतः कथं दातव्यम्-इति न मन्तव्यम्। यतः हे अग्ने' 'तव स्विदा'(२)

I, II द्रुते तौदे, दैर्घतमसे वा।

समक्षासु मनास्व इत्यिजो यान्तीति समाख्यानम्. तदर्दित्यर्थः। प्राश्वात्यानुरोधात् अनाग्नेय्योऽपि ऋचः आग्नेय्यः-इति व्यवहर्तव्ये इति भावः।

(१)—"दाश्वान्साक्षान् भोजसि" (६.१.१२) इति कर्मणो वाक्षन्येन कृतम्।

(२)—'स्वित्. चा-इत्येतौ एव-शब्दस्यार्थे दृष्टौ।

I पुरुत्वादाग्निवाꣳवो। चे। चे। अराइरा२३४
ग्राइ। तावस्वा२३४इदा। तोदास्वा२३४इवा। ग्नारा-
णा२३४या। मा३च्चापुस्वाई५६। ए३१ ॥ १० ॥

II पुरुत्वा३दाग्निवाꣳवोचे। अरिर। ग्राइ। तवा
स्वा२३४इदा। तो२३४दा। स्वा२३४इवा। ग्नाराणा
२३४या। मा३च्चापुस्वाई५६ ॥ ११ ॥

III पुरुत्वा२३दाग्निवाꣳवोचे*ओच्चा। च्चा। औच्चोइ
च्चा। ओ२३४वा। अरिरग्नेतवस्विदा। च्चा। औच्चो
३च्चा। ओ२३४वा। तोदस्वेवग्नरणआ। च्चा। औच्चोइ
च्चा। ओ२३४वा। ए३। मच्चस्वा२३४५ ॥ १२ ॥ ९७

* ब्र० पुस्तके पञ्चसेषु सामसु "वाड्वोचे"-इति स-ङकारः पाठः।

III,IV,V इमानि दैर्घतमसानि तौदानि वा।

अथ द्वितीया।

विश्वामित्रऋषिः।

१र २र ३२उ ३ १ २ ३ २
प्र होत्रे पूर्व्यं वचोग्नये भरता बृहत्।
३ १र २र ३ १ २ ३ २ ३ १ २
विपां ज्योतीꣳषि बिभ्रते न वेधसे ॥ २ ॥ ९८

'अरिः'(३) तवैव अर्त्ता सेवकोऽहं(४) 'महस्य' महतः 'तोदस्य' गच्छ कस्य स्वामिनः(५) 'शरणआ'(६) ['इव'—इत्यूपमार्थे] तदा ईश्वरगृहे यथा गर्भ-दासादिर्नियतोवर्त्तते तद्वदहमपि। यस्मादेवं तस्मात् अभिमतं बहु वोचे। त्वमपि तत् सर्वं देहीत्यर्थः॥

अत्र निरुक्तम्—"वहु दाश्वांस्त्वामभिद्रुयाम्यरिरमित्रमृच्छते रोश्वरोप्यरिरेतस्मादेव यदन्यदेवत्या अग्नावाहृतयोऽहयन्त्इत्येतद्दृष्टैवमवत्यत्तोदस्येव शरणआ महस्य तुदस्येव शरणेधि महतः (५,१,८)" —इति ॥ १ ॥ ९७

९८ नास्तोयमुत्तरार्चिके। ६७

(३)—निघण्टु-तृतीय-पञ्चम-पठितस्य परिचरण-कर्मणः ऋच्छतेरूपम। उक्तञ्च निरुक्तकारेण 'ऋच्छतेः'-इति ५,१,८।

(४)—'अरिः ईश्वरः त्वम्'-इति वि०। अर्थाः-इति निघण्टौ द्वितीय द्वाविंशे ईश्वर पर्याये द्वितीयं पदम्। निरुक्त-ऋतापृक्तम —इश्वरोप्यरिरिति (५,१,८)।

(५) —'तोद-शब्दनाद शब्दस्य उच्यते' इति वि०।

(६)—शरणे. आ—इति छेदः पदपाठे तथैव दर्शनात्। आ-इत्येतत् पाद-पूरण कत्वेऽपि भाष्ये तदर्थादर्शनात्, निरुक्त तथैव लयमा अथर्थः।

I प्रहोत्रेपू। विंयं वचो। अग्नया२३इभा। रताबृ-
हत्। विपाज्ज्यो२३तो। षिबायेइ। भारता२३४औहो-
वा। न वेरधसे२३४५॥ १३॥

II प्रहोत्रा३इपूर्वियं वचाः। अग्नये२भरता३बृ। हा
२३त्। विपाज्ज्योताइ। षो२३४वो। भता३इ। नार
३वेइ। धा३४५सो६हाइ॥ १४॥ ९८

यजमानो होत्रादीन् प्रति ब्रूते -हे होत्रादयः! 'विपां' विप्राणाम् मेधाविनाम् अध्वर्यादीनां 'ज्योतीषि' सत्कर्मानुष्ठान-सम्बन्धानि तेजांसि 'बिभ्रते' निमित्ततया कुर्वाणाय 'वेधसे' जगतो-विधात्रे 'होत्रे' देवानामाह्वात्रे 'अग्नये' 'बृहत्' महत् 'पूर्व्यं' पुरातनं 'वचः' स्तोत्र-शस्त्रादिकं वाक्यं 'प्र भरत'(१) सम्पादयत। नेत्यर्थं पाद-पूरणः, अन्वयाभावात्। यद्वा 'वेधसे न' यथा

I,II अनयोः आग्नेयऋषिः, प्रहितो नाम।

(१)—भरतेति हरते रूपम् हृग्रहोर्भश्छन्दसीति वचनाद्धस्य भत्वम्। ऋचि अन्यालुक् "ऋचि तु-नु (६,३,१३३)"-इत्यादि सूत्रे तद्-ग्रहणात्।

अथ तृतीया।

गोतमऋषिः।

३ १ २ ३ १ २ ३ १ २
अग्ने वाजस्य गोमत ईशानः सहसो यहो।
३ १ २ ३ २ ३ १ २
अस्मे देहि जातवेदो महिश्रवः ॥ ३ ॥ ९९

वेधाः जगद्विधाता परमेश्वरः आदित्यादीनि ज्योतींषि करोति तद्वदिति। प्र-शब्दस्य "छन्दसि" "व्यवहिताश्च"इति(१) भरते त्यनेन सम्बन्धः ॥ २ ॥ ९८

हे 'सहसोयहो'(१) बलस्य पुत्र! 'अग्ने'! 'गोमतः' बहुभिर्गोभि र्युक्तस्य 'वाजस्य' अन्नस्य 'ईशानः' ईश्वरस्त्वमसि, अतः 'अस्मे' अस्मासु हे 'जातवेदः' जात-धन! जातानां 'वेदितः' वा अग्ने! 'महि' प्रभूतं 'श्रवः' अन्नं 'देहि' प्रयच्छ स्थापयेत्यर्थः। सहसो-यहो-परांगवद्भावाद्(२) आमन्त्रितस्य यथामन्त्रित(३) समुदायो-

९९ उत्तरार्चिकस्य ७,२,११,१।

(१) "छन्दसि परेऽपि (१,४,८१)"-इति सूत्रात् छन्दसीत्यधिकारे वर्तमाने "व्यवहिताश्च (१,४,८२)" इति सूत्रेणेति स्फुटार्थः।

(२) -निघण्टौ द्वितीय नवमे बल-पर्यायेषु सप्तः पदमष्टादशम्, तृतीय-द्वितीये अपत्य-पर्यायेषु यज्ञः पदमेकादशम्।

(३)---"सुबामन्त्रित पराङ्गवत् स्वरे (२,१,२)"-इति सूत्रेणेति यावत्।

(४)- "षष्ठ्यामन्त्रित-कारक यचनम्"-इति वचनं-कृतं परिगणन चावाधमस्मीत्य-भिप्रायः।

४ र र र ४ २र २र३ ३ ३
I अग्नेवाजा५स्य। गोमतोवा। ईशान सा। ह्व-
३र ३३ २ ३ २र २र २र र ३ र
सोयह्वो। अस्माइदेहि जातवेदोम। ह्वा२३इ। अवा-
२र ३ ३ ३
ओवा। ऊधिया३। ए२३ह्विया३४३। ओ३४३५इ।
११
डा॥ १५॥

४ र र र र ४ ५ ३र २र १र ३ १
II अग्नेवाजस्य गोमम् मतोह्वोह्वाइ। ईशानः सा।
२ ३ ५ १ २ २ ४र ५ ३र २
ह्वासोया२३४ह्वो। आस्मे१दाइह्वोइ। जात। वेदाइः।
१ ४ २ ५ ८
मा२३ह्वोइ। आ३४५वोइह्वाइ॥ १६॥ ९९

निहन्यते (४)। अस्मे—सुपांसुलुगिति (७,१,३९) सप्तम्याः शे आदेशः(५)॥

"अस्मे देहि"—"अस्मे धेहि"-इति च पाठो॥ ३॥ ९९

I,II इमे शुधिये वा शुद्धे वा अद्धे वा सत्ये वा सामनी, अनयोः प्रजापतिर्ऋषिः।

(४)—"आमन्त्रितस्य च (८,१,१९)"-इत्ययमाद्युदात्तो निघातः।
(५)—"शेश्छन्दसि (६,१,७०)"-इत्यापीह सम्बन्धनीयम्।

अथ चतुर्थी।

विश्वामित्रऋषिः।

३ १ २ १ २ २ १ २ ३ २ १
अग्ने यजिष्ठो अध्वरे देवान् देवयते यज।
१ ३ ३ १ २ २ २ ३ १ २
होता मन्द्रो वि राजस्यति स्रिधः * ॥ ४ ॥ १००

५ २ २ ५ २ २ २ १ २
। अग्नेयजिष्ठो अध्वराऽए। देवां देवयाऽताइया१
३ २ ३ २ १ २ २ १ २
जा२। हुवाऽहोवा। होतामन्द्रः। विराजा१सी२।
३ २ ३ २ १ २ १
हुवाऽ। होऽवा। अतिस्राऽ२ऽइधाऽ४ऽः। ओ२ऽ४५ऽइ।
६
डा ॥ १७ ॥

हे 'अग्ने' 'यजिष्ठः' यष्टृतमः 'त्वम्' 'अध्वरे' यज्ञे 'देवयते' (१)

* "स्रुधः"-इति क० पाठः। "स्रिधः"-इति ग० पाठः।

१०० नास्तीयमुत्तरार्चिके। ६८
। प्रजापतिर्ऋषिः सदोनाम।

(१)—"नच्छन्दस्यपुत्रस्य (७,४,३५)"-इति दीर्घ-निषेधः, "देवसुम्नयोर्यजुषि काठके (७,४,३८)"-इत्यस्यायमविषयः।

अथ प्रथमी।

चितऋषिः।

१ २ १२ १ १र २ १ १र १ २र १ १ २
जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये।
१ २ १ १ २ १ १ १ १ १ २
अयं ध्रुवो रयीणाञ्चिकेतदा ॥ ५ ॥ १०१

५ र १ २ १ २ ५ १ र र
II अग्ने। इया३४इई३४या। यजिष्ठो अध्वराइ।
१ र र र १ १ १ १
देवां देवयते२। होहो२। याजा२। होता२। मान्द्रो
१ २ २ १ १२ ५ र र १
२। विराजा३सी। आ२। तिया३४औहोवा। सी२३-
५ ७
४धाः ॥ १८ ॥

५ ४ १ ४ ५ १ र र र
III अग्नईया। ओवा। यजिष्ठो अध्वराइ। देवां दा
२ १ २ १ २ २ र १
२३इवा। याते१याजा२। होता३ओवा। मन्द्रोवी३रा२३
१ २ ५ र र १ २ १ ३ १ १ १ ८ ६
जा२सा२३४औहोवा। अतिस्विधा२३४५ः ॥ १८ ॥ १००

देवानात्मनइच्छते यजमानाय 'देवान् यज' तदर्थं यष्ट-

---

१०१ नास्तोयमुरार्चिके। ६८

II,III इमे हविर्धाने, अनयोरपि प्रजापतिर्ऋषिः।

५ २ २ २ १ २ १ ५
। जज्ञानः सा। प्तमाऽभाइः। मेधामा२३४शा।
२ १ ७ ३ ५ १ २ १
मनआयाइ। अया२ध्रू२३४वाः। रया२३इणाम्। चि
२ १ ३ ५ २ २ ५ ४
कायेइ। ता२दा२३४ओहोवा। ऊ२३४पा॥ २०॥ १०१

आनग्नयादीन् देवान् पूजय। किञ्च। 'होता' देवानामाह्वाता 'मन्द्रः' यजमानस्य मादयिता स त्वं 'स्विधः' त्वपयितॄन् यजमानान् 'अति' अतिक्रम्य 'वि राजसि' विशेषेण शोभसे॥४॥ १००

'ध्रुवः' स्थिरोऽयमग्निः 'रयीणां' धनानाम् 'आचिकेतत्' अस्यानुशासने जानाति। 'सप्त' सप्त-सङ्ख्याभिः 'मातृभिः'(१) हविर्मान-समर्थाभिर्जिह्वाभिः स्वात्मनि हविः-प्रक्षेपाभिर्वा जिह्वाभिः सह 'जज्ञानः' प्रादुर्भूतः सोमाग्निः 'मेधां' कर्मणो विधातारं सोमं 'त्मिये' सेवार्थम् 'अनुशासत' अनुशास्ति। [शास्तेर्लटि व्यत्ययेनात्मनेपदम् (३,४,८८) "बहुलं छन्दसि" इति(२,४,७३) शपो लुङ् न भवति] अन्विच्छतीत्यर्थः॥

"जज्ञानः सप्तमातृभिः"—"जज्ञानं सप्त मातरः" इति च पाठौ। "चिकेतद्"-"अचिकेतयद्" इति च॥ ५॥ १०१

I त्वष्टाऋषिः, आतिथ्यम्।

(१)—'सप्त मातरः—सप्तच्छन्दांसि अथवा सप्त होत्राः अथवा सप्त सोम-सङ्ख्याः. ताभिः'-इति वि०।

चय पञ्चो।

दूरिमिठिर्ऋषिः।

१२३ २ १ १ ३१२ २२ ३ १ २
उत स्या नो दिवा मतिरदितिरूत्यागमत्।
१२ २ ३ १ २ ३ २ ३१ २
सा शन्ताता मयस्करदपस्रिधः* ॥ ६ ॥ १०२

५ २ ४२५ ४२ ५ १ २२ १
। उतस्याऽनोदिवामतीः। आदितिरूऽ। तिया
२ १२ २ २ ४ ५ ३२ ३
गा१मा२त्। साशन्ताऽताऽ। मा। यः। करात्रो२३४
५ ४ ४ ४
वा। अपाऽस्रिधाः। हो५ऽ। डा ॥ २१ ॥ १०२

'उत' अपिच 'स्या' सा पूर्वोक्ता 'मतिः' मन्त्री(१) मन्तव्या स्तोतव्या वा 'अदितिः'(२) 'ऊत्या' रक्षया सार्द्धं 'दिवा' अहनि 'नः'

* इह सर्वत्रापि "स्रुधः"-"स्रिधः"-"स्रिधः"-इति पाठ-भेदः।

१०२ नास्तीयमुत्तरार्चिके। ७०
I अदितिर्ऋषिः, आदित्यम्।

(१)-'मतिर्ज्ञात्री'-इति वि०।

(२)-दीङ् क्षये, क्तिन्-खण्डनमिति कर्मणि क्तिनि छान्दसं ह्रस्वत्वम्, नञ् समासः; अदितिः सकल-प्रपञ्च-धारणेऽदीना, न क्षियते इत्यर्थः। अदितिरदीनेत्यत्र भाष्ये स्कन्दस्वामी-यद्यपि नञ्-पूर्वात् क्षयतेः क्तिनि 'क्षयति-स्यति-मा-स्थामितीत्वे च रूपं सिध्यति, तथापि क्षयतेर्नित्यमपूर्वादर्शनाच्चयाच्च दीङ् क्षये इत्यस्यैवेदं छान्दसं रूपं द्रष्टव्यम्। तथा चोक्तं 'न संस्कार मात्रियेत, अर्थोनित्यः परीक्षेत'-इति। 'अदिति

अथ सप्तमी।

हयोर्विश्वमनावैयश्वऋषिः *।

१ २ ३ १ २ ३ ३ १ २ ३ १ २
ईडिष्वा हि प्रनीत्या३० यजस्व जातवेदसम्।

३ १ २ ३ २ ३
चरिष्णुधूममगृभीतशोचिषम् ॥ ७ ॥ १०३

अस्मान् 'अगमत्' आगच्छतु; आगत्य च 'शन्ताता' शन्तातिः(३) शान्तिकरः 'मयः' सुखं(४) 'सा' अदितिः 'करत्'(५) करोतु। 'स्रिधः' नाशकान् शत्रूंश्चापगमयतु [स्रिधिर्वधनार्थः] ॥

"उत स्या"-"उत त्या"-इति च पाठौ। "सा शन्ताता" "सा शन्तातिं"-इति च ॥ ६ ॥ १०२

---

* 'विश्वमनसआर्षम्'-इत्येव वि०।

१०३ नास्तीयमुत्तरार्चिके। ७१

देवमाता' इति वि०। नैरुक्तानां मते देवमाता, नैरुक्तानां मते अदीनादिगुणः, आत्मपक्षे प्रकृतिः। 'अदितिर्द्यौरदितिरन्तरिक्षम्' इति निघण्टुभाष्यम्। 'अदितिरदीना देवमाता। "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्"-इत्यादिसर्वविभूतिमाचष्ट एतान्यदीनानीति वा'-इति नै० ४,४,९१—२४।

(३)—"शिवशमरिष्टस्य करे (४,४,१४१)"-इति शङ्करोतीति विषये सातिप्रत्ययः।

(४)—निघण्टोक्तनीय-पञ्चमे सुख-पर्य्याये मयदित्यस्य पदम्।

(५)—लेटोरूपमिदम्।

२२१ ४ ५२ १ २१ २ ३२
। ईडाइष्वा२३हिप्रतीवियाम्। याजस्वआ। तवे-
२१ २३ २ ३ ५ ३२ १
दसा२३म्। चरिष्णुधू। मा२३४म। गृभाइइ। ता२
३ ५२ २ ३ ५ ५
ग्नी२३४औहोवा। ची२३४षाम्॥ २२ ॥ १०३

'प्रतीव्यं' प्रत्यृषु प्रतिगमन-शीलम्(१) अग्निं ['हि' अवधारणे(२), अग्निमेव] 'ईडिष्व' स्तुतिभिः स्तुतं कुरु। किञ्च, 'चरिष्णुधूमम्' सर्वत्र चरण-शील-धूम-ज्वालम् 'अग्नभीतशोचिषं'(३) रक्षोभिरप्रधृत-दीप्तिम् 'जातवेदसं' जातप्रज्ञं [यद्वा, जातानि भूतानि वेत्तीति जातवेदाः,(४) तमग्निं(५) 'यजस्व' हविर्भिः पूजय॥ ७॥ १०३

। वार्क्षजभ्रम्।

(१)—'महाभूतत्वात् सर्वगतम्'-इति वि०।

(२)—'हीति पादपूरणः'-इति वि०।

(३)—'हृषद्वोर्भश्छन्दसि, हस्य' इति भत्वे रूपम्।

(४)—"जातवेदाः, कस्मात्? जातानि वेद, जातानि वैनं विदुर्जाते जाते विद्यन इति वा, जातविद्यो वा, जातधनोवा, जातविद्यो वा, जातप्रज्ञानो यत्तज्जातः पशून-विन्दत, तज्जातवेदसो जातवेदस्त्वमिति** अयमेव सोऽग्निर्जातवेदाः"-इति नै०७, ५,१—५। 'एष मात्राभाग्यात् कर्मपृथक्त्वादग्निरेव'-इति च तद्भाष्यांशः।

(५)—मर्योऽपि जातवेदा इत्युच्यते, तथा च 'तवैव नैरुक्ते—"जातवेदसे सुनवाम"-इत्यृचमुदाहरणमुखेन व्याख्याय—"यत्त किञ्चिदाग्नेयं तज्जातवेदसानां स्थाने युञ्जते म न मन्येत अयमेवाग्निरिति ऋग्वेते उत्तरे ज्योतिषी जातवेदसा उच्यते** अथासावादित्यः -उदुत्यं जातवेदसमिति"-इदमुक्तम्।

अथाष्टमी।

१२ २२ ३ १ २ ३२ ३ १ ३ १२
न तस्य मायया चन रिपुरीशीत मर्त्यः।

३ १२३ २ ३ २
यो अग्नये ददाश हव्यदातये ॥ ८ ॥ १०४

५ ४ ३ ५ २ १२ २ १ २
I ननोवा। स्या२३५मा। ययाचा२३ना। रिपुरी-

२ १ ७ ५ १२ ऽ १२
शीतमा३१ओवा२३। नो२३४याः। योअग्नये२ददा।

५ ७ ५ ६
शहव्यदो२३४वा। ता२३४र्य ॥ २३ ॥ १०४

'मर्त्यः' मनुष्यः 'रिपुः' शत्रुः [चनेति निपात समुदायोऽप्यर्थे(१)] 'मायया चन' मायायापि(२) 'तस्य' जनस्य 'न ईशीत' ईश्वरो न भवति। 'यः' जनः 'हव्यदातये' हविषामादान-समर्थाय 'अग्नये' योयजमानः 'ददाश' हवींषि प्रयच्छति तस्य रिपुर्न ईशीतेत्यर्थः॥

'हव्यदातये'-"हव्यदातिभिः"-इति च पाठो॥ ८ ॥ १०४

---

१०४ नास्तोयमुत्तरार्चिके।'७२
I अगस्त्यऋषिः, राज्ञोघ्नम्।

(१)—'चन शब्दः पादपूरणः' इति वि०।
(२)—'मायया प्रज्ञया' इति वि०।

अथ नवमी।

भारद्वाजऋषिः*।

३ १ २ ३ २ ३ २ ३ १ ३ क २र
अप त्यं वृजिन꣡ꣳरिपु꣡ꣳस्तेनमग्ने दुराध्यम्।
१ २ ३ २ २ २
दविष्ठमस्य सत्यते क्रधी सुगम्॥ ९॥ १०५

२ ४ २ ४ ५ ३ २ २ २ १ १ १ १ २
I अपत्यं वृजिनम्। रिपूम्। स्तेना२३४५म्। अग्ना-
१ २र २ ३ ४ ५ ३ २
इ। दूराधा२३या३४म्। दविष्ठमस्य सत्। पताइ३।
१ ४ २ ५ ४
का२३ङ्घो३। सू३४५गो९ऽधाइ॥ २४॥ १०५

हे 'अग्ने!' त्वं 'त्यं' तं प्रसिद्धं 'वृजिनं' कुटिलं 'रिपुं' पापकारिणं 'दुराध्यं' दुःखस्याध्यात्तारं दुष्टाभिप्रायम् एवम्भूतं 'स्तेनं' हिंसकं 'दविष्ठं' दूरतमम् 'अपास्य' अप क्षिप [असु, क्षेपणे-इति धातुः]। हे 'सत्यते!' सतां पालयितः अग्ने! अस्माकं 'सुगं' शोभनेन गन्तव्यं सुखं 'क्रधि' कुरु। [अत्र सर्वदेवात्मकस्याग्नेः स्तवनाद् वैश्वदेवत्वम्(१)॥ ९॥ १०५

---

* 'ऋजिस्वनआर्षम्'-इति वि०।

१०५ नास्तोयमुत्तरार्चिके। ७३

I सौमक्रतवं बृहदाग्नेयीयं वा।

(१) "विश्वे देवाः सर्वे देवाः' इति नैरुक्तम् (१२,४५)। 'अनादिष्ट देवता लिङ्गात्

अथ दशमी।

विश्वमनाऽवर्षिः।

१क२र १ १२ १ १ २
अग्नेऽग्ने नवस्य मे स्तोमस्य वीर विश्पते।
१ १र १ १ २ १ १ २
नि मायिनस्तपमा रक्षसो दह ॥ १० ॥ १०६

५र र र २र १ २ १
। हाउअग्नेऽग्नेनवस्य मेहाउ। स्तोमास्य वा
१ १ २ ५र र र ४ ५ २र १ १
रविश्पतायेऽ४। ऐहीहाउहोवा। निमायिनाः। [illegible]
२र १ ५र र र ४ ५ १ ५र र र
साराऽ३४। ऐहीहाउहोवा। क्षासाऽ३४ः। ऐहीहाउ
४ ५ १ ५ ५ ४ १५
होवा। दहऽ३४। हियाऽहा। होपुइ। डा ॥ २५ ॥ १०६

इति प्रथम-दशतिः ॥

'वीर' शत्रूणां विनाशयितः 'वीर्यवन्' वा 'विश्पते' विशां पालयितः 'हे अग्ने' 'नवस्य' इदानीं क्रियमाणत्वान्नूतनं 'मे' मदीयं

---

१०६ नास्तीयमुत्तरार्षिके। ७४

। अगस्त्यऋषिः, रात्रीघ्नम्।

मन्त्रराशिः स्यात् स सर्वमाधारणत्वाद् बहुदेवतो वैश्वदेव. स्यात्'-इति देवताध्याय (७,१,५)। अग्नेर्यत्सवनस्याद्याहतम्, अग्नावेव सर्वं देवताभिवादात्, अत उक्तं निरुक्त-भाष्य-कारेण—'अग्निर्वै सर्वा देवता इति ह विज्ञायते. अग्निर्वै देवतानां भूयिष्ठमिति च. अपरिपूर्वं च प्रधानमाप्नोति न्यायः, तस्मादाग्नेय स सूक्त स्यात्' इति (७,१,४)।

३५क,

'स्तोमस्य' स्तोत्र-शस्त्रादिकं 'शुष्टी' श्रुत्वा 'मायिनः' मायाविनः रक्षसः कर्म-विघ्न-कारिणः, राक्षसान् 'तपसा' तापकेन तेजसा 'निदह' नितरां भस्मीकुरु(१)। [शुष्टीति "ज्ञात्व्यादयश्च(७,१, ३९)"-इति निपातितः(२); वकार-लोपश्छांदसः(३)॥

"तपसा"-तपुषा-इति च पाठो॥ १०॥ १०६

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे ऐन्दोत्याख्याने प्रथमस्याध्यायस्य एकादश-खण्डः॥११॥

अथ द्वादश-खण्डे—

सेयं प्रथमा।

प्रयोगोभार्गवऋषिः *।

१ २ २ ३ १ २ ३ २ ३ १ २
प्र मꣳचिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे।
३ १ २ ३ २
उप स्तुतासो अग्नये॥ १॥ १०७

---

* "सौमरेरार्षम्"-इति वि०।

१०७ उत्तरार्चिकस्य २,२,१७,१।

(१)—'मे' 'नवस्य' 'स्तोमस्य' बलेन 'वीर!' 'विघ्नपते!' 'अग्ने!' 'मायिनः' 'रक्षसः' 'तपसा' 'शुष्टी' क्षिप्रम् 'नि दह'—इति वि०-निष्पन्नोऽन्वयः; दह सते न विभक्ति-व्यत्ययः।

(२)—अनेन हि सूत्रेण आकारस्य ईत्वमात्वं विधीयते।

(३)—वकारागमश्च तथैव।

I प्र म॑ण्हा३इ ष्ठाय गायता। ऋतान्वे२। बृहते
शूक्रा३शो३। चा२३४इषाइ। उपा३ओ३हो। स्तोता
सो३आ३। ग्रा३४युयो६हाइ॥ २६॥

II प्रम॑ण्हिष्ठाय। गापुयता। ऋता२१न्वे२। बृहा
ना१इशू२। क्र। शोचा२३इषाइ। उप। स्तुयतो२।
ऊवाइ। हो३वा३। सत्रा२३४वा। ग्रापुया६हाइ॥ २७॥

III प्र म॑ण्हिष्ठाय गा। इया३४३ई३४या। यतऋतान्वे
बृहतेशूक्रशो२। हो२। हुवा२इ। चाइषा२इ। उपा
३हो३इ। स्तुता३हो। सोत्रग्रा२३या३४३इ। ओ२३४
५। इ। उा॥ २८॥

I,II प्रमण्हिष्ठीये, इन्द्रऋषिः।

III प्रमण्हिष्ठीयम् आसिनं वा, इन्द्रो वसिष्ठो वा ऋषिः।

अथ द्वितीया।

द्वयोः सौभरिर्ऋषिः *।

१र २र३ २ ३ १ २ ३१ २ ३ १ २
प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः।

४ ५ र र ४ ५ १ र २
IY प्र मꣳहिष्ठाय गायता। प्र मꣳहिष्ठा वा। यागायत।

१ २ ३र ४ ५र २ २ र
ऋता२३न्वा३४इ। बृहतेशुक्रशो। चा३इषाइ। उपौ-

र २ र र २ २ १
होवा३च्चाइ। स्तुतौहोवा३च्चा३। सत्रो२३४५ऊइ। डा-

६
॥ २८ ॥ १०७

हे 'उपस्तुतासः" (१) हे उपस्तोतारः! यूयं 'मंहिष्ठाय'(२) दातृतमाय 'ऋतावे'(३) यज्ञवते सत्यवते वा 'बृहते' महते 'शुक्रशोचिषे' दीप्त-तेजसे 'अग्नये' 'प्र गायत' स्तोत्रं पठत(४)॥१॥ १०७

---

* "सौभरिः"-इति वि० पाठः।

IY प्रमꣳहिष्ठीयम्, इन्द्रऋषिः।

(१)—कर्तरि लटर्थे क्तः। 'उपगम्य ये स्तुवन्ति'-इत्यादि वि०।

(२)—मंहतिर्दान-कर्मा, निघण्टौस्तुतीयाध्यायीय-विंशतितम खण्डे पाठात्। तस्मात् तृचि "तुञ्छन्दसि (५,३,५९)"-इतीष्ठनि रूपम्।

(३)—"मतौ (६,३,१३१)"-इति योग-विभागादकारस्य दीर्घः।

(४)—ऋचि 'स्तुतासो नग्नये' इति (६,१,११५) पक्षनिभावे रूपम्।

२ ११ २ १२ २२
यस्य त्वꣳ सख्यमाविथ ॥ २ ॥ १०८

१ २ २ १ २ २
I प्रासोऽच्छाऽ। आग्नेऽच्छाऽ। तवाऽ१ओवाऽ२३।

२ ५ २ १ २ २ २ १२ २ १ २
नोऽ२३४भीः। सुवीराभिस्तरतिवाजकर्मभिः। यस्याऽ-

२ १ ४ ५ ४ ५
च्छाऽ। त्वाऽसाऽ२३। ख्यमोवा। वापूऽद्योऽच्छाऽ ॥३०॥ १०८

हे 'अग्ने'! 'तव' 'ऊतिभिः' रक्षाभिः 'सः' यजमानः 'प्र तरति' प्रवर्द्धते। ऊतयो विशेष्यन्ते—'सुवीराभिः' शोभन वीराः पुत्रादयो यासु, ताभिस्तथोक्ताभिः 'वाजकर्मभिः' वाजानामन्नानां बलानां वा कर्म रक्षणं यासु, तादृशीभिः। हे अग्ने! 'त्वं' 'यस्य' यजमानस्य 'सख्यं' सखित्वं मित्रत्वम् 'आविथ'(१) प्राप्नोषीत्यर्थः, स प्र तरतीति पूर्वेणान्वयः॥

"तरति वाजकर्मभिः"-"तिरते वाजभर्मभिः"-इति च पाठो। "आविथ"-"आवरे"-इति च॥ २ ॥ १०८

---

१०८ उत्तरार्चिकस्य ८,२,२,१।

I वाजभृद् वा वाजाभृद् वा वाजाभर्मीयं वा, भरद्वाजऋषिः।

(१)—"छन्दसि लङ्-लुङ्-लिटः (३,४,६)"-इति काल सामान्ये लिट्।

अथ तृतीया।

१ २ क ख २ १ २ ३ १ २ ३ १ २
तं गूर्ड्यां स्वर्णरं देवासो देवमरतिं दधन्विरे।
३ २ ३ १ २
देवत्रा हव्यमूहिषे ॥ ३ ॥ १०९

५ ४ १ ४ऽ ५ ४ ५ २र १ र र १
I तं गूऽर्ड्याऽया सुवर्णरोवा। देवासो देवमरा२ता
७ ५ ४ ५ १ ३ ५
इन्द्धावा। ग्नापुयोऽहाइ२३। हो। न्वा२३४इराइ।
२र १र ऽ २ १ ३ ५र र ३
देवत्राच्। व्यम३हा३। हा२इषा२३४ओहोवा। ऊ-
१ १ १ १ ८
२३४५ ॥ ३१ ॥

५ र र ४ ५ २र १ र ऽ र २ ३ २ १
II तं गूर्ड्यासुवर्णाराम्। देवासोदाइ। व मरता२३
२३ २ २ ५ २र १
इम्। दधन्वउरा। वा३। दे२३४वा। त्राहा२३।
४ ५ ४ ५
व्यमोवा। हापुइषोऽहाइ ॥ ३२ ॥

५ र र र ४ ५ १र ३ ५ १
I,II तं गूर्ड्यास्त्रौहोर्णाराम्। देवा२सो२३४दे। वम-

---

१०९ उत्तरार्चिकस्य ८,२,११,१।
I,II,III इमानि त्रीणि सौभराणि।

२ ५ २ ५ २ २
रता२३दम्। दा२३४धा। ःन्वा२३४दुराद्। ष्टाहो२३४
५ १२ १ ५ ११ ४ १ १ १ १
ष्टा। देवा२त्रा२३४ष्टा। व्यमू३ष्टा५द्। षा२३४५ऊ
५
॥ ३३ ॥ १०९

हे 'स्तोतः'! 'तं' प्रसिद्धमग्निं 'गूर्धय' स्तुहि [गूर्धयतिः स्तुति-कर्मा (नि०३,१४,५] कीर्तय—'स्वर्णरं' सर्वस्य नेतारं सर्वैः यजमानैः कर्मादौ नेतव्यं वा। अथवा, स्वर्गं प्रति हविषां नेतारम्(१)। 'देवासः' द्योतन्ति स्तुवन्तीति(२) देवाऋत्विजः 'देवं' दानादि-गुण-युक्तम् अर्यं स्वामिनं, यद्वा, अभिप्रायव्यं(३) 'दधन्विरे' [धन्वन्ति गच्छन्ति] स्तुत्यादिभिः प्राप्नुवन्ति [धविर्गत्यर्थः(४)] प्राप्य च तेनाग्निना 'देवत्रा' देवान् [देवमनुष्येत्यादिना(५) द्वियोयार्थे त्रा

---

(१)—'स्वः', 'नरम्'—इति पृथक् पद-द्वयमिति पद-क्रम-पाठात् स्वर-भेदेन स्पष्ट-मवगम्यते; विवरणकारस्त्वेकमेव व्याचष्टे, तद्यथा,—'स्वः लुप्तोपमसिद्ध द्रष्टव्यम्, स्वरिव आदित्यमिवेत्यर्थः, 'नरं नराकारम' इति। स्वः, प्रश्निः—इत्यादि नाम-षट्कं दिव आदित्यस्य च साधारणम्, निरुक्त-द्वितीयस्य तृतीय-षोडशं हि तत्र प्रमाणम्। ऋचि स्वर्णरमिति शब्दसमसमानपदेऽपि छान्दसम।

(२)—द्योतेः स्तुतिर्यौगिकोऽर्थः स्पष्टोऽस्ति गण-पाठादौ।

(३)—'अवितम् अवनशीलम्, पर्याप्त मतिं मर्यं ज्ञमित्यर्थः; अथवा देवान् यजमानांश्च प्रति गन्तारम्'-इति वि०।

(४)—निघण्टोर्द्वितीय-चतुर्दशे पठितत्वात्। 'दधन्विरे, धारितवन्तः, स्थापित वन्तः'-इति वि०।

(५)—"देव-मनुष्य पुरुष-पुरु-मर्त्येभ्यः।"

अथ चतुर्थी।

प्रयोगोभार्गवऋषिः, सोभरिः काण्वो वा *।

१ २ १ १ २ ३ १ २ ३ १ २ २ ३ २
मा नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्त एषः।
३ १ २ ३ २
यः सुहोता स्वध्वरः॥ ४॥ ११०

। ४ ऽ २ ऽ८ १ ७ २ १ २ ३
। मा। नाः। हृणीऽथाऽतिथीऽम्। वासूरा२३४
५ २ २ र २ र र २ २ १
ग्नीः। पुरौहोवा३ऽहाउ। प्रगौहोवा३ऽहा३। स्तओ२३
५ ४ ५ ५
४वा। आ५उषोई३ऽहाउ॥ ३४॥ ११०

प्रत्ययः] 'हव्यं' चरु-पुरोडाशादि-लक्षणं हविः 'आ ऊहिषे' अभिप्रापय [वहेर्लिटि(६) यजादित्वात् सम्प्रसारणम्(७)॥ ३॥ १०९

---

* 'सौभरेरार्षम्'-इत्येव वि०।

११० नास्तीयमुत्तरार्चिके। ७५

(६)—"लिङर्थे लेट (३.४.७)"। लिङर्थश्चात्र प्रार्थनं, लोडर्थश्च सम्बन्धेति भाष्यस्था अभिप्रापयेति लोटोरूपं प्रतिपदं दत्तम।

(७)—वचि स्वपि यजादीनां किति (६.१.१५)।

५र ५ १ र र ३ ४ ५ २
॥ मानोहाउ। हा२३४। णोथाअतिथिम्। वा
१ ५ २१र २ १ २ १र २ १ र
सूरा२३४ग्राइः। पुरौहहोइ। प्रशौहहो। स्ता२३४ण्षाः।
५र ५ ४ ७
एहियाईहा। हो५इ। डा ॥ ३५ ॥ ११०

हे ऋत्विक्-सङ्घ! 'नः' अस्मत्-सम्बन्धि यज्ञे 'अतिथिम्' अतिथिवत् प्रियम् अग्निम् 'मा हृणीथाः' मा हर। कमग्निम्? इत्यत-आह—'यः' अग्निः 'सुहोता'(१) सुष्ठु देवानामाह्याता,(२) 'स्वध्वरः' शोभन-यज्ञो भवति 'एषः'(३) अग्निः 'पुरुप्रशस्तः' बहुभिः स्तुतः 'वसुः'(४) वासकश्च भवति [तमिति पूर्वान्वयः(५)]॥

"मा हृणीथा अतिथिम्" इति छन्दोगाः, मा हृणीतामतिथिः"-इति बह्वृचाः ॥ ४ ॥ ११०

।,।। पक्त्रस्य मीभरस्य मामनी।

(१) - षाष्ठ बहुल वचनात (५.१,३५) हः मम्प्रसारणम्।

(२) - अन्यत्रापि 'त्वमग्ने यज्ञानां होता' इत्यादौ (७.१,१,१,२) अग्नेर्होतृत्व श्रूयते। अतएव यास्कः 'अथास्य कर्म, वहनं च हविषामावाहनञ्च देवतानाम'-इत्यादि(७,३,१.)।

(३)—'दृश् गतौ' भ्वा०प०। इत्यस्येदं रूपम्, गत्वा' इति वि०।

(४)- यद्यपि वसुर्देवविशेषोऽपि श्रूयते पर नेह तस्य प्रकृतम् अग्नेः तस्य च स्थानि त्वाभावादमाम्भवात्, अग्नि हि मैत्रेयकम् 'अग्निः पृथिवी स्थानः' ७,३.१) इति, 'मध्यस्थाना वसव'(१२ ४,८)' इत्यादि च।

(५)- यः 'अतिथिम् अतिथि स्थानीयः, 'वसु' प्रशस्त धनवान वा. 'पुरुप्रशस्त'

अथ पञ्चमी।

तिसृणां सोभरिर्ऋषिः।

२१ २ २१२ २२ २२ १ २ २१ २ १२
भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः।
१२ २१२ २२
भद्रा उत प्रशस्तयः॥ ५॥ १११

४ ३ ५ २ १ ४२ ५ ५ १२ २२ १
। भद्रोऽनः। होदु। अग्निराऽहुताऽइ। भद्रारातांइः।
२१ २ १ ३ ५ २१२ २ १
सुभगाभाऽ। द्रेऽध्वा२३४राः। भद्राऽज२३ताऽ। प्रा२
४ २ ५ ४
३शाऽ। स्ताऽ४५योऽहाइ॥ ३६॥१११

'आहुतः' हविर्भिस्तर्पितोऽग्निः 'नः' अस्माकं 'भद्रः' कल्याणो भवतु। हे 'सुभग' शोभन-धनाग्ने! 'भद्रा' 'कल्याणी' 'रातिः' दानं च अस्माकं भवतु। 'भद्रः' कल्याणः 'अध्वरः' यागश्च भवतु। 'उत' अपिच 'भद्राः' कल्याणाः 'प्रशस्तयः' प्रशंसाः स्तुतयश्च भवन्तु॥ ५॥ १११

---

१११ उत्तरार्चिकस्य ७,२,१०,१।

। दैवातीकम्, पथो वा पक्थस्य ऋषिः।

वसुभिः स्तोतृभिः स्तुतः, 'सुहोता' 'अध्वरः' 'एषः' गन्ता 'अग्निः' त्वम् 'नः' अस्माकमुपरि माहृणीथाः' मा क्रोत्सीः—इत्ययमर्थो वि०-सम्मतः। वृषिर्निघण्टु-द्वितीय-द्वादशे क्रतु-कर्मसु, शंसतिश्च निघण्टु-तृतीय-चतुर्दशे पठितो दृश्यते।

अथ षष्ठी।

१२ ११२३११२ २२३१२
यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम।
१ २ १ १२ १ १२
अस्य यज्ञस्य सुक्रतुम् ॥ ६ ॥ ११२

१ ४ २ ४ ५ १२१ २ २ २
I या५५जि। ष्ठं त्वा ३वा ३वृमहाइ। देवं देवत्रा होता२३राम्। आमर्त्रियम्। आस्ययाज्ञा२३। स्या२३सू३।
२ १ २ १ ० १ ४
क्रा३४५तो६हाइ ॥ ३७ ॥ ११२

हे अग्ने! 'यजिष्ठं' यष्टृतमं 'त्वा' त्वां 'ववृमहे' वृणीमहे मम भजामहे। कीदृशं त्वाम्? 'देवत्रा'(१) देवेषु मध्ये 'देवम्' प्रति शयेन दानादि-गुणम्। 'होतारं' देवानामाह्वातारम्। 'अमर्त्यम्' अविनाशिनम्। 'अस्य' 'यज्ञस्य' यागस्य 'सुक्रतुं' सुष्ठु कर्तारं(२) ॥ ६ ॥ ११२

---

११२ उत्तरार्चिकस्य ६,२,१३,१।
I गौतमं साध्यं वा।

(१)—"निपातस्य च (६,३,१३६)" इति दीर्घः।

(२)—'यजिष्ठम्, 'देवत्रा' 'देवम्,' 'होतारम, 'अमर्त्यम्' 'सुक्रतुम' त्वा त्वाम 'ववृमहे' प्रार्थयामहे। 'अस्य' प्रक्रान्तस्य यज्ञस्य परिसमाप्तिर्भवति शेषः। अयमर्थो विवरणकृता मन्यतः।

अथ सप्तमी।

१९ ३१र २र२ ७ ६ ३ १२३ १ २ ३ १२
तदग्ने द्युम्नमाभर यत्सासाह्वा सदने कच्चिदत्रिणम्।
३१र २र ३क २र
मन्युं जनस्य दूढ्यम्॥ ७॥११३

४ र र ४ २१र २ १
। तदग्नेद्यु॒म्नम्। आभरोवा। यत्सासा२३ह्वा। स-
। २ १ २ १
दा२३नाइ। कच्चिदत्रा२३त्रिणाम्। मान्युञ्जनस्यदू२३
१ ३ ५र ५ ४ ४
ह्यो। ढा२३४याम्। एच्छियाइह्वा। ह्योऽ५इ। डा॥ ३८॥११३

हे 'अग्ने' 'तत्' 'द्युम्नम्' अन्नं यशोवा 'आभर' अस्मभ्यमाहर। 'यत्' यदा 'आसदने' यज्ञ-गृहे वर्त्तमानं कञ्चित् कमपि 'अत्रिणम्' अत्तारं राक्षसादिकं 'सासाह' अत्यर्थमभिभव। तथा 'दूढ्यं'(१) दुर्धियं पाप-बुद्धिं(२) शत्रुं 'जनस्य' 'मन्युं' क्रोधं च अभिभव, तरेति पूर्वत्रान्वयः॥

"दूढ्या"-"दूढ्यम्"-इति च पाठौ॥ ७॥ ११३

---

११३ नास्तोयमुत्तरार्चिके। ७६
। संवर्गः, जमदग्निऋषिः।

(१)—"तन्त्रादीनां छन्दसि बहुलम् (६,४,८६)"-इति वचनात् यणि, छान्दस-रक्-लोपे च रूपम्।

(२)—'दूढ्यः, दुर्धियः पापधियः'-इति मै० ५.४ २६।

अथाष्टमी।

विश्वमनाऋषिः।

१२ ३२३ १ २ ३ १२ ९२३ १ १२ ३ २
यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे।
२३ ३ २३ ३ १ २
विश्वेदग्निः प्रति रक्षाꣳसि सेधति ॥ ८ ॥ ११४

२ १२ ४ ५ १ २ २ १ २ १२
। यद्वाऊ२३विश्पतिः शिताः। सुप्रीतोमनुषोविशे।
२ १ २ १ २ २ ३ २ १ २ ४ ५
विश्वाइदा२३ग्नीः। प्रतिरक्षा। सिसेधना। औ३होवा।
५
हो५इ। डा ॥ ३८* ॥ ११४

इति द्वितीय-दशतिः ॥

'विश्पतिः' विशां पतिः(१) पालयिता 'शितः' ऋषिभिस्तीक्ष्णी-

११४ नाम्नोयमुत्तरार्चिके। ७७
। रात्रोघ्नम्, अगस्त्यऋषिः।

(१)—विडितिमनुष्य नामधाच्चि 'मनुष्य-नामान्युत्तराणि पञ्चविशतिः' इति नैरुक्तम् १,२,८ निघण्टौ द्वितीय तृतीये चतुर्थम् पद विशः इति तेषां पतिरीश्वरः।

* इति ग्रामे गेय गाने तृतीयस्यार्द्धः प्रपाठकः।

कृतः(२) सोग्निः 'सुप्रीतः' सुष्ठु प्रीतः सन् 'मनुषः' मनुष्यस्य 'विशे' [विश निवेशने (तु०प०] गृहे 'यद्वै'(३) यदा खलु वर्तते तदानीम् 'अग्निः' 'विश्वादृत्' विश्वान्येव(४) तस्य बाधकानि रक्षांसि 'प्रति(५)सिसे धति' हिनस्ति। [षिधु गत्यां(६) भौवादिकः]; 'उ'-प्रसिद्धौ॥

"विशे" "विशि"-इति च पाठौ॥ ८॥ ११४

इति सायणाचार्य्य विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोग्याख्याने प्रथमस्याध्यायस्य द्वादश खण्डः॥ १२॥

---

(२)—'शो तनूकरणे (दि०प०) इत्यस्यैतद्रूपम्, शृतिः संस्कारार्थः, शितः संस्कृत इत्यर्थः'-इति वि०।

(३)—'वै, उ—द्वावपि पाद-पूरणे।

(४)—विश्वा-इति "सुपां सु लुक् (७,१,३९)"-इत्यादिना आले रूपम्। 'इदिति पादपूरणः'-इति वि०।

(५)—'प्रति शब्दः पाद-पूरणः'-इति वि०।

(६)—गत्यर्थः सोयमिह हिंसार्थः'

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः॥ १॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिक-मार्ग-प्रवर्तक-श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने आग्नेय पर्वणि प्रथमोऽध्यायः॥ १॥

॥ समाप्तम् आग्नेयं पर्व आग्नेय-काण्डं वा ॥

॥ इति १म पर्व ॥

(सामवेदीय-मन्त्र-भाग-लभ्याः सन्ति यावन्तः अग्नि-देवता मन्त्राः तावन्तः सर्वेऽप्येवैव पर्व्वणि काण्डे वा दृश्यन्ते।)

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १ ॥

अथ द्वितीयाध्याय आरभ्यते ।

अस्मिन्नध्याये इन्द्रः स्तूयते * ।

अथ प्रथमे खण्डे

मेयं प्रथमा ।

शंयुर्बार्हस्पत्यऋषिः ॥ ॥

१२ २१२ २२ २२२१२
तद्वो गाय सुते सचा पुरुहूताय सत्वने ।
२३ २२ २१२
शंयद्गवे न शाकिने ॥ १ ॥ १

---

* इत आरभ्य चतुर्थाध्याय-शेष-पर्यन्तमध्याय-त्रयात्मकमैन्द्रं काण्डमैन्द्रं पर्व्व वेत्युच्यते ।

॥ 'भरद्वाजस्यार्षम्'-इति वि० ।

१ उत्तरार्चिकस्य ८.२,४,१ ।१

५ २ ४ ५ १ २२ २ ५
। ओम्। तद्दोहोवा। गाया२। सुनाइमा२३४चा।

१ २२ २ १ १ २ २
पुरूहूता। यमाव्वा१ना२इ। गंयत्। हा। औ३होइ।

३ ५ १ ७ ५२ २ १ ११११
गा२३४वाइ। ना२गा२३४औहोवा। ए३। किने२३४५

॥ १ ॥

हे "स्तोतारः!" "वः" (१) यूयम् "मते" अभिगते सोमे सति "पुरुहूताय" बहुभिर्यजमानैराहूताय "मत्वने" शत्रूणां मादयित्रे [यद्वा धनानां मनित्रे दात्रे (२)] इन्द्राय "तत्" स्तोत्रम् "मघा" (३) मह महता भूत्वा "गाय" गायत। "यत्" स्तोत्रं "गाकिने" (४) शक्तिमते इन्द्राय "गं" सुखकरं भवति। "गवे न" यथा गवे यवसं(५) सुखकरं तद्वदित्यर्थः(६) ॥ १ ॥ १

(१) 'द्वितीय' युष्मच्चनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम् इति, 'अन्तरात्मन एनां प्रेय', हे मदीयान्तरात्मन्" इति च वि०।

(२) 'मत्वने' धनं दाने इत्यस्येदं रूपम्, दात्रे मनित्रे-इति वि०।

(३) 'मघा महदित्यर्थे' इत्यादि निरुक्तम् ५।१।

(४) शकनं शाकः शक्तिः।

५ यवसं तृणमत्तु घासं तृणम्।

(६) विवरणं मतं 'गाकिने' गवे इति विशेषणविशेष्ये। तथाच यद्वा कस्मिन् क्षणेवत्। शक्तिमते यथाय सुखकराः स्तोत्रोच्चारयति, तद्वदिन्द्राय सुखकरं स्तोत्रमुच्चारयेत्यर्थः सम्पद्यते।

५ र र २ १ र २
II तद्वोगाया। सुनाइसचा३। पूरू२३चूता३४।
३र२ १ २ ३ ५ २ १ २
च्छा३। यासत्वा२३४नाइ। शंयद्गा२३वे। नशै२।
१ ५ ४ ५
चौ२। ऊवो२३४। वा। काप्रुदूनो६च्छाइ ॥ २ ॥

५ र र र ५ २ र १र २र १
III तद्वोगायसुतेसचा६ए। पुरुचूतायसत्वने। पुरू।
र १र १ ७ २ ५ २ ३ ५
हूता। यासत्वा२३ना३४इ। शंयत्। गौवाओ२३४वा।
१ ४ २ ५
ना२३शा३। का३४प्रुदूनो६च्छाइ ॥ ३ ॥

५ र र र ५ २ र १र
IV तद्वोगायसुतेसचा६ए। पुरुचूतायसत्वनाइ। शं-
२ २ १ १ ३
यद्गा२३वे। ऐ२च्छो१आ२३इच्छो। नशा२३। का२इना-
५र र ३ १ १ १ १
२३४ओच्छावा। ई२३४५ ॥ ४ ॥ १

I,II,III,IV "रौद्रे वै मार्गीयवे वै, अपि वा मार्गीयवं च रौद्रे च मार्गीयवं च, सर्वाणि वा रौद्राणि सर्वाणि वा मार्गीयवाणि। इत्यार्षेयकम्।

अथ द्वितीया।

सूभकक्षऋषिः *।

१० ३१ २ ३१२ ३ १२३ १२
यस्ते नूनꣳशतक्रतविन्द्र द्युम्नितमो मदः।
१२ ३१२ २२
तेन नूनं मदेमदेः ॥ २ ॥ २

५ २ २ ५ १ २ १
। यस्तेनूनाप५ꣳशतक्रताउ। इन्द्रद्युम्नितमोमा२दाः।
२२१२ २ १ ६ २ १२२१
तेननूना२३म्मा। दाइमा३उवा३। दे२३४५ः ॥ ५ ॥ २

अत्र सोमः स्तूयते—

हे "शतक्रतो"-शतविध प्रज्ञान' (१) हे "इन्द्र" (२)

---

* 'शुतकक्षस्यार्षम्' इति वि०।

। आग्नम्।

(१)—'क्रतुरिति निघण्टु नृतोपनवमं पञ्चम पदम। शतमिति बहुनाम (नि०३,१,१०), क्रतुरपि कर्म नाम (नि०२,१,१) शत क्रतनां यस्य स शतक्रतु, तस्य सम्बोधन शतक्रतो' बहु कर्मन्" इति वि०।

(२)—इन्द्रः अन्तरिक्षस्थ-देवः, "यो जातएव प्रथमो मनस्वान् देवो देवान् क्रतुना-पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मज्मा स जनास इन्द्रः"-इति ऋक् मन्त्र वायुरेव "वायुर्वेन्द्रो वा अन्तरिक्ष-स्थानः (२,३,१)"-इति हि नैरुक्तम्, "वायु-रिन्द्रश्चैक एव यथा हन्नः का:"-इति तद्-भाष्यम्। "इन्द्रः दरां दृणातीति वरां ददा

अथ तृतीया।

हर्यतः प्रगाथः*।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
गाव उपवदावटे मही यज्ञस्य रप्सुदा।

"यन्निंतमः"(३) यशस्वितमः "यः मदः" [माद्यत्यनेनेति मदः सोमः] यः सोमः "नूनं" पुरा "ते" त्वदर्थम् अस्माभिरभिषुतोऽस्ति। "तेन" अस्माभिर्दीयमानेन सोमेन "नूनम्" इदानीम् "मदे"(४) तत्यानेन मदे। तव मज्जाते मति अस्मानपि "मदे" धनादिदानेन त्वं मादय [मदी हर्षे, अत्रान्तर्भावितण्यर्थः] "छन्दसि बज्बलम्"-इति शप्(५)॥ २॥ २

* 'हर्यतस्यार्षम्'-इति वि०। प्रयत्नं प्रगाथः।

नीति वेरं दधातीति वेरं दार्यतइति वेरं धार्यतइति वेरं भनोति वा तद् यदेन प्राणैरगमैरेयत तदिन्द्रसंबन्धलमिति विज्ञायत इदं करणादित्याघायण इदग्मादित्यौपमन्यव इन्द्रसंबन्धकर्मण इन्द्रकर्तृणां दारयिता वा दारयिता वा यज्ञानाम्'-इत्यादि नैरुक्तम् १०.१,८। "इरा शब्दे उपपदे दृणातेर्दधातेर्दार्यतेर्धार्यतेर्वा"-इत्यादि, "इरामन्न तेन मन्यन्यादा तद्धेतु हेतुकं बलं लक्ष्यते, तेन बल-लक्षित लक्षणया तदाधार भूतो मेघः"-इत्यादि च देवराजः॥

(३) 'यूथं द्योतते, तेन दीप्तार्थस्य, अतिशयेन दीप्ततमः'-इति वि०।

(४) 'मदं मनुष्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्, मदेन; 'मदे' माद्य खेत्यर्थः' इति वि०।

(५) 'छन्दसि शायजपि (३.१.८४)'-इतश्छन्दसि पदं 'व्यत्ययो बज्बलम् (३,१.८५)' इतो बज्बलपदञ्च सङ्कलय्य छन्दसि बज्बलमिति वचनम्। वस्तुतो व्यत्ययपदञ्च व्यत्ययः।

उभा कर्णा हिरण्यया ॥ ३ ॥३

I गावः। ए गावाः। उपव। दा३। वारदा
२३औहोवा। वार३४टे। मघोया२३४ज्ञा। स्यरा३।
स्यारा२३४औहोवा। स्मू२३४दा। उभाकार३४र्णा।
हिरा३। हार३रा२३४औहोवा। ण्यार३४या ॥ ६ ॥

हे "गावः" धर्मदुघाः। (?) यूयम् "अवटे"(१) अवटं महावीरं(२) प्रति "उप वद" उपावत [वर्ण-व्यत्ययः (३,४,५८)] उपागच्छत। "यज्ञस्य" धर्म यागस्य(?) साधन भूते "रप्सुदा"(३) रप्सुदे आ रिप्साः फलदे [रिप्साख्यिनोर्दातव्ये वा; यद्वा रपणं शब्दनं रप् मन्त्रः, तेन सुदातव्ये; अथवा पद त्वरणे (भ्वा० आ०), रपा मन्त्रेण त्वरणीये दोहनीये, ईदृशे] गवाजयोः पयसी "मघो" महतो(४) बहुले अपेक्षिते, अत उपावत [गा गच्छो

---

३ उत्तरार्चिकस्य ७,३,१६,१।२

(१) -ग्नि-भावे (५,३,९९) पररूपे (६,१,९०) च रूपमिदम्।
(२) -"धर्म यागे प्रधान भूत महावीर नामकमग्निम्" इति वि०।
(४) -"४। द्वियचनार्थे एकवचनम् (३,१,८५)।

॥ ओ३ गा२३४वाः। उपवाऽदा। वाटाओ२३४-
वा। मह्योयज्ञस्यरप्सुदाऽ३। ओउ२३४भा। कार्णा
ओ२३४वा। हिरण्ययाऽ२३४५॥ ७ ॥ ३

अजाया अप्युपलक्षकः, अजा-पयसोऽपि महावीरे आसेचनीयत्वात्]। अपिच अस्य महावीरस्य "उभा"(५) "उभौ" कर्णा(६) कर्णस्थानीयौ द्वौ रुक्मौ "हिरण्यया"(७) हिरण्मयौ सुवर्ण-रजतमयावित्यर्थः(८)॥

"उपवदावटे"-इति छन्दोगाः, "उपावतावतम्"-इति बह्वृचाः॥ ३ ॥ ३

॥ इति प्रथमे प्रपाठके तृतीयः खण्डः॥

(५). (६). सुपां सु लुगित्यादिना (७,३,३९) आत्वम्।

(७) "ऋत्य वास्त्वा वास्त्व माध्यो हिरण्ययानि छन्दसि"। ६,४,१७५।

(८) 'गावः' हे मदीया वाचः! 'अवट अवट मेघम् 'मह्यौ' महत्यौ च द्यावापृथिव्यौ 'उप' उपगम्य 'वद' वदत। कीदृशं मेघम्? 'उभा कर्णा हिरण्यया' उभौ कर्णौ हिरण्मयौ यस्य। कीदृश्यौ द्यावापृथिव्यौ? 'यज्ञस्य रपसुदा' यज्ञस्य रूपदे। अथ मयौ विवरण-छत्तमन्यतः।

अथ चतुर्थो।

इयोः श्रुतकक्षनाम ऋषिः।

३ १ २ ३ १ २ ३ १ २ ३ १ २
अरमश्वाय गायत श्रुतकक्षारङ्गवे।
३ १ २ ३ १ २
अरमिन्द्रस्य धाम्ने ॥ ४ ॥ ४

३ २ २ ५ २ १ २
। अरा३४म्। अश्वाय। गायाइता। श्रुतक।
२ १ २ ३ ५ २ २ १
क्षाराङ्गावाइ। आ२३४राम्। क्षाइक्षाइ। इ। द्रास्या-
२ १ २ ३ १ ५ २ ३
२३धा। ऊम्मायेइ। म्नो। या२३४औक्षावा। ईइ२
५
४नी ॥ ८ ॥

५ ५ ५ ५ २ २ ५ ५ १ २ २ १ २
॥ अरमश्वायगायता। रमश्वावा। यागायत। श्रुत-
१ २ २ १ ३ ५ १
क। क्षा२३। क्षाइक्षाइइ। आरा२ङ्गा२३४वाइ। आ

श्रुतकक्षऋषिरात्मानमेव सम्बोधयति(१) हे 'श्रुतकक्ष' आत्मन्!

।,॥ श्रीतकक्षे।

(१) नेदं वि० सम्मतम्, तत्र हि "हे 'श्रुतकक्ष' श्रुतकक्षस्य मम पुत्र"-इति।

अथ पञ्चमी।

श्रुतकक्षऋषिः।

१र २र ३२ ३२ ३१२
तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे।
१र २र ३ १ २
स वृषा वृषभो भुवत्॥ ५॥ ५

१ २ २ २ १ २र १ २ ४ ५ ४
रमिन्द्रा३। हा३हा। स्याधाम्ना। औ३होवा। हो
५इ। डा॥ ८॥ ९

"अरम्" अलं "गायत" [वचन-व्यत्ययः (३,१,८५] गाय गीतिं कुरु। किमर्थमिन्द्रोद्देशेनस्तुतिस्तत्राह—"अश्वाय" इन्द्रेण दीयमानायाश्वाय तदर्थम् "अरम्" अलं गाय इन्द्र-विषयं स्तोत्रं कुरु, तथा "गवे" अलं गाय. "इन्द्रस्य" इन्द्रकर्तृकाय "धाम्ने" गृहाय तदर्थञ्च "अरम्" पर्याप्तं स्तुहि; गृहादिकमिन्द्रः प्रयच्छति, तस्मै गायेति [यद्वा इन्द्रस्येति कर्मणि षष्ठी, गवादिलाभार्थमिन्द्रं स्तुहि॥

"श्रुतकक्षा"—"श्रुतकक्ष"-इति च पाठो॥ ४॥ ४

यजमाना आहुः—"तम्" पूर्वोक्तलक्षणम् "इन्द्रम्" वाजया-

५ उत्तरार्च्चिकस्य ५,१,१०,१ । ३

२१ ०१र ५र १ र २ र १ २
। तमिन्द्रा२३वाजयाममि। माहेवृत्रा। यहान्ता-

१ २ २ १ ५ ४ ५
१वे२। मवार्षा१वा२३। पभो२३४वा। भूवोह्हा

३ ॥ १० ॥

२ १ ०१र र ५ २ र १ र १
॥ तमिन्द्रा२३वाजयाममिहाउ। माहेवृत्रा। यहा

२ १ २ २ २ १ २ १ २
न्ता१वे२३। हेवाइहाइ। मवार्षा१वा२३। हेवाइ

२ १ १ ७ ५र र २ २र १ ६
हा। पभो२३। भूवा२३४औहेवा। ण३। दावस्व

१ १ १ १
२३४५ ॥ ११ ॥

ममि(१) सोमेन स्तुतिभिर्वाजयामः वाजवन्तं कुर्मः, किमर्थम्? "महे"(२) महान्तम् "वृत्राय"(३) अपावरकं वृत्रासुरं "हन्तवे"(४) हन्तुम्, सोमपानेन मत्तः स्तुतिभिर्वा स्तुतः सन्, वृत्रहत्यायाञ्च,

। तन्वः पार्थ ऋषिः।

॥ तन्वः पार्थो वा दावसराङ्गिरसो वा ऋषिः।

(१) 'वाजयति' इति निघण्टु, तृतीय चतुर्दशे पञ्चदशाक्षरे पञ्चमे। "इदन्तो ममि (७.१.४६)" इति ममदागमे रूपम्।

(२), (३) द्वितीयार्थे चतुर्थी (२.३.८८)।

(४) "तुमर्थे से सेन् (३.४.९)" इति तवेन् प्रत्ययः।

३८क,

५ र र ५ २ २ २ऽर
III तमिन्द्रं वाजयामसीद्ए। मच्चा३च्चाइ। वृत्रा३-
१ ७ १ऽ ९ १ २ र
याच्चन्तवे२। ओ२। ई२३या। ओमोवा। सच्चे-
१ १ १ऽ २ १ २ १
वार्षा२। ओ२। ई२३या। ओमोवा। वृष। भो२।
२ ५र र २ ५
या२३४औच्चोवा। भू२३४वात्॥ १२॥

२र र १ २ र ४५
IV औच्चोइड्डवा३च्चोइ। तमिन्द्रं वाजया३मसी।
२र र १ २र ४ २३५र ५र र
औच्चोइड्डवा३च्चोइ। मच्चेवृत्रा३या३च्चन्तवे। औच्चोइ
१ ३ २३ ५ २१र २ १ २
ड्डवा३च्चोइ। मवार्षा२३४वृ। षभोभुवत्। इडा२३भा
४ ५ ४ ५
३। एच्चीडा। च्चोपुइ। डा॥ १३॥५

[वाजयामसि वाजवन्तं करोतीत्यर्थे तत्करोतीति(५)णिच्,'णाविष्ठवत्(६)'-इति णेरिष्ठवद्भावात् 'टेः' (६,४,१५५)-इति टिलोपः,

III वसिष्ठऋषिः, निवेष्वो नाम।

IV वसिष्ठऋषिः इडा वा ऋषयः, निवेष्वःसंचारी नाम।

(५)—"तत् करोति तदाचष्टे"-इति गणसूत्रम्(३.१,२५)।

(६)—"प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च"-इति ग०(३,१,२५)।

अथ षष्ठी।

इन्द्रमातरोदेवजामयऋषिकाः।

१ २ ३ २ ३ २ ३ १ २ ३ १२ २२
त्वमिन्द्र बलादधि सहसो जातओजसः।
१२ २२ ३ १२ २२
त्वꣳसन् वृषन् वृषेदसि॥ ६ ॥६

५२ २ १ २ २ १
। ह्वाउत्वमिन्द्रा। बलादधि। ह्वाइउह्वाउ। सह
२२ २ १ २ २ २ २ १ २
सोजा। ताओ१जमाइः। ह्वाइउह्वाउ। त्वाꣳसन्वृषा
२ २ १ ३ ३ ५२ २
इन्। ह्वाइउह्वाउ। वृषायेइत्। आ२सा२३४औहो
२
वा। वृधे१॥ १४॥

'विन्मतोर्लुक्(५,३,६५)'-इति वचनान्मत्वर्थो लुक्] "वृषा" धनानां सेक्ता दाता "सः" इन्द्रः "वृषभः" अस्माकं स्तोतॄणां सोमस्य दातॄणां धनादि-सेचको दाता(५) "भुवत्"(६) भवतु॥ ५॥ ५

हे "इन्द्र!" "त्वम् "सहसः"(१) परेषामभिभावकाद्

(५) 'वर्षणाद् वृषभः' इति नै०९,३१।

(६)—लेटोरूपम्।

(१) 'षह मर्षणे, छन्दस्यभिभवार्थे', 'असुन्'-इति देवराजयज्वा।

II त्वमिन्द्रबलादधी६ए। सहसोजा। ताओ१जसः।
इयाइ३च्चोइ। इयायो२३४वा। त्वाँ२सन्नृषन्। इयाइ३च्चो
इ। इयायो२३४वा। वृषायेऽत्। आ२सा२३४ओ३च्चो
वा। मच्चे१ ॥ १५ ॥

III त्वमिन्द्रबलादधिसच्चसाः। जाता२ः। ओजसा
२३४ः। इच्चोइच्चा। त्वाँ२सन्नृषा३४न्। इच्चोइच्चा।
वृषायेऽत्। आ२सा२३४ओ३च्चोवा। ई२३४च्चा ॥ १६ ॥ ६

"बलात्" "अधि जातः" असि(२) [अधिः पञ्चम्यर्थानुवादकः। वृत्रादि वध हेतु भूताद् बलाद्जितोऽसि प्रख्यातो भवसीत्यर्थः] अपिच "ओजसः" ओजोनाम बल-हेतुः हृदय-गतं धैर्यं, तस्मा-

I,II,III आर्ष्यातानि त्रीणि।

(२) 'बलस्य त्वयि दृश्यमानत्वात् कारणानुविधायित्वस्य कार्याणामिच्छमाणत्वात्'-इति वि०।

अथ सप्तमो।

गोषक्त्यश्वसंक्तिनौ ऋषी हृचस्य(१)।

३१२ २२ ३२३ ३१५
यज्ञ इन्द्रमवर्द्धयन्नमिं व्यवर्त्तयत्।
३ १ २ ३२ ३ २
चक्राण ओपशन्दिवि ॥ ७ ॥ ७

५ ५ २१२ १ ७
। यज्ञइन्द्रमवर्द्धयात्। यन्नमिम्। व्या। व्यवा-
७ ५ ७ ५ ७ ५ १ २ १
र्त्ता२३४यात्। चा२३४क्रा। णा२३४ओ। पाशन्दिवि।
२३२ २ १ १ ७ ५२ २ ७ ५
चक्राणओ२३। पा२शा२३४ओहोवा। हो२३४वो॥१७॥७

दपि त्वं जातोऽसि(२)। हे "वृषन्" वर्षितः! "मन्" "अहः" "त्वम्" "वृषा द्यत् अमि" कामानां वर्षितैव भवसि(३)॥ ६॥ ६

"यज्ञः" यजमानैरनुष्ठीयमानो यागः "इन्द्र" देवम् "अवर्ध-

---

(१)—अथाऽऽर्चः, उत्तरस्यार्चेत्यर्थः। हृचस्येति म-यकारपाठोपेक्षः।

७ उत्तरार्चिकस्य ८,१,८,१। ४

। इन्द्राण्याः साम।

(३)—ओजसइति पदान्तं व्याख्यातं विवरणकृता। तथाच 'ओजसः' परकीयस्य बलस्य 'महसः' अभिभावकात् 'बलात्' 'अधि जात'-इति विः।

(४)—'इदिति पाद पूरणः'-इति विः।

अथ चतुर्थी।

१ २ ३ ४उ ३ १४ २४ ३ २ ३ २ ३ २
यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्।

३ २ ३ १ २
स्तोता मे गोसखा स्यात्॥ ८॥८

यत्" [श्रूयते हि—'इन्द्र इदं हविरजुषतावीवृधत महोज्यायो कृतः'-इति] स इन्द्रः "यत्"(१) यस्मात् "भूमिम्" पृथिवीं (नि०१,१,१८) "व्यवर्तयत्" वृष्ट्यादि-प्रदानेन विशेषेण वर्त्तमानामकरोत्। किङ्कुर्वन्? "दिवि" अन्तरिक्षे मेघम् "ओपशं" उपेत्य शयानं(२) "चक्राणः"(३) कुर्वन् [यद्वा आत्मनि समवेतो वीर्यविशेषः ओपशः, तमन्तरिक्षे कुर्वन्॥ ७॥ ७

हे "इन्द्र!" "यथा" "त्वम्" "एकइत्" एकएव केवलः "वस्वः"(१) वसुनः धनस्य ईशिषे, एवम् "अहम्" अपि "यदि" यदि "ईशीय" ऐश्वर्य्य-युक्तः स्याम्!! तदानीं "मे" मम

---

८ उत्तरार्चिकस्य ८,२,८,१। ५

(१)—'नपुंसकलिङ्गमिदं पुंल्लिङ्गस्थाने द्रष्टव्यम्। 'यः' 'भूमिम्' 'पृथिवीम्' 'व्यवर्तयत्' विवर्तयति विवर्तितवान् वा अन्यरूपां करोतीत्यर्थः'-इति वि०।

(२)—'गर्जित-लक्षण शब्दं कुर्वन्'-इति वि०।

(३)—'लिटः कानज्वा (१,२,१०६)"।

(१)—अत्यधन पुंल्लिङ्गः (२,४,१८), "जसादिषु छन्दसि वा वचनम् (७,३,१७)" इति कात्यायन-वचनात् गुणाभावश्च।

४ ५ र ४ ५र ४र ५ ४ २र
I यदिन्द्राहं यथौ। त्वौहोवाहाइ। त्वाम्। ई-

१र २ १ १ २ १ २र १र
शीयवस्त्रओ२। ऊवाइ। ऊवाये। काई२त्। स्तोता

र र २ १ १ २ १ १
येगोमखो२। ऊवाइ। ऊवाये। माया२३त्। हो-

२ ५र र २ १ र २ ३ १ १ १ १
२वा२३४औहोवा। अग्निराऊता२३४५ः॥ १८॥

२ ३र ४ ५ ५ र २१ १
II आऔहोवाहाइ। यदिन्द्राहाम्। यथा। त्वम्।

३र र ३र २ १ र २ २ २र र ३र २
ऐहीयैहो१। आइशीयवस्त्रआइकाइत्। ऐहीयैहो१।

१ १ २१ १ २
आ२इ। स्तोता२माइगो२। सखा२३। मा२या२३-

५र र २ १ र २ ३ १ १ १
४औहोवा। शुक्रआऊता२३४५ः॥ १८॥८

"स्तोता "गोमखा स्यात् गोभिः सहितो भवेत् [ईश्वरस्य तव स्तोता कुतो हेतोर्गोसहितो न भवेत्! अपितु भवेदेवेत्यभिप्रायः॥ ८॥ ८

I, गोसूक्तम्।

II अश्वसूक्तम्।

अथ नवमी।

मेधातिथिराङ्गिरसऋषिः।

१२ ३ १ २ ३ १ २ ३ १ २
पन्यं पन्यमित्सोतार आ धावत मद्याय।
१ २ ३ २ ३ १ २
सोमं वीराय शूराय॥ ८॥ ९

४ ५ ४ ५ २ ५ १ २ २
। पन्यम्पन्यमित्। सोताऽरः। पन्यम्पन्यमित्सो१ता
२ १ २ २ ३ २ ३ ४ ५ १ २ २ १
३राः। आ। धावत। मद्याया। सोमं वी। रा२३।
३ २ ४
यमू३राप्याऽ५६॥ २०॥ ९

हे "सोतारः" अभिषोतारोऽध्वर्यवः! "मद्याय" मादयितव्याय "वीराय" विक्रान्ताय "शूराय" शौर्यवते इन्द्राय "पन्यम् पन्यम्(१) इत्" सर्वत्र स्तुत्यमेव "सोमम्" "आ धावत" अभि गमयत प्रयच्छतेत्यर्थः(२)॥ ८॥ ९

९ उत्तरार्चिकस्य ८,२,१,१। ६
। गौरीवीतम्।

(१)—'पन्यति स्तुत्यर्थः (नि० ३.१५.१६)। 'क्रियासमभिहारे च (८१.१२)' इति क्रियायनवचनाद् द्विर्वचनम्।

(२)—'नयतेत्यर्थः' इति वि०।

अथ दशमो।

काण्वः प्रियमेधऋषिः*।

२१ २ ३२उ ३ २७ १ २ ३१ २
इदं वसो सुतमन्धः पिबा सु पूर्णमुदरम्।
१ २ ३१ २
अनाभयिन् ररिमा ते ॥ १० ॥ १०

५ २१ ० २ १२र र २
I इदंवसाउ। सुतमा२३धाः। पिवा२सुपू। ण-
१ २ ३२ ३२ ४ ५ ४
मुदा२३रा३४म्। अना३४भया३इन्। ररोवा। मा-
५
पुनोई३त्ताइ ॥ २१ ॥

हे "वसो" वासयितः! (१) इन्द्र! "इदम्" पुरोवर्त्तमानं "सुतम्" अभिषुतम् "अन्धः" अन्नम्(२) सोमलक्षणम् "पिबा"(३), यथा "उदरम्" त्वदीयं जठरं "सु पूर्णम्" अतिशयेन सम्पूर्णम् भवति तथेत्यर्थः। हे "अनाभयिन्!" [आ समन्ताद् विभेत्याभयी, विभेतेरौणादिक इनिः, न आभयी अनाभयो तादृग्!] हे इन्द्र!

* 'मेधातिथेरार्षम्'-इति वि०।

१० उत्तरार्चिकस्य १,२,८,१। ७

(१)—'प्रशस्तधनवन्' इति वि०।

(२)—अन्नमिति अन्ननामसु प्रथमम् नि० २,७।

(३)—'ह्यचोतः (६.३ १३५)'-इति दीर्घः।

५ ४०२१२४ ५ २१२ २ १ ३
॥ इदा३वसोसुतमन्धाः। पिवाहु२३पू३। णमू२दा-

५ १ २ १ ७ २
२३४राम्। आ२३ना। भा२याइन्। रारा२३। हाउ-

१२३१११ १
वा३। माते२३४५॥ २२ ॥

५ २ ५ २२ ऽर१७ २२
॥॥ इदंवसोसुतमन्धा६ए। पिवासुपूर्णामुदरौ। हो-

२ १२ २ ७ २२ २ १ २ २
३वा। पिवासुपूर्णामुदरौ। होश्वा। आनाभा३यीन्।

१ २२ १ २ ४ ५ ४
ररीमाता। औ३होवा। होपुइ। डा॥ २३ ॥ १०

॥ इति तृतीय-दशतिः ॥

"ते" तुभ्यं त्वदर्थं "ररिमा"(४) उक्तगुणं सोमं दद्मः [रा दाने, छान्दसो लिट्(५)॥ १० ॥ १०

इति मायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे ऐन्द्रीव्याख्याने द्वितीयाध्यायस्य प्रथमः खण्डः ॥ १ ॥

I,II,III गारणि।

(४)—'तिङः (६,१,१३५)'-इति योगभागाद् दीर्घः।

(५)—'छन्दसि लिट्' ३, २, १०५।

अथ द्वितीये खण्डे—

मेयं प्रथमा।

द्वयोः सूतकक्षः श्रुतकक्षो वा ऋषिः।

२५ ३ २ ७ १ २ ७ १ २ २

उद्घेदभि श्रुतामघ वृषभन्नर्यापसम्।

१ २

अस्तारमेषि सूर्य॥ १॥ ११

४ २ ४ ५ १ २ ७ ५ २ १ २ १

। उद्घेदभ्योवा। श्रूतामा२३४घाम्। वृषाभन्ना।

७ ३ ५ १ ८ १ २४ १

रिया२पा२३४साम्। आ२स्ता। रा२३मे। षाइस्हरिया।

२ ४ ५ ४

औ३ह्वोवा। ह्वोपुइ। डा॥ २४॥

अस्मिन् द्वचे सूर्यरूपेणेन्द्रस्य स्तुतिः क्रियते —'असौ वा आदित्य इन्द्रः' इति हारिद्रविकम्। हे "सूर्य!" [(१)द्वादशस्य भानुषु इन्द्रोऽपि सूर्यात्मना पठितः, तस्मात्] सूर्यात्मक,

११ उत्तरार्चिकस्य ६,३,४,१ ।८

।।। सोपर्णं गरुत्प्रवितमे वा।

(१)—ननु 'वायुर्वेन्द्रो वा अन्तरिक्षस्थानः सूर्यो द्युस्थः (७,२,१)' इति नैरुक्तसिद्धान्ते कथमिन्द्रसूर्ययोरैकात्म्यमिति शङ्कां निराकुर्वन्नाह—द्वादशस्येत्यादि। आदित्यास्य द्वादश, तथ मानम्—'अष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः-इत्यादि ताण्ड्य'-ब्राह्मणादिकम् २१,१

५ २ २ ५ ४ ३ ४ ५ १
II उद्वेदभिश्रुतामाऽघाम्। वृषभन्नर्या। ऊम्।

३ ५ १ ६ २ २ १ २१ ५
पा२३४साम्। आस्ताऽउवा। रामाइ। षिह्व२३४वा।

४ ५
रापूयोऽह्वाइ॥ २५॥

४ २ ५ ४ ५ ४२५ ४ ५ ४ ५ ४ ३ ४ ५ २
III उद्घेदभिश्रुतामघम्। इयदयाह्वाइ। वृषभन्नर्या।

२ २ १ ५ १ २ २ १ ३
ह्वाऽह्वाऽइ। पा२३४साम्। आस्ताऽउवाऽ। रा२मा

५ २ २ २ ३ १ १ १ १
२३४औह्वोवा। षिह्वरिया२३४५॥ २६॥ ११

सुवीर्य्य, हे इन्द्र! "श्रुतामघम्"(२) सर्व्वदा देयत्वेन विख्यात-धनम्, अतएव "वृषभम्" याचमानानां धन-वर्षितारं "नर्य्या-पसम्" [नर-हितं नर्य्यम्] नर-हित-कर्माणम् "अस्तारं"(३) दानशौण्डम् औदार्य्यवन्तं एतादृशम् "उदेपि" अभितउदेषि। "इदम्" अवधारणे, त्वमेव तस्य यज्ञे सूर्य्यात्मना उद्गतोऽसि। "घ"-इति प्रसिद्धौ(४)॥ १॥११

III विलम्बमोपर्णं शरुप्रवेतसं वा।

(२)—"श्रुचोऽतः (६.१.१३५)" इति योगभागाद् दीर्घः।

(३)—'अस्तारं, क्षेप्तारं शत्रूणाम्'-इति वि०।

(४)—'घा', 'इत्' द्वावपि पादपूरणौ-इति वि०।

अथ द्वितीया।

२ १ १र २र १ १ २ १ १ २
यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य।

१ १ २ १ १ २
सर्वन्तदिन्द्र ते वशे ॥ २ ॥ १२

४ ४ १ १ र १ १र २
। यदद्यकाꣳ२च्चवृत्रहान्। उदगाꣳ२अभिसूरा२३या।

१ १ २ १ २ १ २ ५
सार्वा२म्। तादिन्द्रतायेऽ३। ऊम्। वाऽ३४५शोऽ३हा

ऽ३ ॥ २७ ॥ १२

अत्र शौनकः[१]—

"यदद्यकच्चेत्युदिते रवौ स्तुत्वा पुरन्दरम्।
शत्रुनाशहते रिप्रं वश्यं वा कुरुते जगत्"-इति[२] ॥

हे "वृत्रहन्" वृत्रस्य अपामावरकस्य मेघस्य हन्तः! [३] हे

। शाकलम्।

(१)—आर्षर्क्षणशाखाश्रित शौनकः, स्मृतिकारोऽपि, शौनकः, स एव स इत्यत्रापि संशयः; इह तु कथ्यमानमिदं स्मृतिवचनम्।

(२)—विहितमेतत् सामविधानब्राह्मणे तथाहि "उदिते यदद्यकच्च वृत्रहन्नित्या-काम्यं स्वस्त्ययनम्"-इति सा० ब्रा० २प्र० ४ख०।

(३ वृत्रहनि निघण्टौ प्रथमदशके मेघनामसु अष्टाविंशतितमम्। 'हन्यः' हन्तेराच्छादनार्थात 'अमि चमि-मिदि ग्रमिभ्यः वन्' अथवा वाऽलुकादु भवति

अथ तृतीया।

भरद्वाजऋषिः।

१२ २१ ३ २ ३ १ २ ३ २ ३ १२
य आ नयत्यरावतः सुनीती तुर्वशं यदुम्।
३ २ ३ २ ३ १२
इन्द्रः स नो युवा सखा ॥ ३ ॥ १३

"सूर्य्य" सूर्य्यात्मकेन्द्र! (१) "अद्य" अस्मिन् दिने(२) "यत् कच्च" यत् किञ्चित् पदार्थजातम् "अभि" अभिमुखीकृत्य "उदगाः" [इण् गतौ उत्पूर्व्वः, तस्य लुङि गाङादेशः] उदयं प्रापवानसि "तत् सर्व्वं" पदार्थजातं "ते" तव "वशे" वशवर्त्ति स्वायत्तमस्ति ॥ ३ ॥ १३

"यः" इन्द्रः "तुर्वशं यदुं" च एतत्संज्ञौ राजानौ शत्रुभिः

आच्छादयति द्यौः छादस्तं नभः। वर्त्तनेर्वा गति-कर्मणः, 'स्फायि-तञ्चि' इत्यादिना रक् प्रत्ययः; गच्छत्यौ छादस्तं नभः। वर्द्धनेर्वा इदर्थात्, बाहुलकात् इति धकारस्य तकारः वर्द्धते हि वर्षासु मेघः। ब्राह्मणोक्ता एवामी वरुणोऽर्थाः' इति देवराजयज्वा। 'अथास्य कर्म - रमानप्रदानं, हत-बधः' इति नै० ७,३,३। 'हत-बधो मेघबधः'-इति तद्भाष्यम्।

(२) विवरणमतं सूर्य-इति 'सुपां सुलुगित्यादिना (७,१,३९) सोर्लुकि रूपम्। हे 'हरिवन्' इन्द्रः! 'अद्य' 'यत्' 'कच्च' किञ्चित् 'अभि' अभिलक्ष्य 'सूर्य' सूर्यः उदगाः उद्गच्छति प्रकाशयति 'तत्' 'सर्वम्' 'ते' तव 'वशे' वर्त्ततइति-शेषः-इत्यर्थो वि०-सम्मतः।

(३)—'अद्य-ग्रहण चात्र प्रदर्शनार्थम्, सर्वकालमित्यर्थः'-इति वि०।

I यआहाउ। आनाया२त्। आनाया२३त्। पारा२-
वा२३४ताः। सुनीतोत्तू२। सुनीतोतू२३। वाभ्रंया२३४-
दूम्। इन्द्रःसाना२ः। इन्द्रःमाना२३ः। यू२वा२३४आ-
ह्वोवा। सा२३४खा ॥ २८ ॥

II यआनयत्। परावाहताः। सुनीतोतुर्वशा१या
इदूम्। इन्द्रःमनोयुवा१माइखा। इन्द्रो२३४ग्राइ। इ-
न्द्राओइहो२३४। ग्राइ। आइन्द्रोआ। ग्रा२। या२३४
ओह्वोवा। ई२३४न्द्राः ॥ २९ ॥ १३

दूरदेशे प्रक्षिप्तौ "सूनीतौ"(१) सुनीत्या शोभनेन नयनेन "परा-वत." तस्माद् दूरदेशात्(२) "आनयत्" आनीतवान् "युवा" तरुणः "मः इन्द्र" "नः" अस्माकं "सखा" भवतु ॥ ३ ॥१३

I,II आभरद्वसवे।

(१) सुपां सुलुगित्यादिना (७,१,३९) पूर्वसवर्णदीर्घः।

(२) "परावतः" इति निवृत्ते तृतीय-सप्तविभक्तेः दूर-नामसु पञ्चमत्व।

अथ चतुर्थी।

शुतकक्षऋषिः।

१ २ ३ २ २१ १२ १।२ २२
मा न इन्द्राभ्याऽदिशः स्वरो अक्तुषायमत् *।
२१ २ ३ २
त्वायुजा वनेम तत् ॥ ४ ॥ १४

५।२ २ २।४ ५ १।२।२ १।२
। मानइंद्राभियादाइशाः। स्वरोअक्तु। षुवाया-
२ २।२ २।१ १ २ १
२३मा३४त्। तुवा३४युजा। वनाइमा२३ता३४३त्। ओ
२३४५इ। डा ॥ ३० ॥

हे "इन्द्र!" "आदिशः" आदेष्टा समन्तादायुधान्यति-सृजन् "सूरः" [सृ गतौ (भ्वा० प०] सर्व्वत्र सरणशीलः राक्षसः "अक्तुषु" रात्रिषु(१) "नः" अस्माकम्? "अभ्यायमत्" आ आभिमुख्येन "मा" नियन्ताऽऽगन्ता भवतु। यद्यागन्ता चेत् तदा

* "यमत" इति सु० ख० पुस्तकयोः पाठः।

(२) अक्तुः इति निघण्टु-प्रथम नवमे रात्रि-नामसु चतुर्थम। 'रात्रि-ग्रहणञ्चात्र प्रदर्शनार्थम् सर्व्वकालमित्यर्थः' इति वि०।

अथ पञ्चमी।

अस्याः परस्याश्च मधुच्छन्दा ऋषिः।

१ २ ३ २ ३ २ ३ १ २ ३ १ २
ऐन्द्र सानसिं रयिं सजित्वानं सदा सहम्।

१ २ ३ १ २
वर्षिष्ठमूतये भर * ॥ ५ ॥१५

५ २ ४ २ ४ २ ५ २ ३ ५
॥ माना३आ३इन्द्राभियादिशाः। स्वरो३आ२३४क्रू।

२ ३ ५ १ २ १ २ १
षूआया२३४मात्। त्वायुजावनौ३हो। मनौ२। ऊ

१ १ १ १ १ १
वाइ। औ३हो२३४५वा३५६। ए३। ययू२३४५:॥१३॥१४॥

"तत्" रक्षः "त्वायुजा" त्वत्सहायेन वयं "वनेम" हन्याम [अथ क्रथ हिंसार्थाः, वन चेत्यत्र (स्वा०प०) पठितत्वाद्धिंसार्थः॥

'आयमत्' 'आयमन्' इति च पाठौ॥ ४ ॥१४

---

* "भरा" इति मु० भा० पुस्तकयोः पाठः।

॥ तान्वे इमे।

---

* इति ग्रामे गेय-गाने तृतीयः प्रपाठकः॥

४र५ ४ २ १ र
I ओम्। एन्द्रसा। नसि॒रयिम्। सजित्वान॒-
२१र २ १ २ १ र २ २
सदासा२३च्चाम्। वा२३र्षा। ष्ठामूतया३१उवायेइ।
५
भा२३४रा॥ १॥

४र५ र ४ २ १ र २१र
II एन्द्रसानसाइम। रया२इम्। सजित्वान॒मदा-
२ १ १ २१ ५ ४
मा२३च्चाम्। वार्षी२ष्ठामू२३। तयो२३४वा। भा५रो
५
६च्चाइ॥ २॥ १५

हे "इन्द्र!" "ऊतये" अस्मद्रक्षार्थम्(१) "रयिम्" धनम् "आभरा"(२) आहर, कीदृशं रयिम्? "सानसिम्"(३) सम्भजनीयम् "सजित्वानम्" समान-शत्रु-जय-शीलम्(४) [धनेन हि शूरान् भृत्यान् सम्प्राप्य शत्रवो जीयन्ते] "सदासहम्" सर्व्वदा शत्रूणामभिभवन हेतुम् "वर्षिष्ठम्" अतिशयेन बृहम् प्रभूतमित्यर्थः॥ ५॥ १५

I,II इन्द्रो विश्वामित्रो वा ऋषिः; रोहिकुलीयं नाम।

(१)—'ऊतये, तर्पणाय'-इति वि०।
(२)—भरा इति "ब्रूचोतस्तिङः (६,१,१३५)"-इत्यन्तदीर्घः।
(३)—बन-षण सम्भक्तौ (भ्वा०प०) इत्यस्येदं रूपम्।
(४)—'सदृशतानां शत्रूणां जेतृ'-इति वि०।

अथ षष्ठी।

१२ ३१२ ३२३ ३१२
इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे।

१२ ३१२ ३१२
युजं वृत्रेषु वज्रिणम्॥ ६॥ १६

१ ० १ ०र
I इन्द्राम्। इन्द्रंवाया२म्। महा। महाधाना२इ।

१ ० १ ०र १
इन्द्राम्। इन्द्रमर्भा२इ। हवा। हवामाहा२इ। युजाम्।

० १ ० २
युजं वृत्रा२इ। षुवा। षुवज्रिणा२३४३म्। ओ२३४५इ।

डा॥ ३॥

१ ०र १ २ २ १५
II महा। महाधाना२३इ। आ औ३हो। इह।

"वयम्" अनुष्ठातारः "महाधने"(१) प्रभूत-धन-निमित्तम्(२) "इन्द्रम्" "हवामहे"(३) आह्वयामः, "अर्भे" अर्भके स्वल्पे-

---

I,II इन्द्राण्याः सामनी।

(१)—'महति महामे' इति वि०। 'महाधने इति निघण्टु, तृतीय-षोडशे महान्-नामसु उनचत्वारिंशत्तमम् पदम्।

(२)—निमित्त मप्रत्ययः, चर्म्मणि द्विपिनमितिवदित्याशयः।

(३—ह्वः सम्प्रसारणे (५,१,३४) रूपम्।

अथ सप्तमी।

त्रिशोकऋषिः।

१ २ ३ १ २ ३ १ ४ ३ १ २
अपिवत् कद्रुवः सुतमिन्द्रः सहस्रबाह्वे।
१ २ ३ १ २
तत्राददिष्ट पौंस्यम् ॥ ७ ॥ १७

१ २ ३ ५ १ ७ ६
इहिवाला। ओ२३४वा। इन्द्रमर्भाइ। हवा। हवामा-
१ २ २ १२ १ २ ३
हा२३इ। आ औ३हो। इह। इहिवाला। ओ२३-
५ १ ७ १ २
४वा। युजंवृत्राइ। षुवा। षुवज्रिणा२३म्। आ औ
२ १२ १ २ ३ ५ ३ ५
३हो। इह। इहिवाला। ओ२३४वा। ई२३४हा ॥४॥ १६

ऽपि धने निमित्त भूते सति(४) इन्द्रं हवामहे। कीदृशम् इन्द्रम्? "युजं"(५) सहकारिणं [समाहितं वा] "हवे षु" शत्रुषु धन-लाभ-विरोधिषु ग्रामेषु तन्निवारणाय "वज्रिणं" वज्रोपेतम् [महाधन शब्दो यद्यपि सङ्ग्राम-वाची तथापि महद्धनमत्र विवक्षितम्(६)] ॥ ६ ॥ १६

---

(४)—'अर्भकः'-इति निघण्टु, तृतीय द्वितीय दशमम्।

(५)—'युज्यते इति युक् सहायः तम् इत्यर्थः'-इति वि०।

(६) इह विनिगमकं चिन्त्यम्।

५ २ ५ १ १
I अपिबत्काद्रूऽवःसुताम्। इन्द्राहो२इ। सहाहो२।
१ २ १२ २ १
स्वावा१ऽवे२। तत्रादा२३दी। ष्टपौ२। हौ२। ऽवा
१ २ १ ४ ५ ५
२इ। ईश्या। सियाम्। औ२३होवा। होप्इ।
उ३ा ॥ ५ ॥ १७

"इन्द्रः" "कद्रुवः" कद्रुनामकस्य ऋषेः सम्बन्धिनं(१) "सुतम्" अभिषुतं सोमम् "अपिबत्" पीतवान् "सहस्रबाह्वे" सहस्र बाह्वाख्यं शत्रुम्(२) अहन्निति शेषः। "तत्र" तस्मिन्नवसरे(३) "पौंस्यम्" इन्द्रस्य वीर्यम् "आ ददिष्ट" आ दीप्यत(४)॥

'तत्रादिष्ट'-इति छन्दोगाः, 'अत्रादिष्ट'-इति बह्वृचाः ॥ ७ ॥ १७

I इन्द्रऋषिः, सहस्रबाह्ववीयम्।

(१)—तन्वादित्वात् कृपम्। 'कद्रुर्नाम कश्यपस्य भार्या, तस्याः सम्बन्धिनं'-इति वि०।

(२)—सहस्रमिति बहुनाम (नि० ३.१,११) बाह्वशब्देनापि अवयवेन समुदायस्य सम्बन्धात् कर्ता उच्यते। सहस्रं बहवः कर्तारो यत्र तत् सहस्रबाह्वं सैन्यं, तस्मिन् पीतवान् इत्यर्थः'-इति वि०।

(३)—'तत्र सत्रे'-इति वि०।

(४)—'अत्यर्थं दृश्यते वर्ण्यत इत्यर्थः, केन? सामर्थ्यान्मन्त्रेः'-इति वि०।

अथ चतुर्थी।

वसिष्ठऋषिः।

३१ ३ २३ १२ २२
वयमिन्द्र त्वायवोभि प्र नोनुमो वृषन्।
३२ ऽ१ २
विद्वो त्वाऽस्य नो वसो ॥८॥ १८

I ३१ ५ १ १ ३ ५२ २
वयमा२३४इन्द्रा। त्वा२३। या२वा२३४ओहोवा।
३१ ऽ२ २ ३२ १ ३ ५२
अभिप्रनो२नुमोवृषन्। विद्वाइत्वा३। स्या२ना२३४औ
२ ३ ५
होवा। वा२३४सो ॥ ६ ॥

II ५२ १ १ २
हाउवयमिन्द्रा। त्वा२यावा२। अभिप्रनोनुमो२
१ १ १ १ ३
वार्षा२न्। विद्वा२इत्वा२। स्यनो२३। वा२सा२३४
५२ २ १ २ २ १ २ ३ १ १ १
औहोवा। अस्मभ्यङ्गातुवित्तमा२३४५म ॥ ७ ॥

III ५ १ २ ३ १ २ २ २
वयमिन्द्रा। त्वायाऽवाः। अभिप्रनोनुमो१वा३-

I भृषता मारुतस्य साम।

II भारद्वाजऋषिः, अदारसृत्।

III धृषदृषिः, अदारसृत्।

२ ३ ५ ३ ५ ४ ५
र्षान्। विड्ढीढ्र२३४वा। उ२३४च्छाइ। स्यनोवा५मोइ
५
च्छाइ॥ ८॥

५ २ ४र ५ ४ ५ १ २ ३ १ २
IV वयामौच्छो। इन्द्रा। त्वाया२वा। अभिप्रनो
२ ३ २ २ ३ ५ १ २ ३
नुमो१वा२र्षान्। विड्ढीत्वो२३४च्छाइ। स्यानो२च्छाइ।
१ २ ५ ५ ४
वसा। औ२च्छोवा। च्छो५इ। डा॥ ९॥

७ २ ३र ४ ५ ४ ५ २ ३र ४ ५
V वयामौच्छोवाच्छाइ। इन्द्रा। त्वाऔच्छोवाच्छाइ।
४ ५ १ २ १ २ १ २ ३
यावाः। आ२३भो। प्रा२३नो। ओइनुमोवा२३र्षान्।
१ २ १ २ १ ७ ५४ २ ३
वा२३इन्द्वो। तू२३वाउ। स्या२ना२३४औच्छोवा। वा
५
२३४सो॥ १०॥ १८

हे "वृषन्" कामानां वर्षितः! "इन्द्र!" "त्वायवः"(१) त्वत्कामाः "वयं" वामिष्ठाः त्वाम् "अभि प्र नोनुमः"(२) प्रकर्षेण स्तुमः। हे "वसो" वासयितः इन्द्र! "अस्य"(३) इदम् "नः"

IV, V मारुतस्य भरद्वाजस्य इमे अद्दारसूती।

(१) -त्वां यष्टृमिच्छन्दसीति विग्रहे, क्वचि, "नक्छन्दस्यपृक्तस्य"(७.४.७५) इतीत्वाभावे, "ष्वाच्छन्दसि (३.२.१७०)"-इद्वि-उ-प्रत्ययं रूपम्।

(२)—"अभि प्रनोनुमः, अभि प्रेति द्वावपि पादपूरणौ, अत्यर्थं स्तुमः"-इति वि०।

(३) 'अस्य सुतस्य'-इति वि०।

अथ नवमी।

द्वयोस्त्रिशोकऋषिः।

२ ७ २ ३२ ३ १२ ३१ ६ ३ १२ ३२
आ घा ये अग्निमिन्धते स्तृणन्ति* बर्हिरानुषक्।
३ २ ७ २३ १२
येषामिन्द्रो युवा सखा ॥ ८ ॥ १९

अस्मदीयं स्तोत्रं "नु" क्षिप्रं(४) "विडी"(५) अवधारय ॥ ८ ॥१८

"ये" ऋषयः "आ घा"(१) आभिमुख्येन खलु "अग्निम्" "इन्धते" दीपयन्ति "येषां" च "युवा" नित्य-तरुणः "इन्द्रः" "सखा" भवति(२) ते "आनुषक्" आनुपूर्व्येण(३) "बर्हिः" "स्तृणन्ति" ॥ ८ ॥ १९

---

* "स्तिणन्ति"-इति ख०ग० पुस्तकयोः पाठः।
"स्तृणन्ति"-इति ए० पाठः।

---

१९ उत्तरार्चिकस्य ५,२,२१,१। ८

(४) -क्षिप्रमिति निरुक्तं द्वितीय पञ्चदशे प्रथमम्। 'नु इति पादपूरणः'-इति वि०।

(५) --"इद्योतस्त्रिशः (६,१,१३५)" इति दीर्घः।

(१) -'घा'-इति "निपातस्य च (६,३,१३६)"-इति दीर्घः। 'आ इत्येषमर्यादायाम् घ इति पाद पूरणः' इति वि०।

(२)---'स्तुत्य-स्तोतृ-लक्षणेन सम्बन्धेन सखिभूतः, स्तुत-स्तुत्यर्थयोः'-इति वि०।

(३) -'आनुषगिति नामानुपूर्व्यस्य'-इत्यादि निरुक्तम् ६,३,१६।

I आघाये अग्निमिन्धाताइ। स्तृणन्तिबर्हिरानुषाक्।
येषामिन्द्रोयवाइच्छा। ऊवाइ। ऊवो२३४। वा। सा५
स्वो६च्छाइ॥ ११॥

II आघायइच्छा। ग्निमाइ। धाताओ२३४वा।
ई२३४च्छा। स्तृणन्तिबर्हीरा। नूषाओ२३४वा। ई२३४च्छा।
येषाम्। आइन्द्राओ२३४वा। ई३३४च्छा। युवा। युवा२
सा२३४५खा६५६। ई२३४च्छा॥ १२॥

III औच्छोआघायाय६ण। ग्निमाइन्धाना। औच्छो३३४
वा। स्तृणन्तिवर्हीरानूषा। औच्छो२२४वा। येषामा
इन्द्रा। औच्छो२३४वा। युवाउ। सा२३४स्वा। उरुवा
६च्छाउ। वा॥ १३॥ १९

I,II,III ऐध्मवाहानि ऐध्मभारणि वा।

अथ दशमी।

३ २उ ३ २३ २३ २३१ २ ३१र २र
भिन्धि विश्वा अप द्विषः परिबाधो जहि* मृधः।
१२ ३१र २र
वसु स्पार्हन्तदा भर ॥ १० ॥ २०

५ ४ १ २ ३
भि। ध्योहाइ। वाइश्वाअपा। दाइषाओ२३४
५ १२ ३ ५ १र र २ ३ ३
वा। पाराओ२३४वा। बाधोजहाइ। मार्ड्वाओ२३४वा।
१२र १ र२३ १११
वसुस्पार्हन्तदाभरा२३४५ ॥ १४ ॥ २०

॥ इति चतुर्थ-दशति ॥

हे "इन्द्र!" "विश्वाः" सर्वाः "द्विषः" द्वेष्ट्रीः शत्रु-सेनाः "अप(१) भिन्धि" विदारय "बाधः" हिंसित्रीः "मृधः" सङ्ग्रामान्

* "जहि"-इति क-पाठः।

1 अहेः पैङ्गस्य सामाहेर्भो वा पैङ्गस्य पैल्वस्य वा।
२०. उत्तरार्चिकस्य ४,१,९,१। १०

(१) 'अपउपसर्गश्रुतेः क्रियापदमध्याहियते, अपेत्य अपनीत्य अपनीयेत्यर्थः'-इति वि०।

['स्पधः', 'मृधः'—इति सङ्ग्राम-नामसु पठितत्वात्(२)] "परि जहो"(३) हिंस्याः। ततः तासां "स्याहं" स्मृहणीयं "तत्" प्रसिद्धं "वसु" "आ भर" अस्मभ्यम् आ हर ॥ १० ॥ २०

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोग्याख्याने द्वितीयाध्यायस्य द्वितीय-खण्डः ॥ २ ॥

अथ तृतीय-खण्डे—

मंत्रं प्रथमा।

कण्वोघोरऋषिः।

३ १ २ ३ २ ३ । १ २ ३ १२ २१

दूचेव पूण्व एषां कशा हस्तेषु यद्दान्।

१२ २१ ३ १ २

नियमञ्चित्रमृञ्जते ॥ १ ॥ २१

(२)—निघण्टौ द्वितीय-सप्तदशे 'स्पधः' इति उनविंशतितम पदम, सैनपरनाम मृधइति।

(३)—द्यचोत इति (६,१,१८५। दीर्घः।

अथ द्वितीया।

द्वयोस्त्रिशोकऋषिः।

३ १ २ ३ १ २ ३ १ २ ३ १ २
इमं उ त्वा वि चक्षते सखाय इन्द्र सोमिनः।
३ १ २ ३ १ २ ३ २
पुष्टावन्तो यथा पशुम् ॥ २ ॥ २२

। २ १ र ४ ५ र १ र र २ २ २
। इहेवा२३शृणवन्नृषाम्। कण्वासस्त्वेषया१दा३दान्।
र ४ २ ३ ५ ६ १ र २ १ ७ ३
नियामञ्चाञ्चाञ्चाञ्चताइ। नियामञ्चाइ। त्रमा२ञ्चा-
५ ३ र २ ३ र ४ र ५ २ र १ र २ र
२३४नाइ। एहियाञ्चोवा। एहियौहोइ। एहि-
१ र ५
यौहो२३इ। ए२३४हो ॥ १५ ॥ २१

"एषां" मरुतां "हस्तेषु" स्थिताः "कण्वासः" स्व-स्व-वाहन-ताडन-हेतवः "यद् वदान्"(१) यद् वदन्ति ध्वनिं कुर्वन्ति, तं ध्वनिम् "इहेव" अत्रैव स्थित्वा "शृणवन्"(२) शृणोमि। स ध्वनिविशेषः "यामम्"(३) सङ्ग्रामे "चित्रं" विविधं शौर्यं

[ऐषम्।

(१) —'यत् यदा'-इति वि०। वदान्-इति लेटोरूपम्।

(२) —शृणुते इति वि०।

(३)—'यान्ति येन स यामो रथः, तम्'-इति वि०।

४ २ ४ २ ३ ४ ५ २ २ ४ ५ १ २
I इमउत्वाविचक्षते। ए३। सखायाः। इन्द्रसोमा-

२ १ २ १२ २ १ २
२३इनाः। होइहोवा। पुष्टावा२३न्नाः। होइहोवा-

२ १ ५ ४ ५
३। यथो२३४वा। पा५शोइहाइ ॥ १६ ॥ २२

"न्यृजते"(४) नितरामलङ्करोति ["ऋञ्जतिः प्रसाधन-कर्मा (६,४,२४)"-इति यास्कः(५)॥ १ ॥ २१

हे "इन्द्र!" "त्वा" त्वां "सोमिनः" अभिषुत-सोमाः "सखायः इमे उ" खल्वस्मदीया जनाः "पुष्टावन्तः"(१) सम्भृत-पाशाः "यथा पशुम्" पशुमिव "वि चक्षते" वि पश्यन्ति(२)॥ २ ॥ २२

I पौषम्।

(४) 'नि ऋञ्जते, नियमेन गमयति' इति वि०।

(५) -यदा एषां हस्तेषु कशाः वदन्ति, यदा च एषां चित्रं रथं सारथयो नियमेन गमयन्ति, तदा मन्त्रः इहैव स्थित्वा श्रूयते इति विवरणं निष्प्रयोजनं।

(१) मतौ दीर्घः। 'पोषणं पुष्टम्, तद्वन्तः पुष्टावन्तः, पौषणवन्त इत्यर्थः।

(२) -एतदुक्तम् भवति घासहारिणो घासेन यवौदनेन पशोर्पुष्णाय परमया प्रीत्या युक्तात्मनैव पशुं पश्यन्ति, तद्वदस्मदीया ऋत्विजः सोमवन्तः तेनैव सोमेन यवौदनेन तर्पणार्थं त्वां पश्यन्तीत्यर्थः'-इति वि०।

अथ तृतीया।

वत्सः काण्व ऋषिः।

१२ ३२३२३ १२ ३११
समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः।
३ १२३१२
समुद्रायेव सिन्धवः॥ ३॥ २३

१ र १र र र
। ममस्यामा २। न्यावेविशाः। विश्वानामा २। ना-
१ १ १ १
कृष्टयाः। समुद्राये २। वसिन्धा२३वा३४३ः। ओ२३-
४५६ । डा॥ १७॥ २३

"विशः" निविशन्त्यः(१) "विश्वाः" सर्वाः "कृष्टयः" प्रजाः "अस्य" इन्द्रस्य "मन्यवे" क्रोधाय [यद्वा मन्युर्मनन-साधनं स्तोत्रं तदर्थम्] "सं नमन्त" सम्यक् स्तुत एव नमन्ति प्रह्वीभवन्ति। तत्र दृष्टान्तः—"समुद्राय इव" यथा समुद्रम् अब्धिम् प्रति "सिन्धवः" स्यन्दन-शीला नद्यः स्वयमेव नमन्ति तद्वत्॥ ३॥२३

I मरुतां संवेशीयम्, सिन्धुषाम वा।

(१) 'यद्यपि विशदृति मनुष्य-नाम (नि०) तथापि कृष्टय इत्यनेन पौनरुक्त्य-प्रसङ्गात् क्रिया-निमित्तं द्रष्टव्यम्। विष्लृ व्याप्तौ (चु० उ०) इत्यस्येदं रूपम्, स्तुति-भिर्हविर्भिश्च व्याप्नुवन्तः-इति वि०।

अथ चतुर्थी।

कुसीदी काण्व ऋषिः।

३ २ ३ १र २र ३ १र २र ३ २
देवानामिद्वो महत्तदा वृणीमहे वयम्।
१ २ ३ १ २ ३ १ २
वृष्णामस्मभ्यमूतये ॥ ४ ॥ २४

५ र र र ३ २ ३ ५ १ २ ३ ५
। देवा। नाम्। इदाओ२३४वा। ओवाओ२३४वा।
३ ५ २ १र ५ ३ ५ ३
मा२३४हात्। तदावृणाइ। माहाओ२३४वा। वा२-
५ २ १र २ ५ ५
३४याम्। वृष्णामस्मा। भ्यामाओ२३४वा। ता२३-
५
४ये ॥ १८ ॥

हे देवाः! "देवानां" स्व-तेजसा सर्व्वतो दीप्यमानानाम् "इत्" एवार्थे(१) युष्माकमेव "महत्" व्याप्तं [महनीयं वा] "अवः" पालनं यद् विद्यते "तत्" "वृणां" कामानां वर्षितॄणां युष्माकं

I,II ह्याविष्मते हे।

(१) इदिति पादपूरणः'-इति वि०।

५र र र र र २।र २ १
II ह्वाउदेवानामिदवोमहद्वाउ। तदावृणाइइ। मा-
२ ३ ५ २ १ १ २
ह्वेवा२३४याम्। ए२ह्वो१आ२३इह्वो। वृष्णामा३स्मा।
१ १ ३ ५र र २।१ ३।१।१।१
भ्यमू२३। ता२या२३४औह्वोवा। ह्विष्मते२३४५॥ १८॥
५रर र र र ४ ५ २।र
III देवानामिदवोह्वाउमाहात्। तदावृणाइ। महा
२ १ २ १
इवा२३याम्। वृष्णा२ए्ह्वो१इ। आ२३स्मा। भ्यमू-
१ ३ ५र र २ १ ३।१।१।१
२३। ता२या२३४औह्वोवा। ह्विष्कृते२३४५॥ २०॥
५रर र र ४ ५ १ र २र १
IV देवानामिदवोमाहात्। तादावृणो। महाइवा२३
२ १ र २ २ १ ५ ५
याम्। वृष्णामा२३स्मा३। भ्यमू२३४वा। ताप्यो९
५
ह्वाइ॥ २१॥ २४

स्वभूतं तद्वृत्तं यजमानाः "वयम्" "आ वृणीमहे" ममत्वात् सम्भजामहे(१)। किमर्थम्? "अस्मभ्यम्" "ऊतये" पूर्वमस्मभ्य-मस्मदर्थमिति साधारणेनोक्तं तद् विशिनष्टि-ऊतयइति, अस्माकं पालनायेति॥ ४॥ २४

III, IV ह्वाविष्कृते इ।

(१) 'आभिमुख्येन प्रार्थयामः'-इति वि०।

अथ पञ्चमी।

मेधातिथिः ऋषिः।

३ २ ३ १२ ३ १ २
सोमानाꣳ स्वरणं कृणुहि ब्रह्मणस्पते।
३ १२३ १ २ ३ २
कक्षीवन्तं य औशिजः॥ ५ ॥२५

५र २ ४र ५ २ १२ १ २ १ २
। सोमाञ्नाꣳस्वरणाम्। कृणूहि ब्र। ह्मणस्पतायेऽ
२ ३र २ १ २ ३र
३। ओ३४। ह्वाहोइ। कक्षाइवा२३न्ताम्। यओ-
२ ३र १ ५ ४ ५
होइ। औहो२३४वा। शापूइजोइह्वाइ॥ २२ ॥ २५

हे "ब्रह्मणस्पते!" एतन्नामक देव!(१) त्वं "सोमानाम्" अभिषवस्य कर्त्तारं माम् अनुष्ठातारं "स्वरणं" देवेषु प्रकाशन-

२५ उत्तरार्चिकस्य ६,३,१०,२। ११
। काक्षीवतम्।

(१) "ब्रह्मणस्पतिरिति निघण्टौ देवताकाण्डे परिगणितो नोपलभ्यते, अग्निस्तु तत्र अन्तरीक्षस्थान देवतासु वायुादिषु गृहस्पतिरिति। तस्यैव निर्वचनावसरे 'ब्रह्मणस्पतिः' 'क्षेत्रस्यपतिः' 'वास्तोष्पतिः' 'वाचस्पतिः' 'वनस्पतिः' एषामपि पञ्चानां मीदाहरण निर्वचनं प्रदर्शितम्——'ब्रह्मणस्पतिर्ब्रह्मणः पाता प्राजयितर्वा' इत्यादि नै० १०,१,१२। ब्रह्मणः मन्त्रस्येति तद्भाष्यकारः। 'षष्ठ्याः पति-पुत्र पार-पद पत्य स्योषेषु (८,३,५३)"-इति सत्वम्।

वन्तम्(२) "क्रुणुहि"(३) कुरु। तत्र दृष्टान्तः—"कक्षीवन्तम्" एतन्नामकमृषिम् [इव-शब्दोऽत्राध्याहार्यः] कक्षीवान् यथा देवेषु प्रसिद्धः तद्वदित्यर्थः "यः" कक्षीवान् "औशिजः" उशिजः पुत्रः तमिवेति पूर्वत्र योजना॥ कक्षीवतोऽनुष्ठातृषु मुनिषु प्रसिद्धिस्तैत्तिरीयैराम्नायते—"एतं वै पर आट्णारः कक्षीवानौशिजो वीतहव्यः आयस्यस्सदस्युः पौरुकुत्स्यः प्रजाकामा अचिन्वत" इति। ऋगन्तरेऽप्यृषित्व कथनेन अनुष्ठातृत्व-प्रसिद्धिः सूच्यते—"अहं कक्षीवानृषिरस्मि विप्रः" इति। तस्मादस्यानुष्ठातारं प्रति दृष्टान्तत्वं युक्तम्॥ मन्त्रोऽप्येवं यास्केनैव व्याख्यातः—"सोमानां सोतारं प्रकाशनवन्तं कुरु ब्रह्मणस्पते! कक्षीवन्तमिव य औशिजः कक्षीवान् कक्षावा*नौशिजः उशिजः पुत्रः, उशिक् वष्टेः कान्तिकर्मणोऽपि त्वयं मनुष्यकक्ष† एवाभिप्रेतः स्यात्, तं सोमानं सोतारं मां प्रकाशनवन्तं कुरु ब्रह्मणस्पते! (६,३,१२)"-इति॥ अस्मिन् मन्त्रे सोममिति पदेन ब्रह्मणइति पदेन च सूचितं तात्पर्यम् तैत्तिरीया आमनन्ति—"सोमं स्वरणमित्याह—सोमपीथमेवावरुन्धे, क्रुणुहि ब्रह्मणस्पत इत्याह-ब्रह्मवर्चसमेवावरुन्धे"-इति॥ ५॥ २५

*,†, निरुक्त कार-पाठस्तु—"कक्ष्यावान्", "कक्ष्यएव"—इति स-यकारः।

(२)—'स्तृ शब्दोपतापयोः (भ्वा०प०) इत्यतस्तैतद्रूपम्, शब्दयितारं स्तुतीनाम् उच्चारयितारं स्तोतारं यद्वारब्धेत्यर्थः'-इति वि०।

(३) -विकरण-व्यत्ययेन धातूनाममेकार्थत्वेन वा रूपम्।

अथ षष्ठी।

श्रुतकक्षऋषिः।

१२ ३ १२ २१ २
बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः।
३ १२ ३२ ३ १२
घृणोतु शक्र आशिषम्॥ ६॥२६

५४ १ १ १२३ १ ७
। बोधन्मनाः। इदा२स्तूना२ः। वृत्रहाभू। रिया-
२ ५ ३ २ ५ ७ २१
२सू३३४जोः। घृणा३४औहो। तुशक्रजा। शि।
४ ५
षाम्। औ२३होवा। होघृइ। डा॥ २३॥२६

अयं परोक्षकृतः(१)। "वृत्रहा" वृत्रस्य हन्ता "भूर्यासुतिः"(२) बहुषु देशेषु इन्द्रार्थं सोमा आसूयन्ते अभिषूयन्त इति तादृशः [यद्वा, बहूनि सोमादि-हवींषि इन्द्रार्थमासूयन्ते हूयन्तइति तादृशः]। "बोधन्मनाः" [बुध अवगमने (भ्वा०प०), औणादिको ऽत् प्रत्ययः] यस्य मनः स्तोतृणामभिमतं बुध्यते जानातीति

। औषसम्।

(१)—उक्तं पुरस्तात्, (१२६ पृ०) 'विविधा ऋचो भवन्ति परोक्षकृताः १, प्रत्यक्षकृताः२, आध्यात्मिकयः ३, इत्यादि। तदिह स्मर्तव्यम्।

२)—भूरीति बहु-नामधेयम् ३,१,५। असुतिरिति गृह्नो रूप-वचनः 'ता सम्राजा घृतासुती' इति। तथाच मन्त्रे आसुतिशब्दस्य स भूयासुतिः बहुरसदृश्यः इति वि०।

अथ सप्तमी।

श्यावाश्वऋषिः।

३ १ २ ३ १ २ ३ १ २
अद्य नो देव सवितः प्रजावत् सावीः सौभगम्।
१ २ ३ १ २
परा दुष्वप्नय्ँ सुव॥ ७॥ २७

तथोक्तः "इदु"(३) अवधारणे "नः" अस्माकं बोधन्मना एव "अस्तु" सर्वदास्मदभीप्सितानि जानात्वेवेत्यर्थः [यदा एतादृश इन्द्रः नोऽस्माकं सम्बन्धि यज्ञे भवत्विति]। किं ततः? "शक्रः" सङ्ग्रामे शत्रु-हनन-समर्थ इन्द्रः "आशिषम्" अस्मदीयां स्तुतिम् [आशासनं वा] "शृणोतु"(४)॥

'बोधन्मना' 'बोधिन्मना'-इति पाठौ॥ ६॥ २६

हे "सवितः(१) देव।" "नः" अस्मभ्यम् "अद्य" अस्मिन् यागदिने "प्रजावत्" पुत्रादुपेतं "सौभगं" धनं(२) "सावीः"

---

(३)-'इदिति पाद पूरणः'-इति वि०।

(४)-'एतदुक्तम् भवति- यदहं प्रार्थयामि, तच्छृणोतु शक्रः, श्रुत्वा च बुद्ध्यतु, बुद्ध्वा च सम्पादयतु' इति वि०।

(१) 'सविता आदित्यः तस्य सम्बन्धि धनम् हे सवितः'-इति वि०। "सविता, सर्वस्य प्रसविता"-इत्यादि निरुक्तम् १०,३१,१। "आदित्योऽपि सवितोच्यते"-इत्यादि च तत्रैव तदुत्तरखण्डे।

(२)-भगमिति धननाम, शोभनं भगं सुभगम्, सुभगमेव सौभगम् स्वार्थिक-सहितः शोभनं धनमित्यर्थः।

५ ४ ५र र ४र ५र ४ २ १
I अद्यनोदेवसवितः। औह्वोवा। इह्यधाइ।

र २ र १र र २ १
प्रजावा२३त्मा। वोःसौभगाम्। पराद्दू२३ष्वा३। ह्वो-

२ २ १ १२ १ १ १ १ १
वा३ह्वा। प्रिय॰सू२३४वा६५६। दत्ता३या२३४५॥२४॥

३ २ र र ५ र ४ ५ २ र १ २र
II अद्या३४नोदेवमा। विताः। प्रजावत्मा। वोः

१र २ ४५ २ १ २ १
सौभगाम्। पारा३दूष्वा। प्रिय॰सुवोवा३। ओ२।

१ ५र र २ १ १ र १ २ ३ १ १ १ १
वा२३४। औह्वोवा। अस्मभ्यङ्गातुवित्तमा२३४५म॥२५॥२७

प्रेरय(३)। "दुःष्वप्नम्"(४) दुःस्वप्नं दुःस्वप्नवद् दुःखकरं दारिद्र्यं "परासुव"(५) दूरे प्रेरय॥ ७॥ २७

I भरद्वाजस्य मौक्षम्, दक्षणिधनं वा।

II भरद्वाजस्य मौक्षम्।

(३)—'सावीः अभयतुजानीहि' इति वि०।

(४)—अनिष्टस्य कस्यचित् भक्षकः स्वप्नः, दुःस्वपूः, तस्मिन् भव दुःस्वप्नम्। "पूर्व-पदात् (८,३,१०६)" इति षत्वम्।

(५)—'षुञ्वेति षु प्रेरणे (भ्वा०प०) इत्यस्मादेतद् रूपम् इति वि०।

अथ अष्टमी।

प्रागाथः काण्व ऋषिः।

२ १ ६३१र २र ३२ ३ १२
क्वाऽस्य वृषभो युवा तुविग्रीवो अनानतः।
३१र २र
ब्रह्मा कस्तꣳ सपर्यति ॥ ८ ॥ २८

१ र ४ २ १ १र
। क्व२३४वस्यवा५वृषभोयुवा। तुविग्रीवो२। अना-
र २ २
नताः। ब्रह्माका२३स्ताम्। ऐ२हो१आ२३इहो। स-
१ २ १
पर्या२३ताइ३४३इ। ओ२३४५इ। डा ॥ २६ ॥

४ ५ ४ ५ २ १ ७ ६ २ ३र २
॥ कुवाकुवा। स्यवृषाइभोयुवाइ। ओ३४। हाहो
र र १ ७ ६ २ ३र २
इ। तुविग्रीवोआइनानताइः। ओ३४। होहोइ।

"स्यः" सः "वृषभः" वर्षिता "युवा" नित्य-तरुणः "तुविग्रीवः" प्रहृत-ग्रीवः(१) "अनानतः" कदाचिदप्यनवनतः इन्द्रः "क्व"

(१)—'तुविग्रीवः, पृथुग्रीवः बहुग्रीवइत्यर्थः। कथमिन्द्रोबहुग्रीवः? उच्यते-परमात्मस्वरूपत्वात्। सर्वतः पाणिपादान्तः सर्वतोऽक्षिशिरोमुखः, सर्वतः श्रुतिमां लोके सर्वमावृत्य तिष्ठति'-इति वि०। तुवि-इति बहु-पर्यायः नि० ३,१,३।

अथ नवमी।

वत्सऋषिः।

३ १ २ ३ १ २३१ २ ३१२
उप क्षरे गिरीणꣳ सङ्गमे च नदीनाम्।

१ १ ३ ५ र र २ ३ १ १ १ १
ब्रह्मा२३। का२स्ता२३४ओ३हो३वा। सपर्य्यती२३४५ ॥२७॥

५ र र र र र र ४ ५ र र
।।। ए३हो३यै३हो। क२स्यवृषभोयुवा। ए३हो३यै३हो। तु-

र र र ४ ५ र र र र र ४
विग्रीवोअनानताः। ए३हो३यै३हो। ब्रह्माकस्तꣳसमर्य्य-

५ र र र र र १ ३ २ ५ र र
ती। ए३हि३यै३हो। आ२इ। हि३या३४ओ३हो३वा।

३ ५
आ२३४इ३हो ॥ २८ ॥ २८

कुत्र वर्त्तते ?-इति को जानातीत्यर्थः। "कः" "ब्रह्मा" स्तोता "तम्" इन्द्रं "सपर्य्यति"(२) पूजयति ?(३) ॥ ८ ॥ २८

।,।।,।।। भारद्वाजानि आर्षभाणि वा सैन्धुचितानि वा।

(२)—निघण्टौ परिचरण-कर्मसु पठितम् ३,५।

(३) अस्मादचि ख्यङभवति "सुपस्थालम्" (६,१,१३१)" इति हलपरकस्य निमित्तीकृत्य लोपः। तुविग्रीवो अनानत इति ऋग्यपरं (६,१,११५)इति प्रकृतिभावः। कइति "अतृदादिभ्यः प्रथमादिभिर्व्यजितयोः (८,३,१००)' इति सुनिरनुदात्तम्।

१२ १२र
धिया विप्रो अजायत ॥ ९ ॥ २९

१ २ १ १ २र १
I उपङ्करा३इ। गिरा२इणाम्। सङ्गमेचा। न
१ २१ २१
दा२इनाम्। धियाविप्रो। अजायता। अयाम्।
२ २ ५
अया३१उ। वा२३। ऊ३४या ॥ २९ ॥

२१२ ३ ५ २१ २ ३२ २२३
II इदामी२३४दाम्। इदामिदकम्। इदामी२
५ २ र १ ९ २१२ ५
४दाम्। उपक्षरेगो३राइणाम्। इदामी२३४दाम्।
२१२३२ ३९३ ५ २ र १
इदामिदकम्। इदामी२३४दाम्। सङ्गमेचना३दाइ
२ २१३ ५ २१२३२ २१३
नाम्। इदामी२३४दाम्। इदामिदकम्। इदामी२३-
५ २ र र १ २ २१
४दाम्। धियाविप्रोआ३जायाता। इदामा५इदा६५
१र २ १र
६म्। गोष्पदे पृट् ॥ ३० ॥ २९

"गिरीणां" पर्व्वतानाम्(१) "उपक्षरे" उपक्षर्त्तव्ये प्रान्ते

I, II ग्राम्य सामनी।

(१)—"गिरीणाम् मेघानाम्"-इति वि०। गिरिरिति मेघ-नामसु दशसम् नि०१,१०।

अथ दशमी।

दूरिमिठऋषिः*।

२३ १ २ ३१२ २२ ३ १ २ ३ २
प्र सम्म्राजञ्चर्षणीनामिद्र꣡ꣳ स्तोता नव्यं गीर्भिः।

१ २ ३ २ ३ १ २
नरं नृषाचं मꣳहिष्ठम्॥ १०॥ ३०

"नदीनां" सरितां "सङ्गमे" सङ्गमने च ईदृग्विधे देशे क्रियमाणया "धिया" स्तुत्या(२) "विप्रः" मेधावी(३) इन्द्रः "अजायत"(४) प्रादुर्भवति, स्तुतिं श्रोतुमिति शेषः(५) [गिरीणामित्यत्र 'नामन्यतरस्याम्'(६,१.१७७)-इति नाम उदात्तत्वम्(५)॥

'सङ्गमे'-'सङ्गथे' च इति पाठौ॥ ९॥ २९

"चर्षणीनां" मनुष्याणां मध्ये(१) "सम्राजं" सम्यग् राजमा-

(२)- 'धिया प्रज्ञया'-इति वि०। धीरिति प्रज्ञा नामसु सप्तमम् पदम् नि० ३.९।

(३)- विप्रइति मेधावि नामसु प्रथमम् नि० १.१५।

(४ -कालसामान्ये प्रत्ययः (१.४.३)। मन्त्रे विप्रोऽजायत इति प्रकृतिभावोऽपरे इति ६,१,१२५)।

(५)- 'एतदुक्तम् भवति - यत्र प्रदेशे बहवो मेधाः, यत्र वाऽदकं, तत्र-तेषां स्तोदकस्य पानार्थम्' इत्यादि वि०।

(१)-'चर्षणयः'-इति मनुष्य-नामसु नवमम् नि०२,३।

I प्रसम्राजाम्। चार्षा२णाइना२म्। आइन्द्रा२ए-
स्तोता२३। नव्या२ङ्गा२३४इर्भीः। नारा२माषा२३।
इम्मोवा। चाषूइष्ठो६चाइ॥ ३१॥

II प्रसम्राजोचाइ। चार्षाणी३नाम्। आइन्द्राएस्तो
३ताइ। नव्या२ङ्गा२३४इर्भीः। नारमोइ। नृषाचमो३इ।
मएचाषूइष्ठाम्। चोषूइ। डा॥ ३२॥

नम्(१) [यद्वा मनुष्याणामधीश्वरम्(२)] "इन्द्रम्" हे स्तोतारः! "प्र-स्तोत"(३)प्रकर्षेण स्तुत। कीदृशम्?"गीर्भिः" स्तुतिभिः"नव्यं"(४)

I,II वार्षन्धरे।

(१)—'राजते' इति ज्वलति-कर्मसु नि० १,१५।

(२)—'राजति'-इति ऐश्वर्य-कर्मसु चतुर्थम् नि० ३,२२।

(३)—गुणभावोवाऽलुकात्। ह्रस्वे दीर्घाभ्यो द्व्याचोः स्त्रियाम् (१,३,१२५,) इति।

(४)—'नव्यं नवतरम्'-इति वि०। दृश्यं नये नौतेरूपम्। नौतीति अर्चति-कर्मसु पठितम् नि० ३,१४।

२ ५ ३२ ४ ५ ३ २ ५ २ १ २
III प्रसम्राजञ्च । षणा३२३४इनाम् । इन्द्राꣳस्तोꣳ-

२ १ ३ ५ ४ ५ ४२ ५ ४
ताꣳ । नव्या२ङ्गा२३४इर्भीः । नरंनृषाहम्मा५ꣳहि ।

५ ३ १ १ १ १
आ६ हाउवा । ष्ठा२३४५म् ॥ ३३ ॥

४ ५ ४२ ५ २ ४२ ५ २ २ ४ ५ ५
IV प्रसम्राजञ्चर्षणीनामिन्द्रꣳस्तोनान । व्यङ्गा६इर्भीः ।

१ २ २ ३ ४ ४ ५ ४
इन्द्रꣳस्तोनानव्यङ्गा२३इर्भी३४ः । नरन्नृषाहम् । माꣳ५-

४ २ २ ३ १ ३ ५४ २ ३
हिष्ठाम् । सहमैं३हो२ । या२३४औहोवा । मꣳ-

१ १ १ १ १
हीꣳष्ठा२३४५म् ॥ ३४ ॥ ३०*

॥ इति पञ्चम-दशतिः ॥ **

III,IV कुत्सस्य प्रस्तोकौ ।

** छन्दआर्चिके द्वितीयस्यार्द्धः प्रपाठकः ।

* इति ग्रामे गेय-गाने चतुर्थस्यार्द्धः प्रपाठकः ।

स्तुत्यं "नरं" नेतारं(६) "वृषाहम्"(७) वृणां शत्रु-मनुष्याणाम् अभिभवितारम् "मंहिष्ठम्"(८) दातृतमम् ॥१०॥३०

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्य तृतीयःखण्डः ॥ २ ॥

अथ-चतुर्थ खण्डे —

तृचं प्रथमा।

श्रुतकक्षऋषिः।

१ २ ३ १ २ ३ १ २ ३ १ २

अपादु शिप्र्यन्धसःसुदक्षस्य प्र होषिणः।

२ ३ २ ३ १ २

इन्द्रोरिन्द्रो यवाशिरः ॥ १ ॥ ३१

"शिप्री"(१) ["शिप्रे हनू नासिके वा(२)"] शोभन-हनुः

---

(६)—'नरं नराकारम्'-इति वि०।

(७)—"छन्दसि सहः (३,२,६३)"-इति णौ "पूर्वपदात् (८,३,१०६)"-इति षत्वे रूपमिदम्।

(८)—मंहत-इति दान कर्मसु अन्यम्। तस्य तृचि "तुरुछन्दसि (५,३,५६) इतीष्ठनि रूपम्।

(१)—प्रशस्ते शिप्रे यस्य—सुशिप्रः।

(२)—इत्येतत् षष्ठाध्यायीय-यास्क-वचनम् (६,४,१६)। शप्ट गतौ. स्फायि-तञ्चि यञ्चि

५ २ २१ २ २
। अपादुशो। प्रियन्धसाः। सुदत्त्रा२३स्या। प्रहो-
१ २ २ १२ २ २ १
षिणः। इन्दोरा२३इन्द्राः। यवाशा२३इराः। ऐ। हि
२ २ ५२ २ १ २ १ १ १ १
या२इ। हिया३४औहोवा। ए३। ऊपा३१२३४५॥ १ ॥

५ २ २ ४ ५ २ १ २ २
।। अपादू३शिप्रियन्धसाः। सुदत्त्रस्यप्रहोषिणाः। इन्दौ
१ २ ५ २ ४ ५
२। हौ२। ऊवा२३इ। आ३४इन्द्रो। यवाशाइराः।
२२ १ २ ५२ २ २ १ १
ऐ। हा२ए२३। हिया३४औहोवा। ए३। ऊपा३१-
१ १ १ १
२३४५॥ २ ॥३१

[यद्वा शिप्राः शोषिण्याः(३), सशिरस्त्राणः] सः "इन्द्रः" एव "प्रहोषिणः"(४) प्रकर्षेण देवान् हविर्भिर्जुहतः "सदत्त्रस्य एतन्नामकस्य ऋषेः(५) सम्बन्धि "यवाशिरः" [शीङ् पाके (क्रया० उ०)आङ्-पूर्व-

I,II औपगवे, सौश्रवसे वा अश्वमेधे वा मथाये वा सौमित्रे वा शैखण्डिने वा।

शकि-चयि-स्यपि तृपीति-रक्, बाऽलकात् भृ ज्ञ्ट्स्य ज्ञि भावः, अन्नं गन्तव्यं प्रति वा मृन्नं भवतः'-इति देवराजयज्वा।

(३) इह मांसं यत्न-लभ्यम् भवितु मर्हति।

(४)- 'जुहोतेर्दानार्थस्य द रूपम्'-इति वि०।

(५)—'मुष्टु उत्साहितस्य त्यर्थः'-इति वि०।

अथ द्वितीया।

मेधातिथिरृषिः।

३ १ २ ३ १२ २२ ३ १ १
इमा उ त्वा पुरूवसो* भि प्र नोनवुर्गिरः।
१ २ ३ १३ ३ १ २
गावो वत्सन्न धेनवः॥ २॥ ३२

कस्य "अपस्पृधेथामानृचुः"-इत्यादिना(६) धातोः शिरादेशः)" यवैष्टामिश्रितं(७) यवैः सह पक्वम् "इन्दोः" सर्वत्र पात्रेषु क्षरन्तम् "अन्धसः"(८) सोमलक्षणमन्नम् "अपात्" अपिवत् "यद्वा-सोमस्य भागम् इन्द्रार्थम् परिकल्पितं सोमांशम् अपिवत्। "उ"-इत्यवधारणे॥ १॥ ३१

हे "पुरूवसो!" बहुधन! "यद्वा वसवो यज्ञाः(१) बहुयज्ञ!

* "पुरूवसो"-इति ख० ग० ए० पुस्तकानां पाठः।
३२ उत्तरार्चिकस्य ७. ३, १८, १।

(६)- "अपस्पृधेथामानृचुरानृक्षाय्यायैतित्याजग्यात यितमाशिराशीर्तः"(३,१.३६।

(७)—'यव-शब्दे नाच यव-विकाराः सक्तव उच्यन्ते, तैर्मिश्रेण यस्य स यवाशिरः। प्रथमा च षष्ठ्यर्थे द्रष्टव्या। यवमिश्रितस्येत्यर्थः। मन्थी च नाम यवः स सक्तुभिर्दह्यते "मन्थिम सक्तुभिरिति वचनान्तरमवेक्ष्यैतदुच्यते यवाशिरइति'-इति वि०।

(८) 'सोमस्य'-इति वि०।

(१)—इह मानं यत्न-लभ्यम्।

अथ तृतीया।

गोतमऋषिः*।

२उ ३ १ २ ३ २ ३ १ २ क २र
अत्रा ह गोरमन्वत नाम त्वष्टुरपीच्यम्।
३ २ ३ १ २ ३ २
इत्था चन्द्रमसो गृहे ॥ ३ ॥३३

५ र १ १ १ र १
I इमाउत्वा। पुरू२वासा२उ। अभिप्रनोनवू२र्गा-
३र २ २र र १ १ ४
इरा२ः। औच्चो१इ। गावोवात्सा२३म्। ना२३धे३।
२ ५
ना३४५वोई३च्चाइ ॥ ३ ॥ ३२

इन्द्र! "त्वा" त्वाम् "अभि" "इमाः" अस्मदीयाः "गिरः" स्तुतयः "प्रनोनवुः" प्रकर्षेण पुनः पुनः स्तुवन्ति प्राप्नुवन्तीत्यर्थः। नौतिरत्र व्याप्तिकर्मा"। तत्र दृष्टान्तः—"गावो वत्सं न धेनवः" यथा धेनवः गावः गृहे वर्त्तमानं वत्सं शीघ्रमभिगच्छन्ति तद्वत। यद्वा, अस्मदीया वाचः त्वाम् अभिनोनवुः शब्दयन्ति स्तुवन्ति, यथा गावो वत्समभिलक्ष्य हम्भा-रवं कुर्वन्ति तद्वत् ॥ २ ॥ ३३

---

*—'गोतमस्यार्षम्' इति वि०।

I त्वाष्ट्री साम।

४ ५ २र १र १ १ र
I आत्वा। हागोरमन्वताउवा२३। होवा२३होइ। ना-
र १ १ १र र
मत्वष्टुरपोचियाउवा२३। होवा२३होइ। इत्याचन्द्रमसो-
१ १ ३ ५र र ३
गृहाउवा२३। होवा२३होर। वा२३४औहोवा। ऊर-
५
३४पा ॥ ४ ॥

४ ५ २र १र १
II हावात्वा। हागोरमन्वताउवा२३। होइया२३।
१ र र १
हा२ऊवाइ। नामत्वष्टुरपोचियामियाउवा२३होवा२३-
१ ३१र र १
हा२ईया। इत्याचंन्द्रमसोगृहाउवा२३। होइया२३।
१ ३ ५र र ३ ५
हा२ऊवा२। या२३४औहोवा। ऊ२३४पा ॥५॥३३

"अत्वा(२)ह" अस्मिन्नेव "गोः" गन्तुः(३) "चन्द्रमसः" "गृहे" मण्डले "त्वष्टुः"(४) एतन्नामकस्य आदित्यस्य सम्बन्धि "अपीच्यं"

I,II त्वष्टुरातिथ्ये।

(२)—"निपातस्य च (६.३.१३६)"-इति दीर्घः।

(३) -'गो शब्देनेह सुषुम्ना नाम आदित्य-रश्मिः, चन्द्रमसं प्रति गतः, अन्यत्रा चन्द्रमण्डलस्य, रश्मिं प्रति गतः, ततः परावृत्य पृथिव्यां ओषधीरूपेण दीव्यते सोऽत्र गो-शब्देनोच्यते-इति वि०।

(४) -त्वष्टारति पृथि-स्थान-देवताम्, अन्तरिक्ष-स्थान-देवताम्, द्यु-स्थान-देवतामु च नैघण्टुकाः समामनन्ति। नैरुक्ताश्च त्रिषूपलक्षयन्ते. तद्यथा——"त्वष्टा तूर्णमश्नुत इति

रात्रौ अन्तर्हितं स्वकीयं यत् "नाम"(५) तदादित्यरश्मयः "इत्था इत्थम् अनेन प्रकारेण "अमन्वत" अजानन्(७)। उदक्रमये स्वच्छे चन्द्रविम्बे सूर्यकिरणाः प्रतिफलन्ति, तच्च प्रतिफलिताः किरणाः सूर्ये यादृशीं सञ्ज्ञां लभन्ते, तादृशीं चन्द्रेऽपि वर्त्तमानां लभन्त इत्यर्थः॥ एतदुक्तम् भवति—यद्रात्रावन्तर्हितं सौरं तेजः तच्चन्द्रमण्डलं प्रविश्याथ नेशं तमो निवार्य्य सर्वं प्रकाशयति; ईदृग्भूततेजसा युक्तः सूर्य इन्द्रएव, द्वादशस्वादित्येषु इन्द्रस्यापि परिगणितत्वात्। अतोऽहोरात्रयोः प्रकाशक इन्द्रएवेति इन्द्रस्तुतेः प्रतीयमानत्वात् इन्द्रो देवतेत्युपपन्नं भवति, ईदृग्भूतस्य तेजसः तदाश्रयत्वेन चन्द्रमसः प्राधान्य विवक्षया चान्द्रमस्यामिष्टौ विनियोगोऽप्युपपद्यते॥ अत्र निरुक्तम् "अथाप्यस्यैकोरश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपलक्षयत्यादित्यतोऽस्य दीप्तिर्भवतीति मुख्यः सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमोभवति सोऽपि गौरुच्यते अचाकशीदमन्वतेति" (२,३,९); अत्र ह गोः सममंमतादित्यरश्मयः स्म नासार्पाच्य-

---

नैरुक्ताः, लिपेर्वा दीप्ति कर्मणः, लक्षतेर्वा स्यात् करोति कर्मणः ... अग्निरिति शाकपूणिः"-इत्यादि प्रथमम् (नै० ८,३,१० ... ११)। "लक्षा व्याख्यातमस्येषा भवति" इत्यादि द्वितीयम् (नै०१०,३,९ ... १०)। "लक्षा ... लक्षणा दृष्टिर्लक्षयन्ति करोतीमानि च सर्वाणि भूतान्यभि समागच्छन्ति यमस्य माता पर्युह्यमाना भवतो जाया विवस्वतो ननाश रोदसीरादित्यस्यादित्योऽस्येक्षतेर्वा दर्शनेन" इति चान्त्यम् (नै० १२,२,११)। इह चान्त्य-व्याख्यान एव लक्षा गृह्यते

(५)—"नाम नमनं प्रह्वीभावम" इति वि०।

(६)—"प्रत्यपि विप्रेमात्थाल् लुङ्सि (४,३,१११) इति इदमो विप्रलम्भादिवार्थे विहितोऽपि थाल् व्ययथेन प्रकृतभूतादिदं-शब्दादपि।

(७)—"अमन्वत, अनुमन्यन्ते"-इति वि०।

अथ चतुर्थी।

भरद्वाजऋषिः।

२उ ३ १ २ ३ १ २ ३ २ ३१र २र
यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः।
१ २ ३ १ २ ३ १ २
तत्र पूषा भुवत्सचा ॥ ४ ॥ ३४

। ५ र १ १ २ ४ ५
I यदिन्द्रोया। नायाऽऽत्। उमोऽम्। उवा।
१ र र १ २ ४ ५ १ ७
रितोमहीरापाऽऽः। उमोऽम्। ओवा। वृषावृषा२।
३ २ ५ र र १ २ र १ र २ १ ३ १ १ १ १
तमाऽ४औहोवा। तत्रपूषामुवत्सचाऽ३४५ ॥ ६ ॥

५ र ५ १ र १ र
II यदिन्द्रोअनयद्रिताऽ६ए। महीरापाः। महीं-

मर्पचितमपगतमपहितमन्तर्हितं वा(८) (४,४,२५)"-इति॥३॥ ३३

"यद्" यदि(१) "इन्द्रः" "वृषन्तमः" अतिशयेन वर्षिता इन्द्रः "रितः" गच्छतीः(२) "महीः" महतीः "अपः" वृष्ट्युदकानि "अन-

---

I,II पौषे।

(८)—निरुक्तपाठात्,—'चमुत्र चन्द्रमसो गृहे'-इत्यत्रेनाधिको लक्ष्यते।

(१)—'यत्, भवत्यानम्'-इति वि०।

(२)—'रितः, गतः प्राप्तः सन्'-इति वि०।

अथ पञ्चमी।

विन्दुः पूतदक्षो* वा ऋषिः।

१ २ ३ १ २ ३ २ २ २ ३ १ २
गौर्ङ्यति मरुता॰ अवस्युर्माता मघोनाम्।

३ २ ३ ३ १ २
युक्ता वक्षो रथानाम् ॥ ५ ॥ ३५

१ २ ३ ५ १ २ १ ३
रापा२३:। वार्षं ता२३४मा:। तत्रापूषा३। पूरषा२

५ ४ ३ २ १ ३ १ १ १ १
३४औक्षोवा। भुवत्सचा२३४५ ॥ ७ ॥ ३४

५ ४ ३ १ ३ २
। गौर्ङ्याइ६ए। तिमरुता३म्। अवास्युर्मा३। ता

यत्"(३) इमं लोकं प्रापयति। "तत्र" तदानीं(४) "पूषा" पोषको देवः(५) "सचा भुवत्"(६) इन्द्रस्य सहाया भवति ॥ ४ ॥ ३४

* 'पूतदक्षणः'-इति वि० पाठः।

(३)—कालसामान्ये लङ् (३.४.६।

(४) -'तत्र तत्स्थाने'-इति वि०।

(५) -ऋमो यूयस्थानदेवतास् इमो देवः, "पोषः पूषति तत् पूषा भवति"-इत्यादि च नैरुक्तम् (१२.२,१।

(६) -सचेति सहार्थेऽव्ययम्, भुवदिति लेटोरूपम्।

३ ५ १ ७ ३ २ १ ३
मघो२३४नाम्। युक्तावङ्गाइः। रथा३। नार्मा२३४
५३ २ ३ ५
औह्वोवा। ऊ२३४पा॥ ८॥

५३ ५ २ १ ३ १ २ ३ २
II गौर्ह्यतिमरुताꣳमे। अवस्युर्मा३तामघोना२म्।
२ १ २ १२ १ १ २
उक्ववा२३ह्वाइ। युक्तावा२३न्हीः। उक्ववा२३ह्वाइ।
३ २ १ ५ ५ ४
रथानाम्। औ२३ह्वोवा। ह्वोंउइ। डा॥ ९॥ ३५

"मघोनां" धनवतां "मरुतां"(१)"माता" निर्मात्री "गौः"(२) पृश्निरूपा [पृश्निर्वै पयसो मरुतो जाता इति श्रुतेः; गौर्माध्यमिका वाक्(३), तत्रैव मध्यमस्थाने मरुतामपि वर्त्तनात्(४), तेषां

I,II श्यावाश्वे।

(१)—मरुतो ऽन्तरीक्ष स्थान-गणविशेषाः। तथा च नैरुक्तम् "अथातोमध्यस्थाना देवगणास्तेषां मरुतः प्रथमागामिनो भवन्ति, मरुतो मितराविणो वा मितरोचिनो वा महद्रवन्तीति वा' इत्यादि ११,२,१ २।

(२)—"गौर्वाग्व्याता तस्यैषा भवति * * वागर्थेषु विधीयते, तस्मान्माध्यमिकां वाचं मन्यते'-इति नैरुक्तम ११,३,६।

(३) 'चतुर्धा हि वाचो वदन्ति परा पश्यन्ती मध्यमा वैखरीति शाब्दिक-सिद्धान्तः तत्र गौरिति माध्यमिक वाचोऽभिधानम्। वाक्पदस्य ऋग्लक्षितभागित्वेन परिगणितं निघण्टौ, नैरुक्तस्य सोदाहरण वर्णितम् तद्यथा—"वागर्थेषु विधीयते, तस्मान्माध्यमिकां वाचं मन्यते, वाग् व्याख्याता तस्या एषा भवति। 'यद्वाग् वदन्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा। चतस्रोऊर्जं दुदुहे पयांसि क्वचिदस्याः परमं जगाम (ऋक्१०,७,१०)"यद् वाग्वदन्यविचेतनानि अविज्ञातानि"-इत्यादि ११,३,७। "वागेषा माध्यमिका"-इत्येवमादि च ११,४,८।

(४) 'गौः'-इति निघण्टु दैवतकाण्डे मध्यमस्थानभागिषु उनषष्ठितमम् पदम् 'मरुतः' इति तत्रैव सप्तनिंशतमम्।

अथ षष्ठी।

हयोः श्रुतकक्ष एव सुकक्षो वा ऋषिः।

१ २ ३ १ २ ७ २ ३ १ २
उप नो हरिभिः सुतं याहि मदानांपते।

१ २ ३ १ २ ३ २
उप नो हरिभिः सुतम्॥ ६ ॥३६

२ १ ४ ५ ४ ५ २८ १ २ ८ २ १
I उपनोऽ३हरिभिःसुनोवा। याहिमदाऽ३नाम्प। ता-

तत् पुत्रत्वमुपचर्य्यते(५), मा] "धयति" सोमं पिबति | पोषयति वा स्व-पुत्रान् मरुतः| किमिच्छन्तो ? "अवस्यवः"(६) अन्नं कामयमाना। कीदृशी ? "रथानां" मरुतां(७) "वह्निः" वृषतौभि र्वडवाभिर्वोढ्री संयोजयित्री मा "युक्ता" सर्व्वत्र सम्मता पूज्या भवति॥ ५॥ ३५

हे "मदानां पते!" "माद्यन्त्यनेनेति मदः सोमः | 'मदोऽनुप-

३६ उत्तरार्चिकस्य ९,१,१०,१। १४

(५)—वैदिकाख्यायिकाषु इतान्यान्याख्यानस्य अयथात्वात कल्पनावीजत्वाद्वा। तदुक्तम् तर्कपादान्तिमे - 'अमदृष्टान्यान्याख्यानम्' इत्यादि श्रवस्वामिना भगवता मीमांसाचार्य्य विशेषेण तथान्यैरपि।

(६)—'अवःशब्देन कीर्त्तिरुच्यते तामिच्छति अवस्यति. अवस्यतेः उ प्रत्ययः . (३,१,१७०) कीर्त्तिकाम इत्यर्थः'-इति वि०।

(७)—'कीदृशानां पुनर्मरुताम् वोढ्री? उच्यते 'रथानां' रथत्वभावकानामित्यर्थः'-

२३इ। उपनोइ। हा३ओ२३४वा। रा२३४इभोः।
सुताम्। औ२३होवा। हो५इ। डा ॥ १२ ॥

II उपनोहाहोहा। राइभोः। खु२३ताम्। याहि
मदा। नाम्या२३ताइ। उपानो२३४हा। रा२इभा
२३४औहोवा। सुत२रयिष्ठा२३४५ः ॥ ११ ॥ ३६

सर्गे?" इति करणे अण् प्रत्ययः] सोमानां स्वामिन्! इन्द्र! "हरिभिः" [आ गतेन हरिभिरित्यादिषु बह्वनामखानां श्रुतेः अत्रापि शतमहस्र सङ्ख्याकैः। अश्वैः(१) सह "नः" अस्माकं यज्ञे "सुतम्" अभिषुतम् सोमम् "उप याहि" तत्पानार्थं शीघ्रमागच्छ। पुनः "उप नः" इत्यादुक्तिरादरार्था ॥ ६ ॥ ३६

II प्रजापतेः सुतं रयिष्ठोये सहोरयीष्ठोये वा।

इति वि०। 'रथो रहतेर्गति कर्मणः'-इति नै०६.२,१। तथाच गन्तृणामित्यर्थो निष्पद्यते।

(१) इन्द्राश्वाः हरि-मत्र चक्राः, तथाहि निघण्टुः—'हरिः इन्द्रस्य।१.१५,१' इति।

अथ सप्तमो।

३ १र २र ३ १ २ ३ १ २ ३ २
इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे।

१ २ ३ १र २र
अच्छावभृथमोजसा ॥ ७ ॥ ३७

५ र ४ ५ १ २ ३ ५ २ १ ७
I इष्टाहोत्राः। आसृक्षा२३४ता। इन्द्रंवृधा। तो

३ ५ १ २ ५ ५ ३ २ ५
२३ध्वा२३४राइ। आच्छा३वोभृ। थमो३जापृसा६५६।

२ २ १ २
ए३। उदधिर्निधी१:॥ १२ ॥ ३७

"अध्वरे" अस्मदीये यज्ञे "वृधन्तः" हविर्भिरिन्द्रं वर्धयन्तः "इष्टाः" इष्टवन्तः यागं कृतवन्तः सप्तसङ्ख्याकाः "होत्राः" होतृकाः "अवभृथम्"(१) सुत्याभिधम् "अच्छ" अभि प्रति "ओजसा" स्व-तेजसा सहिताः "इन्द्रम्" "असृक्षत" व्यसृजन्(२)। यावदवभृथ-समाप्ति होतृका यजन्तीति ॥ ७ ॥ ३७

I इष्टाहोत्रीयम् अमरसं वा अर्णानिधि वा।

(१) प्रधानाकृतिषु कृतासु अवभृथ-सञ्ज्ञं कर्म क्रियते, तमित्यर्थः।

(२) 'ऋषिः आत्मीयान् ऋत्विजश्चाह 'इष्टाः प्रियाः होत्राः स्थेति होत्राः आह्वातय इत्यर्थः, ताः 'असृक्षत' विजत दक्षदित्यर्थः' इति वि०।

अथाष्टमी।

वत्सः काण्व ऋषिः।

३ २उ ३ १र २र ३ २ ३ १ २ ३ १ २
अहमिद्धि पितुस्परि मेधामृतस्य जग्रह।
३ १र २र
अहꣳसूर्य इवाजनि ॥ ८ ॥ ३८

I ४ ४ २र १र
अहमिद्धापꣳइतिपितुष्पराङ्। मेधामृतस्यजग्रहा।
२ १ र ७ ३र २ १
अहꣳसूर्याः। इवा२३४। हाहोइ। जनि। होइ।
२र १र २र १र १ १ १ १
होइ। औहोऔहोवा२३४५हाउ। वा ॥ १३ ॥३८

"पितुः"(१) पालकस्य "ऋतस्य" सत्यस्यापि तस्येन्द्रस्य "मेधाम्" अनुग्रहात्मिकां बुद्धिम् "अहम् इत्"(२) अहमेव "परिजग्रह" परिगृहीतवानस्मि नान्यः "हि"(३) यस्मात् एवं तस्मात् "अहं" "सूर्यः इव अजनि" सूर्यो यथा प्रकाशमानः सन् प्रादुर्भवति तथा अहमजनिषम् प्रादुरभूवम् ॥ ८ ॥ ३८

३८ उत्तरार्चिकस्य ७,१,५,१ । १५

I प्रजापतेः निधनकामम् सिन्धुषाम वा।

(१)—'पितुः, कण्वस्य सकाशात्' इति वि०।
(२),(३) 'इत् हि द्वावपि पादपूरणौ'-इति वि०।

अथ नवमो।

शुनःशेपऋषिः।

३ १ २ ३ २ २१ ३ १ २
I रेवतीर्नः सधमादइन्द्रे सन्तु तुविवाजाः।
३ २ ३ २ ३ १ २
क्षुमन्तोयाभिर्मदेम ॥ ९ ॥ ३९

५ २ २ १ ३ ५ १ ०
रेवतीर्नाः। सधार्मार३४दाइ। इन्द्रार्इमार-
५ २ १ १ २ १ ०
३४तू। तुविवा२जाः। क्षू२३मा। तो२या। भिर्मा-
५ ४ ५
२३४वा। दा५इमोऽक्षाइ ॥ १४ ॥ ३९

"क्षुमन्तः"(१) अन्नवन्तः वयं "याभिः" गोभिः "मदेम" हृष्येम "इन्द्रे" "सधमादे" अस्माभिः सह हर्षयुक्ते सति "नः" अस्माकं ता गावः "रेवतीः"(२) क्षीराज्यादि धनवत्यः "तुविवाजाः" प्रभूतबलाश्च(३) "सन्तु" ॥ ९ ॥ ३९

३९ उत्तरार्चिकस्य ४,१,१४,१ । १६
I रेवत्यः वाजदात्र्यो वा।

(१) क्षुरिति अन्ननामसु द्वादशसु निं०२,७। विवरणकारस्तु 'क्षु शब्दे' अ०प०) इत्यस्माद् रूपम्, शब्दवत्यः, कीर्तिवत्यः इत्याह।

(२) 'रयेर्मतौ बहुलम्; ६,१,३४।-इति वचनादिह रे भावः। 'सुपां सु लुग् (७१,३९)" इति जसः सु।

(३) 'तुवि-शब्दो बहुवाची' नि०३,१,७), वाज शब्द इह बलवाची' नि०२,९,३)।

अथ दशमी।

शुनःशेपो वामदेवो वा ऋषिः।

१ २ ७१ २ ३ १ २ ३ १
सोमः पूषा च चेतनूर्विश्वासाꣳ सुक्षितीनाम्।
३ २ क २र ३ २
देवत्रा रथ्योर्हिता॥ १०॥ ४०

। ५र र २१ २, ७ २, ३ ५ १
। सोमःपूषा। चचाइतनूः। अयायोर३४वा। वा-
र २र र १ ३ २, ३ ५ १ ७
इश्वासाꣳसुक्षिती। नाम्। अयायोर३४वा। दाइव-

"देवत्रा"(१) देवेषु "रथ्यः" रथार्हः "अर्हिता"(२) आरोढा "सोमः"(३) तार्क्ष्यः "पूषा" सूर्य्यश्च(४) "विश्वासां" सर्व्वासां "सुक्षितीनां" [क्षियन्ति निवसन्तीति क्षितयः प्रजाः] शोभन-

। सोमापोषम् गोअश्वोयं वा।

(१)- 'देव-मनुष्य पुरु-मर्त्तेभ्यो द्विनोयासप्रश्नोर्बुऊलम्'- इति वा।

(२ 'रथ्यः, अर्हिता'- इति केदमु पदयोर्व्य-विरुद्धो विवरणं विरुद्धयं। पदकारस 'रथ्योः, हिता' इत्येवं विच्छेद। "रथ्योः, रथयोर्ष्टनाव यज्ञ उच्यते', रहतेर्गति कर्मणः, रथ्योः रथस्य यज्ञस्य यो वोढारौ तौ पत्नीयजमानावव रथ्यावुच्यते, तयोः यज्ञस्य देवान् प्रति प्रापयित्रोः पत्नीयजमानयोः 'हिता द्विवचनस्यायमाकारः हितौ' इति वि०।

(३) अन्तरिक्षस्थो देवः, चन्द्रमाः दृश्यमानन्नैरुक्तम् (११,१,५)।

(४) द्युस्थान देवः, 'पोषं पुष्यति पशवो भवति' इत्यादि नै०१२,२,५-७।

२ ४ १२।२ १ २ ११
चारा२३। थियो३र्चा५३हता६५६। गावो२अश्वा२३-
११
४५:॥ १५॥ ४०

॥ इति प्रथम-दशतिः॥

क्षितीनां मनुष्याणां सम्बन्धीनि हवींषि इन्द्रार्थं कृतानि "चेतत:" जानीत:॥ १०॥ ४०

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोग्याख्ये द्वितीयाध्यायस्य चतुर्थः खण्डः॥ ४॥

अथ पञ्चमे खण्डे—

मेयं प्रथमा।

श्रुतकक्षऋषिः।

२ ७ २ ३ १ २ ३ १ २ ७ १८ २८
पान्तमावोअन्धसइन्द्रमभिप्रगायत।
३ १ २ ३ १ २ ३ १ २ ७ २
विश्वामाहृ्ग्णतक्रतुंमृ्चिष्ठञ्चर्षणीनाम्॥ १॥ ४१

हे ऋत्विजः! "व:" यूयम् "अन्धसः" सोमलक्षणम्। अन्नम्

४१ उत्तरार्चिकस्य १,२,१,१। १७

४र ५ ४र५र ४ ५ ४ २ १ ३ १ २
I पान्तमावोऽअन्धसाः। इन्द्रामाभि। प्रगायाता

२ २ १ २ १ २ । १
३। ह्वाऽ३हाइ। विश्वासाह्म्। शतक्राह्वऽ३म्। ह्वा-

२ १ २ ३ ३ १ ३
ऽ३हाइ। मऽ३हाइष्ठचाऽ३। ह्वाऽ३ह्वा। षणाऽ२इ। नाऽ२३

४र र २ ५
४ओऽ३ह्वोवा। उऽ२३४पा॥ १६॥

"आ पान्तम्" आभिमुख्येन पिबन्तं [पा पाने (भ्वा०प०) छान्दसः शपोलुक्(१)। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति 'न लोकाव्यय' (२,३,६९पा०) इति षष्ठी प्रतिषेधाभावः। ततोऽस्मदित्यत्र 'कर्तृकर्मणोः' (२,३,६५पा०) इति षष्ठी] सोममाभिमुख्येन पिबन्तम् एतादृशम् "इन्द्रम्" "प्र गायत" प्रकर्षेणाभिष्टुत। कीदृशम्? "विश्वासाह्म्" सर्वेषां शत्रूणामभिभवितारम् "सर्वेषां भूतजातानां वा" अतएव "शतक्रतुम्"(२) बहुविध प्रज्ञानं "बहुविध-कर्माणं वा" "चर्षणीनाम्"(३)

I अध्यर्द्धऽ-वैतहव्यम्।

(१) अदादिकि शितपरकत्वाभावात् पिबादेशाभावः।

(२) 'शतम्' इति बहुनामसु दशमम् नि०३,१। 'क्रतुः' इति प्रज्ञा-नामसु पञ्चमम् (नि०३,९) कर्म नामसु च एकादशम् नि०२,१।

(३) 'चर्षणयो मनुष्याः (नि०२,३,९)। षष्ठी-बहुवचनं चतुर्थी-बहुवचनार्थे, यजमान मनुष्येभ्य इत्यर्थः' इति वि०।

४२ ५ ४२ ५२ ४ ५ ४ २ १ २ २

IIपान्तमावोअन्धसः। इहा। इन्द्रमभाइ। प्रगा

१ १ २ १ २ २ १ २

यना२। इहा। विश्वासाह्शता२क्रतूम्। इहा।

१ २ १ १

म्ह्चा२इष्ठच्चा। इहा। षणा२इनाम्। इहा२३

१ १ २ १ १

४५॥ १७॥

३ ४ २ ४ ५ १

III पाऽपुन्तम्। आ३वो३अन्धसाः। आइन्द्राम-

१ ३ ५ १ ३ ५ २

भाइ। प्रगा२या२३४ता। विश्वा२सा२३४हाम्। गा

१ २ २ १ २ १२ १ २ १ ३

३ताक्रा३तूम्। म्ह्चिष्ठच्चर्प। णाये३। ना२मा२३४-

५२ २ १ १ १ १ १

ओहोवा। ओ३का२३४५ः॥ १८॥ ४१

मनुष्याणाम् "म्ह्चिष्ठम्" धनस्य दातृतमं यहा यजमानानां यष्टव्यत्वेन पूजनीयमिन्द्रं प्र गायतेति समन्वयः॥ १॥ ४१

II इहवहामदेव्यम्।

III ओकोनिधनं वैतहव्यम्।

अथ द्वितीया।

वसिष्ठऋषिः।

२३१ २३१ २३ १२
प्रवइन्द्रायमादनꣳहर्य्यश्वायगायत।
१२ ३१२
सखायःसोमपावे ॥ २ ॥ ४२

I
१ ३२३ ५ २ १
प्रवइन्द्रा२। यमादा२३४नाम्। प्रवा२इन्द्रा।
२ २ ३ ५ २ २ १
औ३ह्वो। या२३४मा। दा३नाम्। हरा२अश्वा।
२ २ ३ ५ २ २ १
औ३ह्वो। या२३४गा। या३ता। सखा२याःसो।
२ २ १ ५ ४ ५
औ३ह्वोइ। मापो२३४वा। आपुवोऽह्वाइ ॥ १८ ॥

II
१ १ २ २ ३ ५ २ २
प्रवा२इन्द्रा। औ३ह्वो। या२३४मा। दा३नाम्।
१ १ २ २ ३ ५ २ २ १
हरा२अश्वा। औ३ह्वो। या२३४गा। या३ता। सखा-

४२ उत्तरार्चिकस्य १,२,२,१। १८
I,II ग्राम्ये सामनौ।

१ २ २ १ ५ ४
रयाःसो। औ३च्चोइ। मापो२३४वा। आपूव्रोइ
५
च्चाइ ॥ २० ॥

२ ऽ २ ऽ २ १ र ऽ २ ऽ २ ३
III प्रवईइया। ईइया। इन्द्रोईइया। इइया। या-
५ २ २ ऽ २ ऽ २ १ र
२३४मा। दाइनाम्। च्चरईइया। ईइया। आश्वो-
ऽ २ ऽ २ ३ ५ २ २ ऽ २
ईइया। ईइया। या२३४गा। याइता। सखईइया।
ऽ २ १ र ऽ २ ऽ २ ४ ५ ४
ईइया। याःसोईइया। ईइयाइ। मापो२३४वा। आ-
५
पूव्रोइच्चाइ ॥ २१ ॥

१ र १ १ र २ ३ ५ २
IV प्रवौच्चोवा२। इन्द्रौच्चोवा। या२३४मा। दाइ-
२ र १ १ र २ ३ ५
नाम्। च्चरौच्चोवा२। आश्वौच्चोवा। या२३४गा।
२ २ र १ १ र २ १ ५
याइता। सखौच्चोवा२। याःसौच्चोवाइ। मापो२३४वा।
४ ५
आपूव्रोइच्चाइ ॥ २२ ॥

२ र १ २ २ १ र २ २
V प्रवोदाइदा। औ३च्चो। इन्द्रोदादा। औ३च्चो।

III,IV गोरीविते। V गात्र्यंसाम।

३ ५ २ २ १ २ २
या२३४मा। दा३नाम्। हरिदा३दा। औ३ह्वो।
१ २ २ २ ३ ५ २ २
आश्वोददा। औ३ह्वो। या२३४गा। या३ता। सखि
१ २ २ १ २ २ २ १
दा३दा। औ३ह्वो। याःसोददा। औ३ह्वो३। मापो-
२३४वा। आ५वो६ह्वाइ ॥ २३ ॥

VI ४५ ४ २ २ २ १ २
प्रवः। प्रवा। इन्द्रायेन्द्रा। यमादा१ना२म्।
२ १ २ १ २ २ १
हराइह्यश्वा। यगाया१ना२। सखाया२३:सो३। मा
५ ४ ५
पो२३४वा। आ५वो६ह्वाइ ॥ २४ ॥ ४२

हे "सखायः!" "वः" यूयं "हर्य्यश्वाय"(१) हरि-नामकाश्वाय "सोमपावे"(२) सोमानां पात्रे "इन्द्राय" "मादनं" मदकरं स्तोत्रं "प्र गायत" प्र पठत ॥ २ ॥ ४२

VI गोरीवीतम्। सर्वाणि शाक्त्यसामानि, सर्वाणि वा गौरीवीतानि।

(१) -'हरी इन्द्रस्य वर्णौ अश्वौ यस्य सः, हर्य्यश्वः,-इति वि०। "हरी इन्द्रस्य"-इति नै० १.१४.१।

(२) -'पातो मनिनक्वनिब्वनिपश्च' (३,२,७४)।

अथ तनोया।

मेधातिथिः ऋषिः प्रियमेधश्च।

३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २
वयमुत्वातदिदर्थाइन्द्रत्वायन्तःसखायः।

१ २ ३ १ २
कण्वाउक्थेभिर्जरन्ते ॥ ३ ॥ ४३

५ ४ ५ ३ ५ २ ३ ५
I वयंवायाम्। ऊ२३४त्वा। तादीदा२३४र्थाः।
३ ४ ५र ४ ५ ३ ५ ३ २ र
इन्द्रत्वायन्तः। सखा२३४याः। कण्वा३१२३४ः। उक्थे-
५ र र ५ ४
भिर्जरन्ते। एहियाईहा। होप५इ। डा ॥ २५ ॥

५ २ ४र ५ १र २ र
II वयमू३त्वातदिदर्थाः। णेहिहा२इ। वयमुत्वातदि-
र र २ १ ५ ३ ५ १
दर्थाइन्द्रत्वायन्तः सखा२३याः। का२३४ण्वाः। उ।
२ १ ५ २ १ १ १ १
क्थाइ। भिर्जो२३४वा। रन्ता३या२३४५ ॥ २६ ॥ ४३

हे "इन्द्र!" "त्वायन्तः" त्वामात्मनइच्छन्तः "सखायः" समानख्यानाः(१) "वयम्" "तदिदर्थाः" यत् त्वद्विषयं स्तोत्रं

४३ उत्तरार्चिकस्य १,२,३,१। १८
I,II काण्वे इमे।

(१) 'यास्पदा इत्यर्थः' इति वि०।

अथ चतुर्थी।

श्रुतकक्षऋषिः॥

१ २ ३ १ २ ३ १र २र ३ १ २
इन्द्रायमद्वनेसुतम्परिष्टोभन्तुनोगिरः।
३ १ २ ३ १ २
अर्कमर्चन्तुकारवः॥ ४ ॥ ४४

। ४५र ४५ ४ २ १ र र २ १
। इन्द्रायमद्वनाद्। सुताम्। इन्द्रायमद्वनेसुताम्।

तदित्-तदेवार्थः प्रयोजनं येषां, तादृशाः सन्तः(२) "त्वा" त्वाम् जरामहे(३) स्तूमहे। "उ" इति पाद-पूरणः। "कण्वाः" कण्व-गोत्रोत्पन्नाः अस्मदीयाः पुत्राश्च "उक्थेभिः"(४) उक्थैः शस्त्रैः "जरन्ते"(५) त्वां स्तुवन्ति(६)॥ ३॥ ४३

"मद्वने" "माद्यतेः क्वनिप्" मदन-शीलाय "इन्द्राय" तदर्थं सुतम्" अभिषुतं सोमं "नः" अस्मदीयाः "गिरः" स्तुति-लक्षणा-वाचः(१) "परिष्टोभन्तु" "स्तोभतिः स्तुति-कर्मा (नि०३,१४,४)"

---

४४ उत्तरार्चिकस्य १,२,४,१। २०

(२)- उत्तर-वाक्ये जरन्ते इति दर्शनात् इहापि जरामहे इत्यध्याहारः।

(३)- सामयिक-बहुल-वचनात् भिन्नविभक्तिभावः (७,१,३९)।

(४)- 'जरति'-इति अर्चति कर्मसु मन्त्रम पदम् नि०३,१४।

(५)—विवरण-मते तथ कण्वाः जरन्ते इत्येतदेव व्याख्यानम्। तथाचोक्तम्— 'कण्वाः' कण्वस्य पुत्राः, मेधातिथि-प्रभृतय इति।

(१)—'गिरः स्तुतयो गिरते गृणातेः'-इति नै०१,३१४।

२१ २ १२ २ १२
पराइष्टो२३भा। तुनोगिरो। अर्कमा२३र्चा। तुकारा-
२ १
२३वा३४३:। ओ२३४५इ। डा ॥ २७ ॥

५ २ २ १ २ २ १ २२
II इन्द्रायमद्वनेहाउ। ओइस्ह३ताम्। परिष्टो।
१ २ २ १ १ २ २
भा। तुनो२३च्हाइ। गाइरा२:। परिष्टोभा। तुनो२
२ १ १ १ २ ३ ५२
३च्हाइ। गाइरा२:। अर्का२३म्। आ२र्चा२३४ओ-
२ २ २ १ १ १ १
च्होवा। ए३। तुकाा३रवा२३४५:॥ २८ ॥

४ ५२ ४ ५ २ ४ ५ २ ५ ५ २ १ २
III इन्द्रायमद्वनेसुतम्। इन्द्रायमोवा। द्वा३नाइस्ह
२ १ २२ १ २ २ १ ३
३ताम्। परिष्टो। भा२३। च्हा३च्हा३। तूनो२गा२३-
५ १ २ २ २ १२ २
४इरा:। आर्कमर्चा३। च्हा३च्हा। तुकारा२३वा३४३:।
१
ओ२३४५इ। डा ॥ २८ ॥ ४४

परितः सोमं स्तुवन्तु। ततः "कारवः" स्तुतिकारिणः स्तोमा-

I,II गौरीवीते इमे।
III इदं श्वेतकक्षम्।

अथ पञ्चमी।

इरिमिठऋषिः।

३ १ २ ३ २ ३ १ २ ३ १ २३१ २
अयन्तइन्द्रसोमोनिपूतोअधिबर्हिषि।
१ २ ३ २उ ३ १२
एहीमस्यद्रवापिब ॥ ५ ॥ ४५

I ५ २१र २ १ २१र र
अयन्तआ। द्रसोमो। होवाउहोइ। निपूतो-
२ १ २ ३ ५ १ २र १ १
आ३। धीबर्हा२३४इषो। आइहोमस्या२३। द्रा२वा
५र र ३ ५
२३४औहोवा। पी२३४वा ॥ ३० ॥

II ५ ५ १ र र १ र
अयन्तइन्द्रसो४माः। निपूतोअधिबा२र्हाइषो२। ए-

रय(१) "अर्कम्"(२) सर्वरर्चनीयं सोमम् "अर्चन्तु" पूजयन्तु ॥४॥४४

हे "इन्द्र।" "ते" तुभ्यं त्वदर्थम् "अयं सोमः" "बर्हिषि अधि"

४५ उत्तरार्चिकस्य १,२,५,१। २१
I,II इमे हेसोमिचे।

(२) 'कारुः'-इति स्तोतृनामसु निघ०३.१५।

(३) 'अर्कं देव सोमम्' इति वि०। "अर्को देवो भवति, यदेनमर्चन्त्यर्को मन्त्रो भवति, यदेनेनार्चन्त्यर्कमन्नम भवत्यर्चति भूतान्यर्को हतो भवति स-हतः कटकिम्बा"-इत्यादि नै० ५.१,५-६।

१ २ र १ १ र २
ह्वो२इमास्या। द्रवापाइवा२। आइहीमस्याद्रवा३१उवा

५
२३। पी२३४बा ॥ ३१ ॥

४ ३ ४ ३ ५ १ र ५ र ४ ५ ४
III अयन्तइन्द्रसोमः। ना२३४इ। पूतोअधिबर्हि

५ १ र र २ १ २ र १ २ १र
षी। निपूतोअधिबर्हा२३इषी। ऐहोइमा२३स्या। द्रवा

६ ५
पा२३४५इबा६५६। ई२३४हा ॥ ३२ ॥ ४५

वेद्यामास्तीर्णे दर्भे(१) "निपूतः" नितरां दशापवित्रेण शोधितः अभिषवादि-संस्कारैः संस्कृतः इत्यर्थः "इम्" इदानीम्(२) "अस्य"(३) इमं सोमं प्रति "एहि" आगच्छ, आगत्य च यत्र रसात्मकः सोमो ह्रियते तं देशं प्रति "द्रव"(४) शीघ्रं गच्छ, तदनन्तरं तं सोमं "पिब" ॥ ५ ॥ ४५

III इन्द्रवद्दैवोदासम्।

(१ 'अधिबर्हिषि बर्हिषः उपरि' इति वि०।

(२) 'इम्'-इति पदपूरणः इति वि०। निरुक्तकारोऽप्याह 'पदपूरणास्त्रयश्चरेष्वनर्थकाः कमोमिदिति' १,३,१४।

(३)—'अस्य सोमस्य षष्ठी-निर्देशात् स्वइमं इति वि०।

(४)—'एहि, द्रव - इति द्वावपि गत्यर्थौ, अत्यासं च भयंमोर्थाः प्रतीयन्ते' इति वि०।

अथ षष्ठी।

मधुच्छन्दा ऋषिः।

३ २३१२३१२ ३१२
सुरूपकृत्नुमूतयेसुदुघामिवगोदुहे।
२ २३१२
जुहूर्मसिद्यविद्यवि ॥ ६ ॥ ४६

। ४५ २१ २२१ २१२२ १
।। सूरू। पकृत्नुमूतयाइ। सुदुघाम्। इवगो२।
१२ २ ५ २१२ २ १ २
दुहयाउ३१उवा२३। ऊउ३४पा। जुहूमा२३सी। द्यविद्यवियाउ३१
२ ५
उवा२३। ऊउ२३४पा ॥ ३३ ॥

"सु-रूप-कृत्नुम्" शोभन-रूपोपेतस्य कर्म्मणः कर्त्तारम् इन्द्रम् "ऊतये" अस्मद्रक्षार्थं "द्यविद्यवि" प्रतिदिनं "जुहूमसि"(१) आह्वयामः। आह्वाने दृष्टान्तः "गोदुहे" गो धुगर्थं "सुदुघाम् इव" सुष्ठु दोग्ध्रीं गामिव, यथा लोके गौर्यो दोग्धा तदर्थं तस्याभिमुख्येन दोहनीयां गामाह्वयन्ति तद्वत्(२)॥ वस्तोरित्यादिषु

---

४६ उत्तरार्चिकस्य ४,१,१५,१। २२

I शाक्करवर्णम्।

(१) मसद्गागमे (७,१,४६म०) रूपम्।

(२) 'एतदुक्तं भवति, -यथा गो-दोह-कर्मार्थं तस्या एव गोर्दोहनार्थम् आह्वयति, तद्वत्'-इति वि०।

५ र र २१ १ १२र
II सुरूपाहाउ। पक्रत्नुमू२ताया२इ। सुदुघाम्।
१ १२र र र२र३र२ २ १
इवगो२। दुहे। ऐहोयैहो१। जुहो२। ऊवा२इ।
१ १ २र र ३र २
मासो२। द्यविद्यवि। ऐहोयैहो१॥ ३४॥

२र १ ५ १ र २
III सुरूपक्रत्नू३मूता२३४याइ। ओइसुरूपक्रत्नूमू१जा-
१ र २ १र
याइ। ओइसुदुघामिवागो१दुहा२इ। जुहुममा२इ।
३ २ ३ ५ ४ ५ १ १ १
द्यविद्या२३४वी। ऐहो। जूहू२मामो२। द्यविद्या।
५ ५र ५र ५र ५ २ २
वोवो२३। आओहोइ। आओहोइवा। ण३। द्यवोइ-
१ १ १ १ १
ई२३४५॥ ३५॥

४ ५र ५ १ १ २ २ १ २
IV सुरूपक्रु। त्नूमू२तयाइ। सुदुघामो३। वागो-

नामसु द्यविद्यवोति द्वादशाहर्नामानीति पठितम्(१)॥ ६॥४६

II, वोक्रम्। III.IV ईगवे वैगवे वा ओदले।

(१) अहर्नामानि द्वादश इति यद्नैरुक्तं परिगणनं 'वसोः इत्यादिषु द्वादशसु नामसु तदनुगतं 'द्यविद्यवि' इति निघण्टौ पठितम इत्यर्थः। तथा च नैरुक्तम. 'अहर्नामान्युत्तराणि द्वादश अहः कस्मात्? उपाददत्यस्मिन् कर्माणि' इत्यादि ५.३.२८।

अथ सप्तमी।

त्रिगोकऋषिः*।

३ १ २ ३ २ ३ १ २ ३ १ २
अभित्वावृषभासुतेसुतꣳसृजामिपोतये।

३ १ २ ३ १ २
त्वमाव्यꣳहोमदम् ॥ ७ ॥ ४७

३ ५ ४ ५ २ ४ १ १ २ १ २
दू२३४हाइ। सुदुघामा। वागो२दुहाइ। जुहमा२३-

२ १ ४ २ ५
सो३। द्या२३वो३। द्या३४५वौई३हाइ॥ ३६ ॥* ४६

हे "वृषभ!"(१) कामानां वर्षितरिन्द्र! "त्वा" त्वाम्(२)

* 'वृगोक'-इति वि०-पाठः।

४७ उत्तरार्चिकस्य १,२,७,१। २३

"वस्नो२ धू२ भानु३ वामरम४ स्समराणि५ ई घर्मः७ घृणिः८ दिनम् दिवि१० दिवे-दिवे११ द्यविद्यवि१२" इति नि०१.६।

(१) ऋचि वृषभा इति 'सुपां सु लुगिति (७,१,३९) आत्वे रूपम्।

(२) "द्वितीयैकवचनमिदं चतुर्थ्येकवचनस्यार्थे द्रष्टव्यम्' इति वि०। तथाच "चतुर्थ्यर्थे बहुलञ्छन्दसि (२,३,६२)" इति हि स्मरणम्।

* इति ग्रामे गेय गाने चतुर्थः प्रपाठकः ॥४॥

I ओम्। अभित्वावृषभासुताइ। सूतऋजा। मिपाइ-
ताऽयाऽइ। त्वम्यावाऽयाऽउ। शुचाऽउषायेऽ। मार-
ऽ४दाम ॥ १ ॥

II अभित्वावृषभासुतेअभ्याचाउ। त्वावृऽषाभाऽसू-
ताऽइ। ऋतऋजा। मिपाइताऽयाऽइ। त्वम्याऽचो-
इ। वियाऽचो। शुचोमाऽऽदाऽ४ऽम्। ओऽ३४५इ।
डा ॥ २ ॥

III अभित्वावृषभासुते। सुतऋजोवा। मिपोता-
याऽइ। सुतऋजामि। पोताऽऽयाइ। चाऽऽम्याऽ।
वाऽयाऽ३४औचोवा। शुचोमदाऽ३४५म् ॥ ३ ॥ ४७

"सुते" सोमेऽभिषुते सति तं "सुतम्" अभिषुतं सन्तं "पोतर्य"(१)

I,II,III आर्षभाणि त्रीणि सप्तर्चितानि वा बार्हाणि वा।

(१)—"स्यामाषाप त्रोभावे (३,३,८५)," इति स्त्रियां रूपम्।

अथ अष्टमी।

कुसीदऋषिः ※।

१ २ ३१र २र३१ २ ३ २
यद्इन्द्रचमसेषासोमश्चमधुपुतेसुतः।
१र २र३ १ १
पिबेदस्यत्वमोग्निषे ॥ ४ ॥ ४८

I १ २ १ ४ ५ ४र र ५ १र २ १र ३र
याह्वीन्द्रा२३। चमसेषुवाईया। सोमश्चमधुपुतेसु-
१ २र १ ३ १ २ २ १
तः। सोमश्चमू। धुनाइह्व२३ताः। पाइबेइद्धाइ। आ-
२ २ १र २ १
स्याइचाइ। त्वमोग्ना२३इषा३४३इ। ओ२३४इ। डा॥
॥ ४ ॥
५ र ५र १र र २ २ २ र
II यइंद्रचामाईसेषुवा। सोमश्चमधुपुना१इह्व३ताः। सो

मन्नाय "अभिसृजामि"(३) "हव्य"(४) हव्यं "मद" मदकरं सोमं "व्यश्नुहि"(५) विशेषेण प्राप्नुहि ॥ ७ ॥४७

※ 'कुसीदो'-इति वि०।

I,II कौत्से, पाञ्चवाजे वा दाशवाजे वा।

(३)—'आभिमुख्येन ददामीत्यर्थः' इति वि०।
(४)—ऋचि तृम्फा इति 'ह्वाचः (६.३.१३५)-इति दीर्घः।
(५)—ऋचि व्यश्नुही इति दीर्घश्छान्दसः।

अथ नवमी।

शुनःशेप ऋषिः।

१ १ २ १ २ १ १ २
योगेयोगेतवस्तरंवाजेवाजेहवामहे।
१ २ २ १ १ २ १ २
सखायइन्द्रमूतये॥ ९॥ ४९

२ १ १ २ १ २ १
मश्वमू३। षू३ताइव्हू३ताः। आ३इ। पिबेदस्रो२३
५ ३ १ ४
४व्हाइ। त्वमा३इशाषुइषाद्१५६इ॥ ५॥ ४८

हे "इन्द्र!" "ते" त्वदर्थं "सुतः" अभिषुतो यः "सोमः" "चमसेषु"(१) एतन्नामकेषु पात्रेषु तथा "चमूषु" [चमन्ति(२) भक्षयन्त्यत्रेति] चम्बोर्ग्रहाः तेषु च "आ" सर्वतः अस्ति। "अस्य"(३) तमेतं सोमं "त्वम्" "पिब इत्" [इदवधारणे] पिबैव। कथं मम सोम-पान-योग्यता? तत्राह—हे इन्द्र! त्वम् "ईशिषे" तस्य त्वमीश्वरो भवसि खलु; यतस्त्वं ततः पिबेति ममन्वयः [ईश ऐश्वर्ये (अ०आ०) लटि "ईशः से (७,२,७७)" इति इडागमः॥ ८॥४८

"योगे योगे" प्रवेशे प्रवेशे तत्तत्कर्मोपक्रमे(१) "वाजे वाजे"

४९ उत्तरार्चिकस्य १,२.११,१।२४

(१)—'बहुवचनं, बहुयज्ञोपेक्षम्, बहुषु यज्ञेषु अधिपवण-फलकेषु' इति वि०।
(२) चम्,क्रम्, अदने भ्वा० प०।
(३) 'अस्य सोमस्य, पदौ निर्देशात् एकदेशमात्र वाक्यशेषः' इति वि०।
(१)—'योग नियोग- व्यापारः कर्म हवनधादि, तस्मिन् सर्वस्मिन्' इति वि०।

४र४र र र ४ ५ ४ १र र १र र र र र
योगेयोगेतवस्तराम्। वाजेवाजेहवामहे। स-

१र २ २ १ ५ ४ ५
खाया२३ई३। द्रमू२३४वा। तापूयोइ्हाइ ॥ ६ ॥

४र४र र र र ५ १र ऽर र ऽर १ ऽर
II योगेयोगेतवस्ताइ्राम्। वाजे२वाजे२हवा२महे३।

१ २ २ १ १ १ २ २ १
हो॒वा३ह्वाइ। साखा२याई२३। हो॒वा३ह्वाइ। द्रमू२३।

१ २ ४र र २ ५
ता२या२३४औहोवा। ऊ२३४पा ॥ ७ ॥

४र र र र र र र ४ ५ १र र १र र
III योगेयोगेतवाहाउस्ताराम्। वाजेवाजे। हवा-

१ २ ५ १ २र १
२माहाइ। ऊवाइ। औ३हो२३४वा। साखायई।

१ २ ५ ३ र २ १
द्रमू२तायाइ। हुवाइ। औ३हो२३४वा। सखायआ।

१ २ १ १ १ ५
हूवा२इ। औ३हो२३४५वाइ५इ। द्रमू३तये२३४५ ॥ ८ ॥ ४९

कर्म-विधातिनि तस्मिन् तस्मिन् सङ्ग्रामे(२) "तवस्तरम्" अति-

I,II,III सौमेधानि, पूर्वतिथानि वा पौर्वातिथानि वा।

(२) अन्न अन्न हविर्लक्षणे उपकल्पिते' इति वि०। 'वाजे'-इति निघण्टौ सङ्ग्राम-नामसु चत्वारिंशत्तम पदम् (२.१७)। 'वाज'-इति निघण्टौ अन्न-नामसु द्वितीयं पदञ्च २.७)।

अथ दशमी।

मधुच्छन्दा ऋषिः।

२उ ३ १ २ ३ १ २ ३ १र २र
आत्वेतानिषोदतेन्द्रमभिप्रगायत।
१ २ ३ १ २
सखायःस्तोमवाहसः॥ १०॥५०

॥ इति द्वितीय-दशतिः॥

२र २ र र ५र ५ २ १
I आनू३४। एतानि। षोदाऽऽता। इन्द्रमभाइ।
२र १ २र १र २ २ १ ३
प्रगायता। सखायःस्तोम। वा। औ३च्चो। ववा२च्चा

ग्येन बलिनम्(३) "इन्द्रम्" "ऊतये" रक्षार्थं "सखायः(४) सखि वत् प्रिया वयं "हवामहे" आह्वयामः॥ ८॥ ४९

[तु शब्दः क्षिप्रार्थो निपातः] 'आ तु आ इत'(५)। इति

५० उत्तरार्चिकस्य १,२,१०,१। २५
I दैवातिथं मैधातिथं वा।

(३)—'तवः'-इति निघण्टौ बल-नामसु पञ्चम पदम् (२.९)।
(४)—'ह 'सखायः' ऋत्विजः।'-इति वि०।
(५)—इता इति ऋचि निपात-लक्षणोदीर्घः (६.३,१३५)।

५ २१ २२ १२ २ १
२३४माः। ह्वयाइ। साखायःस्तोम। वा। औ३ह्वो।
१ २ ५
ऊम्मा२३। ह्वा३४५सोऽहाइ ॥ ९ ॥ ५०

ह्वाभ्यामाङ्भ्यां मन्त्रे तु इत-शब्दोऽभ्यसनीयः](१) हे "सखायः" ऋत्विजः! त्विप्रमस्मिन् कर्मणि आगच्छतागच्छत [आदरार्थोऽभ्यासः] आगत्य च "निषीदत" उपविशत "इन्द्रम्" "अभिप्रगायत" सर्वतः प्रकर्षेण स्तत। कीदृशाः सखायः? "स्तोमवाहसः" त्रिवृत्-पञ्चदशादि-स्तोमान्(२) अस्मिन् कर्मणि वहन्ति प्रापयन्ति ॥ १० ॥ ५०

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोग्याख्याने द्वितीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

---

(१) उपसर्गानुरोधात् क्रियायाश्चावर्तनमित्यर्थः। विवरणे तु एक आवर्तः स्वीकृतः।

(२) -विधा वर्तते इति त्रिवृत्। एवं पञ्चदशादयश्च स्तोमाः। ते च "तिसृभ्यो ह्विङ्करोति स-प्रथमया, तिसृभ्यो ह्विङ्करोति स-मध्यमया, तिसृभ्यो ह्विङ्करोति स उत्तमयोत्तमो विवृतो विवृतिः" इत्यादि ताण्ड्यायनुशासनादभिगन्तव्याः। ताण्ड्यं हि आदित्यौपाधारणमनौपयिकं समस्तमेतद्वृहत्त्वेनैव नियुक्तं श्रुतम्। तत्र च त्रिवृत्१ पञ्चदशः२ सप्तदशः३ एकविंशः४ त्रिणाववः५ त्रयस्त्रिंशः६—इति प्रथमषड्वृहस्य षट् स्तोमाः क्रमेण विहिताः। अनन्तरं छन्दोमानां चतुर्विंशः१ चतुश्चत्वारिंशः२ अष्टचत्वारिंशः३ - इति त्रयस्तोमाः व्यवस्थिताः। इत्थं सङ्कलनया नवस्तोमाः, तथाचाद्यादिपदात् सप्तदशादेर्ग्रहः।

अथ षष्ठे खण्डे—

सेयं प्रथमा।

विश्वामित्र ऋषिः।

१ १२ २२ ३ १ २
इदꣳह्यन्वोजसासुतꣳराधानाम्पते।

३ २ १ २
पिबात्वा३स्यगिर्वणः॥ १॥ ५१

५ ५ २ १२ १ २ १ २
I इदा६म। ह्यिया३नूओ१जासा२। सुतꣳराधा।

१ २ १ २ ७ ७ २ ७ २
नाम्पा१ता२इ। पिबातुवस्यागिर्वाणा२३४ः। पिवा३४तुवा३।

१ ३ ५ २ ३ ५
स्या२गा२३४ओहोवा। वा२३४णाः॥ १०॥

हे "राधानां" धनानां (१) "पते"! "गिर्वणः"(२) गीर्भिः स्तुतिभिर्वननीय! इन्द्र! "ओजसा" बलेनोपहितस्त्वं "इदम्"(३)

५१ उत्तरार्चिकस्य १,२,६,१। २६
I आङ्गिरसं माधुच्छन्दसं वा।

(१)—'राधः' इति निघण्टौ धन नामसु अष्टादश पदम (२.१०)।

(२)—गिर्वणम् इति मान्तः शब्दः। "गिर्वणा देवा भवन्ति गीर्भिर्वन वनयन्ति। 'जुष्टं गिर्वणसे हवत्'-इत्यपि निगमो भवति" इति नैरुक्तम्. ६.६,१६।

(३)—'नपुंसकलिङ्गं व्यत्ययेन' इति वि०. तथाच इदम् इममित्यर्थः। सायण-मते स्वयं 'सुपां सुलुगित्यादिना तृतीयाया लुकि रूपम्'

५ ५ ३ २ ५ १ २
II इ॒न्द्र॒ण्हिया४ओ३हो। नू३ओजा२३४सा। सु॒त॒ण्-
१ २ ३ २ ५ १ २ ५
राधा। ना३२म्। पा२३४ताइ। पिबातुवस्या२३। ग।
५ १ ५२ ५ ५
वाच्चाइ। वा२३४णाः। एच्चिया६च्चा। हो५इ।
डा॥ ११॥

५ ५२ २ १ २ १ २२
III इ॒द॒ण्ह्यनू६ओजसा। सुत॒ण्राधा। नाम्यातो।
२ १ १ २ १ २२ २ २
हो३वा२च्चाइ। पिबातुव। स्यगाइर्वाणो। हो३वा२च्चाइ।
१ २ २ १ २ १ ३ ५२
पिबातुवो। हो३वा२च्चा। स्यगायेः। वा२ना२३४ओ-
२ २ ३ १ १ १ १
हो३वा। घृतस्यता२३४५॥ १२॥ ५१

अनु" अनेनानुक्रमेणेत्यर्थः "ओजसा" बलेन ग्रावभिः(४) "सुतम्" अभिष्टुतं "अस्य"(५) इमं सोमं "तु" क्षिप्रं "पिब"(६) हि"(७) ॥ १ ॥ ५१

II आङ्गिरसं क्रौञ्च वा।

III आङ्गिरसं घृतस्यन्निधनम् प्राजापत्यं माधुच्छन्दसं वा।

(४) "ग्रावविशेषैरित्यर्थः। इह निरुक्तम् "ग्रावाणो ह्यनेवो ग्रहणाद्वातेर्वा ग्रहणाद्वातेर्वा" इत्यादि तदत्र ग्रहणान्तरवोपयोगः।

(५) —"अस्य पदो निर्देशात् एकदेशमित्यर्थः" इति वि०।

(६) —"क्वचि पिबा इति ह्यच इति दीर्घः।

(७) —"हि' अनु द्वावपि पादपूरणौ।

अथ द्वितीया।

मधुच्छन्दा ऋषिः।

३१र २र ३१२ ३१२ ३१२
मह्ाइन्द्र पुरश्चनो* मह्त्वमस्यवज्रिणे।
१र २र ३१र २र
द्यौर्न प्रथिनाशवः ॥ २ ॥ ५२

I ४ ५ २ १ ३ १
मह्ाइन्द्राः। पुरश्चनो। मा१हो२त्वामा२।
१ १ १र ०
स्तुव। ज्रिणाइ। द्यौ२र्नाप्रा२। थिनाशा२३वा३४३।
१
ओ२३४५इ। डा ॥ १३ ॥

II ५ ५ ४ ५ ३ १ ३ १ ४
माहाहाइन्द्राः। पु३राश्चा३नो। मह्ा२त्वा२
५ २र ५ २र
३४मा। स्तुवी३हो३। ह्वा५ज्रिणाइ। द्यौर्नप्र।

अयम् "इन्द्रः" "महान्" शरीरेण प्रीतः "परश्च" गुणैः

* "पुरश्चनो"-इति पाठः क० ख० ए० क० ग० ख० घ० इति षट्सु, विवरणसम्मतश्च। "परश्च नु" इति भाष्यसम्मतः पाठः, नान्यत्र क्वचिदपि।

४८क,

२ १ ७ ५ ० ३६ २ ४ ५
थिनाग्नवा२३ः। द्यौर्नो२३४प्रा। थिनौ३द्यौ३। द्यवोवा।
४ ५
ग्नाप्रवोद्द्याइ ॥ १४ ॥

४ २ ४ ३ २ २
III मद्दा इन्द्रा५ पुरश्चनाः। माद्दित्वा३२३२३मा।
८ २ १५ २ २ २ १२ ३ २
स्तुवद्या३२३२३द्दणाइ। द्यौर्ना३२३२३प्रा। थिनाग्नवा-
१
३२३४३ः। ओ२३४५इ। डा ॥ १५ ॥ ५२

नृष्टः, किञ्च "वज्रिणे" वज्रयुक्ताय "मद्दित्वं" पूर्वोक्तं त्रिविधमाधिक्यम् सर्वदा "अस्तु" [स्वभाव-सिद्धस्यापि भक्त्या प्रार्थनमेतत्।] किञ्च "द्यौर्न" द्युलोकइव "ग्नवः" बलम्(१) इन्द्रस्य मेनारूपं "प्रथिना" पृथुत्वेन पुत्यताम्--इति शेषः(२) [यथा द्युलोकः प्रभूतः एवमस्य सेना प्रभूतास्तु]। "नु"-शब्दो यद्यपि

I,II,III वास्त्राणि, प्रैयमेधानि वा वैयश्वानि वा आश्वानि वा उद्गातृदमनानि वा।

(१) -'ग्नवः'-इति निघण्टौ बलनामसु चतुर्थम् २.७।
(२) -'अस्त्वित्यनुषज्यते' इति वि०।

अथ हतोया।

कुमोदो काण्व ऋषिः।

१र २र ३ १ २ ३ १ ३ १र २र
आतूनइन्द्र क्षुमन्तञ्चित्रं ग्राभ(ं)सङ्भाय।
३ १र २र
महाहस्तीदक्षिणेन ॥ ३ ॥ ५३

चित्र-नामसु(३) नु-मक्षित्यादिषु पठितः(४) तथापि तदर्थत्वाम-म्नवात् समुच्चयार्थोऽत्र गृह्यते(५)॥ न शब्दो लोके प्रतिषेधार्थ एव, स्वाध्याये तु प्रतिषेधार्थ उपमार्थश्चेति द्विविधः; यत्र पदे नान्वीयते, तस्मात् पूर्वं प्रयुज्यमानः प्रतिषेधार्थः, उपरिष्टात् प्रयुज्यमान उपमार्थः; तथाच यास्क उदाहरति "उभयमन्वध्यायं नेन्द्रं देवममंसतेति प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत् प्रतिषेधति, दुर्मदासो न सुरायामिल्युपमार्थीय उपरिष्टादुप चारस्तस्य येनोपमिमीते(१,२,६,)" इति। अत्रोपमा वाचिनो यु-शब्दस्योपरि-प्रयुक्तत्वादुपमार्थः स्वीकृतः ॥ २ ॥ ५२

५३ उत्तरार्चिकस्य १.२.६.१ । २ ।

(३) "चित्र नामान्युत्तराणि षड्भवन्ति चित्र कस्मात् / मङ्क्षिप्रमिति वा" इति निरुक्तम् ७,२.१० ।

(४) नियमोर्द्वितीयाध्यायीय चतुर्दशखण्डादनन्तरम् ।

(५) आर्ष्यमेतत् ? क्वापि मन्त्रे 'नु' इति। विवरणकृता तु यथाश्रुतस्य 'नः' इत्यस्य विवरणं पादपूरणार्थमित्युक्तम्। पदपाठस्तु खलु न... मक्षि इत्येव केवलः श्रूयते, तथाच नः मक्षित्यस्य खलु इत्येतादृशेऽर्थे कोऽपि वादः इत्यपि न गम्यते ।

५ र र २ १ २ १ २ र १
। आतूनआ। द्रक्षुमा२३क्षाम्। चाइत्रंग्राभा२३ष्-
२ १ १ २ र ३ ५ १
क्षाइ। संगृ२भाया। महाहस्तो२३४क्षाइ। दक्षा२३इ-
१ १ ३ ५ र र १ २
णाइना। माक्षा२३। क्षा२स्तो२३४औक्षोवा। दक्षिणे
३ना२३४५॥ १६॥

५ र र ४ ५ १ ३ ५
॥ आतूनइंद्रक्षुमान्ताम्। चित्रा२ङ्गा२३४भाम्।
३ ३ ५ १ २ १ ३ ५ र र
सङ्गभा२३४या। माउक्षा३। क्षा२स्ता२३४औक्षोवा।
१ २ र ३ १ १ १ १
दक्षिणेना२३४५॥ १७॥

हे "इन्द्र"। "महाहस्तो"(१) महाहस्तवान् त्वम् "तु"(२) तदानीमिव "नः" अस्मभ्यं दातुं "क्षुमन्तं" शब्दवन्तं स्तुत्यमि-

I, II गौरोवितेः।

(१) —महांश्चासौ हस्तश्च महाहस्तः, तस्मादिदं तृतीयैकवचनम्, तस्य "इयाडियाजीकाराणामुपसङ्ख्यानम् ३.१.३९।"-इतीकारादेशः महता हस्तेनेत्यर्थः।

(२) क्वचित् तृ इति "क्वचित् तु नु घ मक्षु-तङ् कु चोरुष्याणाम् (६,३,१३३)"-सूत्रेण दीर्घः।

४र र५ ४ ५ ५ २ १र
III आतूनइ। द्रुत्तुमाइन्ताम्। चित्रंग्राभ॰मङ्गभा२
१ २ १र २ २ ३ ५ २र १
या। चित्रंग्राभ॰सम्। गृ। औ३च्होइ। भा२३४या। ऐच्होइ।
र र १ २र १ ३र ५ ४
महाहस्तोदत्ता२३च्होइ। औच्हो। वाच्हो२३४वा। णा५इनो
५
६च्हाइ॥ १८॥

५र र ५ २ १र र
II आतूनइन्द्रुत्तुमाइन्ताम्। चित्रंग्राभ॰मङ्गभाया।
२ १र ३ ५ ३ ५
चित्रङ्गाभ॰सम। गृ२३। ई३४च्हा। भा२३४या।
२र १ र र २ १ ३१
ऐच्होइ। महाहस्तोदत्ता२३च्होइ। औच्हो। वाच्हो२३-
५ ४ ४ ५
४वा। णा५इनोइच्हाइ॥ १८॥ ५३

त्यर्थः "चित्रं" चायनीयं "ग्राभं"(३) ग्राहकं [ग्रहणार्हं वा] धनं "दक्षिणेन" हस्तेन "आ मङ्गभाय"(४) आभिमुख्येन मङ्गहाण॥ ३॥ ५३

III,IV आपालवैगर्वे, वैगर्वे वा आपालि वा आकृपारेवा पारवते वा।

(३) - च्छपच्होरिति भक्तं रूपम। अभिपवादिभि॰ मस्कारैः मस्कृतमित्यर्थः।
(४) - छन्दसि गायजपि (३,५,८४) इति गायत्रः। च्छपच्होरिति भक्तम।

अथ चतुर्थी।

प्रियमेध ऋषिः।

३ १र २र ३ १ २ ३ १ २ ३ २
अभिप्रगोपतिङ्गिरेन्द्रमर्चयथाविदे।

३ २ ३ २ ३ १ २
स्तनुं(१)मत्यस्यसत्पतिम् ॥ ४ ॥ ५४

४ ५ ४ ५ २ र ३ १र ३ १ २
I अभो अभो। प्रगोऽपातिङ्गिरा२। इन्द्रमर्चयाथा

१ २ र १ ३ ४ १ २
१विदा२इ। स्तनूऽ(१)च्हाइ। सात्या२३४च्हा। स्या२मा

४र र २ १ १ १ १ १
२३४औच्होवा। पतोऽमे२३४५ ॥ २० ॥

४ ५ ४ ५ २ १ ३ २ १
II अभो अभो। प्रगो। पतिङ्गिरा। इन्द्राम्।

"गोपतिं" गवां(१) स्वामिनम् "इन्द्रम्" "अभि अर्च(२)"

५४ उत्तरार्चिकस्य ७,१,१,१। २८

I,II धुरोः सामनी।

(१) "गोशब्दो नाम सोम उच्यते" इति वि०।

(२) "मध्यम पुरुषैकवचनमिदमुत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्, लोट् लडर्थे। "अर्च्च" आभिमुख्येन स्तौमीत्यर्थः" इति वि०।

२ २ ३ ५ १ ३ २ १ ४ ३
अर्चाया२३४था। ऊं३ऊ३म्। आ२३४इविदाइ। स्हनु

४ ३ ४ ५ १ ३ २ १ ५ ४
मत्यस्यसा। ऊं३ऊ३म्। ओ२३४वा। पापु। तोई

५
ह्वाइ॥ ३१॥

५ ३ २ ४ ५ १ २
III अभि। प्रगोइ३। पतिं गिरा। इन्द्रमर्चयथावि-

१ २ ४ १
दा२३ई। स्हनु॰सत्या३१२३। स्यमापुत्यतायिम्। स्हनु॰

२ ४ ५ ४ ५
सत्या३१२३। स्य सावा। पापु। तोईह्वाइ॥ ३२॥ ५४

"गिरा" स्तुत्या प्रकर्षेण पूजय "यथा विदे"[३] स यथा स्वात्मानं स्तुतप्रकारं जानाति यथा वा यागं प्रति गन्तव्यमिति जानाति तथाऽर्चेति। कीदृशमिन्द्रम्? "सत्यस्य" यज्ञस्य "सनुम्" पुत्रं[४] [तत्तानुरक्तत्वात् सनुरित्युपचर्यते] "सत्पतिं" सतां यजमानानां पालकम्॥ ४॥ ५४

III महागौरीवितम् गौरीवितं वा।

(३) "कथं पुनः स्तौमि" "यथाविदे यथा जानासीत्यर्थः" इति वि०।

(४) कथमस्य सनुः सत्यस्यपुत्रः? उच्यते "वैदिक्य लक्षण ब्रह्म सत्य तत्र ब्रह्म-नामकेन

अथ पञ्चमी।

वामदेव ऋषिः।

१ २ ३ १र २र ३ २ ३ १ २३ १ २
कयानश्चित्रआभुवदूतीसदावृधःसखा।

३ १ २ ३ २
कयाशचिष्ठयावृता॥ ५॥ ५५

५ र २ १ २ ३ र १ २ १
I कयानश्चो। चित्रआभू३वात्। ऊताइम। दा।

० ३ ४ १ २ ३ १ ४ २
वाद्वः सा२३४खा। कयाशा३चो३। ष्ठा२३या३। वा

५
३४५र्त्ताइ६ह्वाइ॥ २२॥

५र र र १र र २ १ ३ २ ५र र
II ह्वावोइ। होवाइकयानश्चित्रआभू३वा३४त्। होवाइ।

"सदावृधः" सर्वदा वर्द्धमानः "चित्रः" चायनीयः(१) "सखा"

५५ उत्तरार्चिकस्य १,१,१२,१। २९
I,II वाचः सामनी।

ऋत्विजा यानि हवींषि ह्रियन्ते तैर्जन्यते यस्मात्, तस्मात् सत्यस्य मूनुः। अथवा सत्यमन्नं ह्रावोलक्षणेन तेन सङ्गाथते आख्यायते वा, तस्मात् सत्यस्य मूनुः'-इति वि०।

(१) 'चित्रः विचित्रः पूज्यो वा' इति वि०।

र र र र २ १ २ २ ५र र ५र र
हावाऊतीसदा। वृधाः साऽखा३४। हीवाइ। हीवाइ।

र २ १र ३ ५र र ७
कयाशचाइ। ष्टया। वाऽर्त्ताऽ३४औहीवा। ऊऽ३-

५
४पा॥ २४॥

३ र ५ ७ ५र ५ १ र २ १र
।।। काऽ५या। नश्चाऽइत्राऽआभुवात्। ऊ। तीसदाइ-

२ १ ७ र ७ १ २ २
धःस। खा। औऽ हो हाइ। कयाऽ३शचाइ। ष्ट

र २ १ ७
यौ हो३। ऊम्मा२। वाऽ२। र्त्तो३५हाइ॥ २५॥ ५५

मित्रभूतः इन्द्रः "कया" "ऊतो"(२) ऊत्या तर्पणेन "नः" अस्मान् "आ भुवत्"(३) आभिमुख्येन भवेत् "शचिष्ठया" प्रज्ञावत्तमया(४) प्रज्ञासहित मनुष्टीयमानेन "कया वृता" केन वर्त्तनेन कर्मणा च अभिमुखो भवेत्॥ ५॥ ५५

।।। महावामदेव्यं वामदेव्यं वा।

(२) "सुपां सुलुगित्यादिना ७.१.३९ पूर्वसवर्णदीर्घः।

(३) लेटो रूपम्।

(४) "शची" इति निघण्टौ प्रज्ञानामसु पठितम् ३.९। "शचीति कर्म नाम

अथ षष्ठी।

शुतकक्ष ऋषिः।

१ २ ३ २ ३ १ २ ३ १ २
त्यमुवःसत्रासाहंविश्वासुगोर्ष्वायतम्।

१ २ ३ १ २
आच्यावयस्यूतये ॥ ६ ॥ ५६

५ २ ३ १ १ २ ३ ४ २
I त्यमुवाः। सत्रासाहा२म्। विश्वासुगोर्पू आ१या-

१२ १ ३ ५२ ३ २
ताम्। आच्या२३। वा२या२३४औ। होवा। सि-

१ १ १ १ १
यूऽत। ये२३४५ ॥ २६ ॥

यजमानः स्तोतारं सम्बोध्याह(१)—हे स्तोतः! "सत्रासाहं" [सत्रा शब्दो बहु-वाची(२)] बहूनामभिभवितारं [यद्वा शत्रून् स्व-

---

५६ उत्तरार्चिकस्य ८,१,१०,१—ऋग्वेदस्य ६,६.१६,२—जरहगानस्य १२,२,४।

(नि०२,१,२२)अतिशयेन शचीः. शचिश्रा, तया शचिश्रया. अतिशय-कर्मवत्या यागक्रिय येत्यर्थः'-इति वि०।

(१)—'अतकक्षः पुत्रशोकमाहं'-इति वि०।

(२)—निघण्टौ द्वादश पदानि बहुवाचकानि पठितानि।२,१। न तत्र सत्रेत्युपलभ्यते।

२ ५ र ४र ५ ५ १ र
II त्या३४म्। उवःसत्रासाह्म्। ओ६वा। विश्वा-

र र १ १ २ १ ५ २र
सुगीर्षाया२ताम्। आ२च्या। वा२३या। मियौ३ह्वो।

१र २ १ ५ ५
वाह्वा३४३ह्। ता२३४योह्वाह्॥ २७॥ ५६

बलेन सङ्गत्य जेतारं(१)] "वः" युष्मदीयेषु "विश्वासु गीर्षु"(४) सर्वेषु स्तोत्रेषु "आयतं"(५) विस्तृतं |सर्वत्रेन्द्र एव स्तूयते तस्मात् तेषु वितनम्] "त्यम् उ" |'उ'-इत्यवधारणे| तमेवेन्द्रम् "ऊतये" अस्मद्रक्षणाय "आह्वयामि" |ह्वेञ्, ह्वृङ्, ह्वृञ्-गतौ (भ्वा०आ०)] स्वदीयैः स्तोत्रैः यज्ञं प्रति आभिमुख्येन गमय॥ ६ ॥५६

I,II इन्द्रस्य सत्रासाह्वीये, अजितस्य आजित्तो वा।

(१)—'सत्रा शब्दः सत्य-वचनः (नि०३,१०,७ मदा शब्दपर्यायो वा। सह्वि अभिभवे मर्षणे च (भ्वा० आ०), अत्र सह्वि अभिभवार्थः। सत्येन सर्वदा वा शत्रूणामभि भवितारम्'-इति वि०।

(४)—'सप्तमी-बहुवचनमिदं तृतीया-बहुवचनस्य स्थाने द्रष्टव्यम्। विश्वाभि गीर्भि. सर्वाभिः ऋग्यजुःसाम-लक्षणाभि वाग्भिरित्यर्थ'—इति वि०

(५)—'आयत निवद्धं श्रुतमित्यर्थ' इति वि०

अथ सप्तमी

मेधातिथि ऋषिः।

१ २ ३ २ ३ १ २ ७ १ २ २ ३ १ २
मदमस्यतिमङ्गनमिय्रियमिन्द्रस्यकाम्यम्।
७ २ ३ १ १
सनिंमेधामयासिषम् ॥ ७ ॥ ५७

४ ५ १ ७ २ ३ ५ ५ २ ७
[सादा। मस्यताइमङ्गता। ओ२३४वा। प्राया ओ-
५ १ १ २ ३ २१ २
२३४वा। आइन्द्रा। स्याकामा२३४५याई५६म्। सनिम्मे-
६ १२ २२ ३ १ १ १ १
२धामयासिषा२३४५म् ॥ २८ ॥ ५७

"मेधां" लब्धुं "मदमस्यति"(१) एतन्नामकं देवम्(२) "अया-मिषम्" प्राप्तवानस्मि। कीदृशम्? "अङ्गतम्" आश्रयंकरम् "इन्द्रस्य प्रियम्" [सोम पाने सहचारित्वात्] "काम्यम्" कम-नीयं "सनिं"(३) धनस्य दातारम्(४) ॥ ७ ॥ ५७

५७ ऋग्वेदस्य १.१.३५.१।

। वामदेव्यम्।

(१) "षष्ठ्याः पति पुत्र" इत्यादिना ८.३.५३ सत्वम्।

(२) नैघण्टुके दैवत-काण्डे ऽपरिगणितम्।

(३) "कृदभि वनेत्यादिना ३.२.७१ इन्।

(४) "मदमस्यति" सदोनाम-यज्ञगृह-स्वामिनम् "अङ्गतं" महान्तम् "काम्यं" कमनीय

अथाष्टमी।

वामदेव ऋषिः।

२ ३ १ २ ३ २ २ ३ २ ३ क्र २१ ३ १ २
येनेपन्थाअधोदिवोयेभिर्व्यश्व*मैरयः।
२ १ २ ३ १ २
उतश्रोषन्तुनोभुवः॥ ८॥ ५८

२ ३ ५ २ ३ ५
I ह्वाइ। आप्सदा२३४त्ताः। आप्सदा२३४त्ताः।
२ २ २ १ ७ १ १ १ १ २ ३ ५
येनेपन्थाआ३धोदिवा२३४५ः। ह्वाइ। आप्सदा२३४त्ताः।
२ २ १ ७ १ १ १ १ ३ २ ३ ५
येभिर्व्यश्वा३माइरया२३४५ः। ह्वाइ। उताश्रो२३४षा।
२ १ १ ३ ५ २ ३ ५
तुनो२३। भूरवा२३४श्रौहोवा। ई२३४तो॥ २८॥ ५८

हे इन्द्र! "दिवः" द्युलोकस्य "अधः" अधस्तात् "ये"

* "विश्वम्" एष पाठो भाष्य मात्र सम्मतः। "व्यश्वम्"-इति पाठस्तु सङ्गृहीत-समस्त पुस्तकानाम्।

विवरणकारस्य सम्मतश्च एव, तथाच-व्यश्वम् वेगिनाश्वं क्षीप्रं मित्यर्थः इति तद्-विवरणम्।

I अश्विनोः साम।

'प्रिय' षष्ठ्यन्तम्, इन्द्रं, 'मनि गो', 'मेधां' प्रज्ञाम् 'जयामियम्' याचे—एयोर्ज्या विवरण-सम्मतः।

अथ नवमी।

सुतकक्ष ऋषिः*।

२ १ २ ६ २ ३ २३१२
भद्रमभद्रन्नआभरेषमूर्जꣳशतक्रतो।
१२ ३ १२
यद्दिन्द्रमृडयासिनः॥ ९॥ ५९

"पन्याः"(१) पन्थानः मार्गाः सन्ति, "येभिः"(२) यैर्मार्गैः, "विश्वं" सर्वं जगत् "ऐरयः" प्राप्तवानसि, ते मार्गाः यजमानैः स्तूयन्तामिति शेषः। "उत" अपिच "नः" अस्मदीयाः "भुवः"(३) भूमीः निवास-स्थानानि "श्रोषन्तु"(४) यजमानाः त्वदनुग्रहाच्छृण्वन्तु(५)॥ ८॥ ५८

* 'सुकक्षस्यार्षम्'-इति वि०।

५९ ऋग्वेदस्य ६,६,२६,३।

(१) -'एकवचनमिदं बहुवचनार्थे भवति'-इति वि०।

(२) -भिसऐस्भ्यस्छन्दसि बाहुल्येन भवति (७,१,१०)।

(३) —"छन्दस्युभयथा (३,४,८६)" इत्युवङ्।

(४) लेटि सिप्पक्षे (३,४,३४)-रूपम्।

(५)—'यं' 'नं' तव सम्बन्धिनः 'पन्थाः' पन्थानः 'दिवः' अधः' अन्तरीक्ष-लोके 'येभिः' यैः पथिभिः 'विश्वं' शीघ्रम् 'ऐरयः' आगतवानसि। 'उत' अपिच नै रेत्य 'भुवः' अवयवे वेदाख्य-प्रदेशे 'नः' अस्माकं स्तुतीः 'श्रोषन्' शृणोतु भवान्—इत्ययमर्थो विवरण-सम्मतः।

५ ४ ५ २ १र २ ४ ५ ४ ५
I भद्रम्भाद्राम्। नआभा२३रा३। आइषामूर्जाम्।

२ १ २ ४ ५ ४ ५ १ ३ ५र र
शतक्रा२३ता३उ। यादिन्द्रामृ। डा२या२३४औद्दोवा।

३ ५
सो२३४नाः ॥ ३० ॥ ५८

हे "शतक्रतो" शत-विध-कर्मन्! [शत प्रज्ञ! वा] "इन्द्र"! "भद्रं भद्रं" कल्याणतमं(१) [सुखोत्पादकं वा] धनं "नः" अस्मभ्यम् "आभर"(२) सम्पादय देहि, तथा "इषम् ऊर्जम्"(३) अन्नरसं [यद्वा बलवदन्नं(४) देहि], "नः" अस्मान् "यदृ"(५) यदि "मृडयासि" सुखयसि तर्हि धनादिकं देहीति [मृड सुखने (क्या० प०)] तस्य लेटि अङ्गस्याडागमः(६) ॥ ८ ॥ ५८

I गोतमस्य भद्रम्।

(१)—अभ्यासेनातिशय्य लक्ष्यते।

(२)—हरतेर्भर्ते रूपम् आहरत्यर्थः।

(३)—'इषम्', 'ऊर्जम्' इ अर्थेन अन्ननामनी (नि०२.७.१७ - १८, अतः पौनरुक्त्यप्रसङ्गात् ऊर्जशब्दोऽत्र रस-वचनो ग्राह्यः अन्नस्य रसस्त्वर्थः इति वि०।

(४)—'ऊर्ग्' इति निघण्टौ बल-नामसु एकविंशतितमम् ९.९।

(५)—'यत' तनोतेर्या अत्र लुक्, येन अन्नेन रसेन च 'मृडयसि' सर्वदा सुखयसि, जीवयसीत्यर्थः—इति वि०।

(६)—"लेटोऽडाटौ (३.४.९४)"।

अथ दशमी।

विन्दु ऋषिः*।

२ ३ १ २ ३ २ ३१२ २२ ३१२
अस्तिसोमोअयꣳसुतःपिबन्त्यस्यमरुतः।
३ २ ३१२ ३ १ २
उतस्वराजोअश्विना ॥ १० ॥ ६०

॥ इति तृतीय-दशतिः ॥

३ ४ ३२ ४२ ३ ४ ३ ४ ५ ३२ ४२
I अस्तिसोमोअयꣳसुतः। अ। स्येआस्ती। सोमो-
३ ४ ३ ४ ५ ३ ५ ४ ४
अयꣳसुतःपिबन्त्यस्यम। रुतो२३४हाइ। उतस्वरा५जो-
५ ४ ५
वा। श्वा५इनो६हाइ॥ ३१ ॥ ६०

"अयं" पुरोवर्त्ती "सोमः" "सुतः" मरुद्भ्यमस्माभि रभिषुतः "अस्ति" विद्यते, तस्मात् "अस्य" अन्वादेशे एनं सुतं सोमं "स्वराजः" स्वयं दीप्यमानाः स्व-तेजसा नान्यदीयेनेत्यर्थः, तादृशाः

* 'पूतक्रतस्य सुक्रतस्य वा इदमार्षम्'-इति वि०।

६० उत्तरार्चिकस्य ९,१,८,१—ऋग्वेदस्य ६,६,२८,४।

I अश्विनोःसाम, सांस साम वा।

"मरुतः" प्रातः(१) "पिबन्ति"(२); "उत" अपित्व "अश्विना"(३)
अश्विनौ च सोमं प्रातः सवने पिबतः ॥ १० ॥ ६०

इति सायणाचार्य्य विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोग्याख्याने
द्वितीयाध्यातस्य पञ्चमः खण्डः ॥ ६ ॥

अथ सप्तमे खण्डे--

मैषा प्रथमा ।

इन्द्रमातरो देवजामय ऋषिकाः ।

३ १ २ ३ २३ १ २ ३ १ २४
ईङ्खयन्तीरपस्युवइन्द्रञ्जातमुपासते ।
३ १ २ ३ १ २
वन्वानाम:सुवीर्यम् ॥ १ ॥ ६१

६१ ऋग्वेदस्य ८,८,११,१ ।

(१)—प्रातरिति न जाने कुतोलब्धः ।

(२) —'लडर्थे लोडर्थे द्रष्टव्यः. पिबन्तु' इति वि० ।

(३)—"अथातो युज्यानां देवता सामा मस्विनोऽश्वावश्विन्यावित्येके अहोरात्रौ वित्येके, सूर्याचन्द्रमसावित्येके, राजानौ पुण्यकृतावित्यैतिहासिका" इत्यादि नैरुक्तम् १२,१,१ --२ ।

५र २ १ १ २र
I ईङ्खयन्तीः। अपा२स्यूवा२ः। आइन्द्रञ्जातम्।
१ २ १र २ १ २
ऊपा१साना२इ। वन्वाना२३साः। सुवीरिया३१उवा२३।
२
वृधे१॥ ३२ ॥ ६१

"ईङ्खयन्तीः"(१) गच्छन्त्यः स्तुत्यादिभिः इन्द्रं प्राप्नुवन्त्यः "अपस्युवः" अपः कर्मात्मन इच्छन्त्यः इन्द्रमातरः अस्य सूक्तस्य द्रष्ट्र्यः(२) "जातं" प्रादुर्भूतं तम् "इन्द्रम्" "उपासते"(३) परिचरन्ति, "सुवीर्यं" शोभन-वीर्योपेतं धनं च "वन्वानासः"(४) तस्मात् इन्द्रात् सम्भक्तवत्यो भवन्ति॥

"वन्वानासः"-"भेजानासः"-इति पाठो॥ १॥ ६१

I त्वाष्ट्रसाम। "त्वाष्ट्री"-इति च पाठः।

(१) -'ईङ्खते' इति गतिकर्मसु अशीतितमम निघ०२,१४।

(२) -'स्तुतयः'-इति वि०।

(३) 'उपगम्य इन्द्रं तस्यैव समीपे च्यवनिष्ठत्व इत्यर्थः'-इति वि०।

(४) -'वनु, याचने इत्यस्येदं रूपम। याचमाना उच्यन्ते। किं याचमानाः? उच्यते—तस्यैवेन्द्रस्य शोभनं वीर्यम्'-इति वि०।

अथ द्वितीया।

गोधा ऋषिः।

१ २ ३।१र २र
नकिर्देवा*इनीमसिनक्या।योपयामसि।
३ १ २
मन्त्रश्रुत्यं॑चरामसि ॥ २ ॥ ६२

५ र २।१ २ १ ऽ २
I नकिर्देवाः। इनाइ। इनोमामाऽइ। मासोऽया।
५ र २।१ २ १ ऽ २ ५
नकियायो। पया। पयामामाऽइ। मासोऽया। मन्त्र-
२।१ २ १ ऽ २
श्रुत्याम्। चरा। चरामासाऽइ। मामीऽया ॥ ३३ ॥ ६२

हे "देवाः" इन्द्रादयः। यूयम् विषये "न किं(१) इनोमसि" न किमपि हिंस्माः(२) [मीङ् हिंसायां, क्र्यादिकः "मीनाति

---

६२ ऋग्वेदस्य ८,७,२२,७।

* "नकिर्देवा"-इति, "नकिरायो" इतिच ऋग्वेद-पाठः।

"मन्त्रश्रुत्यम्" इति आद्यनदात्त अन्तोदात्तस्य ऋग्वेद-पाठः।

I गोधासाम।

(१)—'नेति प्रतिषेधे, कीति निपातोऽनर्थकः' इति वि०।

(२)—'इ देवाः न इनोमसि, प्राणि-वध कर्म यज्ञादि याग न कुर्म इत्यर्थः' -इति वि०।

अथ तृतीया।

दध्यङ्ङाथर्वण ऋषिः*। ३ १र २र ३ १ २ ३१

दोषोआगाद्बृहद्गायद्युमद्गामन्नाथर्वण। ३ २३१ २ ३१२

स्तृहिदेवꣳसवितारम् ॥ ३ ॥ ६३

I ४र५र र ४ २१र २ १र

दोषोआगात्। बृहद्गाया। द्युमद्गा२मान्। आथ-

र्निगमे (७,३,८१पा०)" इति ह्रस्वः, "इदन्तोममि (७,१,४६ पा०)" मकार-लोपश्छान्दसः। आकारः समुच्चये।] "न किं" न च "योषयाममि" योषयामः(३) अननुष्ठानेन [अन्यथानुष्ठानेन वा] मोहयामः [युप विमोहने (चु०प०)]। किन्तर्हि? "मन्त्रश्रुत्यं" मन्त्रेण स्मार्यं श्रुतौ विधिवाक्य-प्रतिपाद्यं यद् युष्मद्विषयं कर्म(४) तत् "चरामसि" आचरामः(५) अनुतिष्ठामः॥

"दूनीमसि" "मिनीममि"-इति च पाठौ॥ २ ॥ ६२

---

* 'वामदेवस्यार्षम्'-इति वि०-पाठः।

I सवितुः साम।

(३)—दह निखननार्थे द्रष्टव्यः; सुप-निखननमपि न कुर्मः, दक्षौषध्यादि-हिंसा-मपि न कुर्मः इति वि०।

(४)—'जपात्मम्'-इति वि०।

(५)—'प्राणि वधं न कुर्मः, जपमेव कुर्म इत्यर्थः। उक्तञ्च—"जप्येनैव तु संसिद्धे द

३ २ २ १ ६ २ ६र २ ४ ५
वर्णाऽ। स्तुहि। औऽहोऽ३४इ। देवाऽम्। सवोवा।
४ ५
ताप्रोऽहाइ ॥ ३४ ॥ ६३

हे "बृहद्गाय"(१) बृहदाख्यस्य मान्त्रो गातः! "द्युमद्गामन्"(२) दीप्त-गमन! "आथर्वण"(३) अथर्वऋषेरपत्य।(४) [ऋषिः स्वात्मानमेवामन्त्रयते] त्वं "दोषः"(५) ऋत्विग्यजमानापराधेन यः कश्चिद् दोषः "आगात्" आगच्छति तत्परिहारार्थं "सवितारं"(६) प्रेरकम् एतन्नामकं "देवं" "स्तुहि"। [यद्वा "दोषः" दूषयति नाशयति तमांसीति, दुनोति उपतपति रक्षांसीति वा दोषः, सः सविता "आगात्", अतो हे "आथर्वण!" "बृहत्" स्तोत्रं "गाय"। तथा "गामन्" गायतीति गामा हे एवं विध! स्वात्मन्! "द्युमत्" दीप्तिमदन्यत् स्तोत्रम् उप गाय। शिष्टं(७) पुनरादरार्थम् ॥ ३ ॥ ६३

ब्राह्मणो नास्य संशयः। कुर्याद्वान्यन्न वा कुर्यादाक्रोशो ब्राह्मण उच्यते (मनु०२च०)" -इति'-इति वि०।

(१)—'गाय उच्चारय'-इति वि०।

(२)—'द्युमतां स्वर-सौष्ठव-युक्तानां मान्त्रां गामन गातः, -इत्यर्थो वि० सम्मत।

(३)—थर्वति गत्यर्थः, थर्वा गन्ता, न थर्वा अथर्वत्युच्यते, तस्यायं स्तोता स्वभूतः तेन स आथर्वणः, तस्य सम्बोधनं हे आथर्वण! सम वामदेवस्य स्वभूत! इत्यर्थः' इति वि०।

(४)—"अथर्वाणोऽथनवन्तश्चर्वतियरतिकर्मा तस्य प्रतिषेधः" इत्यादि नै०११,१८।

(५) 'दोषा रात्रिः, उ इति पदपूरणः'-इति वि०। पदकारस्त्वेव मन्त्र विच्छेद- 'दोषा. उ'-इति।

(६)—'सविता सर्वस्य प्रसविता'-इत्यादि नै०१०,६१। 'सवितृ देवत्यञ्च यजुः' -इति वि०-ध्वनिः।

(७)—शेषमर्चम्।

अथ चतुर्थी।

प्रस्कण्व ऋषिः।

३२ ३१र २र क २र ३२ ३ २
एषोउषाअपूर्व्याव्युच्छतिप्रियादिवः।

३ १२ ३२
स्तुषेवामश्विनाबृहत् ॥ ४ ॥* ६४

I

४र र १ र२ र १ २ १ २ २
I एषोउषाः। आपूर्विया। व्युच्छति। होवाऽहाइ।

१र २ ३ २ ३र २ २ १ ५
प्रियादा२३इवा३४ः। स्तुषा३४इवामाऽ। श्विनो२३४वा।

४ ५
बृ५हो६हाइ ॥ ३५ ॥

"एषः"(१) एषैव अस्माभिः परिदृश्यमाना "प्रिया" सर्वेषां प्रीतिहेतुः "अपूर्व्या"(२) पूर्वेषु मध्यरात्रादिकालेषु विद्यमाना न

---

६४ उत्तरार्चिकस्य ८,३,७,१—ऋग्वेदस्य १,३,२३,५।

I उषस साम।

(१)- 'एषा, उ, उषाः' इति पदकारः। विवरणकारेण च तथैव व्याख्यातः 'उकारः पादपूरणः' इति।

(२)- 'यतः पूर्वं नास्ति सा अपूर्वा, अपूर्वा एव अपूर्व्या, स्वार्थिकलक्षितः, प्रथमेत्यर्थः' इति वि०।

---

*॥ इति ग्रामे गेये पञ्चमस्यार्द्धः प्रपाठकः ॥

अथ पञ्चमी।

गोतम ऋषिः।

१ २ ३ २ ३ १ २ ३१२ ३२
इन्द्रोदधीचोअस्थभिर्वृत्राण्यप्रतिष्कुतः।
३ १ २ ३१२ २२
जघाननवतीर्नव ॥ ५ ॥ ६५

भवति किन्विदानीन्तना "उषा"(३) उषो देवता "दिवः" द्यु लोकस्य सकाशात् आगत्य "व्युच्छति" तमो वर्जयति(४)। हे "अश्विना" अश्विनौ! (५) "वां" युवां "हृहत्" प्रभूतं यथा भवति तथा "स्तुषे" स्तौमि ॥ ४ ॥ ६४

---

६५ उत्तरार्चिकस्य ३,१,८,१—ऋग्वेदस्य १,६,७,४।

(३)—'उषाः, कस्मात्? उच्छतीति सत्या रात्रेरपरः कालस्तस्या एषा भवति' इत्यादि नैगम-काण्डोक्तं नैरुक्तम् (७,१८) पटलत्वतेऽवलम्बनीयम्। सायण मते तु 'उषा, वष्टेः कान्ति-कर्मणः, उच्छतेरितरा माध्यमिका, तस्या एषा भवति' इत्यादि दैवत-काण्डोक्तं नैरुक्तम् (६ ५ -६) प्रेक्ष्यम्।

(४ —'व्युच्छति, उच्छिविवासे, विवासयति--किम्? तामर्थात् तमांसि, शक्नोति विवासयितुम् अतो विवासनेनाव उदितत्व लक्ष्यते. उदितेत्यर्थः इति वि०।

(५) -'अथातोद्यु स्थाना देवताः। तासामश्विनौ प्रथमागामिनौ भवतः। अश्विनौ यद् व्यश्नुवाते सर्वं रसेनान्योन्योतिषान्यः। अथैरश्विनावित्येणवाम। तत्काव श्विनौ द्यावापृथिव्यावित्येके अहोरात्रावित्येके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकाः। तयोः कालः ऊर्ध्वमर्धरात्रात प्रकाशभावस्यानुविद्धमनुतमो भागो हि मध्यमो ज्योतिर्भाग आदित्यः। तयोरुषा भवति' इत्यादि नैरुक्तम्. ? ७।

I ओम्। इन्द्रोदधीचोअस्थभिरिया२ईइया। वृत्राण्य-
प्रतिष्कुतइया२ईइया। जघाननवतीर्नवइया२। इ२।
या२३४। औहोवा। ऊ२३४पा॥ १॥

II इन्द्रोदधाइ। चोअस्था२३४भोः। वृचाणिया।

अत्र शाटायनिन इतिहास माचक्षते—'आथर्वणस्य दधीचो जीवतो दर्शनेन असुराः पराबभूवुः। अथ तस्मिन् स्वर्गते, असुरैः पूर्णा पृथिव्यभवत्। अथेन्द्रस्तैरसुरैः सह योद्धु मशक्नुवंस्त मृषि मन्विच्छन्, स्वर्गं गत इति शुश्राव। अथ पप्रच्छ तत्रत्यान्—इह किमस्य किञ्चित् परिशिष्टमङ्गमस्ति? इति, तस्माअवोचन्—अस्त्येतदाश्वं शीर्षं, येन शिरसा अश्विभ्यां मधुविद्यां प्राब्रवीत्, तत्तु न विद्मः तत्रत्याभवदिति; पुनरिन्द्रोऽब्रवीत्—तदन्विच्छतेति। तदा अन्वेषिषुः। तच्छर्यणावत्यनुविद्या जक्षुः, (शर्यणावद्ध वै नाम कुरुक्षेत्रस्य जघनार्द्धे सरः स्यन्दते)। तस्य शिरसोऽस्थिभिरिन्द्रो ऽसुरान् जघानेति'(१)॥

I,II त्वष्टुरातिथ्ये द्वे।

(१)—विवरणकारस्त्वेवमितिहासमन्यथाचष्टे। तथाहि—'कालपक्षा नाम असुराः। रसुरैर्बाध्यमाना देवा ब्रह्माणमुपगम्योचुरवन्नः—भगवन्! 'कालपक्षै रसुरैर्बाध्यामहे,

२ २ १ २ १ २ २ २ १ २ ४ ५
प्रातिष्कुताः। जघाना२३ना। वतीर्नवा। औ३ह्वोवा।
४
ह्वोपूइ। डा॥ २ ॥ ६५

"अप्रतिष्कुतः"(२) परैरप्रतिशब्दितः प्रतिकूल-शब्द-रहितः "इन्द्रः" आथर्वणस्य "दधीचः" (३) एतत्सञ्ज्ञकस्य ऋषेः "अस्थभिः" पार्श्व-शिरः-सम्बधिभिरस्थिभिः "नवतीर्नव" नव-सङ्ख्याका नवतीः, दशोत्तरा अष्टशत सङ्ख्याकाः [८१०] [तथाहि—लोक-त्रय-वर्त्तिनो देवान् जेतुम् आदावासुरी माया त्रिधा सम्पद्यते, त्रिविधा सा अतीतानागत-वर्त्तमान काल-भेदेन तत्काल-वर्त्तिनो जेतुं पुनरपि प्रत्येकं त्रिगुणिता भवति, एवं नव सम्पद्यन्ते, पुनरपि उत्साहादि-शक्ति-त्रय-रूपेण(४) त्रैगुण्ये सति

तेषां मारणोपायं विधत्स्वेति। तच्छ्रुत्वा स तानुवाच दधीचि नाम ऋषिमुपगम्य ब्रूत,स मारणोपायं विधास्यति। ते तच्छ्रुत्वा तथेत्यङ्गीकृत्य त दधीच मुपगम्य उक्तवन्त-भगवन्! अस्मदीयान्यस्त्राणि शुक्रस्तेषां पुरोधा अपहरति, तानि रक्षस्व। ततः स ऋषिस्तानुवाच—मम मुखे प्रक्षिपध्वम्। तत इन्द्रादिभि र्देवैः स मरुद्गणैः तस्य मुखे प्रक्षिप्तानि। पुनः कालेन देवासुर-सङ्ग्रामे पर्युपस्थिते एत्य देवा ऊचुः भगवन्! तान्यस्त्राणि प्रयच्छास्माकम्। ततस्ते नोक्तम्—तानि मे जीर्णानि, न तानि पुनः प्राप्तुं शक्यानि। ततः प्रजापति-मुखा देवा ऊचुः -भगवन्! प्राण-त्याग कुरुष्व। इति श्रुत्वा पुनः कृतस्य तेन प्राण-त्यागः। तस्य दधीचः स्वभवैरस्थभिरिन्द्रो वज्राणि जघान' -इति।

(२)—'अप्रतिस्खलितः'-इति वि०।

(३)—"या मथर्वा मनुष्यिता दध्यङ् धियमत्नत' इति (१,८०,२,१९ ऋग्वेदीय-मन्त्रार्थः परिद्रष्टव्यः।

(४)—प्रभावोत्साहमन्त्रजाः शक्तयस्त्रिधः।

अथ षष्ठी।

मधुच्छन्दा ऋषिः।

२च ३१र २र३ १२ २१९
इन्द्रेहिमत्स्यन्धसोविश्वेभिःसोमपर्वभिः।

३१ २३ १र २र
महाँ॒अभिष्टिरोजसा ॥ ६ ॥ ६६

५र र २ १२ २ १ २र
। इन्द्रेहिमाहाउ। त्सोऽआन्धाऽसाः। वाइश्वेभिः

सप्तविंशतिः सम्पद्यते, पुनः सात्विकादि-गुण-त्रय-भेदेन त्रैगुण्ये सति एकोत्तरा अशीतिः सम्पद्यते, एवं चतुर्भिस्त्रिके गुणिताया मायाया दशसु दिक्षु प्रत्येक मवस्थाने सति नव नवतयः सम्पद्यन्ते; एवं विधं मायारूपाणि] "वृत्राणि" (५) आवरकाणि असुर-जातानि "जघान" हतवान् ॥ ५ ॥ ६५

हे "इन्द्र!" "एहि" अस्मिन् कर्मणि आगच्छ, आगत्य च "विश्वेभिः" सर्वैः "सोमपर्वभिः" (१) सोमरसरूपैः "अन्धसः"

६६ ऋग्वेदस्य १,१,१७,१—यजुर्वेदस्य ३१,२५।

I पौषम्।

(५)- नपुंसकलिङ्गमिदं व्यत्ययेन (३,१,३९)—वृत्रानिति।

(१)—'पर्वाणि अवयवाः, सोमस्य पर्वाणि, तैः सोमपर्वभिः, तदर्थमभिषुतैः सोम रसवैः' इति वि०।

अथ सप्तमी।

वामदेव ऋषिः।

१र २र ३ २ ३ २ ३ १ २
आतूनइन्द्रवृत्रहन्नस्माकमर्ध* मागहि।
३ २ ३ १ २ ३ १ २
महान्महीभिरूतिभिः॥ ७॥ ६७

१ २ १ २ ७ ५ १ ४
सो२३हा३। मापर्वा२३४भीः। महा७२३। आरभा२३
५र र २ १र ३ १ १ १ १
४औहोवा। ष्टिरोजसा२३४५॥ ३॥ ६६

अन्योभिः अन्नैः(२) "मत्सि" माद्य हृष्टो भव, तत ऊर्ध्वम् "ओजसा" बलेन महान् भूत्वा "अभीष्टिः"(३) शत्रूणामभिभविता भवेति शेषः [अष्टाविंशति(४)-सङ्ख्याकेषु वल नामसु 'ओजः' 'पाजः' -इति (नि०२,९) पठितम्॥ ६॥ ६६

* 'अर्धम्'-इति ऋग्वेद-पाठः।

६७ ऋग्वेदस्य ३,६,२७,१—आरण्यगाने ४,३।

(२)—"अन्न इत्यन्न नाम"-इति नै० ५,१।

(३)—'आभिमुख्येन यष्टा वा'-इति वि०।

(४)—'बल-नामान्युत्तराण्यष्टाविंशतिः'-इति नै०३,८।

ऋषाष्टमी।

वत्स ऋषिः।

३ १ २ ३ २उ ३ १ २
ओजस्तदस्येतित्विषउभेयत्समवर्त्तयत्।

३ १ २३१ २
इन्द्रश्चर्मेवरोदसी॥ ८॥ ६८

३र २र ७र ५र ३र २र ७र ५र २ १ २ १ ५
I आतूऔहो। आतूऔहो। नइन्द्रवृत्रा२३४हान्।

२ १र २ १ २ १र २ १ १
अस्माकमद्रिम्। आगा२३हो। गाहो२। माहो२न्मा

२ १ ५ ४ ५
हो२३। भिरू२३४वा। ताप५इभो६हाइ॥ ४॥ ६७

हे "वृत्रहन्!"(१) वृत्राणां शत्रूणां हिंसक! इन्द्र! त्वं "नः" अस्मान्(२) प्रति "तु"(३) क्षिप्रम् आगच्छ, हे "इन्द्र!" "महान्" प्रभूतः त्वम् "महीभिः" महतीभिः "ऊतिभिः" रक्षाभिः सह "अस्माकम्" "अद्रिं" समीपम् "आ गहि" आगच्छ॥ ७॥ ६७

---

६८ उत्तराचिकस्य ८,१.१३,३।

I इन्द्रस्य माया।

(१)- 'यथास्य कर्म –रसानुप्रदानं वृत्रबधो या च का च बलक्षतिरिन्द्रकसव तत्' इत्यादि निरुक्तम् ६,१.१०। 'वृत्रबधो मेघ-बधः'-इति तद्भाष्यम्।

(२)—'अस्माकम्'-इति वि०।

(३) –'ऋचि तु. 'तू'-इति दीर्घः श्रूयते। तव सूक्तम्—"ऋचि तु-नु-घ-मक्षु-तङ्-कु चोरुष्याणाम् (६,३.१३३ "-इति।

५ २ १र २ ३ ५
I ह्वा। ह्वाउवाइ। ओजस्तदस्यतित्विषे२३४। ह्वा।

२ १र २३ ५ ६ १
ह्वाउवा। उभेयत्समवर्त्तया२३४न्। ह्वा। ह्वाउवाइ। इन्द्र-

ऽर १र ३ १ १ १ १
स्यर्म२वरोदसी२३४५॥ ५॥ ६८

४र ४ २ १र २
II ओजस्तदाऽपूस्यतित्विषाइ। उभेयत्समवर्त्तयादा१

१ २ ५र र २ १र ३ १ १ १ १
इन्द्राऽइः। चार्मा२३४औह्वोवा। वरोदसी२३४५॥६॥६८

"अस्य" इन्द्रस्य "तत्" "ओजः" बलं "तित्विषे" दिदीपे [त्विष दीप्तौ (दि०प०)] "यत्" येन ओजसा अयम् "इन्द्रः" "उभे" "रोदसी" द्यावापृथिव्यौ "चर्मेव"(१) "समवर्त्तयत्" सम्यग् वर्त्तयति। यथा कश्चित् किञ्चित् चर्म कदाचिद् विस्तारयति कदाचित् सङ्कोचयति, एवं तदधीने अभूतामित्यर्थः(२)॥ ८॥ ६८

I,II इन्द्रस्य संवर्त्तस्य वा मांवर्त्ते।

(१)—"चर्म चरतेर्वोषधं भवतीति वा" इति नै०७,५।

(२)—"यथा कश्चित् चर्म वेष्टयति, तद्वदित्यर्थः" इति वि०।

अथ नवमी।

शुनःशेपः ऋषिः।

३ १२३१२ ३१२ ३२
अयमुतेसमतसिकपोतइवगर्भधिम्।
३१२
वचस्तश्चिन्नओहसे॥ ८॥ ६९

I ४ ३ ४ २ ४र ५ १ र २
अयाऽ५मु। ताइइसाइमानसाइ। कापोतइ।
१२ १ १ २१ ५
वगार्भा१धी२म्। वाचा२स्ताच्चो२३त्। नओ२३४वा।
४ ५
ह्वापूसो६ह्वाइ॥ ७॥ ६९

हे इन्द्र! "अयम् उ" अयमपि(१) दृश्यमानः सोमः "ते" त्वदर्थं सम्पादितः यं सोमं "समतसि" सम्यक् सातत्येन प्राप्नोषि। तत्र दृष्टान्तः—"कपोत इव" यथा कपोताख्यः पक्षी

* 'शुनः शेफं' इति वि०-पाठः।

६९ उत्तरार्चिकस्य ७,३,१५,१—ऋग्वेदस्य १,२,२८,४।
I आङ्गिरसस्य शौनःशेपम् च्यावनं वा।

(१) दृष्ट मायण मते उ अव्ययः। विवरण मते नु प द-परत्वाय।

अथ दशमी।

वातायन उक्थ ऋषिः।

२ ३ १ २ ३२ ३१२३१ २३२
वातआवातुभेषज॰शम्भुमयोभुनोहृदे।
६ १ २
प्रनआयू॰षि* तारिषत्॥ १०॥ ७०

॥ इति चतुर्थ-दशतिः॥

४र५ ४र ५र ५ ५ १ २ १
I वातआवातु। भाषुद्रुषजाम्। शाम्भुमयः। भुनो
७ ३र २ १ र २ २ १
हृदा२३४३। हाचोइ। प्रनआयू॰षीउता। रिषात।
४ ५ ५ ४
औ२३होवा। इडा॥ ८॥ ७०

"गर्भधीं"(२) गर्भधारिणीं कपोतीं प्राप्नोति तद्वत्, "तच्चित्"(३) तस्मादेव कारणात् "नः"(४) अस्मदीयं "वचः" "आत्रमे" प्राप्नोषि॥ ८॥ ६९

---

* 'प्रणआयषि'-इति ऋग्वेदीय पाठः।

---

७० उत्तरार्चिकस्य ९,३,११,१—ऋग्वे दृश्य ८,८,४४,१।

I प्रतीचीनेड़ं काशोतम्।

(१)—गर्भो धीयते यस्यां सा गर्भधिः, ताम्।

(३)—'तन्मम खमनं वचः' इति, 'चिदिति पादपूरणः' इति च वि०।

(४)—'बहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम्' इति वि०।

"वातः"(१) वायुः(२) "नः" अस्माकं "हृदे" हृदयाय(३)"भेषजम्"(४) औषधम् [उदकं वा] "आ वातु" आ गमयतु, कीदृग्भूतम्? "शम्भु" रोग-शमनस्य भावयितृ(५) "मयोभु" मयसः सुखस्य च भावयितृ,(६) अपि च "नः" अस्माकम् "आयूंषि" "प्रतारिषत्" प्रवर्द्धयतु(७) ॥ १० ॥७०

इति मायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने द्वितीयाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

---

(१)—'वातो वातीति मतः'—इत्यादि नै० द० १०,३४।

(२)—अन्तरिक्षस्थो देवः। तथाहि—'वायुर्वेन्द्रोवान्तरिक्षस्थानः' इति नै० दै० ७,५। 'अथानो मध्यस्थाना देवताः, तासां वायुः प्रथमागामी भवति' इति नै० दै० १०,१।

(३)—'हृदयस्य' इति वि०। एतस्मिन्नर्थे 'षष्ठ्यर्थे चतुर्थी (२,३,६२)' इति वचनादिह चतुर्थी।

(४)—'पथ्यमित्यर्थः'—इति वि० भेषज मित्युदक नाम स्थानचत्वारिंशत्तमम् पदम् नि०१,१,१२।

(५)—'शम्भु सुखस्य भावयितृ, इदानीं सुखकरमित्यर्थः' इति वि०।

(६)—'कालान्तरे सुखस्य भावयितृ, अथवा मयो बलं तस्य भावयितृ' इति वि०। शमिति बल-नामसु (नि०२,९) ऊनविंशतितमं पदम्, मयइति तु मयोदशमिति एकार्थयोरुभयोः कालभेदेन व्याख्यान विवरण-सम्मतम्।

(७)—'वात आवातु भेषजानि शम्भु मयोभु च नो हृदयाय प्रवर्द्धयतु च न आयुः'—इति नैरुक्त व्याख्यानम् दै० १०,३५।

अथाष्टमे खण्डे—

मैषा प्रथमा।

कण्व ऋषिः।

१र २र ३ १ २ ३ र २ ३ १ २ ३

य꣡꣡रक्षन्तिप्रचेतसोवरुणोमित्रोअर्यमा॥

३ १ २ ३ १ २

न किः* सदभ्यतेजनः॥ १॥ ७१

४ ५ ५ ५र ४ १ र र २ १

I य꣡꣡रक्षन्तिप्रचेतसाः। वरुणोमित्रोअर्यार३मा। न।

२ १ २ १ ७ ५र र

काइःसा२३दा। हन्मायेइ। भ्या२ता२३४औहोवा।

३ ५

जा२३४नाः॥ ८॥ ७१

"प्रचेतसः"(१) प्रकृष्टज्ञानयुक्ताः वरुणादयो देवाः "यं" यजमानं "रक्षन्ति" "स" यजमानः "न किर्दभ्यते" केनापि न हिंस्यते॥ १॥ ७१

---

* 'नृचित्'-इति ऋग्वेदीय-पाठः।

---

७१ ऋग्वेदस्य १,३,२२,१।

I मोमित्रम्।

(१)—'प्रकृष्टज्ञानाः—वरुणः मित्रः, अर्यमा न' इति वि०।

अथ द्वितीया।

वत्स ऋषिः।

३ २उ ३ १२ ३२ ३१र२र३२
गव्योषुणोयथापुराश्वयोतरथया।
३ २ ३१२
वरिवस्या*मद्दोनाम्† ॥ २ ॥ ७२

५४र ५र४ ५र ४५ २ र १ १२ १
। । गव्योषुणोयथापुरा। अश्वयोतरथा। यावरिवस्या।
२ १र र २ ५र र ३ ५
म। द्दो मा२३। द्दोना३४औद्दोवा। उ२३४पा ॥ १० ॥
५ र र ५ २
॥ गव्योषुणोयथापुरा६ए। अश्वयो१त। रथा२।
१ २१ १ २१र ३ ५र र
या। वरिवा२स्या। मद्दो। मद्दो२ना२३४औद्दोवा।
३१ १११
ई२३४५ ॥ ११ ॥ ७२

हे "इन्द्र"! "गव्योषु"(१) गव्या उ सु(२) इति निपात-द्वय-

* 'वरिवस्य मद्दामद्द'-इति ऋग्वेदीय-पाठः।

† 'मघोनाम्'-इति वि० पाठः।

७२ ऋग्वेदस्य ६,४,२,५।

I,II श्यावाश्वे।

(१)—'सुञसः'(८,३,१०७)-इति लम्।

(२)—'उ' 'सु' द्वावपि पादपूरणौ'-इति वि०। सायण-मते तु उ अवधार्य, सुष्ठु-त्यर्थः। 'वरिवस्या'इति क्रियान्वितम्।

समुदायस्य एकवद्भावेन निपातवद्भावात्(३) प्रकृतिवद्भावाभावः(४) "नः"(५) अस्माकं गवामिच्छया अस्माकं गां दातुं "यथा पुरा" पूर्वम् अस्माकं सम्बन्धि-यागे गवादि-दानाय(६) वरिवस्यसि तद्वदद्यापि सुष्ठु "वरिवस्य"(७) परिचर(८) आगच्छेत्यर्थः। न केवलं गविच्छया किन्तु "अश्वया"(९) अश्व-प्रदानेच्छया "उत" अपिच "रथया" रथेच्छया "महोनां"(१०) धनानां [कर्मणि षष्ठी],(११) महान्ति पूजाकरणि धनानि दानाय वरिवस्य परिचर देहीत्यर्थः॥ २॥ ७२

---

(३)—समुदाय एवैक इति स्वीकारादिति भावः, यथा तथा चेत्यादि।

(४)—'निपात एकाजनाङ' (१,१,१४)-इति प्राप्त एकाजत्वाभावान्न ङित इत्यर्थः।

(५)—'नः—द्वितीयाबहुवचनमिद प्रथमाबहुवचनार्थं द्रष्टव्यम्। यथ त्वां सुमदति वाक्य-शेषः'-इति वि०।

(६)—गोषु इच्छा, गव्या; तस्मात् तृतीयैकवचन, तस्य 'सुपां सुलुगिति पर्वसवर्ण दीर्घः। गव्या, गव्यया गविच्छयेत्यर्थः।

(७)—ऋचि 'वरिवस्या'-इति निपातस्य चेति (६,३,१३६)-दीर्घः।

(८)—वरिवस्यतिः परिचरणीयः, तस्मात् मन्त्रैकवचनम्, तस्य स्थाने सुपा सुलुगिति आकारः, वरिवस्य! परिचरणीयेत्यर्थः-इति वि०।

(९)—अश्वशब्दात् "छन्दसि परेच्छायामपि क्यच् (३,१,८)" इति वचनात् क्यचि, "न छन्दस्यपुत्रस्य (७,४,३५)"-इति ईत्वदीर्घयोरभावे रूपम्।

(१०)—'मघं धनं हविर्लक्षण तदर्थं मह्यं ते मघवानः हविष्मन्तो यजमानाः, तेषामित्यर्थः'-इति वि०।

(११)—व्यत्ययेनेति(३,१,८५ बोध्यम्।

अथ तृतीया।

वत्स ऋषिः।

३ १ २ ३ १ २ ३ १ २ ३ १ २
इमास्तइन्द्रपृश्नयोघृतन्दुहतआशिरम्।
३ २ ३ १ २ ३ १ २
एनामृतस्यपिप्युषीः॥ ३॥ ७३

I ३ १ २ २ १ २ १ २ ३ २ १ २
इमास्तई। द्रपृश्नयोघृतन्दूऽहा। औहोऽहाऽ।
२ १ ३ ४ ३ २ ३ २ २ १
हाऽइ। ताआऽगाऽ२३४इराम्। एनाऽ३४मृताऽ। स्यपो
५ ४ ५
२३४षा। प्युषीऽहाइ॥ १२॥ ७३

हे "इन्द्र"! "ते" त्वदीयाः "इमाः" "पृश्नयः"(१) प्राप्त वर्णाः(२) गावः(३) "घृतं" क्षरण-शीलम्(४) "एनाम्" "आशि

---

७३ ऋग्वेदस्य ५,८,१२,४।

I शैखण्डिनम्।

(१) –'पृश्नयः स्तनयः' इति यि०।

(२) –नाना वर्णा इत्यर्थः। उत्तरार्धिक द्वितीय प्रपाठक द्वितीयार्ध-पञ्चदश खण्डीय द्वितीयर्ग् व्याख्याने माधवेनैवानेन स्पष्टमभिहितत्वात्।

(३) –निघण्टौ तु 'पृश्निः' इति दिव आदित्यस्य च साधारणं नाम (नि०१.४,२)। निरुक्तेऽपि तथैव। तथाहि—'पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्पृष्टारसामतसस्पृष्टा भास ज्योतिषां संस्पृष्टा भासेति: वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पुष्पवद्भिरिति' इति २.१८।

(४)– घृतमिति निघण्टौ प्रथम दादशे उदक नामसु दशमम्।

अथ चतुर्थी।

शुतकक्ष* ऋषिः।

३ २ ३ १ २ ३११ २र
अयाधियाचगव्ययापुरुणामन्पुरुष्टुत।
१र २र ३ १ २
यत्सोमेसोमआभुवः॥ ४॥ ७४

५ र र ५ १ २ २ २ ५
। अयाधियाचगव्याइया। पुरुणा३। मन्यू२३४रु।

रम्"(५) आश्रयणद्रव्यं पयः(६) "दुक्षते" दुहन्ति क्षारयन्ति। कौट्टयः पुत्रयः? "ऋतस्य" सत्यस्य अवितथस्य(७) इन्द्रस्य [यज्ञस्य वा(८)] "पित्र्युषीः"(९) वर्धयित्र्यः॥ ३॥ ७३

---

* 'सुकक्ष'-इति वि० पाठः।

७४ ऋग्वेदस्य ६,८,२४,२।

। वैतहव्यम्।

(५)—"अपस्यधेयामानृचुरानृक्षियुर्नेत्याजग्यानाश्रितमाग्नीराग्नीध्रे" (६,२,३६) इति ओक्ष् पाके इत्यस्य निघायां रूपम। "आशिगायणादाश्रपणाद्वा" इति च नैरुक्तम् ६,८।

(६)—'सोमसिद्धं यद् दधितत् क्षीरम्'-इति वि०।

(७)—'निघण्टु तृतीय-दशम-खण्डमिह मानम।

(८)—निघण्टु प्रथम-द्वादश खण्डमिह मानम्।

(९) 'द्वितीया प्रथमैकवचनार्थे'-इति वि०।

२ १ र ऽर २र ३ २ १ र ऽर १र
ष्टुतौ। वा३२। यज्ञोमे३सोमआ। या२मोमे२सो।

२ १ ५ ४ ५
मआ२३४वा। भूपूवोऽहाइ ॥ १३ ॥ ७४

हे "पुरुणामन्"(१)बहुविध-शक्र-वृत्रहादि नामोपेत(२)! [यद्वा बहु-स्तुतिमन्! नमयति स्तुत्यं देवं वशं नयतीति नाम स्तोत्रम्] अत एव "पुरुष्टुत" बहुभिरभिष्टुतेन्द्र! "सोमे सोमे" मदीयेषु सर्वेषु सोमेषु त्वं "यद्" यदा(३) "आभुवः"(४) तेषां पानार्थं समन्तादभवः तदा वयं "अया" अनया(५) ईप्सितया "गव्यया" गा आत्मन इच्छन्त्या(६) "धिया"(७) बुध्या युक्ता भवेम। त्वयि सोमं पिबति सति वयं गवादियुक्ता भवेमेत्यर्थः॥

"आभुवः"-"आभवः"-इति च पाठौ॥ ४ ॥ ७४

---

(१) पुरुशब्दो बहुवचनः निघण्टु-तृतीय-प्रथम-खण्डे तृतीय इति दर्शनात् 'पूर्वपदादिति (८,४,३) णत्वम्।

(२) -'पुरुणामन्। बहूनां शत्रूणां प्रहीकर्तः! इत्यर्थः। अथवा बहवो यजमानाः प्रह्वीभूता' इति वि०।

(३)—'यत्—पञ्चम्या अत्र लुक्, यस्मात्' इति वि०।

(४)—'आभिमुख्येन भवसि'-इति वि०।

(५) -"अया'—अनया. 'धिया'—धीरिति प्रज्ञानाम. प्रज्ञया त्वां स्तुम इति वाक्यशेषः। अथवा धीरिति कर्मनाम, अनेन यागाख्येन कर्मणा; त्वां यजामह इति वाक्यशेषः"-इति वि०।

(६)—'किमर्थं पुनः स्तुमः? उच्यते—गव्यया गविच्छया'-इति वि०।

(७) -धीरिति प्रज्ञा-नामसु सप्तमम्(नि०३१)कर्म-नामसु एकविंशतिमम्(नि०२,१)।

अथ पञ्चमी।

मधुच्छन्दा ऋषिः।

३ २ ३ १२ ३ १ २ ३ १ २
पावकानःसरस्वतीवाजेभिर्वाजिनीवती।

३ १ २ ३ १ २
यज्ञंवष्टुधियावसुः॥ ५॥ ७५

५र र ४५ २ १ २ १ र २ र
I पावकानईया। सरास्वा१तीर्२। वाजेभिर्वा। जि-

१ २ १ १ ३ ५र र २ १र
नाइवा१तीर्२। यज्ञा२३म्। वा२ष्टू२३४औ३होवा। धिया-

३ १ १ १ १
वत्म्२३४५ः॥ १४॥ ७५

"सरस्वती"(१) देवी "वाजेभिः" ऋविर्लक्षणैः अन्नै र्निमित्त भूतैः [यद्वा यजमानेभ्यो दातव्यै रन्नै र्निमित्तभूतैः] "नः" अस्मदीयं "यज्ञं" "वष्टु" कामयताम्। कामयित्वा च निर्वर्तयित्वर्थः। तथाचैतरेयारण्यकाखण्डे श्रुत्यैव व्याख्यातम् 'यज्ञं वष्टिति

७५ ऋग्वेदस्य १,१,६,२।

I भारद्वाजम्।

(१)—'सरस्वती'-इति निघण्टु-प्रथमस्य त्रयोदशे नदी नामसु एकादशे वाङ्नामसु च दृश्यते। दृश्यते च निरुक्तम्—'सरस्वती लैतस्य नदीवद् देवतावच्च निगमा भवन्ति (२,२३)'-इत्यादि, 'सरस्वती माध्यमिका वाक' इति वि०। 'वागर्थेषु विधीयते, तस्मान माध्यमिका वाचं मन्यन्ते'-इति नैरुक्ताः (११,२२) मानम्।

अथ षष्ठी।

वामदेव ऋषिः।

२ ३ १र २र ३ २उ ३ १ २
कदूमन्नाङ्ऋषीषाइन्द्रꣳसोमस्यतर्पयात्।

२ ३ २ ३ १ २
मनोवस्यून्याभरात् ॥ ६ ॥ ७६

यदाह, यज्ञं वहत्वित्येव तदाहेति] कीदृशी सरस्वती? "पावका"(२) शोधयित्री "वाजिनीवती" अन्नवत्-क्रियावती "धिया वसुः" कर्म-प्राप्य-धन निमित्त-भूता [वाग्वै धियावसुरित्यादिना तथाविध धन-निमित्तत्वमैतरेयारण्यकाण्डे श्रुत्वा व्याख्यातम्—'यज्ञं वष्टु धियावसुरिति वाग्वै धियावसुरिति]। 'श्रेनः, 'सोमः'-इत्यादिषु पञ्चविंशति-संख्याकेषु देवता-विशेष-वाचिषु पदेषु 'सरमा,' 'सरस्वतो'-इति पठितम्(३)॥ एतामृचं यास्क एवं व्याचष्ट (नै०११,२६)—'पावकानः सरस्वती यज्ञं वष्टु धियावसुः कर्मावसुरिति' ॥ ५ ॥ ७५

---

(२)—"पावकादीनां छन्दसि २.२.६९" इति वचनादिह इत्वाभावः।

(३)—निघण्टौ दैवतकाण्डे चतुर्थखण्डानन्तरं श्येन इत्यादीनि षट्त्रिंशत्पदानि पठितानि, तत्र सरमेति सप्तदशं सरस्वतीत्यष्टादशम्। तानि च पदानि ऋक्परिशिष्टस्य देवता-वाचकानि, तथाहि नैरुक्तम्—'अथातो मध्यस्थाना देवताः'-इत्यादि-'मरुद्भिः सरोदसी'-इत्यन्तम् (१०,१-११,५०)।

अथ सप्तमी।

इरिमिठ* ऋषिः।

१ २ ३ ४ ३ ३ २ ३ २ १ २ ३ २
आयाहि सुषुमाहितइन्द्रसोमपिबाइमम्।

४ ५ ४ ५ ४ ५ ४ १ २ १
। कइमम्। उक्थवाहाइ। नाहुषाइषू१वा२। आ-

२ २ १ २ १ ५२ १२ १ २
इन्द्र१सोम। स्यतार्पा१याऽत्। सनो२वस्व। नियाभा-

१ २ ५ १२ २ १ २ १२
१रा२त्। सानो२वस्व। नि। आ२३। भराउवा। आ

२ १२ २
गहियेहिताइमे१॥ १५॥ ७९

"नाहुषेषु" [नहुषइति मनुष्यनाम नि०२,३,९] नहुष-सम्बन्धिनीषु प्रजासु,(१) "कः" "इमम् इन्द्रम्" "सोमस्य" सोमेन "तर्पयात्" तर्पयति प्रीणाति (२), "सः" नाहुषीभिस्तर्पयित मयक्य इन्द्रः "नः" अस्माकं सम्बन्धि-यज्ञे नमः मन् "वसूनि" धनानि "आभरत्" आहरत् आहरत्वित्यर्थः॥ ६॥ ७९

---

* 'इरिमिरि' इति वि० पाठः।

। अरुणस्य वैतहव्यस्य साम सौभरं वा।

१ - नहुष इति मनुष्यनाम. तेषु भवाः जातिष्वौसाद्याः क्रियाः नाहुषाः। तासु नाहुषीषु जातिष्वौसादिषु क्रियासित्यर्थः।

(२ - 'कः मा मुक्त्वा अन्यः तर्पयति बहून्य तर्पयामि इत्यभिप्रायः' इति वि०।

५३ क,

२ उ १ १ २ १ २
एदंबर्हिःसदोमम ॥ ७ ॥ ७७

५ २ २ २ १ २ १ २
I आयाहिवी। घुमाञ्चा१इतेर२। घुमाञ्चा१इतेर२।

१ २ १ २ १ २
आइन्द्रसोमम्। पिबाइमम्। पिबाआ१इमा२म्।

३ २ १ २ १ २ १
एदम्बर्हाइः। सदोमा२३मा३४३। ओ२३४५इडा ॥१६॥७७

हे "इन्द्र"! त्वम् "आयाहि" आगच्छ, वयं "ते" त्वदर्थं "सुषुमा हि"(१) सोममभिषुतवन्तः खलु, तम् "इमम्" अभिषुतं "सोमं" त्वं "पिब," तदर्थं "मम" मदीयम् "इदम्" "बर्हिः"(२) वेद्यामास्तीर्णं दर्भम् "आ(३) सदः" आसीद अभि निषीद ॥७॥७७

७७ उत्तरार्चिकस्य १,२,६,१—ऋग्वेदस्य ६,१,२२,१।
I सौभरम्।

(१)—'सुषुमा'-इति षुञोरूपं छान्दसम् अभिषुणुम इत्यर्थः। हि शब्दो हेतौ, यस्मात् षुणुमः तस्मादागच्छेति वि० मन्त्रार्थः।

(२)—"इदं, 'बर्हिः' इं अध्येते मन्त्रमं कवचनान्तं द्रष्टव्यं। अस्मिन् बर्हिषि। कः पुनरर्थः बर्हिः? उच्यते 'सदः' इत्यपि मन्त्रमं कवचनान्तं, द्रष्टव्यम् सदमिमम् स भवते वेद्याख्यं स्थानं इत्यर्थः' इति वि०।

(३)—विवरणे-नथ आ इत्यर्थं सुषुमेत्यनेनसमन्वयते

अथाष्टमी।

वारुणिः सत्यधृतिर्ऋषिः।

१ ० ३ १र २र ६ २ ३ १ २ ७ २
मह्यित्रीणामवरस्तु*द्युक्षंमित्रस्यार्यम्णः।
७ २ ३ १ २
दुराधर्षवरुणस्य ॥ ८ ॥ ७८

३ २ ३ ५ १ १ ३ २ ३
I मह्याइत्रा२३४इणाम्। अवा२रस्तु। द्युक्षम्मा२३
५ १ ३ २ ३ ५ २ १र
४इत्रा। स्या२र्यम्णः। दुराधा२३४र्षाम्। वरौहो२३४।
५ ४ ५
वा। णापुस्यो३ह्वाइ ॥ १७ ॥

५ र र ५ २ १ र २ १र
II मह्यित्रीणामवरस्तू३ए। द्युक्षम्मित्रस्यार्यम्णः। दुरा
२ १ १ १
धा२३र्षाम्। वरौहो२। क्षम्मा२। ण। स्यो२।
३ ५ र र २र १ २ १ ३ १ १ १ १
या२३४औहोवा। ह्वाओवा। ओवा२३४५ ॥ १८ ॥ ७८

* 'अवोऽस्तु'-इति ऋग्वेदीयः पाठः।

७८ ऋग्वेदस्य ८,८,४४,१—यजुर्वेदस्य ३,२१—
आरण्यगानस्य ३,२,१,२।
I,II इमे द्वे पाष्टौहे।

अथ नवमी।

वत्स ऋषिः।

१ २ ३ १ २
त्वावतःपुरूवसोवयमिन्द्रप्रणेतः।

१२ २ ६ २ २ २ २५ २
। त्वावतोऽ। हौ३ह्वोऽ३ई। पुरूवसोऽ। हौ३ह्वो-

२१ २ २५ २ २ २५
३ई। वयमिन्द्राऽ। हौ३ह्वोऽ३ई। प्रणेताऽः। हौ३-

"त्रीणां"* त्रयाणां "मित्रस्य" "अर्यम्णः" "वरुणस्य" च "द्युत्तं" दीप्तम्(१) अतएव "दुराधर्षम्" अन्यै र्धर्षितुं बाधितुमशक्यं "महि" महत् "अवर्" अवः रक्षणम् अस्माकम् "अस्तु" [अवस् इत्यत्र अवः शब्दस्य विसर्जनीयस्य रेफादेशश्छान्दसः।

"अवर्"-"अवः"-इति च पाठो॥ ८॥ ७८

हे "पुरूवसो" बहुधन! इन्द्र! "प्रणेतः" क्रमणां पारं प्रकर्षेण नेतः(२)! "इन्द्र"! "त्वत्सदृशस्य [इन्द्रसमानस्यान्यस्या-

* 'त्रयाणाम्' इति वि०पाठः।

I साकमश्वं धुरां साम वा।

(१) 'द्यु' इति अक्षरनाम निघण्टु-प्रथम-नवमे द्वितीयत्वेन दर्शनात्। द्यु-शब्दो दीप्ति वचनश्च 'द्योतन इति सतः' इति नैरुक्त-वचनात् (१.६)। 'द्युचि' निवास-गत्योः। तस्मिन् यत् द्युचयति तत् द्युत्तम्। तुतरामागतं दीप्तमिति।

(२) 'प्रणेतः** अथवा प्रकर्षेण नेतः शत्रूणाम्' इति वि०।

१ २
स्मसिस्थातर्हरीणाम् ॥ ८ ॥ ७९

॥ इति पञ्चम दशतिः* ॥

२ ३ १ २ ३ २
हो३१इ। स्मसिस्थाताः। हौ३हो३१इ। हरीणाम्।
१ २ २
हौ३हो३१२३४५इ। डा ॥ १८ ॥ ७९

भावात् तथेत्यर्थः(१) | तव स्वभूताः "वयम्" "स्मसि"(२) स्मः। हे "हरीणाम्" एतत् सञ्ज्ञकानामश्वानां(४) "स्थातः" अधिष्ठातः! ॥ ८ ॥ ७९

इति सायणाचार्य विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोऽर्चाख्याने द्वितीयाध्यायस्याष्टमः खण्डः ॥ ८ ॥

---

७९ ऋग्वेदस्य ६,४,१,१ ।

(१)—त्वमिवदति त्वावान्। "युष्मदस्मदोः सादृश्ये वतुवावौ" इति (५,१,९१) वचनाद् वतुपि, "प्रत्ययोत्तरपदयोश्चेति" त्वादेशे, "आ च सर्वनाम्नः"-इत्यात्वं रूपम्। तस्य त्वावतः।

(२)—'एतदुक्तं भवति—त्वत्सदृशस्यापि वयं स्तोतारो भवामः, किमुतत्त्ववेत्तेति'—इति वि०।

(३)—"इदन्तोमसि (७,१,४६)" इति ममदागमः।

(४)—'हरी इन्द्रस्य'-इति नि०१,१५,१। 'अश्वः कस्मादश्नुतेऽध्वानं सदाशनो भवतीति वा" इत्यादि नै०२,२७।

*॥ इति द्वितीयः प्रपाठकः ॥ २ ॥

अथ नवमं खण्डे—

मैषा प्रथमा।

प्रगाथ ऋषिः।

१ २ ३ १ २ ३ १ २ १ २ १
उत्वामदन्तुमोमाः* कृणुष्वराधोअद्रिवः।
१ २ ३ १ २
अवब्रह्मद्विषोजहि ॥ १ ॥ ८०

I उत्वामन्दन्तुसोमाः। कृणोहो। ष्वरोहो।
धाअद्रिवाः। अ। वब्रा२३ह्मा। द्विषा२ः। हा२इ।
औ३होइ३येइ। जा२हा२३४औहोवा। ए३। ययू२-
३४५ः ॥ २० ॥ ८०

हे इन्द्र! "त्वा" त्वाम् "सोमाः" "उत्"(१) उत्कृष्टं "मदन्तु"

* 'सोमाः'-इति ऋग्वेदीयः पाठः, उत्तरार्चिक-व्याख्यायां सायणाचार्य्य-धृत-पाठश्च।

८० उत्तरार्चिकस्य ६,१,३,१—ऋग्वेदस्य ६,४,४३,१।

I यामम्।

(१)—'उदिति पादपूरणः'-इति वि०। इदं निगमम् "प्रगृह्यमुपोदः पादपूरणे (८.१.६)" इति पाणिनि सूत्रम्।

अथ द्वितीया।

विश्वामित्र ऋषिः।

१ २ ७ १ २ ३ २ ७ ३ १ २
गिर्वणःपाहिनःसुतंमधोर्द्धाराभिरज्यसे।
७ १ २ ७ १ ८ २८
इन्द्रत्वादातमिद्यशः॥ २॥ ८१

४ ५ ८ ४ ५ ४ ५ ८ १
। गिर्वणः पाहिनः सुतम्। गिर्वणःपा। हिनःसु
१ ८ ८ २ १ ८ १ २
ता२म्। मधोर्द्धाराभिराह्वो२। ज्यासे२३। ह्वाउवा।
१ २ २ ९ १ ९ ५ ८ ८
इन्द्रात्वा२३दा। तमायेऽत्। या२मा२३४औह्वोवा।
२ १ १ १ १ १
ह्वरोऽओ२३४५ः॥ २१॥ ८१

मादयन्तु हे "अद्रिवः"(२) वज्रवन्! इन्द्र! त्वमस्मभ्यं "राधः" धनं(३) "ह्वयस्व"(४) कुरु प्रयच्छ। किञ्च "ब्रह्मद्विषः" ब्राह्मणद्वेष्ट्रीन् "अव जहि" विदारयेत्यर्थः(५)॥ १॥ ८०

८१ ऋग्वेदस्य ३,३,२,१।

। आङ्गिरसम् हरिर्योनिधनम्।

(२) "मतुवसोरुमन्त्वौ ८,३,१" इति रुत्वं रूपम्

(३) -राधइति निघण्टु-द्वितीय-दशमे धननामसु सप्तदशम्। "राध इति धन नाम, राध्नुवन्त्य तेन"-इति नै०२.४।

(४) क्रिया-सामान्य वचनो दानार्थो ह्वयत्यः, देहि धनमित्यर्थः।

(५) 'जहोति च हन्तेर्गत्यर्थस्यैव रूपम्। अवजहि अधोगमय, नरकं नयेत्यर्थः' इति वि०।

अथ तृतीया।

वामदेव ऋषिः।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ २ ३ २
मदावइन्द्रश्चर्कृषदाउपोनुससपर्यन्।

३ २ ३ २ ३ ३ १ २
नदेवोवृतःशूरइन्द्रः॥ ३ ॥ ८२

"गिर्वणः"(१) गोभिः वाग्भिः स्तुतिभिः वननीय! [तथा च यास्कः—'गिर्वणा देवो भवति गोभिरेनं वनयन्तीति' (नै०६, १४)] तादृश! हे इन्द्र! "नः"(२) अस्मदीयं "सुतम्"(३) अभिषुतम् इमं सोमं "पाहि" पिब,(४) यतः "मधोः" मदकरस्य सोमस्य "धाराभिः" "अज्यसे" सिच्यसे। हे "इन्द्र! "त्वादातम् इत्"(५) त्वया शोधितं विशदीकृतमेव "यज्ञः" अन्नम्(६) अस्मासु भवति॥ २॥ ८१

(१) -गिर्वणः इति मान्तः। गिरः स्तुतिलक्षणावाचः (नि०१,११), ताभिः या वन्यते सम्भज्यते स गिर्वणाः, तस्य सम्बोधनम्—हे गिर्वणः!।

(२), (३)- सुतमिति षष्ठ्यर्थे द्वितीया, विभक्तिव्यत्ययो वा। सोमस्येत्यस्य वि०-सम्मतम।

(४)—'नः-अस्मान्' 'पाहि रक्ष'-इति च वि०।

(५)—'इदिति पदपूरणः'-इति वि०। "अथ ये पञ्चम्यर्थे उपसर्गाश्चरन्ति, अन्येषु वाक्यपूरणे आगच्छन्ति, पदपूरणानि सिताचरन्त्यनर्थकाः- कर्मोपसर्गाः" इति नि०१,९।

(६)—'यज्ञः'-इति निघण्टौ प्रथम-द्वादशे उदकनामसु पञ्चपञ्चाशत्तमस्यदम द्वितीय सप्तमे अन्न नामसु चत्वारिंशत्तमम—द्वितीय दशमे धन नामसु त्रयोविंशतितमम्

४ ५ २ २ ३ ४ ५ २ ३
। सादा। वइन्द्राइः। चर्कृषादा। उपोनुसाइः।
१ २ १ २ २ । २ २ २ ४
सापर्यन्यनदेवाइ२ः। वृताइ४इः। शूइ४३। राइआ५
यिन्द्राइ६५६ः ॥ २२ ॥ ८२

हे ऋत्विग्यजमानाः(१)! "इन्द्रः" "सदा" सर्वदा "वः" युष्मान् "आ चर्कृषत्" यज्ञानुष्ठानार्थम् आकृषत् कर्त्तुमिच्छति। किं कुर्वन्? "उपान्" युष्माकं समीप एव "समपर्यायन्" पुनः पुनः भुजं वा सपर्यां कुर्वन् [हविर्भोक्तुं मामाभ्यध्वमिति प्रार्थयमान इत्यर्थः, अतएव श्रुत्यन्तरे देवानां यजमान-प्रदत्त हवि-रुपजीवित्वं श्रूयते-'इतो दानादि देवा उपजीवन्तीति] अतः अस्मत्सपर्या-कर्त्तृत्वात् "इन्द्रः देवः" "नः" "शूरः" यजमानानां बाधक इत्यर्थः(२) ॥ ३ ॥ ८२

। वैरूपम्।

(१)—'आत्मीयं पवपौवमाइ'-इति वि०।

(२)—'सदा' सर्वदा. 'वः' युष्माकम्, 'इन्द्रः' 'चर्कृषत्' चत्यर्थं करोतु पुनः पुनश्च करोतु बल पुष्टि धनं चिरञ्च दीर्घञ्च जीवितम्। 'आ,' 'उप', 'उ', 'नु'-चत्वारोऽप्येते पद पूरणाः। 'स' शब्दो यच्छब्दसम्बन्धेन न निराकाङ्क्षितां प्रतिपद्यते यतोऽयमर्थ-सम्बन्धो यच्छब्दोऽध्याहर्त्तव्यः। य अयत्नादुच्चमुनः स कथं बलपुष्टा-दीन् करोति? उच्यते—'सपर्यन्' सपर्यतिः परिचरणकर्मा 'सम्' शब्द उपरिष्टादुप-सार्थीयः यथा कश्चित् परिचरन् प्रीतिमुत्पादयति तद्वत् प्रीतिमुत्पाद-

अथ चतुर्थी।

श्रुतकक्ष ऋषिः।

१ २ ३ १ २ ३ १ २ ३ १ २
आत्वाविशन्त्विन्दवःसमुद्रमिवसिन्धवः।
२३ ३ १ २
नत्वामिन्द्रातिरिच्यते ॥ ४ ॥ ८३

। आत्वाविशन्त्विन्दवः। समुद्रमिवसिन्धवः। स-
मुद्रमि। वसिन्धा२३वाः। नत्वामिन्द्रातिरिच्यते। न
त्वामा२३यिन्द्रा। तिरिच्या२३ताइ४३यि। ओ२३४५ई।
डा ॥ २३ ॥ ८३

हे इन्द्र! "इन्दवः" स्रवन्तः अस्माभि र्दीयमानाः सोमाः(१)

८३ उत्तरार्चिकस्य ८,२.२.१—ऋग्वेदस्य ६,६,१८,२—
उहगानेऽपि १४,२—१८—१साम।

। आसितं सिन्धुषाम वा।

यतीत्यर्थः। 'देवः' दानादि गुण-युक्तः, 'इनः' अभ्यर्थितः, 'प्रभः' विक्रान्तः 'इन्द्रः' ईश्वर इत्यर्थः इति वि०।

(१)—इन्दुरिति निघण्टौ उदक नामसु १.१२। यज्ञ नामसु ३,१७ च दृश्यते।

अथ पञ्चमी।

मधुच्छन्दा ऋषिः।

इन्द्रमिद्गाथिनोबृहदिन्द्रमर्केभिरर्किणः।
इन्द्रवाणीरनूषत ॥ ५ ॥ ८४

I इन्द्रमिद्गाथिनोबृहान्। इन्द्रामर्काइ। भिर-

"त्वा" त्वाम् "आविशन्तु"। तत्र दृष्टान्तः "समुद्रम् इव सिन्धवः" स्यन्दनशीला नद्यो(२) यथा समुद्रं जलाशयं सर्वतः प्रविशन्ति तद्वत्। यत एवं तस्मात् हे "इन्द्र"! त्वां कश्चिदपि देवः धनेन बलेन वा "न अतिरिच्यते" नातिरिक्तोऽस्ति। सामर्थ्यवान् त्वत्तोधिको नास्तीत्यर्थः ॥ ४ ॥ ८३

---

८४ उत्तरार्चिकस्य २,१,८,१—ऋग्वेदस्य १,१,१३,१—आरण्यगानेऽपि ३,११।

I यमस्य इन्द्रस्य वा अर्कः।

नैरुक्ता देवता-कार्त्स्न्येऽपि व्याख्याताः, तथाहि 'इन्द्र इन्धेर्दीप्तिकर्मणः' इत्यादि, 'इतीमानि सप्तर्षिभ्यो देवता-नामधेयान्यनुक्रान्तानि। सप्तभ्यश्चैव ऋषिभ्यः। तेषां मतान्यृषिभ्यश्च वेनोऽनुनीयते कर्तृतः' इत्यनेन १०,४२। इह तु उदकवत् सरणशीलत्वात् सोमो गृह्यते।

(२) -'सिन्धवः' इति निघण्टौ नदी-नामसु एकविंशतितमम् पदम् १,१३।

१ १ २ २ २ ४
र्किणाः। इन्द्रवाणोऽ। ह्वाऽहायि। अनूषसता।
४
होपृयि। डा॥ २४॥ ८४

"गाथिनः"(१) गीयमान-साम-युक्ता उद्गातारः "इन्द्रम् इत्" इन्द्रमेव "बृहत्" बृहता 'त्वामिद्धिवामहे'-इत्यस्या मृच्युत्पन्नेन बृहन्नामकेन साम्ना(२) "अनूषत" स्तुवन्ति। "अर्किणः" अर्चन-हेतु-मन्त्रोपेता होतारः "अर्कैभिः" उक्थरूपै र्मन्त्रै रनूषत। ये त्ववशिष्टा अध्वर्यवः ते "वाणीः" वाग्भि र्यजूरूपाभि "इन्द्रम्" अनषत। अर्क-शब्दस्य मन्त्र-परत्वं याष्केनोक्तम्(५,४) 'अर्को मन्त्रो भवति यदनेनार्चन्तीति(३)॥ ५॥ ८४

---

(१)—गाथाइति वाङ्नामसु दृश्यते नि०१,११। 'गाथानि सामानि'-इति वि०।

(२)—इन्द्राग्नि कस्यास्य तृतीय-प्रथम पञ्चमस्य द्वितीया 'त्वामिद्धिवामहे'-इति। अस्यामुत्पन्नानि एकादश सामानि। तत्र गेयगानस्य चतुर्थ-प्रथमे ऋचे द्वे (२८—२९) आरण्यगानस्य प्रथमे एकम् (२०), द्वितीये एकम् (२२)—ऊहगानस्य द्वाविंशतितमे त्रयोदश सप्तदशर्चेति—ऊहगानस्य प्रथमे पञ्चमम्, तृतीये षष्ठम्, तृतीय-द्वितीये पञ्चमम्, पञ्चमे पौष्यं सप्तदशर्चेति सङ्ख्यानया पञ्च। तत्र आरण्य-गानस्य प्रथमा-द्याद्योयमेव बृहदिति व्यपदिश्यते। मानसमार्षेयकं ब्राह्मणम्।

(३)—"अर्को देवो भवति यदेनमर्चन्ति। अर्को मन्त्रो भवति यदनेनार्चन्ति। अर्कमन्नम् भवत्यर्चन्ति भतानि। अर्को हविर्भवति सदृशः कदुकिम्रा"-इति नै०५,४।

अथ षष्ठी।

सुतकक्ष* ऋषिः।

१ २ ३ १ २ ३ २ ३ २ ३ २
इन्द्रइषेददातुनऋभुक्षणमृभुंरयिम्।
३ १ २ ३ १ २
वाजोददातुवाजिनम् ॥ ६ ॥ ८५

४ ५ ४ २ ५ २ ४ २ १
I इन्द्रइषेददातुनः। ओक्षायि। ऋभु। क्षणा-
३ २ ३ ५ २ २ २ ३ २ २ १ २
मृम्। ऋभुंरा२३४याम्। वाजोददातुवा३। वाजो-
२ २ १ ५ ४ ५
ददा। तुवो२३४वा। जा५युयिनोई३क्षायि ॥ २५ ॥

५ २ २ ५ २ १ २
II इन्द्रइषेददातुनाई३ए। ऋभुक्षणमृ। भू२१२३म्।
२ १ २ ४ ५ ४
रपो३४३म्। वा२३जा। ददा२उ२३। तुवोवा। जा
५
५युयिनोई३क्षायि ॥ २६ ॥ ८५

---

* 'सुकक्ष'-इति वि०-पाठः।

---

८५ ऋग्वेदस्य ६,६,२७,४— जहगानस्य ५,२,२५,२६।
I,II सौमित्रे।

"इन्द्रः" एवमस्माभिः सुतः इष्टः सन् "ऋभुक्षणम्"(४) ["वाषपूर्वस्य(६,४,८ पा०) इति दीर्घाभावः] यागादि-कर्म-करणेन महान्तम् [सर्वेषां भ्रातॄणां श्रेष्ठं सौधन्वनं वा(६)। अथवा तृतीय-सवने प्रजापति-सवित्रोर्मध्ये सोमपानेन महान्तं रयिं(२) दातारं(१)] "ऋभुम्"(७) [सोम-पानेन मर्त्यत्वं विहाय देवत्वं प्राप्तं तादृशम्(५)] एतन्नामकं देवं "नः" अस्मभ्यम् "इषे"(८)

(४) -'ऋभुक्षाः' इति महन्नामसु दशमम् नि०३,३।

(६) "ऋभुर्विभ्वाजदिति सुधन्वन आङ्गिरसस्य वयः पुत्राः बभूवुः। तेषां प्रथमो नमाभ्यां बहुवचनेनागमा भवन्ति, न मध्यमेन' इति नै०११,१६।

(७) ऋभुरिति मेधावि-नामसु अष्टमं पदम् नि०३,१५। दैवतकाण्डेऽपि निघण्टौ चतुरक्षरस्थानदेवताक्षरे ग्ने नादिषु दशमम् पदम्, तच्च बहुवचनान्तम्। तत्र चास्ति नैरुक्तम्—"ऋभवऊरुभान्तीति वर्णेन भान्तीति वर्णेन भवन्तीति वा"-इत्यादि—"तदेतदृभोश्च बहुवचनेन चमसस्य च संभवेन बहूनि दशतयीषु मन्त्रानि भवन्ति"—इत्यपि "आदित्य रश्मयोऽप्यभवऊच्यन्ते" इति च ११,१६।

(३) -'पत्र लक्षणं धनम्' इति वि०। "रयिरिति धन-नाम, रातेर्दान-कर्मणः"-इति नै ४,१७।

(१) -एषणार्थो वि०-सम्मतः।

(२) -'ऋभुम् मेधाविनम्' इति रयिमित्यस्य विशेषणञ्च वि०।

(५) -तदिदमानमत्सवे दीयो मन्तोऽयम् -"विद्वा ग्रमी तरणित्वेन वाघतो मर्त्तासः सन्तो अमृतत्वमानशुः। सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः। (१,११०,४,५)" इति। यास्केनेयमेवं व्याख्याता 'कृत्वा कर्माणि क्षिप्रत्वेन वोढारो मेधाविनो वा मर्त्तासः सन्तो ऽमृतत्वमानशिरे सौधन्वना ऋभवः सूरस्यानां वा सूरप्रज्ञा वा संवत्सरे समपृच्यन्त धीतिभिः कर्मभिः' इति।

(८) -चतुर्थ्येक वचनं द्वितीयार्थे द्रष्टव्यम् इषमन्नम्'-इति वि०।

अथ सप्तमी।

गृत्समद ऋषिः(१)।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११
इन्द्रोअङ्गमहद्भयमभीषदपचुच्यवत्।
१२ १३ १४ १५
मह्तिस्थिरावितर्षणिः॥ ७॥ ८६

अत्रार्थः(९) "दद्यात्" प्रयच्छतु। तथा "वाजी" बलवान्(१०) इन्द्रः "वाजिन" बलवन्त(११) [वाज-नामानं(१२) कनीयांसं वा भ्रातरं सौधन्वनम्] अस्माकमन्नलाभाय दद्यात्॥ ६॥ ८५

"इन्द्रः" "महत्" अधिकम् "भयं" साध्वसं [भय कारणं

८६ ऋग्वेदस्य २,८,८,३।

(९) दर्षमित्यन्ननामसु चतुर्दृश्यम निं०२,७।

(१०)—'वाजो बलवान्' इति वि०। वाजो इति निघण्टौ अन्न नामसु चतुर्थम्, १४। "अपि म वाजो बलवान चेपणमन् तूर्णमश्वनत,श्वानम इति तत्र नैरुक्तम २,२८,

(११)—'वाजिनमन्नमिति वि०। वाजदत्यदन्नोऽन्ननामसु (नि०२,७, संग्राम नामसु च (नि०२,१७ दृश्यते। वाजिन इति नाम्नोऽश्वनामसु (नि०१,१५)—बलवत्सु (नै०२,२८ बृहति। वाजिन इति नोपधोऽदन्तः युष्मद्बलनामसु च उपान्त्यम् पदम, तत्र च नैरुक्तम—"वाजिन" इत्यादि "देवाश्वा इति वा" इत्यन्तम १२,४५।

(१२)—अस्मिन् पक्षे वाजइति नाम विद्यते,स्येति विग्रहः पर नाम रूचिरतमम।

(१)—'गृत्समदोवसूनुत्पातान् दृष्ट्वा इन्द्रमनया ऋचा स्तौति' इति वि०।

षष्ठाष्टमी।

भरद्वाज ऋषिः*।

३ १ २ ३ १ २ ३ १ २ ३ १ २
दूमाउत्वासुतेसुतनक्तन्तोगिर्वणोगिरः।

१ २ ३ २उ ३ १ २
गावोवत्सन्नधेनवः ॥ ८ ॥ ८७

५ ८ २ १ २ १ २ १
I इन्द्रोअङ्ग। मद्दङ्गा२३याम्। अभीषद। पच्-

२ ३ २ २ ४ ५ ४
च्या२३वा३४त्। सद्दा३४यिस्थिरा३:। विचोवा। षाप्-

५
णोऽहायि ॥ २७ ॥ ८६

वा] "अङ्ग" क्षिप्रम् "अभीषत्" अभिभवति,(१) "अपचुच्यवत्" अपच्यावयति च [यद्वा अभीषद् अभिभवद् भय-कारणम् अपच्यावयेत्] "हि" यस्मात् कारणात् "स स्थिरः" केनापि चालयितुमशक्यः "विचर्षणिः"(२) विश्वस्य द्रष्टा ॥ ७ ॥ ८६

* 'संयोरार्षम्'-इति वि०।

I इन्द्रस्य अभयङ्करम्।

(१)—'आभिमुख्येन सोदत्, पर्यु[पस्थितम्'-इति वि०।

(२) -इतम् पदं विश्वादित्यादिभ्यस्तु पञ्चतिकर्मभ्यस्तु पञ्चम वि०३,११।

अथ नवमी।

भरद्वाज ऋषिः।

२ ३ २ ३ २ ३ २ ३ २ ३ १ २
इन्द्रानुपूषणावय॑मस्थायस्वस्तये।
३ २ ३ १ २
उवेमवाजसातये ॥ ९ ॥ ८८

५ २ २ १ २
I इमाउत्वा। सुतायिसुतायि। नक्षन्ताऽयिगो
५ २ २ १२ २ २ २ १
३४ः। वनः। गाऽयिराः। गावोवाऽत्साऽम्। नधी
५ ४ ५
२३४वा। नाऽवोऽह्वायि ॥ २८ ॥ ८७

हे "गिर्वणः" गोभिर्वननीयेन्द्र। "सुतेसुते" सोमे ऽभिषुते सति "इमाः" अस्मदीयाः "गिरः" स्तुतयः "त्वा" त्वां "नक्षन्ते"(१) व्याप्नुवन्ति। "धेनवः"(२) द्रोगध्वः "गावः न" गावइव, वत्सं यथा शीघ्रं(३) व्याप्नुवन्ति तद्वत्(४) ॥ ८ ॥ ८७

८८ ऋग्वेदस्य ४,८,२३,१।

I त्वाष्ट्रीमाम।

(१) 'नक्षन्ति'-इति 'ननक्ष' इति वा व्याप्तिकर्मसु द्वितीय पदमिति ८८।

(२) -'अचिर प्रसवाः' इति वि०।

(३) - विवरणमत्र स्वं वांछ दृष्टान्तं गावोनति।

(४) अस्यामृचि '३' इति पदपूरणं सायणसम्मतम्।

५५क,

५ २ २ १२ २ १ २ २ १
I इन्द्रानूषू। षणावा२३याम्। साख्याय। सुव-
२ १ १ २ १ ५ ४
स्त्रा२३यायि। हुवे२मावा२३। जसो२३४वा। ताभु-
५
योई३हायि ॥ २९ ॥ ८८

(इतरेतरयोगादिन्द्रपूषशब्दयोरुभयत्र द्विवचनम्) "इन्द्रा पूषणा"(१) देवो(२) "नु"(३)अद्य च(४)"वयम्" "स्वस्तये सख्याय" शोभनाय सखित्वाय "वाजमातये"(५) वाजस्यान्नस्य (बलस्य वा) सातये सम्भजनाय च "हुवेम"(६) आह्वयामः (स्तवामो-वा(७)) ॥ ९ ॥ ८८

I पौषम्।

(१)—"देवताद्वन्द्वे च (६,३,२६)"-इति आनङि "सपां सुलुगित्यादिना (७,१,३९) द्विवचनस्यात्वे रूपम्।

(२)—इह नैरुक्तम्—"अथास्य सप्तविकादेवाः अग्निः सोमो वरुणः पूषा बृहस्पतिः त्वष्टा सवितः कुत्सो विष्णुर्वायुः" इति १.१०।

(३)—'नु क्षिप्रम्'-इति वि०। निघण्टु, द्वितीय पञ्चदश-खण्डोऽत्र नियामकः।

(४)—"नच पुराच सदनं रयीणाम्" इत्येतद्व्याख्यानमाह यास्कः- 'अद्य च पुरा च सदनं रयीणाम्' इति ४,१७। तच नू इति दीर्घम्, "ऋचि तुनुघमक्षुतङ् कुत्रोरुष्याणाम् (६,३,१३३)"-इति। इदमेव यास्कव्याख्यानमिह नियामकम्।—नु इति तु वाक्यार्थो निपातः। तथा च नैरुक्तम् -"नु इत्येषोऽनेककर्मदः। नु करिष्यतीति क्षेत्रपदेशे। कथं नु करिष्यतीत्यनुपृष्टे। नन्वेतदकार्षादिति च। अथाप्युपमार्थे भवति"इत्यादि।१.४॥

(५)—वाजसातिरिति सङ्ग्रामार्थो रूढः (नि०,२७)। वाजमन्न बलवा तस्य माति र्लाभः एषोऽर्थो यौगिकः। सातीति षणु दाने इत्यस्य रूपम् "ऋतियुनीत्यादिना (३,३,९७) क्तिनि सिद्धम्।

(६)—सम्यसारणं छान्दसम् (६,१,३५)।

(७)—हूयते, हुवति वा अर्चतिकर्मसु पठ्यते नि०३,१५।

अथ दशमी।

वामदेव ऋषिः।

१ २ ३ १र २र३ १ २र
नकिरिन्द्र*त्वदुत्तरं†नज्यायोः‡अस्तिवृत्रहन्।

२ ३ २उ ३ २
नक्येव** यथात्वम्॥ १०॥ ८९

॥ इति प्रथमा-दशति॥

५ ५ १ २ १र र १
I न। क्येनाकी। आयिन्द्रत्वदुत्तराम्। नज्यायो२।

१ २ ९ २ ३ ५ १ २र
अस्ता२४यिवृ। ऊं३ऊम्। त्रा२३४हान्। नक्ये।

१ २ २ २ ५
वंया२३था। ऊं३ऊ३४३म्। वृ३४५वो६हायि॥३०॥ ८९

हे "वृत्रहन्" वृत्रस्य नाशक! "इन्द्र"! इन्द्रलोकेऽपीति

---

* "नकिरिन्द्र"-इति, † "रो"-इति, ‡ "ज्याया"-इति,

** "नकिरेवम्"-इति च ऋग्वेदीयपाठः।

---

८९ ऋग्वेदस्य ३,६,१८,१।

I इन्द्राण्याः साम।

शेषः "त्वत्" त्वत्तः "उत्तरः" उत्कृष्टतरः "नकि(३) अस्ति" न भवति त्वत्तो "ज्यायान्" प्रशस्ततर(१) एकोऽपि नास्ति। हे इन्द्र! "त्वं" लोके "यथा"(२) प्रसिद्धो भवसि तथाविध एकोऽपि "नकिरेवास्ति" नैव भवति (कश्चिदपि लोके इन्द्रसदृशो नास्तीत्यर्थः॥ १०॥ ८९

इति माधवाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे ऐन्दोत्याख्याने द्वितीयाध्यायस्य नवमः खण्डः॥ ९॥

अथ दशमे खण्डे

मैषा प्रथमा।

तिरोक* ऋषिः।

३ १ २ ३ ४ २ ३ १ ४ २ ४ २ १ २

तरणिर्वोजनानान्नदंवाजस्यगोमतः।

---

* 'विरूपस्यार्षम्'-इति वि०।

---

(१)—'न किं'-इति हि कमित्यादिषु पठितम् नि०३,१२। तत्र च नैरुक्तम्—"नवोत्तराणि पदानि सर्वपदसमाम्नानाय"-इति। नै०३,१३।

(२)—'दृङ्तरो वा'-इति वि०।

(३)—"यथेति कर्मोपमा"-इति नै०३,१५। तथाच 'न कश्चित् एवं सर्वोपकार प्रवृत्तः'-इति विवरणकृदृच्याख्यानं साधुतरं मन्यते।

३ २ ३ १ २
समानमुप्रशꣳसिषम् ॥ १ ॥ ९०

५ ४ २ २ १ २ २ २
I तरणिंवाः। जनाऽ३नाम। त्रदंवाजाऽ३त्राऽ।

१ २ ३ ५ २ १२ २ ४
स्यागोमाऽ३४ताः। समानाऽ३मू। प्रशा५ꣳसिषाम्।

४ ५
त्रोऽ५इडा ॥ ३१ ॥ ९०

हे अस्मदीयाजनाः! "वः" युष्माकं "जनानां" पुत्रपौत्रादीनां "तरणिं"(१) तारकम् "त्रदं" शत्रूणां तर्दयितारं "गोमतः" पशुमतः "वाजस्य" अन्नस्य दातारं च इन्द्रम् "समानम् उ" साधारणमेव "प्रशंसिषम्"(२) प्रकर्षेण स्तौमि ॥ १ ॥ ९०

---

९० ऋग्वेदस्य ६,३,४७,३।
I श्यावाश्वं तारणं वा।

(१)—'तरणिं' क्षिप्रम् दातारं वा वि० मतम्। तरणिरिति निघण्टौ क्षिप्रनामसु उपान्त्यं पदम् २,१५।

(२) निघण्टु तृतीय-चतुर्थे 'शंसति' इति अर्थनिकर्मसु पठ्यति शतितमम।

अथ द्वितीया।

मधुच्छन्दा ऋषिः।

१ २ ३ २ ३ २३१र २र
अस्तृग्मिन्द्रतेगिरःप्रतित्वामुदहासत।

३ १ २ ३ १र २र
सजोषा* वृषभम्पतिम् ॥ २ ॥ ९१

५ र ५र १ १ २र
I अस्तृग्माइन्द्राईतेगिराः। प्रातो२त्वामू२त्। अहा।

१ २ १ २ १ २ १
सता। मा१जो२षावा२। षभा२म्पतिम्। ओ२३४५

५
इ। डा॥ ३२ ॥ ९१

हे "इन्द्र! "ते गिरः" त्वदीयाः स्तुतीः "अस्तृग्" सृष्टवानस्मि। ता गिरः स्वर्गेऽवस्थितं "त्वां प्रति" "उदहासत"(१) उद्गत्य प्राप्नुवन्। तादृग्गीर्गिरस्त्वं "सजोषाः"(२) सेवितवानसि।

---

* "अजोषा"-इति ऋग्वेदीयः पाठः।

---

९१ ऋग्वेदस्य १,१.१७,४।

I वैरूपम्।

(१)—'ओहाङ् गतावित्यस्य रूपम्'-इति वि०।

(२)—'जषौ प्रीति-सेवनयोरित्यस्येदं रूपम्'-इति वि०।

अथ तृतीया।

वत्स ऋषिः।

३ १ ३ २उ३ ३ २ २ १ १ २ ३ २
सुनोथोघासमर्त्यायंमरुतोयमर्यमा।
१ २उ ३ १ २
मित्रास्पा*न्त्यद्रुहः॥ ३॥ ९२

४ ४ २ ५ १ ४ ९ १ २
I सुनोथोघापुसमर्त्तियाः। यम्मरुतोऽयमर्यमा। मि
१२ ४ २ १ २ १ १ २ २ १ २
त्रास्पान्त्यद्रुहः। ऊ। ऊ। वाहा३१उवा२। अति-
१ ३ १ १ १ १
द्विषा२३४५ः॥ ३३॥ ९२

कीदृशं त्वाम्? "वृषभं" कामानां वर्षितारं "पतिं" सोमस्य पातारं, यजमानानां पालयितारं वा, "पाता वा पालयिता वेति" (१०,११) यास्केनोक्तत्वात्॥ २॥ ९१

"सः" "मर्त्यः" मनुष्यः यजमानः "सुनोथः" सुयज्ञः(१)

* "मित्रःपा" इति ऋग्वेदीयः पाठः।

९२ ऋग्वेदस्य ६,४,१४।

I सोमित्रम् कोत्सं वा।

(१) 'सुनीथः सुप्रणय.' इति वि०। सुनीथ इति निघण्टौ प्रणयनामसु मनुष्यनाम ३,८।

अथ चतुर्थी।

त्रिशोक* ऋषिः।

२ २ १ २ ३ २ ३ १ २ २ २ ३ १ २

यद्वीड़ावि*न्द्रयत्स्थिरेयत्परिशाने परामृशम्।

(सुनयनो वा) भवति "घ"-इति प्रसिद्धौ(२)। सदृत्यृक्तं कमित्याह—"यं" यजमानं "मरुतः" देवाः(३) "पान्ति" रक्षन्ति "अद्रुहः"(४) अद्रोग्धारोमरुतः। तथा "अयम् अर्यमा"(५) पाति। "यं" "मित्रः"(६) पाति स एवं भवतीति॥ ३॥ ९२

* "त्रिशोक"-इति वि० पाठः।

(२)—'घ इति पाद-पूरणः'-इति वि०।

(३)—मरुत् शब्दोबहुर्थः। क्विरण्यर्थः (१,२)—रूपार्थः(३,७)—कृत्तिवाचकश्च (३,१८)। अथ च अन्तरीक्ष-देवगणेष्वपि मरुतः स्मर्यन्ते—तथाहि नैरुक्तम्—"अथातो मध्यस्थाना देवगणाः। तेषां मरुतः प्रथमागामिनो भवन्ति। मरुतो मितराविणो वा मितरोचिनो वा महद्रवन्तीति वा"-इत्यादि।

(४)—अद्रुहदति विशेषणं पदम्। उत्तरार्चिकस्य सप्तम-द्वितीय-त्रयोदशैके अग्निविशेषणत्वेन श्रुतम्—तस्यैव षष्ठ-तृतीयैकादश-द्वितीये मित्र विशेषणत्वेन एतस्यैवार्चिकस्य षष्ठद्वितीयैकषष्ठे—उत्तरार्चिकस्य तृतीयैक चतुर्दश-द्वितीये तृतीयैक षोड़श-तृतीये-तृतीय-द्वितीयैनविंश द्वितीये च मातृ-विशेषणत्वेन—अस्यामृचि तु मरुद्विशेषणमेति।

(५)—अहोरात्रस्य विभागकर्ता आदित्यविशेषः (नै०१२,३६-भाष्ये स्थितम्)।

(६)—अहरभिमानीदेवः अयमप्यादित्यविशेषः (नै०१२,३६-भाष्येस्थितम्)।

१ २ ३ १र २ ३
वसुस्यार्हन्तदाभर ॥ ४ ॥ ९३

२र र र र ३ ५ ५ २ र र
I औहोवाऔहो२३४वा। ओ६ह्वा। यद्दीडावो३-

४ २ ३ ५ २र र र र ७ ५ ५ २
द्रा३यस्थिराइ। औहोवाऔहो२३४वा। ओ६ह्वा। य-

र ४ २र ३ ५ २र र र र ३ ५ ५
त्पर्ष्णिने३पा३रामृतम्। औहोवाऔहो२३४वा। ओ६-

५ २ र ४ २र २५ २र र र र ३ ५
ह्वा। वसुस्यार्हा३न्ता३दाभर। औहोवाऔहो२३४वा।

५ ६ ५
ओ६ह्वा। हो५३। डा ॥ ३४ ॥९३

हे "इन्द्र"। त्वञ्च "बोडो" दृढे परैः कम्पयितृसमूहके "यत्" धनं "परामृतं" विनाशितं(१) "यत्" च "स्थिरे" स्वयमचले(२) परामृतं. "यत्" च अपि "पर्ष्णिने"(३) विमर्शकर्त्रे(४)

---

९३ उत्तरार्चिकस्य ४,१,९,३ = ऋविदस्य ६,३.४९.५।

I तोभम्।

(१ —'परामृतम मथितम मर्दयित्वेत्यर्थः इति वि०।

(२) 'पर्वतादौ' इति वि०।

(३) —'परिज्ञाने' इति दकारमध्यपाठात्, पातिज्ञात्यानुज्ञामनात् कौथुमस्य।

(४ —'कृपादौ' इति वि०। पर्ष्णान इति तु मेघनामसु मन्त्रमस्य (नि०१,१०)।

५६क,

अथ पञ्चमी।

सुकक्ष ऋषिः।

३ १ २ ३ १ २ ३ १ २ ३ २
अुतंवोवृत्रहन्तमंप्रशर्द्धं चर्षणीनाम्।

३ २ ३ १ २ ३ २
आशिंषेराधसे मह्े ॥ ५ ॥९४

५ ४ १ २ २ १
I अुताम्। वोवृत्रहन्तमम्। प्रशर्द्धं चर्षणा२३इ-

२ २ १ २ ३ २ १ २ ४ ५
नाम्। आशाइषा२३इरा। धसेमह्ा। औ३ह्वोवा।

४
ह्वोऽुइ। डा ॥ ३५ ॥* ९४

पराभृतं, यद् "वसु" "स्पार्हं" स्पृहणीयं "तत्" धनम् "आभर" आहर ॥ ४ ॥ ९३

---

* "आशूंषे"-इति ऋग्वेदीयः पाठः।

---

९४ ऋग्वेदस्य ६,६,२४,१।
I औतम्।

---

* इति ग्रामे गेये पञ्चमः प्रपाठकः ॥

अथ षष्ठी।

वामदेव ऋषिः।

१२ ३१२ ३१२ ३१२
अरन्तइन्द्रश्रवसेगमेमशूरत्वावतः।

१२ ३१२
अरंशक्रपरेमणि ॥ ६ ॥९५

५ २ २१ २२ १२ २
I अरन्तइन्द्रश्रवसेए। ए। गमाइमशूरत्वावताइः।

"श्रुतं" विख्यातम् "इवहन्तमम्" अतिशयेन इवस्य हन्तारं(१) शत्रुं" बलभूतं [वेगवत्तरं वा(२)] एताहृगमिन्द्रं "चर्षणीनां" मनुष्याणां "वः" युष्माकम् "आशिषे" [अशेते लेटि(३) उत्तम "आशिषे" "आशुषे"-इति च पाठो ॥ ५ ॥ ९४

I आभोषवम्।

(१)—"इयो मेघ इति नैरुक्ताः। त्वाष्ट्रोऽसुर इत्यैतिहासिकाः। अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्ष-कर्म जायते, तत्रोपमार्थेन युद्धवर्णो भवति" इति यास्कः९,१६।

(२)—'उत्पादित बलवत्तरम्'-इति वि०। शर्धमिति निघण्टौ बलनामसु पठितम्(२.५)।

(३) "लिङर्थे लेट (३,४,७) पा०।

१ २ ३ १ २ १ २ ३ १
ह्वोवाऽह्वाइ। अरा॒ग्ना१क्का२३। ह्वोवाऽह्वाइ। परा
२ १
इमा२३णा३४३इ। ओ२३४५इ। डा॥ १॥८५

इटि सिप् प्रत्ययः,(४)'छन्दस्यपि दृश्यते'-(६,४,७,३,पा०) इत्याडागमः; तमिन्द्रं स्तुतिभिः प्रीणयित्वा युष्मभ्यं प्रकर्षेण अश्वैः प्रयच्छानीत्यर्थः] किमर्थम्? "महे" महते "राधसे" धनाय धनं युष्मभ्यं दातम्॥

हे "शूर" वीर! "इन्द्र"! "ते" तव "अवसे"(१) अवनीयां त्वदीयां कीर्त्तिं श्रोतुम् "अरम्" अलं पर्याप्तं यथा भवति तथा "गमेम"(२) प्रवृत्ता भवेम। हे "शक्र" शक्तियुक्तेन्द्र! "त्वावतः" त्वत्सदृशस्य(३) "परेमणि"(४) परत्वे उत्कर्षनिमित्तम् "अरं" गमेम [त्वत्कीर्त्तिवदन्यस्यापि त्वत्सदृशस्य देवस्य कीर्त्तिं गच्छेमेत्यर्थः॥ ६॥८५

(४)—"सिप बहुलं लेटि"(३,१,३४) पा०।

(१)—'चतुर्थ्येक वचनमिदं द्वितीयैकवचनस्यार्थे द्रष्टव्यम। अवः अन्नं सोमलक्षणमित्यर्थः' इति वि०। अव इत्यन्ननामसु चतुर्थम् नि०२,७।

(२)—'गमेम गमयेम दद्यामित्याशास्महे' इति वि०।

(३) 'त्वत्सदृशस्यापि अवोगमेम किमुनस्तवैवेत्यभिप्रायः' इति वि०।

(४) 'कथमदः? उच्यते—परेमणि'-परमुत्कृष्टं स्वर्गाख्यं स्थानं, तत्र गम्यते येन सः परमा यज्ञः ज्योतिष्टोमादिः तत्रेत्यर्थः' इति वि०।

अथ सप्तमी।

विश्वामित्र(१) ऋषिः।

३ १ २ ३ १ २ ३ १ २ ३ १ २
धानावन्तंकरम्भिणमपूपवन्तमुक्थिनम्।
१ २ ३ १ २
इन्द्रप्रातर्जुषस्वनः ॥ ७ ॥८६

५ ४ ३ २ ३ ४ ५ १ २ २ २ २
I धानावन्तङ्करम्भिणाम्। अपूपवन्तमू१क्थो३नाम्।
३ ५ ३ ५ ४ ५ ४
इन्द्राप्रा२३४ताः। ओ२३४हाइ। जुषोवा। स्वा५नो
५
ई३हाइ ॥ २ ॥८६

यजमानो ब्रूते—हे "इन्द्र"! "धानावन्तं" धाना भृष्टयवाः तद्वन्तं "करम्भिणं" करम्भो दधि मिश्राः सक्तवः तद्वन्तम् "अपूप-

---

८६ ऋग्वेदस्य ३,३,१७,१।

I पौषम्।

(१)—"तव त्विदाममाचक्षत—विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव। विश्वामित्रः सर्वमित्रः। सर्वं संहत्य सुदाः कल्याणदानः। पैजवनः पिजवनस्य पुत्रः पिजवनः पुनः स्पर्द्धनीय जवो वा मिश्रीभाव गति वा इत्यादि। "मिश्रे च षा(६,३,१३०)" इति आत्वं कृपम्। इह "मन्त्राणां मिश्राजिमथोः (६,३,१६५)" इति प्राप्तोऽकोदानः "ऋषि प्रतिषेधो मिश्रे (६,३,१६५)" इति वचनात् तदभावश्च।

अथाष्टमी।

गोषू इत्यस्य सूक्तिनाऽऽषी*।

३ १र २र३ १ २३ १ २३ १ २
अपाम्फेनेननमुचेःशिरइन्द्रोदवर्त्तयः।
३ १र २र १ १ २
विश्वायदजयस्पृधः॥ ८॥९७

५ ४र ३ ५र ४ ५ ४ १ २ १ ७ ६
I अपाम्फेनेननमुचेः। शिरइ। द्रोत्। अवा२र्त्ता
५ १ १ २ ५ र १
२३४याः। वाइस्वा२३ः। या२दा२३४औद्दोवा। जय
१ ३ १ १ १ १
स्पृधा२३४५ः॥ ३॥९७

वन्त" सवनीय-पुराडाशोपेतम् "उक्थिनं" स्तोत्रियं "नः" अस्मदीयमिमं सोमं "प्रातः" सवने "जुषस्व" सेवस्व। करम्भशब्दात् तदस्यास्तीत्यत इनिः तस्य प्रत्ययस्वरः(१)। प्रातः-स्मरादिष्वन्तोदात्तत्वेन पठितत्वादन्तोदात्तः(२)॥ ७॥ ९६

पुरा क्रिविन्द्रोऽसुरान् जित्वा नमुचिमसुरं ग्रहीतुं न शशाक

* 'गोषूक्षो वाश्वसूक्तौ वा'-इति वि०।

९७ ऋग्वेदस्य ६,१.१९,३।

I इन्द्रस्य क्षुरपवि।

(१) -"आद्यु दात्तश्च (३.१.३)" इत्याद्युदात्त इत्यर्थः।

(२) -"स्मरादिनिपातनयम्(१.१,३७)" इति सूत्रोपात्त-स्मरादिगणे 'स्मर' 'अन्तर'

अथ नवमी।

वामदेव ऋषिः।

३१२ २१२ ३२ २२११ २
इमेतइन्द्रसोमाःसुतासोयेचसोत्वाः।
१२
तेषांमत्स्वप्रभूवसो॥ ८॥९८

५२ २१२ २ १ २१२२
I इमेतआ। द्रसोमाः। ह्वोवाश्चोइ। सुतासोयेश।

स च युध्यमान स्तेनासुरेण जगृहे, स च गृहीतमिन्द्रमेवमवोचत् "त्वां विसृजामि राचावज्रि च शुष्केणार्द्रेण चायुधेन यदि मां मा हिंसीरिति, स इन्द्रस्तेन विसृष्टः सन् अहोरात्रयोः सन्धौ शुष्कार्द्र-विलक्षणेन फेनेन तस्य शिर अच्छिनद्; अयमर्थोऽस्यां प्रतिपाद्यते।—। "इन्द्रः" त्वम् "अपां फेनेन" वज्रीभूतेन "नमुचेः" असुरस्य "शिरः" "उदवर्त्तयः" शरीरादुद्धृतमवर्त्तयः अच्छैत्सीरित्यर्थः। कदेति चेत्-"यद्" यदा "विश्वाः" सर्वाः "स्पधः" स्पर्द्धमानाः आसुरीः सेनाः "अजयः" जितवानसि। "इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव" इत्यादिकमथर्वणब्राह्मणमनुसन्धेयम्॥ ८॥ ९७

I सोमिचम्।

'प्रातर्'-इति प्रातः शब्दस्तृतीयः सच प्रहृति एवाम्नोदाहृतः। तत्र तथा विधगणपाठ एव नियामकः।

अथ दशमी।

शुनकच्छ ऋषिः।

१ २ ३ २ ३ १ २ ३ २ ३ १ २
तुभ्य॑ सु॒तास॑ः सोमा॑ स्तो॒ण॑ बर्हिर्विभावसो।
३ १ २
स्तोत॑भ्यइन्द्रमृड॒य ॥ १० ॥९९

१ २ ३ ५ ३ ५ २ २ १ २ १
चासीतू२३४वाः। ते४षाम्। हाइ॒हाइ। मान्स्वप्रभू२३-
५ ४ ५
३४वा। वापू॒सो९॒ईहोइ॥ ४ ॥९८

हे "इन्द्र"! "ते" त्वदर्थम् "इमे" पुरतो दृश्यमानाः "सोमाः" "सुतासः" अभिषुताः "ये च" अन्ये सोमाः "सोत्वाः" इत जर्ह्मभिषोतव्याः हे "प्रभूवसो(१) प्रभूतधनवन्निन्द्र! "तेषाम्" अभिषुतानाम् अभिषोतव्यानामर्थे "मत्स्व" हृष्टो भव ॥ ९ ॥ ९८

---

* "तुभ्यं सोमाःसुता इमे"-इति, ॥ "मावच्ह"-इति च ऋग्वेदीयः पाठः।

---

९९ ऋग्वेदस्य ६,६,२५,५।

(१)- 'प्रभु: बहु, वसु धनं, यस्य स प्रभुवसुः। छान्दसं दीर्घत्वम् (६,४,१३७सू०) तस्य सम्बोधनम् हे प्रभुवसो! प्रभूत धन! इत्यर्थः।

I तुभ्य॒ꣳ हाउ। सुतासः॒सोमाः। स्तोर्णांवा२३र्हीः।
विभा२र्हो१इ। वा२३साउ। स्तोताउवा३। भ्यआ-
२इ। द्रसृ३४ओहोवा। डा२३४याः॥ ५॥ ९९

॥ इति द्वितीय-दशतिः॥ ४

हे "विभावसो"(१) दीप्तिधन! [दीप्ति-व्यापक! वा(२)] इन्द्र! "तुभ्यं" त्वदर्थं "सोमाः" "सुतासः" अभिषुताः तथा "बर्हिः" "स्तोर्णं" प्रसारितम्(३)। अतः हे "इन्द्र"! त्वं बर्हिषि निषद्य सोमान् पीत्वा "स्तोतृभ्यः" अस्मभ्यं "मृडय" उप दयां कुरु [यद्वा अस्मान्(४) सुखय]। 'क्रिया ग्रहणं कर्त्तव्यम्' इति चतुर्थी॥ १०॥ ९९

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थ प्रकाशे छन्दोग्योत्तरे द्वितीयाध्यायस्य दशमखण्डः॥ १०॥

I सोमसत्रम्।

(१)—'विविध भाति दीप्यते वसुयस्य म. विभावसुनस्य सम्बोधनम् हे विभावसो! दीप्तिधन! इत्यर्थः' इति वि०।

(२—'वसु'-इति निघण्टौ द्वितीय दशमं धन नामसु षोडशम, प्रथम पञ्चमं रश्मि नामसु 'वसवः'-इति दशमञ्च।

(३)—'बर्हिषि प्रदेशे'-इति वि०।

(४)—अतएव माधवभोज्यम् 'चतुर्थी-बहुवचनमिदं द्वितीयैकवचनस्थाने' इति।

५७क,

अथैकादशे-खण्डे—

सूक्तं प्रथमम्।

शुनःशेप* ऋषिः।

२ ३२ ३ २ ३ १२ ३१२ ३१२
आवइन्द्रं क्रविं* यथावाजयन्तःशुनक्रतुम्।
१ २ ३१२
मꣳहिष्ठꣳसिच्चइन्दुभिः॥ १॥ १००

५२ २१ २ २
I आवइन्द्राम्। क्रविंयथा। वाजया२३न्ताः।
१ २ ११ २
शुताक्रतुम्। मꣳहिष्टा२३ꣳसो। चाया३उवा३इ। दूर
५
३४भोः॥ ६॥ १००

"वाजयन्तः" अन्नमिच्छन्तो(१) वयं शुनःशेपाः हे ऋत्विग्यजमानाः! "वः" युष्माकं सम्बन्धिनम् "इन्द्रम्" "इन्दुभिः"

---

* 'शुनशेफ'-इति वि-पाठः।

* 'क्रिविं'—इति क-पाठः, ऋग्वेदीय-पाठश्च।

---

१०० ऋग्वेदस्य १,२,२८,१।

I कौथुमम्।

(१)—पूजयन्तो वा वि० मतम्। वाजमित्यन्ननामसु द्वितीयम् (नि०२,७)।

अथ द्वितीया।

शुनकर्ण ऋषिः।

१२ ३१२ २२ ३१२
अतश्चिदिन्द्रनउपायाहिशतवाजया।

१२३१२
दूषासहस्रवाजया॥ २॥ १०१

५ ५ १२२ १२
I अतश्चिदिन्द्रन्नउपाऽए। आयाहिश। तवाजा२३

सोमैः(१) "आभिस्ते" [वचन-व्यत्ययः (३,१,८५पा०)] सर्वतः सिञ्चामहे सपर्यामः। कीदृशं? "शतक्रतु" शत-सङ्ख्याक-कर्मोपेतम्(२) "मंहिष्ठम्" अतिशयेन महान्तम्(३)। मेचने दृष्टान्तः "क्षविं यथा"(४) [क्षतोच्छेदने, क्षत्यते छिद्यते खन्यते इति] क्षविः क्षणिः तां जलेन पूरयन्ति तद्वत्॥ १॥ १००

---

१०१ ऋग्वेदस्य ६,६,१६,५।

I कौत्सम्।

(२)—'शतमिति षष्ठ-नाम (नि०३,१,९)। क्रतुरित्यपि कर्म-नाम (नि०२,१,१११) यज्ञ-नाम वा। षष्ठ-कर्माणं षष्ठ-यज्ञं वेत्यर्थः' इति वि०। क्रतुरिति निघण्टौ तृतीयाध्याये प्रज्ञा-नामस्वपि दृश्यते।

(३)—'अतिशयेन दातारम्, अथवा पूजनीयतमम्' इति वि०। मंहते-इति दान-कर्मसु चान्यं पदम् (३,२०नि०)—मघयति-इति चर्चति-कर्मसु पठित्वा निगदव्याख्यानम्। मघोरन्यतरयोः तृजन्तयोः "तृच्छन्दसि (५,३,५९)"-इतीष्ठनि रूपम् विवरणकारस्य। सायणमते तु मघच्छब्दस्य।

(४)—'क्षविरिति कूप-नाम (नि०३,२३,८) तन्नामधेयात् खावादकोऽपि क्षविर

अथ तृतीया।

त्रिशोकः* ऋषिः।

२ ३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २

आ बन्दंवृत्रहादद्देजातः पृक्षाद्दि*मातरम्।

२ ३ २ ३ २ २ १ ५ ४ ५

या३४। दूषा३४सहा३। स्तवो२३४वा। जा५योर्६ह्वा-

इ॥ ७॥ १०१

हे "इन्द्र"। "अतश्चित्" अस्मात् द्युलोकादेव [यद्वा अस्माच्छत्रु-स्थानात्] "शतवाजया"(१) शत-सङ्ख्यक-बलयुक्तेन तथा "सहस्रवाजया" [वाजोऽन्नम् (नि०२,७)] सहस्र-सङ्ख्याकान्नवता बहुलान्नेन "इषा"(२) अन्न-रसेन युक्तः सन् "नः" अस्मान् "उपायाहि"(३) अधिकमाभिमुख्येनागच्छ॥ २॥ १०१

* 'त्रयोक' इति वि० पाठः।

* "पृक्षद्वि"-इति ऋग्वेदीयः पाठः।

यते। यथा-ग्रन्थ उपमा वाची (नि०३,१३,२)। आवाहकमिव। * * । एतदुक्तं भवति-यथा कश्चित्, आवाहकमदकेन मिश्रयति विभर्ति, तद्वत् त्वां हे इन्द्र! सोमेन सिञ्चाम इत्येतदाशास्महे इति वि०।

(१) 'शतमिति बहु नाम (नि०३,१,९)। वाजः वेगः (नि० २,२८)। बहुवेगो यस्याः सा शत वाजा। तया बहु-वेगया शीघ्रया गत्या'-इति वि०।

(२) 'इषम्' इत्यन्न नामसु पठितम् नि० २,७।

(३) 'समीपमागच्छ'-इति वि०।

३ १र २र
कउग्राः केऽहऽण्विरे ॥ ३ ॥ १०२

५र २ १र २
I आबुन्दम्बृ। त्रहाद। दाद्। जातःपृक्षाश्त्।

१ ३ ५ २ १ २ १ २ र १
विमाऽरता२३४राम्। कउग्रा२३ःके। ह्याऽण्विरोदूडा

२ १
२३भा३४३। ओ२३४५दू। डा ॥ ८ ॥ १०२

"जातः" उत्पन्नः(१) "त्रहत्रा" इन्द्रः "वृन्दम्" इष्टं। तथा च यास्कः—'बृन्द इषुर्भवतीति'(२)। "आदद्दे" आदाय चेषुम् "उग्राः" उद्गूर्ण-बलाः(३) "के" के च "मृग्विरे" वीर्येण विश्रुता!—इति स्वीयां "मातरं"(४) "वि पृच्छात्" अप्राक्षीत्(५)॥ ३ ॥ १०२

---

१०२ ऋग्वेदस्य ६,३,४२,४।

I औषसम्।

(१)—'जातमाचष्टे इति वि० व्याख्याने किञ्चिदविशयोऽर्थः।

(२)—"बन्दर्दर्षभवति, बृन्दो वा भिन्दो वा भयदो वा भासमानो द्रवतीति वा"-इत्यादि नै० ३,३२,३३।

(३—'उग्रमस्त्राः इति वि०।

(४)—'जनयित्रीम् आदितिम् इति वि०। "अदितिरदीना देवमाता" इति नै० ४,२२। "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासौ स पिता स पुत्रः। विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्" इति ऋ० १,८९,४,४।

(५)—इन्द्रः जातं एव इषुं मातरं पृष्टवान क उग्राः? के च मृगुवंशे यागादि कर्मसु विश्रुताः? दुष्टनिष्टयोः परिचयमिति यावत इत्येवार्थोऽस्या विवरणमस्मत।

अथ चतुर्थी।

मेधातिथिर्ऋषिः।

३ १ २ २ १ २ ३ १ २
वृबदुक्थ ँ हवामहेसृप्रकरस्नमूतये।
१ २ ३ २ ३ १ २
साध * कृणवन्नवसे ॥ ४ ॥ १०३

I ५ ५२ १ १ २
वृबदुक्थ ँ हाइवामहाइ। सार्प्रारेकारा२। स्नमू।
१ २ १ २१ ५ ४
तयाइ। सा१धा२ काण्वा२३। तमो२३४वा। वाप्र-
५
सोइहाइ ॥ ८ ॥ १०३

"ऊतये"(१) लोकस्य रक्षणाय "सृप्रकरस्नं"(२) प्रसृत-बाहुं

* "साधु"-इति ऋग्वेदीयः पाठः।

१०३ ऋग्वेदस्य ६,३,२,५।
I भारद्वाजम्।

(१)-"ऊतिरवनात्"-इति (नै० ४,२,)। "कतिपूतीत्यादिना (३,३,९७सू०) सिद्धम्।

(२)-'करस्नू बाहू; सृप्नौ गतौ। प्रलम्बौ बाहू यस्य स सृप्रकरस्नुः। उकारस्याकारादेशाकरस्नम्। तं सृप्रकरस्नम् प्रलम्बबाहुमित्यर्थः'-इति वि०। दृष्ट चिन्त्यमेतत्-ऋक्षि पि निघण्टौ द्वितीय चतुर्थे बाहु-पर्याये करस्नौ इति सप्तमम्पदम्. तथा च

अथ पञ्चमी।

गोतमऋषिः*।

ऋजुनीतीनोवरुणोमित्रोनयतिविद्वान्।
अर्यमादेवैः सजोषाः॥ ५॥ १०४

['करस्नो बाह्वं कर्मणां प्रख्यातारौ(१,१७) इति यास्क वचनात्(२) "अवसे" लोकस्य पालनाय "साधः" साधकं धनं "कृणुध्वं" कुर्वन्तं प्रयच्छन्तं "हवदुक्थं"(४) महदुक्थम् इन्द्रम् "हवामहे" आह्वयामः। [तथाच यास्कः—'हवदुक्थो महदुक्थो वक्तव्य मस्माउक्थमिति वा (६,४)'-इति॥ ४॥१०३

* 'गौनकस्यार्षम्'-इति वि०।

१०४ ऋग्वेदस्य १,६,१७,१।

करस्नशब्दोऽदन्त एवेति किंयुनस्वकारस्याकारापत्तिरथनेनेति. किंच अलि मर्यति मंतिकर्मा (२,१४,७ नि०) तस्य मृप्रंतिरूपं तकारस्य रेफत्वं कथमिह नेष्यतमिति।

(२)—तत्रैव मृप्र शब्दोऽपि व्याख्यातः। तथाहि—"मृप्रः मर्यकात्"-इत्यादि (६, १७)।

(४)—हवच्छब्द-वकारस्य वकारापत्त्याकथम्। उकथ-शब्दः लोक-वचनः। हवत् उकथं यस्य स हवदुक्थः तं हवदुक्थम्'-इति वि०।

अथ षष्ठी।

ब्रह्मातिथि ऋषिः।

३ २ ३ २ ३ २ ३ २ ३ २ ३ १ २
दूरादिहेवयक्रनोरुणस्सुरश्मिनत्।

५ २ ४र ५र ४ ५ ४ २ १र २ १
I ऋजुनीतीनोवरुणः। इ॒ह्वा। मित्रोनयतिविद्वा-

२ १ २ १र २ १ २ १ ऽ
२३॰त्साः। इ॒ह्वा। अर्यमादा२३इ॒वादु। इ॒ह्वा। सजोषाइ

२ २ ५
उवाइ। ई३४॒ह्वा॥ १०॥ १०४

अहरभिमानी देवः "मित्रः", "वरुणः" रात्राभिमानी, मित्रश्च वरुणश्च "विद्वान्" नेतव्यमुत्तमं स्थानं जानन् "नः" अस्मान् "ऋजुनीती"(१) ऋजुनीत्या ऋजु-नयनेन कौटिल्य-रहितेन गमनेन "नयति" अभिमतं फलं प्रापयति। तथा "देवैः" अन्यैः इन्द्रादिभिः "सजोषाः" समान-प्रीतिः "अर्यमा" अहोरात्र-विभागस्य कर्त्ता सूर्यश्च अस्मानृजु-गमनेनाभिमतं स्थानं प्रापयतु।

'नयति'-"नयतु"-इति च पाठौ॥ ५॥ १०४

I कौथुमम्।

(१)—"ऋजुरित्यस्य भवति"-इत्यादि (नै० ६.२१)।

३ २ ३ १ २
विभानुं विश्वथाततनत् ॥ ६ ॥ १०५

२२१२ ४२ ५ २ १ २ १ २
I दूराद्दो२३ह्वेवयत्सनाः। अरुण्प्युरशिश्वा२३इतात्।

१२ २ १ २ १ २ १
विभानू२३वी। स्वाथाततनत्। इडा२३भा३४३। ओ२३-

४५इ। डा॥ ११ ॥ १०५

"दूरात्" दूरतएव विप्रकृष्टे एव नभसः प्राक् प्रदेशे वर्त्तमाना "इह"(१) "मतः"(२) सतो इह ममीपे विद्यमाना "इव" ममीपे विद्यमानेव "अरुण्पुः"(३) आरोचमानरूपा ईदृशी उषा(४) "यत्" यदा "अशिश्वितत्" अश्वेतयत् |श्वेता वर्णे,

* "विश्वथा", विश्वधा" इति च पाठौ।

१०५ ऋग्वेदस्य ५,८,१,१।

I ओषसम्।

(१) -'पृथिव्याम्'-इति वि०।

(२ -'प्रज्ञानात यजमानात्'-इति वि०।

(३)—'अरुणरूपा' इति वि० 'रुप्'- इति रूपनामसु मन्त्रभम (नि० ३,७) एतदेव विवरणं ज्ञात्वाने नियामकम्।

(४)—अर्थलभ्यत्वः। "रात्रेरपरः काल:" इति नै० २,१८ तत्सम्बन्धिनः गर्भ

५८ज,

अस्मात् यन्तात्(५) लृङि चङि रूपम् 'यदृद्धत्तान् नित्यम् (८,१,६६पा०)'-इति निघात-प्रतिषेधः] तदा "भानुं" दीप्तिं "विश्वधा"(६) विश्वधा बहुविधां(७) "व्यतनत्" विस्तारयति [तनोतेर्व्यत्ययेन शप् (१,१,८५पा०]। प्रातरनुवाके उषस्येन काण्डेन (१,२४,२) उषाः स्तुता सती प्रादुर्बभूव, हे अश्विनौ! शंसिष्यमाणम् आश्विनं क्रतुं श्रोतुं युवामपि प्रादुर्भवत-इत्यध्याहारेण वाक्यं पूरणीयम्(८)॥

"सतः"-"सती"-इति पाठौ॥ ६ ॥ १०५

धारण-शीलत्वात्। तथाहि—"इदं श्रेष्ठं ज्योतिषां ज्योति रागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा। यथा प्रसूता सवितुः सवाय मेवारात्रुषसे योनि मारैक्" इति ऋ० १,१६,८, १। "इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञातनं ममजनिष्ट विभ्वतनम् यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनि मरिचत् स्थानम्" -इति यास्क-कृत तद्व्याख्यानम्। "स्त्री-योनिरभियुत एनां गर्भः"-इति च नैरुक्तम् २,१६। 'कृण्वत्या कृपतो"१,१६,८,२)-इत्यादि चोषसः स्त्रीत्वे लिङ्गम्।

(५)—'नपुंसकलिङ्गमिदं व्यत्ययेन. या उषा इति। 'पुरस्ताद् यक्तव्द-युतेर्योग्यार्थसम्बन्धसच्छब्दोऽध्याहर्त्तव्यः' इति च वि०।

(६)—"प्रथ पूर्वे विश्व मात थाल्लक्ष्मन्दमि ५,३.१११)" इति थालि रूपम्।

(७)—मृदु-मन्द-तीव्र-लक्षणामित्यर्थः।

(८)—तथाच श्रूयते—"प्रातर्युजा विबोधयाश्विना वेह गच्छताम्। अस्य सोमस्य पीतये (१.५,३.१)"-इत्यादि "प्रातर्योगिनौ विबोधयाश्विना विहागच्छता मस्य सोमस्य पानाय"-इत्यादि च यास्क-कृतं तद् व्याख्यानम्। "अश्विनौ यद् ब्रह्मवत सर्वं रसनान्यो ज्योतिषान्यः **तत्कावश्विनौ द्यावापृथिव्या वित्येके द्यौरावा वित्येके सूर्या चन्द्रमसा वित्येके राजानौ पुण्यकृता वित्येतिहासिकाः"-इत्यादि नै० १२.१।

अथ सप्तमी।

विश्वामित्रो जमदग्नि वा ऋषिः।

१ २ ३ १र २र
आनोमित्रावरुणाघृतैर्गव्यूति मुक्षतम्।
१ १
मध्वारजा°मिसुक्रतू ॥ ७ ॥ १०६

३र ४र ५ र २ २र १ ३र
I आनोमित्रा। वरुणा३। औहोवा२३४। घृतै
४ ५ २ १र १ १ २र १ ३र
र्गव्यूतिमु। क्षता३म्। औहोवा२। माध्वारजारा°
१र १ र १ २ १
मिसू३। औहोवा२। क्रतू। इडा२३भा३४३। ओ२३
४५६। डा ॥ १२ ॥ १०६

"सुक्रतू" शोभन-कर्माणौ हे "मित्रावरुणौ!" "नः" अस्माकं "गव्यूतिं"(१) गवां मार्गं गो-निवास-स्थानं "घृतैः"(२) क्षरण-

---

१०६ उत्तरार्चिकस्य १,१,५,१—ऋग्वेदस्य ३,४,११,५।
I मित्रावरुणयोः संयोजनम्।

(१)—'गावो यत्र चरन्ति स गव्यतिरुच्यते' इति वि०।

(२)—घृतमिति घृणातेरूपम्। तथाहि फणिभाष्ये—(७,१,९५) "घृणातेस्तोकि रूपाणि लोके, घृतं घर्मं घृणा" इति 'उदवृहिलक्षणैः', इति वि०। निघण्टौ चोदक-नामसु दशमम् १.१२।

अथाष्टमी।

प्रस्कण्व(१)ऋषिः*।

२ ३ २ २ ६ ३ २ ३ १ २ ३ १ २
उदुत्येसूनवोगिरःकाष्ठायञ्जेषन्नत*।
३ १ २ ३ १ २ २ २
वाश्राअभिज्ञुयातवे॥ ८॥ १०७

साधनैः पयोभिः(२) "आ उत्तम्" आ समन्तात् सिञ्चतम्, अस्मभ्यं दाग्भ्रोः गाः प्रयच्छतामिति भावः। रजांसि"(३) पारलौकिकान्यस्मदावासस्थानानि "मध्वा"(४) मधुरेण दुग्ध-रसेन सिञ्चतम् [गव्यूतिम्-'गोर्यूतौ छन्दसि(६,१,१२३पा०]-इत्यवादेशः, मध्वा-सर्व विधीनां छन्दसि विकल्पितत्वादत्वनुमभावः॥ ७॥ १०६

* 'हिरण्यस्तूपस्यार्षम्'-इति वि०। "हिरण्यस्तूपो हिरण्मय-स्तूपोऽस्येति वा। स्तूपः स्त्यायतेः सङ्घातः"। इति नै० ४,३३।

* "अज्मेषन्नत"-इति ऋग्वेदीयः पाठः।

१०७ ऋग्वेदस्य १,३,१३,५।

(१) "प्रस्कण्वः कण्वस्य पुत्रः, कण्व-प्रभवोयथा प्राग्यम्"-इति नै० ३,१७।

(२)—'चोनपि लोकान्'-इति वि०।

(४) 'उदकेन'-इति वि०। मधु-इत्युदक-नामसु एकादशम् १,१२।

(५)—"सुप्तिङन्तपदयल्लिङन्तराणां कालस्तस्तस्करकर्तृयज्ञाश्च। यत्ययमिच्छ-ति प्राज्ञस्तदेषां मोऽपि च सिद्ध्यति वाऽऽलकेन" इति (२,१,८५) कात्यायन-वचनात् लिङ्यत्यये "अमादिषु छन्दसि वा वचनम् प्राङ्णौ चङुपधायाः"-इति (७,३,९७) कात्यायनीयेन घि-संज्ञाभावे रूपमिति भावः।

५ २ २ ५२ १ २ १ ३
I उदुत्येसूनाईवोगिराः। काष्ठाय। ज्ञाइ। षुवा
३ ५ २२ १२ ३ १ ४ २
२त्ना२३४ता। वाश्राआ२३भी३। ज्ञू२३याइ। ता३४-
५
५वोईच्चाइ॥ १३॥ १०७

"त्ये" ते प्रसिद्धाः "गिरः सूनवः" वाच उत्पादकाः(१) मरुतः(२) [वायवो हि ताल्वोष्ठादिषु मरुवरन्तो वाचमुत्पादयन्तो(३) "यज्ञेषु" स्वकीयेषु यागेषु वर्त्तमानेषु सत्सु "काष्ठाः" अपः ["आपोऽपि काष्ठा उच्यन्ते क्रान्त्वा स्थिता भवन्तीति" (२,१५) यास्कः(४)] "उत् उ" उत्कर्षणैव "अस्तत" अतनिषतवन्तः विस्तारितवन्तः। उदकं विस्तार्य्य तत्यानार्थं "वाश्राः"(५)

I ऋतुनाम।

(१)—सूनवः-इत्येभ्यैवार्थः उत्पादक इति। अत्र च सुनोतेः सूनुरित्येव बोध्यम।

(२)—इयञ्च मारुती ऋक् इति प्रसिद्धा।

(३)—तथाहि निरुक्तं वचनम्—"आत्मा बुद्ध्या समेत्यार्थान मनोयुङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्"-इत्यादि।

(४)—काष्ठाइत्येतदनेकस्यापि सत्यस्य नाम भवति। काष्ठा दिशो भवन्ति, क्रान्त्वा स्थित्वा भवन्ति। काष्ठा उपदिशो भवन्ति, इतरेतरं क्रान्त्वा स्थित्वा भवन्ति। आदित्योऽपि काष्ठोच्यते, क्रान्त्वा स्थितोभवति। आज्यन्योऽपि काष्ठोच्यते. क्रान्त्वा स्थितो भवति। आपोऽपि काष्ठाउच्यन्ते, क्रान्त्वा स्थित्वा भवन्तीति स्थावराणाम्"-इति नै० २,१५।

(५)—"स्थाशि यजि वसि (उ०,दि०)" इत्यादिना शब्दार्थं वाशृ शब्दे सिद्धम्।

अथ नवमी।

मेधातिथिर्ऋषिः।

२२३ ३ १ २ ३ १र २र ३ २
इदविष्णुर्विचक्रमेत्रेधानिदधेपदम्।
१ २ ३ २
समूढमस्यपाꣳसुले* ॥ ९ ॥ १०८

॥ इति तृतीय-दशतिः ॥

५ ५ १ ३ २ ३ ५ १
I इदाꣳहमे। विष्णूरः। विचक्राꣳ३४माइ। त्राइ-

हभारवोपेताः गाः "अभिज्ञु"(६) जानुभिमुखं यथा भवति तथा "यातवे"(७) गन्तुं प्रेरितवन्त इति शेषः(८)॥ ८ ॥ १०७

---

* "पांशुरे"-इति ऋग्वेदीयो यजुर्वेदीयश्च पाठः। "स्वाहा"-इत्यन्तेनाधिकश्च यजुर्वेदे।

---

१०८ उत्तरार्चिकस्य ८,२,५,१ = ऋग्वेदस्य १,२,७,२ = यजुर्वेदस्य ५,१५ = अथर्व-ब्राह्मणस्य १,१७ = जहगानस्य १४,७।

I विष्णोः साम।

(६) -जानुभोः (५,५,१ ३०)।

(७) -"तुमर्थे से सन् (३,४,९)"-इत्यादिना तवेङ्।

(८) -'त्वं' ते 'स्तनवः' रुद्रस्य अपत्यभूता 'मरुतः' 'गिरः' गर्जितलक्षणा वाचः 'काष्ठाय' दृष्टि लक्षणा अपः 'यज्ञेषु' निमित्त-भूतेषु 'उदप्रुतः' ऊर्द्धं विस्रावयन्ति। कीदृशा मरुतः? 'वाशाः' वाशन-स्वभावकाः। कथं त्वमपि? 'अभिज्ञु' अभिनिपात्य-जानुनो मरुतो दात्यर्थः। किमर्थम्? 'यातवे' पृथिवीं प्रति गमनाय। इत्यर्थो विवरण निष्पन्नः।

र २ १ २ २
धानि। दधाइपा१दा२म्। समू२ढो१। ढा२३मा३।
१ ३ ५र् र २ २
स्या२पा२३४औढोवा। ए३। सुले१॥ १४॥ १०८

'विष्णुः" त्रिविक्रमावतारधारी "इदं" प्रतीयमानं सर्वं जगत् उद्दिश्य "त्रेधा" त्रिभिः प्रकारैः "पदं निदधे" स्वकीयं पादं प्रक्षिप्तवान्। "अस्य" विष्णोः "पांसुले" पांसुरे धूलियुक्ते पादस्थाने "समूढम्" इदं जगत् सम्यगन्तर्भूतम्(१)। सेयमृग् यास्केनैवं व्याख्याता—"* * विष्णु र्विगते र्वाप्राप्ते र्वा * * * यदिदं किञ्च तद्विक्रमते विष्णुः, त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः। समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः। समूढमस्य पांसुरेप्यायनेन्तरिक्षे पदं न दृश्यते। अपिवोपमार्थेस्या पांसुल इव पदं न दृश्यत इति। पांसवः पादैः सूयन्त इति वा। पद्वाः शेरत इति वा। पंसनीया भवन्तीति वा"(१२,१८—१९)" इति॥ ९॥ १०८

इति सायणाचार्य्य विरचिते माधवीये सामवेदार्थप्रकाशे ऊर्ध्वाख्याने द्वितीयाध्यायस्यैकादशमखण्डः॥ ११॥

(१) "तच्च पादत्रयमपि "समूढमस्य" वक्ष्यमाणं रूपम् सम्यक् स्थापितम्। "पांसुले" लुप्तोपमेयम् द्रष्टव्यम्. पांसुरइव देशे। १। अथवा पांसुलत्व-योगात् पांसुलशब्देन ग्रथिरुच्यते। तेषां त्रयाणां ग्रथिर्यत पदं तत समूढम्। २ अथवा विष्णुरादित्यः। स इदं विचक्रम। त्रेधा निदधे पदम् -उदयगिरौ, मध्ये नभसः, अस्तगिरौ च। ३। अथवा त्रेधा निदधे पदम् -ग्रथित्रयसम्बन्धेना, अन्त-रिक्षे वैद्युतात्मना. दिवि आदित्यात्मना. तच्च पदत्रयमस्य समूढम् पांसुर इव देशे। ४। अथवा समूढमिति मुहे मोहनार्थस्य रूपम। समूढं मोक्षितं यदस्य वैद्युता-त्मना पदम् तत समूढं मक्षितम्॥" इति वि०।

* * "अथ यद्विषितो भवति तद्विष्णुर्भवति" इत्यादिभागेनाधिकलय।

* * * रूपैव तत्र मन्त्र स्वरूपः पठितः।

अथ द्वादशखण्डे—

मेधा प्रथमा।

मेधातिथि ऋषिः।

१ २ ३ १ २ ३ २ ३ १ २ २
अतीहिमन्युषाविणꣳसुषुवाꣳसमुपेरय*।
३ २ ३ २ ३ १. २
अस्मरातौ॑ सुतम्पिब ॥ १ ॥ १०९

५ २ २ १ १
I अतीहिमा। न्युषा२वाइणा२म्। सुषुवाꣳसा

हे इन्द्र! "मन्युषाविणं" क्रोधेन सोमं सुन्वन्तम्(१) "अतीहि" अतिगच्छ, तथास्मिन् देशे "सुषुवांसं" सोमं सुन्वन्तम्(२)

---

* "सुमुपारणे"-इति, ॥ "इमं रातम्"-इति च ऋग्वेदीय पाठः।

१०९ ऋग्वेदस्य ६, ३, ५. १।

I कौत्सम्।

(१)—दीप्तस्य सोमस्य अभिषोतारम् मेधातिथिं माम् प्रति'-इति वि०। 'मन्यु'-इति क्रोध नामसु उपान्त्यं पदम् २.१३ नि०। 'मन्यते' इति कान्ति-कर्मसु चयोदशके २.६ नि०।

(२)—'अद्रि॰॰॰प्रभृतिमन्यस्मिन्' इति वि०।

अथ द्वितीया।

वामदेव ऋषिः।

२ ३ १ २ ३ १र २र ३ १ २
कदुप्रचेतसेमहेवचोदेवायशस्यते।
१र २र ३ १ ९
तदिध्यस्यवन्द्यनम्॥ २॥ ११०

१ २ ३ २र ५ १
२म्। ह्वोइ। ऊपै१रायार२। अस्यरातार२३उ। सू२-
३ ५र र ३ ५
ता२३४औह्वोवा। पो२३४वा॥ १५॥ १०९

३ ४ ३ ४र५ र ३ २ १ ऽ ५र र
I कदुप्रचेतसे। महा३इ। वा२३४चो। देवाहाउ।
४ ५र २ १ २ ३ २ ३ २ २ १
वचोदेवा। यशस्या२३ता३४इ। तदा३४इन्द्रिया३। स्ववो
५ ४ ५
२३४वा। धापूनोहाइ॥ १६॥ ११०

"उपेरय" समीपे प्रेरय। "अस्य" यजमानस्य "रातौ" यज्ञाख्ये दाने "सुतम्" अभिषुतं सोमं "पिब"॥ १॥ १०९

"महे" महते "प्रचेतसे"(१) प्रकृष्ट-ज्ञानाय "देवाय" द्योत-

I काश्यपम् आसरसं वा।

(१)—'चेतः' इति प्रज्ञा-नामसु तृतीयम् ३,९ निः। "प्रचेताः प्रहृद्य चेताः" इति नै० ८,५।

अथ तृतीया।

मेधातिथि-प्रियमेधावृषी*।

३ २ ३२३ १२ ३१ २ ३१२ २२
उक्थञ्चनशस्यमानंनागोरयिराचिकेत।
१२ ३२३ १२
नगायत्रङ्गीयमानम्॥ ३॥ १११

५ ४ ५ ४ २ २ २ २ २
I उक्थञ्चनोहाइ। शस्यमानम्। नागोरा२श्योः।

नादि-गुण युक्तायेन्द्राय "कदु"(१) कुत्सितम् अस्मदीयं "वचः" स्तोत्र-रूपं सत् "शस्यते" यथा प्रशस्तं भवति(२) देव स्तथानुग्रहातीत्यर्थः। "तदित्" तदेव "अस्य" यजमानस्य 'वर्द्धनं हि'(३) प्रवृत्ति-साधनं खलु॥ २॥ ११०

* 'मेधातिथेरार्षम्-इत्येव वि०।

१११ उत्तरार्चिकस्य ९,१,१५,२ = ऋग्वेदस्य ५,७,१९,४।
I वार्हदुक्थम्।

(१)- 'कत्, किम उत्तरस्याः पञ्चम्या चत् आदेशः, कस्मात् कारणात्'। 'उ' इति पाद-पूरणः, इति वि०।

(२)--'शस्यते उच्चार्यत इत्यर्थः'-इति वि०। 'शसनं'-इति अर्चति कर्मसु पठ्यते ३,१४ नि०।

(३)--'हि' यस्मात् 'तत्' उच्चारितम् वचनम् 'अस्य' देवस्य 'वर्द्धनम्' हर्षिकरम् तस्मादुच्चारयेति वि०-सम्मतोऽर्थः। स्तूयमाना हि देवता वीर्येण वर्द्धते इति तत्त्वि-द्धान्तः।

आचिकेता। नगाया२३चाम्। गो। यमा२ना२३४
औच्छोवा। ऊ२३४पा॥ १७॥१११

गायते गौः(१) "अगोः"(२) अस्तोतुः(३) "अयिः" अरिः [व्यत्ययेन यकारः(३,१,८५पा०)] गच्; इन्द्रः "गस्यमानं" स्तोत्रा पठ्यमानम् "उक्थं च" गस्यमपि "आ चिकेत" अभिजानाति [कितज्ञाने, छान्दसो लिट् (३,४,७पा०)। नेति सम्पत्यर्थे] "न" सम्पति प्रस्तोत्रादिभि र्गीयमानं "गायत्रम्" गातव्यं साम(४) [यद्वा गायत्राख्यम्(५)] आचिकेतेत्येव। अतः कारणात् वयमपि तमिन्द्रं स्तुमइत्यर्थः॥

"नागोः"-"अगोः" इति, "रयिः"-"अरिः"-इति च पाठौ॥ ३॥१११

(१)—तथाहि-"गातेर्वोकारो नाम करणः" इति नै० २,५। गौरिति निघण्टावपि स्तोतृ नामसु दृश्यते ३, १६।

(२)—'अगोः'-इति पाठस्य, ऋग्वेदीयस्तोत्रेऽत्र न युक्तः, इह पुनर्नागोरिति प्रतीकमुदूह्य युज्यते।

(३)—'नागोः' कुङ्गुङ् अव्यक्तं शब्दं . गु. अव्यक्तभाषी, न गुः=अगुः=अव्यक्तभाषी, न अगुः=न अव्यक्त-भाषी=नागुः। तस्य नागोः अव्यक्तभाषिण इत्यर्थः' इति वि०।

(४)—"गायत्रं गायतेः स्तुति कर्मणः" इति नै० १,८।

(५)—तच्च गानं चतुर्षु गान-ग्रन्थेषु नोपलभ्यते, परमध्ययनारम्भे गुरुमुखादनुश्रूयते। तदिदम्—"तत्सवितुर्वरेण्यस्य। भार्गोदेवस्य धीमाहीरे। धियोयोनः प्र। चो ९९२१९२। दम्। चा२। दायो। चा२३५॥ १॥" अन्या मूलसङ्ग्रहे तु तनरार्चिकस्य षष्ठ तृतीय-दशम सूक्ते प्रथमेति पठ्यते॥

अथ चतुर्थी।

विश्वामित्र ऋषिः*।

१ १ १ २ ३ १ २ ३ १ २ ३ १ २
इन्द्रउक्थेभिर्मन्दिष्ठोवाजानाञ्चवाजपतिः।

१ २ ३ २ ३ १ २
हरिवान्त्सुतानाꣳसखा॥ ४॥ ११२

५ २ १ २ १ २ ३
I इन्द्रउक्थाइ। भिर्मान्दाइष्ठो३। वाजाना२३४-

५ १२ २ १ ३ ५ १२ ऽ२ १
ञ्चा। वाजपतिः। हरा२इवा२३४त्स। ताना२ꣳस।

२ ४ ५ ४
खा। औ३ञ्चोवा। होपुइ। डा॥ १८॥ ११२

"वाजानाम्"(१) अन्नानां मध्ये "वाजपतिः" उत्कृष्टान्न-पतिः "हरिवान्" हरि-नामकाश्ववान् "इन्द्रः" "उक्थेभिः" होत्-प्रयुक्तैः (उक्थ-नामकै र्वा शस्त्रैः) "मन्दिष्ठः" अतिशयेन हृष्टः सन् "सुतानाम्" अभिषुतानां सोमानां "सखा" सखिवत् प्रीति-करः सोमैः प्रीयत इत्यर्थः(२)॥ ४॥ ११२

---

* 'वामदेवस्यार्षम्-इति वि०।

I वार्हदुक्थम्।

(१)—'दानेति यास्कशेषः'-इति वि०।

(२)—चक्षाञ्चेति च-शब्दः पाद-पूरणः सर्व-सम्मत।

अथ पञ्चमी।

मेधातिथि-प्रियमेधावृषी* ।

३ १ २ २१२ २२ ३ १ २
आयाह्युपनः* सुतंवाजेभिर्मा हृणीयथा ।
३ १ २३१ २
महाँ३इवयुवजानिः ॥ ५ ॥ ११३

४२ ५२ ४ १ २ १ २ २ १२ २
I आयाह्वी। उपनःसुतम्। ह्वोवाऽह्वाइ। वाजे
१ १२ ३२ १ २ २ १२ २ १ १ २
भिर्माहृणीयथाऽःह्वोवाऽह्वाइ। महाँ३इवयुवा२३। ह्वोवा-
२ १ ३ ५२ २ २ ५
ऽह्वाऽइ। जा२ना२३४ओह्वोवा। ऊ३२३४पा ॥ १८ ॥ ११३

हे इन्द्र! "नः" अस्मदीयं "सुतम्" अभिषुतं सोमम् "उप याहि" प्रत्यागच्छ, किञ्च "वाजेभिः" अन्यदीयैर्हविरूपैरन्नैः "मा हृणीयथाः" मा क्रियस्व(१)। तत्र दृष्टान्तः "युवजानिः" यौवनोपेता जाया यस्यासौ युवजानिः ['जायाया निङ्(५,४,१३४ पा०)'-इति समासान्तः] "महान् इव" प्रभुरिव; यथा रूपवद्-

---

* 'सुतकक्षस्यार्षम्'-इति वि०।

* "आयाह्यद्रिभिः"-इति म-पाठः।

I कौथुमम्।

(१)—'अत्र च श्लोकेनापराधेन 'मा हृणीयथाः' मा क्रोधङ्कृथाः, मा रोषीरित्यर्थः'-इति वि०। निरुक्तौ क्रुध्यति-कर्मसु 'हृणीयते'-इति चतुर्थेऽध्याये पदमीक्ष्यते १,१२।

अथ षष्ठी।

कौत्सो दुर्मित्र ऋषिः*।

३ १ २ ३ १र २र ३ १र २र ३ १ २ ३ २
कदावसोस्तोचꣳहर्यताआवꣳसशा*रुधद्वाः।

३र ३ २ ३ १ २
दीर्घꣳसुतंवाताप्याय ॥ ६ ॥ ११४

२र ३ ५र १ २ २ ३
। औ२हो१इ। कदावसो। स्तोचाꣳम्। हर्य-

४ ५ ३ २ ३ ५र ३ २ ३ ५
ताआ। औ२हो१इ। अवꣳसशा। रुधाद्व२३४वाः।

भार्योपेतः प्रभुः अन्याभि र्नोपक्रियते किन्तु तामेव युवतिं प्रत्या-
गच्छति तद्वत्(२) ॥ ५ ॥ ११३

हे "वसो" वासयितः(१)! इन्द्र! "स्तोचम्" अस्मत्कर्तृकं

* 'दुर्मित्रस्य सुमित्रस्य वार्षम्'-इति वि०।
* "हर्यतआवꣳसशा"-इति ऋग्वेदीयः पाठः।

११४ ऋग्वेदस्य ८,५,२६,१।

(२) विवरणकारस्त्विदमेव दृष्टान्तं घटयति—'स यथा तरुणा भार्यायाः स्तोकेऽपराधे चिन्न रुष्यति, तद्वन्मा रोषीरित्यर्थः' इति।

(१)—'प्रशस्त-धनवन्'—इति वि०।

औ२च्चो१इ। दीर्घ॰सुतम्। वाता३४३। पो३याधुया
६५६। ई२३४५॥ २०॥

II कदा३४औच्चोवा। वसो। स्तोत्राइम्। च्चर्यता
आ। अवा३४। औच्चोवा। ग्रभ्णा२। रुधादू२३४
वाः। दीर्घा३४औच्चोवा। सुता२३म्। वाता३४३।
पो३याधुया६५६॥ २१॥ ११४

"च्चर्यते" कामयमानाय(२) कामयमानं त्वां [क्रिया-ग्रहणं कर्त्तव्यम् कर्मणः सम्प्रदान-त्वाच्चतुर्थी] "कदा" कस्मिन् काले "अवारुधत्" अवरोत्स्यति, अवरुध्य च कदा "वाः" वारयिष्यति, तादृशः कालः कदाऽस्माकं सम्भविष्यतीत्याशास्ते। तत्र दृष्टान्तः —अश्नुते व्याप्नोतीति "ग्रभ्णा"(३) कृत्वा [लुप्तोपममेतत्] यथा कश्चित् तत उदकान्यवरुणद्धि अवरुध्य च वारयति तथेत्यर्थः। किमुद्दिश्यावरोध इति तत्राह—"दीर्घं" सवन-त्रय रूपेणायतं "सुतम्" अभिषुतं सोमं प्रति। किमर्थमिति तदाह "वाता-

I,II इमे द्वे कौत्से।

(२)—'च्चर्यति'-इति कान्ति-कर्मणः पाठात् नि० २,६।

(३)—"ग्रभ्णा शु व्याप्नुत इति वा ग्रभ्नात इति वा" इत्यादि नै० ५,१२।

अथ सप्तमी।

मेधातिथि ऋषिः।

१२ ३ १२३२ ३१ २३१२ २२
ब्राह्मणादिन्द्रराधसःपिबासोममृतूंरनु।
३२ ३१२ २२
तवेद्ंसख्य*मस्तृतम् ॥ ७ ॥ ११५

। ५२ २ २२१ २२१ २
I ब्राह्मणादो। द्रराधसाः। पिबासोमा२म्। ऋतू-
१ २२१ १ ४ २
ंरनू। तवेदांसा२३। ख्या२३मा३। स्ता३४र्त्तो-
५
६ह्वाइ ॥ २२ ॥ ११५

प्याय" [वातेनाप्यते अधस्ताच्चिपात्यत इति] वाताप्य मुदकं तस्य प्रदानायेत्यर्थः ॥ ६ ॥ ११४

हे "इन्द्र"! "ब्राह्मणात्" ग्रंसिसम्बन्धात् "राधसः" धनभूतात् पात्रात् "सोमं" "पिब"। किं कृत्वा? "ऋतूंरनु"(१)

---

* "तवेद्विसख्य"-इति ऋग्वेदीयः पाठः।

---

११५ ऋग्वेदस्य १,१,२८,५।

I अष्टसप्तनम्।

(१)—"दीर्घादटि समान-पदे (८,३,९)" नकारस्य वत्वे सानुनासिक-रुडागमे च (७, १,८) रूपम्।

अथाष्टमी :

मेधातिथि ऋषिः।

२ १ २ ३ १ २ ३ १ २
वयंघातेअपिष्मसि*स्तोतारइन्द्रगिर्वणः।
१ २
त्वन्नोजिन्वसोमपाः॥ ८॥ ११६

५ ४ ५ ४ ३ ५ ४ २ १ २
I वयंघातेअपिष्मसाइ। स्तोतारइन्द्रगिर्वणाः। ववा
१ ७ १ १ २ १
२३ह्वोइ। तूवन्नोजो२। ववा२३ह्वो। न्वमो२३। मा
५ ३ २ १ १ १ १ १
२पा२३४औह्वोवा। ए३। उपा२३४५॥ २३॥ ११६

देवाननुसृत्य ऋतवोऽपि(१) पिबन्त्वित्यर्थः। यस्मात् "तव इदं सख्यम् अस्तृतम्" ऋतूना मविच्छिन्नं तस्मादृतुभिः पानं युक्तम्(२)॥ ७॥ ११५

हे "गिर्वणः" गीर्भिर्वननीय! "इन्द्र"! "ते" तवापि "वयं घ"

---

*"अपिष्मसि"-इति ऋग्वेदीयः पाठः।

---

११६ ऋग्वेदस्य ६,३,२,२।

I अर्धसङ्गनम्।

(१)—'यस्मात् 'तवेदं सख्यं' यष्टृ-यष्टव्य-सख्यम् 'अस्तृतम्' अविच्छिन्नम्। यस्मात् न तवेदं यष्टव्यः तस्मात् पिबेत्यर्थः'-इति वि०।

अथ नवमी।

विश्वामित्रोगाथिनोभोपाद उदलो वा ऋषिः*।

१ २ ३ १ २ २ २ ३ १ २
एन्द्रपृक्षुकासुचिन्नृम्णन्तनूषुधेहिनः।
१ २ ३ १ २
सत्राजिदुग्रपौंस्यम्॥ ९॥ ११७

I ५ २ २ ५ २ २ १ २
एन्द्रपृक्षुकासुचीर्धे। नृम्णम्। तनूषूश्धादूहा-
१ २ २ १ २
१इनाः। सात्राजिदु। ग्रपौश्ंस्याउ। वाः।
२ ५
ऊ३४पा॥ २४॥११७

वयं खलु "स्तोतारः" "स्मसि" स्मः भवामः। हे "सोमपाः" सोमस्य पातरिन्द्र! "त्वं" "नः" अस्मान् "जिन्व" प्रीणयसि॥ ८॥ ११६

हे "इन्द्र"! "पृक्षु"(१) सम्पृक्तासु "कासु चित्" कास्वपि "नः" अस्माकं "तनूषु" अङ्गेषु "नृम्णं"(२) बलम् "आ धेहि" आ

* 'वामदेवस्यार्षम्'-इति वि०।

I अभीपादस्य औदलस्य साम।

(१)—'पृची सम्पर्के-इत्यस्येदं रूपम्, सम्पृक्तासु यासां याग-क्रियायां यजमाना देवैः सह सा पृक्, तासु पृक्षु याग-क्रियासित्यर्थः'-इति वि०।

अथ दशमी।

सुतकक्ष ऋषिः।

३ १र १र २ २ ३ १र २र ३ २ ३ २
एवाह्यसिवीरयुरेवाशूरउतस्थिरः।

३ २ ३ र ३ १ २
एवातेराध्यमनः ॥ १० ॥ ११८

॥ इति चतुर्थ-दशतिः ॥

५र र २ ४ ५र २र १ २ १
I एवाह्योऽसिवीरयूः। एवाशूरा२ः। उताऽऽ

समन्तात् स्थापय। हे "उग्र" उद्गूर्ण बल! इन्द्र! "सत्रा-जित्"(३) द्वादशाहादिभिः सत्रैः जीयमानो वशीक्रियमाणः सन् "पौंस्यम्"(४) पुंसे हितं फलम् "आ धेहि" प्रयच्छेत्यर्थः ॥९॥ ११७

---

११८ उत्तरार्चिकस्य २,१,१८,१ = ऋग्वेदस्य ६,८,२०,२ = ऊहगानस्य २,२।

I आमहीयवम्।

(२)—'बृंहणम् धनम्'-इति वि०। मघरूपमिति निघण्टौ बल नामसु (२,९) धन-नामसु (२,१०) उभयत्रैव दृश्यते।

(३)—'सदा सर्वे जां जेतृ इत्यर्थः'-इति वि०।

(४)—'पौंस्यम् बलम्'-इति वि०। 'पौंस्यानि' इति बल नामसु चतुर्विंशति मध्ये २,९।

२ १ २२ १ २२
स्थिराः। आदुवातेरा। धियाऽ३म्माउ। वाऽस्तौषे-
१११
३४५ ॥ २५ ॥ ११८

हे इन्द्र! त्वं "वीरयुः"(१) वीरान् युद्ध-कर्मणि समर्थान् शत्रून् हन्तुं कामयमानः 'एव असि" भवसि खलु "हि" प्रसिद्धौ अतएव त्वं "शूरः" सामर्थ्यवानेव भवसि "उत" अपिच "स्थिरः" सङ्ग्रामे धैर्यवान् भवसि। [एकत्र स्थित्वैव शत्रून् सम्महरसीत्यर्थः।] एवं सति "ते" तव "मनः" "राध्यं" स्तुतिभिराराधनीयमेव; यतोऽनेन मनसा त्वं शत्रु-वधं सङ्ग्रामे धैर्यादिकं करोषीति तत एव मन एव सर्वैः स्तुत्यमित्यर्थः ॥१०॥ ११८

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ महेश्वरः ॥ २ ॥

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे ऐन्द्रोव्याख्याने द्वितीयाध्यायस्य द्वादशः खण्डः ॥ ७ ॥

इति श्रीमद्राजाधिराज परमेश्वर-वैदिक-मार्ग-प्रवर्तक-श्री-वीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थ-प्रकाशे ऐन्द्रो व्याख्याने ऐन्द्रकाण्डे द्वितीयोऽध्यायः ॥

---

(१)—"क्याच्छन्दसि(३,२,१७०)" इति उः। "मन्छन्दसि पुनर्वस्(७,४,३५)"-इत्यादीर्घाभावश्च।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥ २ ॥

अथ तृतीयाध्याय आरभ्यते ।

अस्मिन्नध्यायेऽपि इन्द्रः स्तूयते ।

ऋचोऽशीति रभित्वेति(१) बृहत्यः(२) सकला अपि ।
नक्षिवो(३) मारुतो तत्र प्रमित्वायेति(४) संस्तुतिः ।

---

(१)—'अभित्वाशूरनोनुम' इत्यारभ्य—'विवक्षितेत्यन्ताः अष्टसु दशतसु पठिताः ।

(२)—बृहतीच्छन्दस्काः । अष्टचत्वारिंशदक्षरा बृहती, छन्दः मृग प्रभिदाः, अक्षरैः कस्य न्यूनताया मित्यादि-भावेन पादः पर्यंत —आधिक्यं तु न दोषो वैदिकानाम् । "बृहती परिवर्हणात् (६,१२)" इति नैरुक्त-निर्वचनम् "गायत्री मेव विपदां सतीं चतुर्भिन पादैमातुष्टोभतीति ब्राह्मणम्, अत एवोक्तं याज्ञिकैन "चतुष्टुचतुष्टोभनात्"-इति ; सैषा चतुष्टुप् चतुर्भिरक्षरैः परिवृंहिता बृहतीत्युच्यते ।

(३)—'नक्षिवस्यमरुत'-इत्यादि अभित्वेति-प्रथम-सूक्त-गता नवमी ।

(४)—'प्रमित्वायप्रार्थमज्ये'-इत्यादि अग्न्यूषिति तृतीय-सूक्त-गता तृतीया । मेधसा-दित्यानां संस्तुतिः आदित्य-देवताकेत्यर्थः ।

अथ प्रथम खण्डे—

सैषाप्रथमा।

वसिष्ठ ऋषिः।

३ १ २ ३ १ २ ३ १ २
अभित्वापूरनोनुमोदुग्धाइवधेनवः।

आदित्याना मथेन्द्राग्नोअपा(५) दिन्द्राग्नि-संस्तुतिः।
अश्विन्यत्ता ग्रचीभिर्नः(६) कुष्ठ्येमाउवामिति।
यदा कदा(७) वारुणी स्यात्त्वष्टानो(८) वनु-देवता।
उषस्यी प्रत्यु(९) इत्येषा ब्रह्म वट्(१०) सूर्य-संस्तवः।
इत्येकादश(११) ताभ्योऽन्या ऐन्द्र एकोनसप्ततिः॥

(५)—'इन्द्राग्नोअपादियम्'-इत्यादि थोराजेति-पञ्चम-खण्ड गता नवमी।

(६)—'ग्रचीभिर्नःग्रचीवसू'-इत्यादि इनऊतीति षष्ठ-खण्ड-गता पञ्चमी। 'कुष्ठः कोवा'-इत्यादि प्रत्युदर्ग्रेत्यष्टम-खण्ड गता तृतीया। 'इमाउवान्दिविष्ठ्ये'-इत्यादि नवैव खण्डे द्वितीया। आमाम्नवयाणां ऋषिणी देवता उक्ता कथिता वेदविद्भिरित्यर्थः।

(७)—'यदाकदाचमीढुषे' इत्यादि इनऊतीति षष्ठ-खण्ड-गता षष्ठी।

(८) 'त्वष्टानोदैव्यंवचः' इत्यादि इमरन्द्रायेति सप्तम-खण्ड-गता सप्तमी।

(९)—'प्रत्युदर्ग्रा' इत्यादि अष्टम-खण्डीयाद्या।

(१०)—'ब्रह्मणुजोहरयद्रन्द्र'-इत्यादि 'मकिष्टमित्यादि-द्वितीय-खण्डीय-तृतीया; षण्मदांऋषि'-इत्यादि 'थोराजेति-पञ्चम-खण्ड-गता चतुर्थी; ब्रह्मेत्ययं मन्त्रः वक्तित्यर्थं च मन्त्रः सूर्य-सवितः सूर्यस्य संस्तुतिः सूर्य-देवताक इत्यर्थः।

(११)—'मविवो'-इत्यादि कथिता एकादश यथा-कथित-देवताकाः, ताभ्यः एकादशभ्यः अन्यः अन्याः एकोनसप्ततिः ऐन्द्राः केवलेन्द्र-देवताकाः इति एतदर्थाये ऋतामाग्निसङ्ख्याकानामृचां देवत-सङ्केतः॥

१२ ३१२ २२ १ २ ३ १ २ ३ १ २
ईशानमस्यजगतःस्वर्दृशमीशानमिन्द्रतस्थुषः ॥ १ ॥ १

५ २ २१ ७ १ २ ३ १
I अभित्वाशूर। नोनुमाऽदुः। ओइनू३माः। आदु-

२२ १ ७ १ २ २ १ २ ५
ग्धाइ। वधाइनवाऽदुः। ओइनाऽ३वाः। आइशानमस्य-

१ २ १ २ २ १ २ २
जगतः। सुवाइदृशम्। आर्दृ३शाम्। आइशानमि।

१ २ १ १ ३ ४२ २
न्द्रतास्थुषः। आर२३। स्थू२। षा२३४। औहोवा।

२ १ ३ १ १ १ १
स्थुषःस्थूषा२३४५ः ॥ २६ ॥

५ २ ४२ ५ ४२ ५ १ २२ १
II अभित्वाऽशूरनोनुमाः। आदुग्धाइव। धाइना

२ १ २ २ १ ७ ६
२३वाः। आइशानमस्याजगा। ताः। सुवार्दृ२३४-

१ उत्तरार्चिकस्य १,१,११,१ = ऋग्वेदस्य ५,३,२१,१ = आरण्यगानस्य २,२१—२६ ४,२,२—१५—५१० = ऊहगानस्य १२,१८—२२,१—१२ = ऊह्यगानस्य १,१—३,५—५, १५ ॥

I,II भरद्वाजस्यार्कौ द्वौ।

५ २र१र २ १ २ १ २
शूम्। ईशाना२३मो। द्रातस्थुषः। इडा२३भा३४३।
२३४५इ। डा॥ २०॥ १

हे "शूर!(१) "इन्द्र!" "अस्य" "जगतः" जङ्गमस्य(२) "ईशानम्" ईश्वरं "तस्थुषः" स्थावरस्य चेशानम् [ईशान-पदस्याद्वत्तिरादरार्था(३)] "खर्दृशं" सर्वद्रष्टारं(४) "त्वा" त्वां "अदुग्धा इव धेनवः" यथा अदुग्धा धेनवः क्षीर-पूर्णाधस्त्वेन वर्त्तन्ते—तद्वत् सोम-पूर्ण-चमसत्वेन वर्त्तमाना वयम्(५) "अभि नोनुमः" भृशमभिष्टुमः॥ १॥ १

---

(१)—'शूर! विक्रान्त!'-इति वि०।

(२)—विवरणकारस्तु—'अस्य जगतः'-इत्यंशस्य विशेष-व्याख्यान मकुर्वन् 'तस्थुषः' स्थावरस्य इति व्याख्याय 'स्थावर ग्रहणं प्रदर्शनार्थं जङ्गमस्य चेत्यर्थः'-इत्याह।

(३—विवरण-नये एकस्येशान-पदस्य अस्येत्यादिनेन सम्बन्धः अपरस्तु पृथगुपेक्षेश्वरमित्यर्थः।

(४)—'खः आदित्यः तमिव यः पश्यति सः खर्दृक्। आदित्यमिव सर्वस्य जगतः द्रष्टारमित्यर्थः'-इति वि०। "खरादित्यो भवति; सु चरणः, सुरेरणः खृतो रसां स्खृतो भासं ज्योतिषां खृतो भासेति वा"—इति नै०२,१४। निघण्टौ दिव आदित्यस्य च साधारणनामसु 'खः'-इति प्रथमं पदम्।

(५)—'ऋचिर-प्रसृता गावः धेनु-शब्देनोच्यन्ते; ताः यथा व्रजमीयुः वत्सं स्नेहार्द्रेण मनसा द्रष्टारादिभिरभिवन्द्यन्ति तद्वत् स्तुमइत्यर्थः'-इति वि०।

अथ द्वितीया ।

भरद्वाज ऋषि * ।

१र २र ३ १र २र ३ १ २
त्वामिद्धि हवामहे सातौ† वाजस्य कारवः ।
३ १ २ ३ १ २ ३ २ ३ १उ ३ १ २
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वाकाष्ठास्वर्वतः ॥ २ ॥ २

५र २ १२र १ २ र र २
। त्वामिद्धी । हवा२महे । आ । ओ३ह्वोवाहाउ
२ ५ २र र र १२ १
वाइ । ऊ३४पा । सातौवाज । स्याइका२रवः । आ ।
२ र र २ २ ५ १र १
ओ३ह्वोवाहाउवाइ । ऊ३४पा । त्वांवृत्राइषुद्रा ।
१ २ १ २ र र २ २ ५
२त्पतिम् । आ । ओ३ह्वोवाहाउवाइ । ऊ३४पा ।
१ र र २र १२ १ २ र र १
नरस्त्वांकाष्ठा । सुआ२र्वतः । आ । ओ३ह्वोवाहाउवाइ ।
२ ५
ऊ३२३४पा ॥ २८ ॥

---

* 'मंयोरार्षम्'-इति वि० ।

† "साता"-इति ऋग्वेदीयः पाठः ।

---

२ उत्तरार्चिकस्य २,१,१२,१ = ऋग्वेदस्य ६,७,२७,१ = आर्ष ६१क,

४र ५र र र र र ४ ५ १ २
II त्वामिद्धिहवामहे। सातौवाजोवा। स्याकाःरा-
२र २ १ ७ १र
वाः। त्वांवृत्राइषुइन्द्रसत्। पातिन्नाहाः। त्वाङ्का-
२ १ २ १
२ष्ठा। सुअर्वा२ताइ४३ः। ओ२३४५इ। डा॥ २९॥ २

"कारवः" स्तोतारो वयं "वाजस्य" अन्नस्य "सातौ" सम्भजने निमित्तभूते सति(१) हे "इन्द्र"! "त्वामिद्धि" त्वामेव "हवामहे" स्तुतिभिर्ह्वयामहे। हे इन्द्र! "सत्पतिं" सतां पालयितारं श्रेष्ठं त्वां "नरो" नेतारोऽन्येऽपि मनुष्याः "हवेषु" आवरकेषु शत्रुषु सत्सु(२) "हवन्ते" आह्वयन्ति भजनार्थम्। अपि च "अर्वतः" अश्वस्य(३) सम्बन्धिनीषु "काष्ठासु" यथाऽश्वः क्रान्त्वा तिष्ठति तासु काष्ठासु संग्रामेषु(४) युद्ध-कामाश्च त्वामेवाह्वयन्ति अतो वयं त्वामेवाह्वयाम इत्यर्थः॥ २॥ २

ण्यके प्र०२७—द्वि०२२=ऊहे हा०१३—१७=ऊह्ये प्र०५—त्र०६-त्र०हि०१—प०१६—१७।

I,II इन्द्रस्य, भारद्वाजे हे।

(१)—'सातिर्लाभः, तत्सादिर्यं निमित्त सप्तमी'-इत्यादि वि०।

(२—'यस्य च भावेन भावलक्षणम्'-इति च सप्तमी। तच्छत्रोश्च लक्षणभूत योग्यक्रियापद मध्याहर्तव्यम्। तथा च शत्रुषु हन्यमेषु इत्यर्थः।

(३)—'अर्वा'-इति निघण्टौ अश्वनामसु तृतीयम् (१,१४)। 'अर्वतः ऋ गताविति अस्य गत्यर्थमेवेत्यादि वि०।

(४)—'काष्ठाशब्देन दृष्टिलक्षण आपउच्यन्ते, तत्सादिर्यं निमित्त-सप्तमी; आपसु च निमित्त-भूतासु। तदर्थं त्वामाह्वयन्तीत्यर्थः। अथवा'-इत्यादि वि०।

अथ तृतीया।

वालखिल्या ऋषयः *।

१२ २२११ २३१२ ३१२१२
अभिप्रवःसुराधसमिन्द्रमर्चयथाविदे।
१२३१२ ११२ ३१२२१२ ३१२
योजरित्रभ्योमघवापुरूवसुःसहस्रेणेवशिक्षति ॥ ३ ॥३

५ २१२ २ १ २
I अभिप्रवाः। सुराधा२३साम्। इन्द्रमर्चयाथा-
१२२ ३१ १२ २ २
विदा२३४इ। योजा३४रित्रभ्यो। मघवापूरू१वासुः। सहस्रा२३। णेवा२३४शीक्षति। वशिक्षती२३४५ ॥३०॥

१ ७ ६२ १ ५ १
II अभादुप्रवाः। सुराधा२३४साम्। इन्द्रा-

* 'वामदेवस्यार्षम्'-इति वि०।

३ उत्तरार्चिकस्य २,१,१३,१ = ऋग्वेदस्य ६,४,१४,१ = जह-गानेऽत्र चत्वारि सामानि; द्वि०३- स०७—हा०११—१५ = जह्न गाने चतुर्थस्य द्वितीयार्धेऽत्र चत्वारि सामानि ७-१०-११-१२इति।

I,II स्मर्यते हे।

० १ २ ५ र र २ ५ १र २
मर्त्ता२३। या२था२३४औ३होवा। वी२३४दे। योजरि-

१२र १ऽर र१२ र र १ २ १
त्भ्योमघवा२पुरूवसुः। सत्ता। स्रेणेवा३शाये३। त्ता२

३ ५र र २ १ १११
ता२३४औ३होवा। सुभू३तये२३४५॥ ३१॥

४ ३ ४ ५ र ३ २ ३र४र ५ १ २
III अभिप्रवःसुरा। धसा३४औ३होवा। आइन्द्रमर्त्ता।

१ ० ५ ५ १र २ १ २ १
यथाविदा२३४इ। ओ३त्ता। योजरित्भ्यः। माघा२३

२ १ २ ५ २१ र २ २ १ २
वा। पुरू२। वा२३४सूः। सहस्रेणाइवा३शा। ऊम्मायें

१ २ ५र र २ ५
३। त्ता२ता२३४औ३होवा। वा२३४सू॥ ३२॥ ३

"पुरूवसुः" पश्वादि-धनोपेतः यज्ञादि-बाहुल्याद्बहु-निवासको वा "मघवान्" "यः" इन्द्रः "जरित्भ्यः" स्तोतृभ्यः(१) अस्मभ्यं "सहस्रेणेव" सहस्र-सङ्ख्याकेन धनेनेव(२) "शिक्षति"(३)

I श्येतम्।

(१)—जरितेति स्तोतृनामसु द्वितीयं पदम् नि०३,१६।

(२)—'सहस्रेणेव प्रकारेणवेति वाक्यशेषः, बहुभिः प्रकारैरित्यर्थः'-इति वि०।

(३)—शिक्षतीति दान-कर्मसु षष्ठं पदम् नि०३,२०।

अथ चतुर्थी।

नोधा इन्द्रं स्तौति।

१२ ३१ २ ३ २ ३ १ १ ३१२ २२
तं वोदस्मृतीषहं वसोमन्दानमन्धसः।

३ २ ३ २२ ३ २ ३१ २ ३ १ २
अभिवत्सं नस्वसरेषुधेनवइन्द्रं गीर्भिर्नवामहे॥ ४॥ ४

४५ ४ ५ २२१२ १
I तंवः। एदास्माम्। ऋतीषहम्। ह्वा२इ। आ

पश्वादि-बहु-धनमस्मभ्यं प्रयच्छतीत्यर्थः। स इन्द्रः "यथा विदे" यथा अस्माभिर्विज्ञायते तथा हे ऋत्विजः! "वो" यूयं(४) "सुराधसं" शोभन-धनोपेतम् "इन्द्रं" परमैश्वर्ययुक्तं देवम्(५) "अभि" आभिमुख्येन "प्रार्च" प्रकर्षेणार्चत(६)॥ ३॥ ३

४ उत्तरार्चिकस्य १,१,१३,१=ऋग्वेदस्य ६,६,११,१= ऊहेच नव सामानि प्र०६ प०हि०१४ व०५—८—चतुर्दृ १०—सप्तद०४—९—१७—अष्टा०१४=ऊह्यगानस्य चतुर्थ-द्वितीये नवममित्येकमस्याम्।

I प्रजापतेः, नाविकम्।

(४)—वः त्वामिन्द्रमिति वि०-सम्मतोऽर्थः।

(५)—'सप्तमतेजाः परमैश्वर्यत्व निमित्तेन्द्र-शब्द-वाच्यः' इति शबर०।

(६)—प्रार्च-प्रार्चामीत्यर्थो वि०-सम्मतः।

२ २ १२ १ र २ र १ २ १
औ३ह्वो। इ॒ह्वा। वासोर्मन्दानमन्धसाः। ह्वा२इ॒। आ

२ २ १२ १ २र र १ऽर
औ३ह्वो। इ॒ह्वा। अभिवत्सन्नस्वसरेषुधेनवाः। ह्वा२इ॒।

१ २ २ १२ १२ १ २ २
आऔ३ह्वो। इ॒ह्वा। इन्द्रम्। ह्वा२इ॒। आऔ३ह्वो।

१ २ २र२ ३ ५र र १र३ १ १ १ १
इ॒ह्वा। गोर्भाः। ना२३४औह्वोवा। वामह्वे२३४५॥३३॥

५ ४ २ ४ऽ ५र ४ ५ १ र २ र
II तंवो३दा३स्मा॒तीषह्वोवा। वासोर्मन्दा। न-

१ २ १ २ ३ ४५र २१
मान्धा१सा२ः। आभिवत्सा३१२३४म्। नस्वसरे। षुधा-

२ १ २ ३२ १
इना१वा२ः। इन्द्राङ्गा१इर्भी२ः। नवा३। मा२३४५।

३ १ १ १ १
ह्वा२३४५इ॒॥ ३४॥

३ ४र ४ ४५र १ १ ३ ५ १ र र
III तंवोदस्मा॒ती। षह्वाओ२३४वा। वासोर्मन्दा-

१ र २ ऽ २
नमन्धासा२ः। आभिवत्सन्नस्वसरेषूधे१नावा२ः। औ३वा।

II अभीवर्त्तस्य इन्द्रस्य वा, अभीवर्त्तम्।

III अभीवर्त्तस्य, भागम्।

१ ५ २१२ २ १११
इन्द्रङ्गा२३४इर्भीः। नवामा२३४५च्चा६५६इ। भगा३या२३
११
४५॥ ३५॥

३४२ ३ ४ ४२ ३२ १ २ ५
IV तंवोदस्मत्तो। षच्चा३म्। वा२३४। सोम-
५ ५ २ २ १ २
न्दानम। धामाः। अभिवत्मन्नस्सरेषू३धाइ। ना२३वाः।
१ २ २ २ ऽ २ ऽ २
इन्द्रङ्गीर्भाइर्नाऽवा। हू३म्। हू३म्। हू३म्हू३म्। नवा-
३ ५ ४ ५
नवो२३४वा। मापृच्चोद्दच्चाइ॥ ३६॥

१ २ ४ ५ २ ४ ५ २१२
V ता२३४म्। वोदस्मत्तो। षाच्चाम्। वसोर्म-
२ २ २ २ १ २ १ २ १२
न्दा। नाऽमान्धाऽसाः। आ२३भी। वात्मन्न। स्वस।
१ २ ३ ५ १ २ १ २१
राइ। षूधेना२३४वाः। आ२३इन्द्राम्। गाइभिर्नवो
५ ३ ५
२३४वा। मा२३४च्चे॥ *॥ ३७॥ ४

IV अभीवर्त्तः।

V नौधसम्।

---

*॥ इति ग्रामे गेय गाने षष्ठस्यार्द्ध-प्रपाठकः॥

हे ऋत्विग्यजमानाः! "दृक्षं" दर्शनीयम्(१) "ऋतीषहम्" ऋतयो बाधकाः शत्रवः तेषा मभिभवितारं(२)। पुनः कीदृशं? "वसोः" वासयितुर्दुःखस्य विवासयितुः (यद्वा, वसोः पात्रं प्रति वसतः(३), तादृशस्य "अन्धसः" सोम-लक्षणस्यान्नस्य(४) पानेन "मन्दानं" मोदमानं "वः" यष्टव्यत्वेन युष्मत्सम्बन्धिनं तं तादृशमिन्द्रं गोभिः स्तुति-लक्षणाभि र्वाग्भिः "अभि नवामहे" (नु स्तवने, नु शब्दे) अभिष्टुमः। कुत्र? "स्वसरेषु" ॥ [अत्र यास्कः (५,४)—"स्वसराण्यहानि भवन्ति स्वयं सारीण्यपि वा स्वरादित्यो भवति स एनानि सारयतीति सूर्य-नेतृकेषु दिवसेषु(५) वय मभिष्टुमः अभितः शब्दयामः] तत्र दृष्टान्तः "वत्सं न" यथा धेनवो नव-प्रसूता गावः स्वसरेषु (सुष्ठु अस्यन्ते प्रेर्यन्ते गावोऽत्रेति स्वसराणि गोष्ठानि तेषु) वत्स मभिलक्ष्य शब्दयन्ति तद्वत्॥ ४ ॥ ४

(१)—'तसु दसु उपक्षये इत्यस्येदं रूपम्; उपक्षयितारं शत्रूणाम्'-इति वि०।

(२—'ऋतयः सेनाः, गच्छत्वात्'-इति वि०।

(३) वि० मते क्वचि 'वसो मन्दान'-इति रेफ-शून्यः पाठः। अतएव तन्मते 'वसो' प्रशस्यधनवन्नित्यर्थः। 'वः' त्वामिति चार्थः तदभिमतः।

(४)—'अन्धः इत्यन्न-नाम, अध्यानीयं भवति' इत्यादि नै०५,१।

(५) 'स्वसरेषु यागगृहेषु'-इति वि०। स्वसराणीति गृह-नामसु दशकम् नि०३,४।

अथ पञ्चमी।

कलिः प्रगाथऋषिः*।

१२ ३१२३१ २ ३१ २३१२
तरोभिर्वोविदद्वसुमिन्द्रꣳसबाधऊतये।

३१२ २२ ३१२ ३२३३३२ ३ १२
वृत्रहाऽयन्तःसुतसोमेअध्वरेऽवेभरन्नकारिणम्॥ ५॥५

४ ५ १ २ २ ५
I ओम्। तरो। भाइर्वोविदा३१उवा२३। वा२३४सुम्।

१ऽर १२२ २ १ऽर १ २
इन्द्रा२ꣳसबाधऊतये२। वृत्रात्। वृत्रा३१उ। वा२।

१२ २ १२२ २ १२ २१२ २ १ २ २
गायतःसुतसोमे अध्वरे। ऽवेभा२३राम्। नाकारिणम्।

१ २ १
इडा२३भा३४३। ओ२३४५इ। डा॥ १॥

४ ५ १ २ २ ५
II तारो। भाइर्वोविदा३१उवा२३। वा२३४सुम्।

१ऽर १२२ २ १ऽर १ २
इन्द्रा२ꣳसवाधऊतये२। वृत्रहाऽया२। ताःसुतमो२।

* 'कालेयस्यार्षम्'-इति वि०।

५ उत्तरार्चिकस्य १,१,१४,१=ऋग्वेदस्य ६,४,४७(३०)१=ऊहेऽस्यामृचि दे सामनी प्र०७—द०१५।

I,II लौगे दे।

र १ २१र २ १ र २ १
मेऋध्वराइ। ऊवेभा२३राम्। नाकारिणम्। इडा२३
२
भा३४३। ओ२३४५इ। डा॥ २॥

५ र र ४ ५ २
III तरोभिर्वाविदद्वासुम्। इन्द्राम्। इन्द्रꣳस-
र १ २ र र
बाधाऽऊता१या२इ। वृत्रान्। वृत्रहायन्तःसुतसोमाऽ-
१ २ र र १
आध्वा१रा२इ। ऊवाइ। ऊवेभरन्नकारिणम्। इडा-
२ १
२३भा३४३। ओ२३४५इ। डा॥ ३॥

५ र र ५ २ १
IV तरोभिर्वाविदा४द्वासुम्। इन्द्रꣳसवाऽ। ध-
३ ५ २ १ २ १र र
उ२ता२३४याइ। वृत्रान्। वृहा३१उ। वा२। गायन्तः
१ २र र १र २ १र २ १ र २
सुतसोमेऋध्वरे। ऊवेहोइभा२२राम्। नाकारिणम्।
१ २ १
इडा२३भा३४३। ओ२३४५इ। डा॥ ४॥

III धानाकम्।

IV धानाकं चुल्लककालेयं वा।

V तरो२३भिर्वो। विदा५द्वसुम्। इद्र॰सवा३धाऊ-
१ताया३इ। ओ३४वा। ओ२३४वा। वृत्रहाऽयन्तःसुत-
सोऽमाअध्वारा३इ। आ३४वा। ओ२३४वा। ऊवाइभराम्।
नाकारा२३४इणाम्। ओ२३४वा। ओ२३४५२इ। डा ॥५॥

VI तरोभिर्वा२। विदद्वा२३४सुम्। इन्द्र॰सवा३धा
ऊ१ताया२इ। औ३ह्वोऽवा। औ३ह्वोऽवा। वृत्रहाऽयन्तः
सुतसोऽमाअध्वारा२इ। औ३ह्वोऽवा। औ३ह्वोऽवा।
ऊवाइभा१रा२म्। औ३ह्वोऽवा। औ३ह्वोऽवा। नाका
रिणम्। इडा२३भा३४३। ओ२३४५इ। डा ॥ ६ ॥

VII तरोभाऽइवाविदद्वसुम्। इन्द्रा॰सवा। धऊत-

V,VI,VII कालियानि बोधि।

१ २ ३ र २ १ ३ ४ र ५ र २
या२३इ। वृत्रघ्नाया३। ता२३४:। सुतसोमेभ्या-
२ १ ३ २ २ ४ ४
३राइ। ऊवाइभरी। वा३४३ओ३४वा। नकापुरिणाम्।
४
न्द्रोपुइ। डा॥ ७॥५

हे ऋत्विजः! "वः" यूयं "तरोभिः" वेगवद्भिरश्वैरुपेतं वेगै-रेव वा(१) "विदहसुं" वेदयद्दसुं धन-वेदकम् "इन्द्रं" "सवाधः" बाधा-सहिताः(२) "ऊतये" रक्षणाय "बृहत्" सामैतत्साञ्ज्ञकं "गायन्तः" सन्तः परिचरतेति शेषः। कुत्रेत्युच्यते? "सुतसोमे" अभिषुत-सोमके "अध्वरे" यज्ञे सोम-यागे। अहं च तदर्थं "हुवे" आह्वयामि। कमिव? "भरं न" भर्त्तारं कुटुम्ब-पोषकं "कारिणं" स्व-हित-करण-शीलं यथा, स्व-हित-करणायाह्वयन्ति पुत्रादयः, तद्वत्(३) तथाभूतमिन्द्रं हुवे इति॥ ५॥ ५

---

(१)—'तरोभिः क्षात्रोपैर्वलैः' इति वि०। तरदिति बल-नामसु पठितम्।

(२)—'सबाधः मदीयाः ऋत्विजः' इति वि०। सबाध इति ऋत्विङ्-नामसु सप्तमं पदम् नि०३,१८।

(३)—वि०-मते 'भरेकारिणमिति पाठः। किञ्च भरे-इत्यस्य सङ्ग्रामे इति, कारिणमित्यस्य सङ्ग्राम-कारिणं, प्रतियोद्धारमित्यर्थः। ऊवे-इति उत्तम-पुरुषैकवचनस्य प्रथम-पुरुषबहुवचनस्यार्थे। तथाचोक्तम्—'यथा सङ्ग्रामे योद्धा प्रतियोद्धारं महता यत्नेन आह्वयति, तद्वदाह्वयन्तीत्यर्थः' इति। भरे-इति निघण्टौ सङ्ग्राम-नामसु पठितम् पदम्२,१७।

अथ षष्ठी।

वसिष्ठ ऋषिः।

३ २ ३ १ २ ३ २ ३ १ २ ३ २
तरणिरित्सिषासतिवाजंपुरन्ध्यायुजा।

३ १ २ ३ १ २ ३ २ ३ १ २ २ ३ १ ०
आवइन्द्रम्पुरुहूतंनमेगिरानेमिन्तष्टेवसुदुवम्* ॥६॥ ६

५ ३ २ ४ ५ २ १ २ १ २
I तरणिरीत्। सिषाऽसानी। वाजांपुराम्। धि-

२ १ २ ४ ५ २ १ २ १ २ २ १
यायुजा। आवाऽआइन्द्राम्। पुरूऽहूतम्। नमेगा-

२ ४ ५ २ १ १ १ १
इरा। नाइमीऽन्ताष्टे। वासुदुवा२३४५म् ॥ ८॥

३ ५ २ १ २ १
II तराहाउ। णिरित्सीऽषासति। हयाइ। २। वा-

२ १ २ २ २ १ २ २
जम्पुरम्। धियायुजौ। होवाऽहाइ। आवइन्द्रंपुरुऽ-

---

* "सुद्रम्" इति ऋक्पाठः।

---

६ उत्तरार्चिकस्य २,२,१३,१ = ऋग्वेदस्य ५,३,२०,५ = ऊहे द्वितीये उनविंशतितममेकमिच्च गानम्।

I,II ऐशिरे द्वे।

१ २र र २ र र
तम्। नमाइगाइरी। ह्वोवाइह्वाइ। नेमिन्तष्टेवाइ

१ २ र र २ ५र र २ ३ ५
सा। औ३ह्वोवाह्वा३४औ३ह्वोवा। उप्। इ२३४वाम्॥८॥

४ ३ ४ ३ ४ ५र २ ४ र ५ ४ ५ र ४
III तरणिरित्सिषा। सा३ती। वाजम्भरन्ध्यायुजा।

१र र र २ र ३ ४ ५र
वाजम्भरन्ध्यायुजा। वस्या२३इन्द्रा३४म्। पुरुऋतन्नमे।

२ २ र १ २ १ २ १ २
गा३इरा। नेमाइन्ता२३ष्टे। वसुश्रुवम्। इडा२३भा-

१
३४३। ओ२३४५इ। डा॥ १०॥

४ ३ ४ ३ ५ १र ३ २ १ ५ र
IV तरणिरित्सिषा। सतो३। वा२३४। जम्भरन्धिया।

४ ५ १र र र र १
युजा। वाजम्भरन्ध्यायुजावइन्द्रम्भरुऋतन्नमा२इगाइरा२।

१ २र १ र २ १ ५ ४
ह्वा२ऊऊवाइ। नेमिन्तष्टेवसोवा३ओ२३४वा। इ५वोई

५
ह्वाइ॥ ११॥ ६

"तरणिरि"(१) युडादौ कर्मणि त्वरित एव पुमान् "पुर-

III, IV गोशृङ्गे हे।

(१) "तरणिरिति क्षिप्र-नामसु पञ्चत्रिंशतितमम् नि० २.१५। इत् एवार्थः। वि०-मतेतु इत् पादपूरणे।

अथ सप्तमी।

मेधातिथि ऋषिः।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
पिबासुतस्यरसिनोमत्स्वानइन्द्रगोमतः।

३ १ २ ३ १ २ ३ २ १ २ ३ १ २
आपिर्नोबोधिसधमाद्येवृधेऽस्माँअवन्तुतेधियः ॥७॥७

५ ४ २ ३ ४ ५ १ २ २ १
1 पिबाऽसुतस्यरसिनाः। मत्स्वानइन्द्रगोमताऽऽउ

स्या" महत्या धिया(१) "युजा" सहाय-भूतया "वाजम्" अन्नं "सिषासति" सम्भजते। "पुरुहूतं" बहुभि राहूतम् "इन्द्रं" "गिरा" स्तुत्या हे यजमानाः! "वः" युष्मदर्थम् "आ नमे" तमभिमुखं कुर्वे। तत्र दृष्टान्तः--"नेमिं" चक्रस्य वलयं "सुद्रुवं" शोभन-दारुं "तष्टेव" यथा वर्द्धकिः दारु-नेमि मानमयते तद्वदित्यर्थः ॥ ६ ॥ ६

७ उत्तरार्चिकस्य ६,२,१६,१=ऋग्वेदस्य ५,७,२५,१=अस्यामृचारण्यके प्रथमे चोणि सामानि८ १० १५=ऊहे च पञ्च अ०८—च०१५ १६ पा०६०१२ अष्टा०६०१६।

1 पृष्ठम्।

(१)—'पुरुभूता पतया' इति वि०।

या। आपिर्नोबोधिसधमाद्येवृधा२३ह्वोइया। अस्माऽ-

आ२३वा। तुताइधा२३या३४३ः। ओ२३४५इ। डा॥१२॥

II पिवासुतस्यरसिनोहाउ। मत्स्वानइन्द्रगोमा२तः।

ह्वाओ२३४वा। आपिर्नोबोधिसधमादियेवा२इ। ह्वाओ-

२३४वा। अस्माऽअवन्तुतेधा२यः। ह्वाओ२३४वा। इ२

३४५॥१३॥

III पिवासुतस्यरसिनोमत्स्वाहाउ। नाः। इन्द्रा२-

गोमता२३ः। हाउ। आपिर्नो२वो। धिसाधमा२।

दियेवृधा२३। हाउ। अस्माऽअवा२३। हा। तुते-

३ह्वो२। था२३४ओहोवा। धियऊ२३४५॥१४॥७

हे "इन्द्र"! "रसिनः" रसवतः "गोमतः" गो-विकारैः पयः-

II शौक्लम्। III जमदग्नेः, अभीवर्त्तः।

चत्वारिंशी

भर्ग ऋषिः।

२उ ३१२ ३२उ ३१२
त्वꣳह्यो हिचेरवेविदाभगंवसुत्तये।

१२ २१३१२८३२३ १ २
उद्वावृषस्वमघवनाविष्टयउदिन्द्राश्वमिष्टये ॥ ८ ॥ ८

प्रभृतिभिः अपण-द्रव्ये युक्तस्य(१) "नः" अस्मदीयस्य "सुतस्य" अभिषुतस्य (क्रिया-ग्रहणं कर्त्तव्य मिति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी) ईदृगं सोमं(२) "पिब"(३) पीत्वा च "मत्स्व" मत्तो भव अपि च "सधमादे" सह मादयन्ति देवा अत्रेति सधमादो यज्ञः तस्मिन् सहमादयितव्ये यज्ञे त्वम् "आपिः" आपयिता(४) "वस्यः सन् "नः" अस्माकं "वृधे" वर्द्धनाय "बोधि" बोध्यस्व। "ते" त्वदीयाः "धियः" बुद्धयः अनुग्रहात्मिकाः अस्मान् स्तोतॄन् "अवन्तु" रक्षन्तु ॥

"सधमादे"-"सधमादः"-इति च पाठौ ॥ ७ ॥ ७

---

८ उत्तरार्चिकस्य ७,३,४,१ = ऋग्वेदस्य ६,४,३ (१८),२ = ऊहे ए०१६ -- हाविं०१८ = ऊह्ये प०१८।

(१)—'गोशब्देनाव * * * उदकान्यप्यन्ते, तदतः तैर्मिश्रितस्येत्यर्थः'-इति वि०।

(२)—'सुतस्याभिषुतस्य सोमस्य, षष्ठी-निर्देशात् एकदेशमिति वाक्यशेषः'-इति वि०।

(३)—'अत्रि पिबा इति दीर्घान्तःपाठः "ह्यावोऽतस्त्रिलिङः (६,३,१३५)" इति दीर्घः।

(४)—'आपिः आप्तः'-इति वि०। आपानः-इति आप्नि कर्मसु षष्ठम् नि०२,१८।

५ ४ २ ४र ५र २ १र १
I तुवाऽ३ऽहोऽ३ऽहिचेरवाइ। विदाभगंवसू२त्तायाऽ-
५ र ४ ५ ३र १ १
२३४इ। उद्दावृषस्वमघावान्। ऐहोइ। गा२विष्टयाइ।
र २ १ ५ ४ ५
उदिन्द्राश्वमीवाऽ३ओ२३४वा। ष्टापुयोई६ऽहाइ॥ १५॥

५ र र ५ २ १र २
II त्वऽह्वोऽहिचेराऽ६वाइ। विदाभगेवसूत्ता१याऽ२३४इ।
५र ४ ४ १ २ १ २ १
उद्दावृषस्व। माघवान्। आइहियाइ। गविष्टायाऽ२-
१ १ २ ३ ५ ४
इ। उदिन्द्राऽ२श्वमी। ओ३१म्। ओ२३४वा। ष्टापुयो
५
ई६ऽहाइ॥ १६॥ ८

हे "इन्द्र"! "त्वं हि" त्वं खलु सामर्थ्यादेतेति गम्यते। अत "एहि" आगच्छ। आगत्यच "चेरवे" क्रमपराचारवते(१) मह्यं "भगं" भजनीयं धनं विदाः लभस्व दत्स्व। किंमर्थम्? "वसुत्तये" अस्माकं वसुदानाय। हे "मघवन्" धनवन्निन्द्र! "गविष्टये"(२) गामिच्छते मह्यम् "उद्दावृषस्व" आभिमुख्येन(३)

I,II कौल्मलबर्हिषे ह्वे।

(१)—'चेरुः चेतयिता, तस्मादिदं तादर्थ्ये चतुर्थी', चेरवे ज्ञातुमर्मम' इति वि०।

(२)—इषु इच्छायामित्यस्येदं रूपम्।

(३)—इषु सुषु अषु सेचने इत्यस्येदं रूपम्।

अथ नवमी।

वसिष्ठः परोक्षेण ब्रूते(१)।

१२ २८ ३२ ३१२ ७२ ३ १२
नहिवश्वरमच्चनवसिष्ठःपरिमंसते।

७ १ ८३२ ३१२३२३ २ १२ ७ १२
अस्माकमद्यमरुतःसुतेसचाविश्वेपिबन्तुकामिनः॥ ८॥९

५ २ ४ ५४ ५ २१ १
I नहिवाश्वारमच्चना। हुवेहो२इ। वसिष्ठःपरा

७ १२ ३२ ३
इमंसाता२इ। अस्माकमद्यमरुताः। सुनाइसा२३४

५ १ २ १ २ १ २१ १ ७
चा। वाइश्वे३हो३इ। पिबा३हो। तुवा२३। मा२इना

५२ २ २ १ १११
२३४औहोवा। जनिचा२३४५युम्॥ १७॥

७ ४५ ७२ ४ ५ १
II नहिवश्वरमम्। चना३। वसिष्ठाः। हो३इ।

७ ३२ ४ ७४ ५ ७२
हो३इ। पराइमंसाता२३४इ। अस्माकमद्यमरुतः। सुना

गामितिशेषः। तथा हे इन्द्र! "अश्वमिष्टये" अश्वैषणावतिमच्छम् अश्वान् "उद्वाहयेव" आमिश्वस्व(५) देहीत्यर्थः॥ ८॥८

९ ऋग्वेदस्य ५.४.२८.३।

I,II वसिष्ठस्य, जनिवे हे।

४ उदिति उपसर्गाभ्यामात् वाहयसीति क्रियाभ्याम्।

५ —यसिष्ठसामाश्वमिषे इति वि०।

अथ दशमी।

प्रगाथः काण्वऋषिः।

१ २३१२ २१ ३१२ ३१ २
माचिदन्यद्विशंसतसखायोमारिषण्यत।
२ ३१ २ ३१२३ १२३१२ २१३ १ २
इन्द्रमित्स्तोतावृषणंसचासुतेमुहुरुक्थाचशंसत॥१०॥१०

इति पञ्चम-दशतिः॥*

४ ५ १ १२ ६ २ २ १ ७
३इडासचा। वाइत्थेपिबन्तुकौ३। होत्रा३येऽ३। मारडना-
५१ २ ३ १११ ११
२३४श्रौद्दोवा। जनो३त्रा२३४५म्॥१८॥९

हे "मरुतः"! "वमिदः" एतन्नामा ऋषिः "वः" युष्माकं मध्ये "चरमं चन" जघन्यमपि "न हि परिमंसते"(१) वर्जयित्वा न स्तौति किन्तु सर्वानेव युष्मान् स्तौतीत्यर्थः। "अद्य" अस्मिन् दिने "अस्माकम्" अस्मदीये "सुते" सोमे अभिषुते सति मरुतः "कामिनः" सोमं कामयमानाः(२) "विश्वे" सर्वे "स'चा' सङ्गत्य "पिवन्तु" पानं कुर्वन्तु॥

"पिवन्तु"-"पिवन्त"-इति च पाठौ॥८॥९

१० उत्तरार्चिकस्य ६,१,५,१=ऋग्वेदस्य ५,७,१०,१=ऊहे ष०१५।

(१)—'प्रथमपुरुषैकवचनमुत्तमपुरुषस्यैकवचनार्थे'-इति वि०।
(२)—'कामयन्तः अहावन्तो भूत्वा पिवन्तु इत्यर्थः'-इति वि०।

*॥ इति तृतीयस्य प्रथमार्द्धः॥

I माचिदन्यद्दोहाइ। विशा३ऽसाता। [सखाया२हो
१इ। मा३ओ२हो। राइषाउवा। एयाताउवा। इन्द्र-
मित्स्तोतावृषणा ओ३हो। साचाउवा। सुताउवा।
मुहुरुक्था ओ३हो। चशा। ओहो। वाहो२३४वा।
सा५तोइहाइ॥ १८॥१०

हे "सखायः" समानख्यानाः स्तोतारः(१)! इन्द्र-स्तोत्राद् "अन्यत्" स्तात्रं "मा चिद्दिप्सतं" मैवोच्चारयत। "मा रिषण्यत" मा हिंसितारो भवत। अन्यदीय-स्तात्रोच्चारणेन हृषीपत्नीका मा भवत। "सुते" अभिषुते सोमे "वृषणं" कामानां वर्षितारम् "इन्द्रमित्" इन्द्रमेव हे "स्तोतवादयः"! "सचा" सङ्घीभूय "स्तोत" स्तुत। "उक्था च" उक्थानि शस्त्राणि चेन्द्र-विषयाणि यूय "मुहुः" पुनः पुनः "गायत" उच्चारयत॥ १०॥ १०

इति श्रीसायणाचार्य विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोग्याख्याने द्वितीयाध्यायस्य प्रथमः खण्डः॥

I मैयातिथं, दैवातिथं वा।

(१) "प्रथमे खादीयान ऋत्विज आह॰॰॰ ऋत्विजः" इति वि॰।

अथ द्वितीय खण्डे—

मैषा प्रथमा।

आङ्गिरसः पुरुहन्मा ऋषिः।

१ ७ १र २र २ २ ७ १ २ ३ १ २
नकिष्टं कर्मणानशद्यश्चकारसदावृधम्।

१ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ७ १र २र
इन्द्रं नयज्ञैर्विश्वगूर्त्तस्मृभ्वसमधृष्टं धृष्णुमोजसा ॥१॥११

५ २ ४ ५ ४र ५ २ १ २र १ २ ३र २
I नकिष्टा३ं कर्मणानशात्। यश्चाकारा। सदावृ-
१ २ ३र २ १ २ १ २र ३ २ ०
धा२३म्। सदावृधाम्। इन्द्रान्नया। ज्ञैर्विश्वग। त-
३र १ २ ३ २ १ २ १ २ ३र
मार्भसा२३म्। तस्मृभ्वसाम्। अधार्ष्ण्वा। ष्णुमो
२ २ ३र २ १
जसा२३। ष्णुमोजसा२४३। ओ२३४५इ। डा ॥ २० ॥

३ ५ ७ ५ ४र २ ५ २ ४
II नकिष्टंकर्मणानशत्। हो३४इ। यश्चकाऽरा-

११ उत्तरार्चस्य ४,२,८,१ = ऋग्वेदस्य ६,५,८,३ = जसे च०८।

I वैखानसम्।

I पौरुहन्मनम् प्राकर्षं वा।

५ ४र ५ १ १ १र र ७
सदावृधाम्। आइन्द्रा२न्नाया२। इवैश्वगूर्त्ताम्भसा-

१ २ ४र ४ ५ २
२म्। अधा२ह्यो१। षणा२३ध३४। ह्याओवा*। षणु-

१र १ १ १ १ १
मोजसा२३४५॥ २१॥ ११

"तं" यजमानं "कर्म्मणा" हननादि-व्यापारेण(१) "नकिर्नशत्" नैव(२) व्याप्नोति(३)। यः "इन्द्र" "चकार" इन्द्रमेवानुकूलं "यज्ञैः" साधनैः कृतवान्। कीदृशमिन्द्रम्? "सदावृधम्" "सर्वदा वर्द्धकं। "विश्वगूर्त्त" सर्वैः स्तुत्यम्(४)। "ऋभ्वस" महान्तम्(५) "ओजसा" बलेन "अधृष्टं" अन्यैः धर्षितुं अशक्यम्। "धृष्णु" शत्रूणां धर्षकम्॥

"धृष्णुमोजसा"-"धृष्णवोजसम्"-इति च पाठौ॥२॥ ११

---

(१)—'रत्नात्मकेन' इति वि०।

(२)—'न कश्चिदपि पिशाचादिः'-इति वि०।

(३)—'शक्नोऽयं नशिर्वि-पूर्वो द्रष्टव्यः व्याप्तौ इति अत्यर्थं, विनाशायनेत्यर्थः' इति वि०। 'नशत्'-इति व्याप्ति-कर्मसु अष्टमं पदम् २,१८।

(४)—'सर्वशत्रूणां वधाय स्तोतव्यम्' इति वि०।

(५)—ऋभुक्षाः'-इति मन्त्रान्तरे दशमं पदम् नि० ३, ३।

४र ४
* "ह्याओवा"-इति सा०पाठः।

अथ द्वितीया।

मेधातिथि र्मेध्यातिथि रृषा (१) परस्याश ऋषी।

३ १ २ ३ १ २ ३ २ १ २ ३ १ २
यच्चतेचिद्दभिश्रिषःपुराजत्रुभ्यआतृदः।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
सन्धातासन्धिमघवापुरूवसुर्निष्कर्त्ता*विदुतंपुनः ॥२॥ १२

५ २ ४ ५ ४ ५ १ १ २
I यच्चताऽइचिद्दभिश्रिषाः। पुराऽजात्रू२। भ्यआ-

१ २ १ २ २ १ १ १ २ १
तृदाः। होवाऽहाइ। सान्धाऽतासा२म्। धांइंमघ-

३ २ १ २ १ २ २ १ १ १ २
वाऽपुरूवसुः। होवाऽहाइ। नाइष्काऽर्त्तावी२दुतंपुनः।

१ ३ ३ २ ३ ४ ३ २ ३ ४ ३ २ ३ ४
हो। वाऽ। हाऽ३४। औहोवा। ऊऽ३४पा ॥ २२ ॥ १२

"यः" इन्द्रः "अभिश्रिषः" अभिश्लिषः अभिश्लेषणात् सन्धान-

* "इष्कर्त्ता"-इति ऋक्पाठः।

---

१२ ऋग्वेदस्य ५,७,१२,२।

I साम्नम्।

(१)—प्रगाथस्याधम्। भयस्य मन्त्रार्थरस्याभिमर्शन मनया ऋचा क्रियते-इति वि०।

अथ तृतीया(१)।

१ २ ३ २ ३ २ ३ २ ३ १ २ १ २ ३ १ २

आत्वामहस्तमाशतंयुक्तारथेहिरण्यये।

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २

ब्रह्मायुजोहरयइन्द्रकेशिनोवहन्तुसोमपीतये ॥ ३ ॥ १३

५ ४ ३ २ १ २ १ २ ३ १

I आत्वामहा। समाशा१ता२म्। युक्तारथेहि-

३ १ २ १ २ १ २

रण्यये। ब्रह्माय्१जा२:। हारयइ। द्रकाइशा१इना२:।

१ २ १ २ ५ ४ ३ २ ५

वहान्तू१सो२३। मा२पा२३४औहोवा। ता२३४ये ॥ २३ ॥

द्र्यात् "ऋते चित्" विनापि(२) "जतुभ्यो यीवाभ्यः सकाशात् "आतृदः" आतर्दनात् आरुधिरनिस्रवणात् "पुरा" पूर्वमेव "सन्धि" सन्धातव्यं तं "सन्धाता" संयोजयिता भवति। "मघवा" धनवान् "पुरूवसुः" बहु-धनः स इन्द्रः "विच्छिन्नं" विच्छिन्नं तं "पुनः" "निष्कर्ता" संस्कर्ता भवति(३) ॥ २ ॥१२

(१) अत्रापि 'प्रगाथस्यार्षम्' इति वि०।

१३ उत्तरार्चिकस्य ६,२,५,१ = ऋग्वेदस्य ५,७,१४,४ = आरण्यके प्रथमे द्वाविंशतितम्=ऊहे म०१५—अष्टां द्वि०१२—त्रयोवि०स्तृ०३।

I भारद्वाजम्।

(२)—'ऋते यज्ञे, चिदिति पद-पूरणः' इति वि०।

(३)—साक्षात्कृतान् तं वयं स्मरन्ति वाक्यशेषः।

५र र र र ५ २ १ २ ३र
II औहोआत्वासहाइ६ए। सुमाशा१ता२३४म्। हा-
२ १ र १र र .१ २ ३र २
हाहोइ। युक्तारथेहिरण्यये। ब्रह्मायू१जा२३४:। हाहो
१ २ १ २ ३र १ १
इ। हारयइ। द्रकाइशा१इना२३४:। हाहोइ। वहा-
२ ३र २ १ २ १ ५
न्तू१सो२३४। हाहो। मपोइ। ता२३४याइ। उरु-
५
वाइहाउवा॥ २४॥

५र ३र ४ ५ ५र ५ ४ २ १र २ १
III आत्वासहसुमाशतमा। युक्तारथेहिरण्यये। ब्र-
१ र २ १ १ २
ह्मयुजोहरयइन्द्रकेहो२इ। शाइनाइ३:। हाउवा।
१ १र२ २ १ ३ २ १ ५
वहन्तुसोमपीहोइ। ऊम्मा२। तयाइइ। ओ२३४वा।
१ १११
उ२३४५॥ २५॥

२र ४र १ ४ ५र १ १ १र ४र ५ २ २ १
IV आत्वासहसुमा। शताम्। आत्वासहा। सुमा-
२ १ १ ५ १ र २र र
शतम्। आ१इहिया२३४हाइ। यूक्तारथेहिरण्यये।

II भारद्वाजम्, कण्वब्रह्मद् वा।

I,II,IV भारद्वाजे द्वे।

१ २ १ २ ५ १ २
ब्रह्मायू१जा२३ः। आ२इ॒च्छिया२३४साइ। हारयइ।

१ २ १ २ ५ १ २
द्रकाइ॒श्रा१इ॒ना२३ः। आ१२इ॒च्छिया२३४हाइ। वहान्तू१सो-

१ २ ५ २१२ २ १
२३। आ१२इ॒च्छिया२३४हाइ। मपौता२३या३४३इ। ओ-

२३४५इ। डा॥ २६ ॥१३

हे "इन्द्र"! "त्वा" त्वां "सहस्रं" सहस्र-सङ्ख्याका हरय स्वदीया अश्वाः "आ वहन्तु" आ नयन्तु अस्मद्यज्ञम्। तथा "शतं" शत-सङ्ख्याकाय भवदीया अश्वा त्वा मावहन्तु। (यद्यपि द्वावेव हरी(१) तथापि तद्विभूतयोऽन्येपि बहवोऽश्वाः वहति। ननु युगपदनेकैरश्वैः कथं यातुं शक्यते? इत्यत आह—— "युक्ताः" इति) "हिरण्यये" हिरण्मये स्वर्ण-विकारे (हिरण्य-शब्दादिकारार्थे विहितश्च मयटः "ऋत्व्य वास्त्व्या"दौ मलोपो निपात्यते(२) तादृशे) "रथे" "युक्ताः" सञ्चिताः (बहुना मश्वानां शीघ्रगमनाय रथे नियुक्तत्वात् युगपदेव सर्वे रथं गन्तुं शक्यन्त

(१)—'हरी इन्द्रस्य' इति निघण्टु-आमनात् (१, १५, १)।

(२)—'ऋत्व्य वास्त्व्या वास्तव्य-हिरण्ययानि छन्दसि (५, ४, १०५)।

अथ चतुर्थी।

विश्वामित्रो यथार्थ(१) मिन्द्र माह्वयति।

२ ३ १ २ ३ १ २ ३ २ ३ १ २.
आमन्द्रैरिन्द्रहरिभिर्याह्यमयूररोमभिः।

३ २ ३ १ २ ३ १ ३ २ ७ ३ १ २ ३ १ २
मात्वाकेचिन्नियेमुरिन्नपाशिनोतिधन्वेवताꣳइहि॥४॥१४

इति भावः) कीदृशा हरयः? "ब्रह्मयुजः" ब्रह्मणा परिवृढेनेन्द्रेण युक्ताः (यद्वा। ब्रह्मणास्मदीयेन स्तोत्रेण अस्माभिर्दत्तेन हविषा वा युक्ताः(४) "केशिनः" केशाः ग्रीवाया उपरि वर्त्तमानाः सटाः तैर्युक्ताः। किमर्थमिन्द्रस्यावहनम्? तत्राह-"सोमपीतये"(५) सोम-पानाय। यथास्मदीयं सोमं पिबेत् तथा आवहन्त्वित्यर्थः॥ ३॥ १३

(१)—अस्याऋचो ऽर्थमनतिक्रम्य, ऋगर्थानुरूपमित्यर्थः।

१४ उत्तरार्चिकस्य ८,३,३,१ = ऋग्वेदस्य ३,३,८,१ = जहे अष्टा० द्वि०१८—एकवि०५।

(४)—ब्रह्म अन्नं, तेन निमित्त-भूतेन ये युज्यन्ते, ब्रह्मयुजः; हविर्लक्षणस्यान्नस्य भक्षणाय गन्तुं ये रथे नियुज्यन्ते। अथवा त्रैविध्यलक्षणं ब्रह्म, तेन निमित्त-भूतेन ये युज्यन्ते, ते ब्रह्मयुजः। अथवा ब्रह्मणा प्रजापतिना अनुज्ञातस्येन्द्रस्य ये युज्यन्ते ते ब्रह्मयुजः' इति वि०।

(५)—"भ-त्रो-रेत्यादिना त्रिमि रूपम् पौनिरिति।

I आमन्द्रैरा। द्रुहरिभाइर्याच्हिमयूराइरोमाभाइइः।
मात्वाकाइचीत्। नियेमू२३४रीत्। नपाशिनाः। अति-
धान्वे२। वताु२३। आरइच्हा२३४औच्होवा। वा२३-
४याः॥ २७॥

II आमन्द्रैरिन्द्र। च्हापुरिभाइः। याच्हिमयूररोम-
भाइः। मात्वाकार३इचीत्। नाइयेमुरित्। नपाशार३-
इनाः। अताइधार३न्वे। वताु२३। आरइच्हा२३४औ
च्होवा। वयोइभोर३४५ः॥ २८॥

III आमन्द्रैरिन्द्र। च्हापुरिभोः। याच्हिमयूररोमभा-
उ। वा२। मात्वा२। केचिन्नियेमुरिन्नपाशिनाओ।
वा२। आनी२। धन्वेवताइ१ओवा२३। ई२३४च्ही॥ २९॥

I,II,III अग्नेः, वात्मानि त्रीणि।

अथ पञ्चमी।

गौतम ऋषिः।

३१२ २२ ३१ २ ३१२
त्वमङ्ग प्रशंसिषोदेवः शविष्ठमर्त्यम्।
२३ ३१२ ३२३१२ ३१२
नत्वदन्योमघवन्नस्तिमर्डितेन्द्रब्रवीमितेवचः॥ ५॥ १५

हे "इन्द्र"! "मन्द्रैः" मादयितृभिः(१) "मयूररोमभिः" मयूर-रोम-सदृश-रोम-युक्तैः "हरिभिः" अश्वैः रुपेतस्त्वम् "आयाहि" यज्ञं प्रत्यागच्छ। केचिदपि जनाः "त्वं" स्वां "मा नियेमुः" मा नियच्छन्तु(२)। गमन-प्रतिबन्धं मा कुर्वन्तु-इत्यभिप्रायः। तत्र दृष्टान्तः—"पाशिनो न" पाशिनः इव, यथा पाश-हस्ता व्याधाः पक्षिणं न यच्छन्ति तद्वन्मा नियच्छन्तु। किञ्च। "धन्वेव"(३) यथा पान्थाः धन्वं मरुदेशं शीघ्रमतिगच्छन्ति तद्वद्गमन-प्रतिबन्धकारिणस्तानतीत्य(४) शीघ्रम् "एहि" आगच्छ॥ ४॥ १४

---

१५ उत्तरार्चिकस्य ८,३,५,१=ऋग्वेदस्य ३,३,९,१—जहे अष्टा० हि०१९—एकवि०५।

(१)—मन्द्रस्वरैः गभीरस्वरैः-इति वि०।

(२)—यमिरत्र बन्धनार्थः।

(३)—धन्वेव, इव शब्दः उपमार्थस्यामश्चात् पदपूरकः; धन्वेत्यत्र च तृतीयायाः लुग् द्रष्टव्यः; धन्वना अन्तरीक्षेण, अथवा धन्वना धनुषा अस्त्रैर्विजित्य तान्,-इत्यादि वि०।

(४)—अतीत्ययमुपसर्गः। उपसर्गाश्च पुनरेवमात्मकाः—यत्र क्रियावाची कश्चिच्छब्दः तत्र विशेषमाहुः; यत्र न प्रयुज्यते, तत्र स साधनां क्रियामाहुः। न चात्र क्रियावाची कश्चिच्छब्दः प्रयुज्यते, अतउपसर्गश्च क्रियां ब्रवीति अतोऽतीत्यस्यैवातीत्यर्थो बोध्यः।

५ ४ ४ ५ ४ ५ १ १ २ २
I त्वमा३०गाप्रश्ण्सिषाः। दाढ्वा२:। श्रविष्ठमा३।

४ ५ २ १ २ १ २ २ ४ ५
तायाम्*। नत्वदन्योमघवा२३नार। स्तिमा३र्डाढ्ता।

१ २ १ २ २ १ ५ ४ ५
आइन्द्रब्रा। वा। औ३च्चो। मितो२३४वा। वायुचोइ च्चा

इ॥ ३०॥ १५

(अङ्गेत्यभिमुखीकरणे(१) "अङ्ग" "श्रविष्ठ"! हे बलवत्तम! इन्द्र! "देवः" द्योतमानस्त्वं "मर्त्यं" मरण-धर्माणं त्वां स्तवन्तं पुरुषं "प्रशंसिषः" सम्यगनेन स्तुतमिति प्रशंस(२)। हे "मघवन्" धनवन् "इन्द्र"! "त्वदन्यः" त्वत्तोऽन्यः कश्चित् "मर्डिता" सुख-यिता नास्ति। अतः कारणात् तुभ्य मिदं स्तुति-लक्षणं "वचो" "ब्रवीमि" उच्चारयामि॥ ५॥ १५

---

* 'ताइयाम्'-इति सा०पाठः।

I गुङ्गोः साम, गौङ्गवं वा।

(१)—सम्बोधने इति यावत्। 'अङ्ग क्षिप्रम्' इति वि०।

(२)—'प्रशस्तं करोषि'—इति वि०।

अथ षष्ठी।

नृमेध-पुरुमेधावृषी(१)।

१ २ ३१ २ ३१र २र३१ २
त्वमिन्द्रयशाअस्यृजीषीशवस तिस्पः।

३१ २ ३२उ ३२३१२ ३१ २
त्वंवृत्राणिहꣳस्यप्रतिन्येकइत्पुर्वनुत्तश्चर्षणीधृतिः*॥६॥ १६

४ ५ ४ २१र २ र १र २
I त्वमिन्द्रा। यशाः। असाइ। ऋजीषीशवसः।

१ २ र २ ३२ १र १
पताइः। त्वंवृत्राणीउहꣳसिया। प्रतीनाए२। कइत्पूरू-

१ १ १ ३ ५र र ३
२। अनू२हो१। तश्च। षा२णा२३४औहोवा। धा२-

५
३४र्त्ताः॥ ३१॥

---

* "एकइदनुत्ताचर्षनीधृता"-इति ऋक्पाठः।

---

१६ उत्तरार्चिकस्य ६,२,१२,१ = ऋग्वेदस्य ६,६, १३,५=जहे स०हि०१८—षो०हि०७—अष्टा०हि०१४=जह्वे त०१८।

I इन्द्रस्य, यशःसाम।

(१)—पुरुमेधस आर्षम्। रत्येव विवरणे दृश्यते।

I त्वमा३इन्द्रायशाअसाइ। ऋजाइषीशा२। वसा-
३४५:। पा२३४तोः। त्वंवृत्राणिहꣳस्यप्रतीन्येकइत्यु। हू।
आनाओ२३४वा। ताश्चाओ२३४वा। षणा५इधृतोः।
हो५इ। डा ॥ ३२ ॥

II हाउत्वमिन्द्रा। याशाआ२३४सो६। हाउऋ-
जाइषी२३४शा। वासस्या२३४तो६:। हाउ। त्वंवृत्रा।
णोहꣳमिया। हाउ। प्रतीनाा२३४ए। कइत्यू२३४हू६।
हाउ। अनृत्ता२३४श्चा६। हाउ। पा२णा२३४ओहो
वा। धा२३१त्तोः ॥ ३३ ॥

हे "इन्द्र"! "गवसस्यतिः"(१) बलस्य पालयिता "ऋजीषी"

I इन्द्रस्य ; यशःसाम ; माध्रं वा।

II इन्द्रस्य ; यशःसाम, ममीचोनं वा।

(१)—"ब्रह्मणः पतिपुत्रपारस्पत्येषु (८,३,५३)"-इति षत्वाभावो निपातनात्।

६५क,

५ २ १ २ ४
III ह्वाउत्वमिन्द्रा। यज्ञा असि। होइ। होये३४। ह्वा

१ १ २ २ १ २ १ १ २ १ २
उह्वाउह्वाउ। ऋजीषीशवसस्पतिः। होइ। होइ। होये

४ १ १ १ २ २ १ २ २ १ १ २ १
३४। ह्वाउह्वाउह्वाउ। त्वंवृत्राणिहंस्यप्रतीन्येकइत्पूरु।

२ ४ १ १ १ २
होइ। होइ होये३४। ह्वाउह्वाउह्वाउ। अनुत्तश्चर्ष-

२ १ २ १ २ ४ १ १
णीधृतिः। होइ। होइ। होये३४। ह्वाउह्वाउह्वाउ

१ २ ३ १ १ १ १
वा। सुवर्मह्वा२३४५ः॥ ३४॥

५ २ १ २ १ १ १ १ १
IV होत्वमिन्द्रा। यज्ञाअसि। होये३। हो२३४५।

ऋजीषी अपाजितोऽभिषुतः सोमः, तद्वान्(१) "त्वं" "यज्ञः"(४) यज्ञस्वी "असि" भवसि। कथमस्य यज्ञस्वित्वम्? तदाह—"अप्रतीनि" बलिभिरप्यप्रतिगतानि(५) "पुरु" पुरूणि ("ये छन्दसि-

---

III इन्द्रस्य; यज्ञःसाम, प्राचीनं वा।

IV यौक्षसचम्।

(१)—'यत् सोमस्य पूयमानस्यातिरिच्यते, तत् ऋजीषम्: तेन तद्वान्। कथ पुनरसौ तेन तद्वान्? उच्यते भवमस्यति'-इति वि०।

(४)—यज्ञवांत मत्वर्थे दन्द्रष्टव्यम्।

(५)—प्रतिहन्तुं कर्तुं न शक्नुवन्त्यर्थः।

अथ सप्तमी।

एतदादीनां तिसृणां मेध्यातिथि र्ऋषिः*।

२ ३ १ ३१२ ३१ १ ३क२र३ २
इन्द्रमिद्देवतातयइन्द्रं प्रयत्यध्वरे।

१ २ १र २ १ १ १ २ १ १ १ १ १ २
इन्द्रं वाजोषीशवसस्पतिः। होयेइ। होर२३४५। त्वंवृत्राणि-

२ १र २ २ ११ १ २ १ १ १ १ १ ३
हन्नस्यप्रतीन्यकइत्परुः। होयेइ। होर२३४५। अनुत्त-

२ १ २ १ २ १ १ १ ५ १
स्त्वर्षणीधृतिः। होयेइ। होर२३४वा४हाउवा। सुवम-

१ १ १ १
याऽ२३४५ः॥ ३५॥१६*

बहुलम् (६,१,१०)"-इति ग्रैलोपः) बहूनि "वृत्राणि" रक्षांसि(५) "अनुत्तः" न केनापि प्रेरितः(६) "चर्षणीधृतिः" चर्षणीनां यजमान-मनुष्याणां(८) धारकः "एक इत्" अ-सहाय एव त्वं "हंसि" मम् प्रहरसि अत एवास्य यज्ञस्वित्वम्॥ ६ ॥१६

* मेधातिथिरिति वि०-पाठः।

(५)—'वृत्राणि शत्रुकुलानि, मेघरूपाणि वा'-इति वि०। वृत्र इति मेघनामसु अष्टाविंशतितमम् नि०१.१०।

(६)—'अनुत्तः अखण्डितः'-इति वि०।

(८) -चर्षणयः-इति मनुष्यनामसु सप्तमं पदम् नि० २, ३।

* ॥ इति ग्रामे गेय-गाने षष्ठः प्रपाठकः ॥ ६ ॥

१ २ ३ २ १ २ ३ २ १ २ १ २
इन्द्र॒ समीके वनिनो हवामहे इन्द्रं धनस्य सातये ॥७॥१७

४ ५ ४ ५ ४ १ २ १
ओं। इन्द्रमिद्देवता। तयाइ। इन्द्रंप्रयतियध्वा२-

२ १ २ १ २ १ २
३राइ। आइन्द्रा२म्। समीकेवनिनोहवामा२३हाइ।

१ १ २ १ ४ ३ ५
आइन्द्रा२म्। धानस्यसो२३४वा। ता२३४ये ॥ १ ॥१७

"देवतातये" देवैः स्तोतृभिः तायते विस्तार्यते इति देवतातिर्यज्ञः(१) तदर्थम् "इन्द्रमित्" "देवेषु" मध्ये इन्द्र मेव "हवामहे" आह्वयामहे। "अध्वरे" यज्ञे "प्रयति" प्रगच्छति उपक्रान्ते सति इन्द्रं हवामहे। तथा "समीके" सम्यग्जाते सम्पूर्णे च यागे "वनिनः" सम्भजमानाः(२) वयम् इन्द्रमेवाह्वयामहे [यद्वा। समीकमिति सङ्ग्राम नाम-(नि०२,१७,११)। समीके सङ्ग्रामे ॥ ७ ॥ १७

---

१७ उत्तरार्चिकस्य ७,३,८,१ = ऋग्वेदस्य ५,७,२५,५ = ऊहे एका०दि०१२—त्रयोवि०ह०५ = ऊह्ये दि०१५।

I यातसुचम्।

(१)—देवतातिः-इति निघण्टौ यज्ञनामसु दशमम् पदम् ३,१७।

(२)—'वनम उदकं सं'भक्तवणम्, तेन तद्वन्तः सोमवन्त इत्यर्थः' इति वि०।

अथ अथाष्टमी।

३१२ ३ १२ ३१ २र
इमाउत्वापुरूवसोगिरोवर्द्धन्त्यामम।

५ ४र५ र र र ४५ ४ ४ १ २
I इमाउत्वापुरूवसोगिरः। ए५। गिराः। वार्द्धं
३ र २ १ २र ३ २ ३ १ २ २ ६
तुथाममा२३। पावकवर्णाः। शुचयोवी३पा। हूम्।
२ ३ ५ १ १ र र २ १
हूम्। चा२३४इताः। अभिस्तोमैरनो२। ऊवाइ।
६ २ १ २ ४ ५ ४
हो३वा। पता। औ३होवा। हो५इ। डा॥ २॥

५ र र र र १ र २ १ २
II इमाउत्वापुरूवसोहाउ। गिरोवर्द्धं। तूया१म-
३ र २र १ २ ३ ५ २र १ २र १
मा२। इहाहाहोइ। इहो२३४वा। पावकवर्णाःशुचयः।
२ ३ र २र १ २ ३ ५ २ १
इहाहाहाइ। इहो२३४वा। विपश्चि। तो।
र र ३ र २र १ २ ३ ५ २ १
अभिस्तोमैः। इहाहाहोइ। इहो२३४वा। अनू२३।
१ ३ ५र र ३ ५
षा२ता२३४औहोवा। ऊ२३४पा॥ ३॥

४ ३र ४ ५र र ३ २ १ २५
III इमाउत्वापुरू। वमा३उ। गा२३४इ। रोव-

I,II,III वावाणि चौणि, वामिष्ठानि वा।

१ १२३ १ २ ३२३ १२ २२
पावकवर्णाःशुचयोविपश्चितोऽभिस्तोमैरनूषत ॥ ८॥१८

४२ ५ ९२ १ २२ १ २२ १
वर्ढन्तुयाः। ममा। पावकवर्णाः शुचयोविपश्चि। ता।

१ २ १ २ २ १२ २ १
औ३ह्वो। आऔ३ह्वो। अभिस्तोमैरनौ२। ऊवाइ।

१ २ १ २ ४ ५ ४
हो३वा। षता। औ३ह्वोवा। होपुइ। डा॥४॥१८

हे "पुरुवसो" बहुधनेन्द्र! "मम" मदीयाः "इमाः" "गिरः" शस्त्र-रूपा वाचः(१) "त्वा" त्वां "वर्धन्तु" वर्धयन्तु। तथा "पावकवर्णाः" अग्नि-समान-तेजस्काः अतएव "शुचयः" शुद्धाः "विपश्चितो" विद्वांसः उद्गातारश्च(२) "स्तोमैः" स्तोत्रैर्वर्धिष्यमानादिभिः(३) "अभ्यनूषत" त्वामभिष्टुवन्ति (नु स्तुतौ कुटादिः॥ ८॥ १८

---

१८ उत्तरार्चिकस्य ७,३,१८,१ = ऋग्वेदस्य ५,७,२५,३ = ऊहे द्वा०१०—अष्टा०हि०५।

(१)—शस्त्रगीत मन्त्रा इत्यर्थः।

(२) विपश्चित् इति निघण्टौ षोडश पदेषु ३. १५।

(३—प्रगीतमन्त्रैः "उपाग्ने गायता नरः"-इत्येवमादिषु ऋक्षु ताण्डोक्त-प्रकारैर्गीयमानैः ऊहगानारम्भ एव स्तुतिरित्यर्थः। वर्धिष्यमानादिभि रित्यादिपदात् 'आ धीलोवो' 'माध्यन्दिनपवमान;' इत्यादयो गृह्यन्ते।

अथ नवमी।

२ १ १ २ २ ८ २ १ २
उदुत्येमधुमत्तमागिरःस्तोमासईरते।
१ १ २ २ १ २ २ २ २ १ २
सत्राजितोधनसाअक्षितोतयोवाजयन्तोरथाइव ॥९॥ १९

५ २ २ १ २ ३ ५
I उदुत्येमा। धूमत्तमा२३४। गाइरस्तो२३४मा।
२ १ २ २ ३ ५ २ ३ ५
साईरतायेइ। सात्राजा२३४इताः। धानामा२३४आ।
२ १ २ ३ ५ ३ २ ४
क्षीतोतया२३ः। वाजाया२३४ताः। रथाइआपूइवाइ-

५६ ॥ ५ ॥

४ २ ४ १ २ २ १
II उदुत्येमा५धूमत्तमाः। गिरस्तोमासआ२इराता
२ १ २ १ २ २ २ १ १ २
२इ। सत्राजितोधना२साअ। क्षितोताया२ः। वा-
२ २ ५
जयन्तोरथा३१उवा२३। ई२३४वा ॥ ६ ॥

३ १ १ १ १ ३ ४ ३ २ ४ ५ ३ ५ १
III क्ष्ण२३४५। उदुत्येमधुम। तमा२३४क्षाइ। गा-

---

१९ उत्तरार्चिकस्य ६,१,६,१।

I,II,III वासिष्ठानि त्रीणि, आवाणि वा।

१ ३ २ ३ ५ २ ३ १
इरा२:स्तोमा२। सञ्चा३४५इ। रा२३४ते। सञ्चाजि-
१३ २३ ३ १ १ १ ३ १ १ १ ४३ ३ ४३
तो२धनसाञ्चितीतयाइ३४५:। इ७२३४५। वाजयन्तोरथाः।
५३ ३ ५ २३ १ २३ १ २३ १ २
इवो२३४इाइ। वाजयन्तोरथाइ। वा। औ-
४ ५ ४
३होवा। होइ५। डा ॥ ७ ॥ १९

"त्वे" ते प्रमिदाः "मधुमत्तमाः" अतिशयेन मधुराः "गिरः" अप्रगीताः शस्त्ररूपा वाचः। "स्तोमासः" प्रगीतानि बर्हिष्यवमानादीनि स्तोत्राणि च "उदीरते"। इन्द्र! त्वामुद्दिश्योद्गच्छन्ति ऊर्ध्वं प्रसरन्ति (ईर गतौ आदादिकः) तत्र दृष्टान्तः— "सञ्चाजितः" सदैव शत्रून् जयन्तः अतएव "धनसा" धनानि-सम्भजन्तः [वनु षण सम्भक्तौ। "जन-सन-खन-क्रम-गमो विट् (३,२,६७)। "विड्वनोरनुनासिकः स्यात् (६,४,४१)"-इत्यात्वम्]"अचितीतयः" [क्तियो भावे निष्ठाया मण्यर्थे (६,४,६०)"-इति पर्युदासाद्दीर्घाभावः अतएव "क्तियो दीर्घात् (८,२,५६)"-इति निष्ठानत्वाभावश्च।अचिताः क्षयरहिताः जतयो रक्षा येषां ते तथोक्ताः] "वाजयन्तः" वाजमन्नमिच्छन्तः(१) [क्यचि-'नक्षत्रस्य पुत्रस्येति(७,४) ईत्व-दीर्घयोः प्रतिषेधः] एवं गुण-विशिष्ट-रथाइव, ते यथा विविध मितस्तत उत्तिष्ठन्ति तद्वदुदीरत इत्यर्थः ॥ ९ ॥ १९

(१)—वाजयन्तः पूजयन्तः; अथवा वाजशब्दो वेगवचनः वेगवन्तः-इति वि०।

अथ दशमी।

देवातिथिः काण्व ऋषिः।

१ १ ३ २ ७ २ ३२३ ३१२ ४२२
यथागौरोअपाकृतंतृष्यन्नेत्यवेरिणम्।

३ १२ ३२३ ३१ २ ३१ २ ३२३ १ १०
आपित्वेनंप्रपित्वेनूयमागच्छिकण्वेषुसुमचापिव॥१०॥२०

॥ इति प्रथम-दशतिः ॥ १ ॥

२१२ ४२ ५२ १ २ २१२
I यथागौ२३रोअपाकृताम। तृष्यन्नेतियवेरा२३इ

२ २ १२ २२३ १२ ७ १
णाम्। आपित्वेनःप्रपित्वेनूयमागा२३च्छौ। कण्वे२षु-

१ १ ३ ५२२ ७ ५
सू२३। मा२चा२३४ओचोवा। पौ२३४वा॥ ८॥

२ ३ ५ ४ ५ ७२२ १ ७
II ओवाआ२३४वा। याथा। गौरोआ३पाकृतम।

२ ३२२ २ १ ७ ७
ओ३४। च्छोच्छ। तृष्यन्नेतियाउवाइरिणम। ओ३४।

२० उत्तरार्चिकस्य ८,३,४,१=ऋग्वेदस्य ५,७,३०,३= ऊहे अष्टा०हि०१८।

I,II गौराङ्गिरसस्य सामनी द्वे; गौतमस्य मनाज्ये वा।

१र २ ३ ५ १र र र २ ३ २
ह्वाहोइ। आ२३४पी। त्वेनःप्रपित्वेनूयामा१गहि। ओ-

३र २ १ १ १ ३ ५र र
३४। ह्वाहोइ। कण्वेरषुसू२३। सा२चा२३४औहोवा।

२ १ १ १ १
पिवा३ई२३४५॥ ८॥२०

"गौरः" गौर-मृगः(१) "तृष्यन्" पिपासितः सन् "अपा" अद्भिरुदकैः (अत्ययेनैकवचनम्। ऊठिदमित्यादिना(६,१,१७१) विभक्तेरुदात्तत्वम्) "क्रतं" सम्पूर्णत्वं क्रतम् "इरिणं" निस्तृणं तटाक-देशं "यथा" येन प्रकारेण "अवैति" अभिगच्छति (अव-शब्दोऽभिशब्दस्यार्थे) अभिमुखः सन् शीघ्रं गच्छति। तथा "आपित्वे" वस्तुत्वे(२) "प्रपित्वे" प्राप्ते सति, हे "इन्द्र"! त्वं "नः" अस्मान् "तूयं" (क्षिप्र-नामैतत्) शीघ्रम् "आ-गहि" आगच्छ। आगत्य च "कण्वेषु" कण्व-पुत्रेष्वस्मासु "सचा" सह एक-प्रयत्नेनैव विद्यमानं सर्वं सोमं "सु" सुष्ठु "पिब"(३)॥ १०॥ २०

इति श्रीमायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोव्याख्याने तृतीयाध्यायस्य द्वितीयः खण्डः।

---

(१)—'गौरः गौरमृगः सिंहः व्याघ्रो वा'-इति वि०।

(२)—'आपित्वे आपानकाले'-इति वि०।

(३)—'कण्वेषु सप्तम्या बहुवचनमिदम् तृतीया-बहुवचनस्थाने द्रष्टव्यम्, कण्वैर्मेधा-दिभि रस्मदीयै ऋत्विग्भिः सचा सह पिब सोमम्'-इति वि०। कण्वइति निघण्टौ मेधावि नामसु सप्तमं पदम् ३, १५।

अथ तृतीये खण्डे—

मैषा प्रथमा।

भर्ग ऋषिः।

१ २ ऽ१२ १२३ १२ ३ १२
शग्घूउ३षुशचीपतइन्द्रविश्वाभिरूतिभिः।

५ र २१ २ ३ ५ २ र
I शग्ध्यूषु। शचाइपताइ। ई२३४न्द्रा। विश्वाभो
१ २ ७ ५ २ र १ २
३रूतिभाइः। भा२३४गाम्। नहित्वायशा३मांवसू।
३ ५ १ १ ७ ५र र १ ऽर १
वौ२३४दाम्। अनू२३। शू२रा२३४औहोवा। चरा२म
३
सी२३४५॥ १०॥

४ र र र ४ १ र र
II शग्ध्यूष्वौहोपुइशचीपताइ। आइन्द्रविश्वाभिरूति
२ २ २ २ २ २
भिः। भगान्ना३हो। त्वायशमाम्। वसू३हाइवाइदरम्।
१ र २ १ ५ ४ ५
अनुशूरचरोवा३ओ२३४वा। मापुमोईहाइ॥११॥

४ ३र ४ ५र ७ ७ ७ ८ र ५ २ १ २र
III शग्घ्यूषूशचो। पताइ। शग्घ्यूषु। शचाइपत।

I,II,III इन्द्रस्य; हारयणानि, हारायणानि वा स्तोत्रि।

३ १ २ २ ३ १ २ ३ २ ३ १ २ ३ १ २
भगंनहित्वायशसंवसुविदमनुशूरचरामसि ॥ १ ॥ २१

१ ३ ५ १ २ २ १ २
आ२इहिमा२३४हाः। आइन्द्रविश्वा। भिरूतिभिः। आ२

१ ३ ५ १ २ २ १ २ १
इहिमा२३४हाः। भागन्नहित्वायशसम्। वसूविदम्। आ-

३ २ १ ३ १ ३ ५
२इहिमा२३४हाः। अनुशू१रा२३। आ२३इहिमा२३४हाः।

११२ २ १
चरामा२३मा३४५इ। ओ२३४५इ। डा ॥ १२ ॥ २१

हे "शचीपते"(१)! "इन्द्र"! "शग्धि"(२) देह्यभिमतं। "विश्वाभिः" सर्वाभिः सह हे "शूर"! "भगं न"(३) भाग्यमिव "यशसं" यशस्विनं। "वसुविदं" धनस्य लम्भकं "त्वा" त्वाम् "अनुचरामसि" परिचराम इत्यर्थः ॥ १ ॥ २१

---

२१ उत्तरार्चिकस्य ७,२,३,१ = ऋग्वेदस्य ६,४,३५,१८,५ = ऊहे एका० १८ एका० द्वि० ६—अष्टा० द्वि० ११ ॥

(१)—'शचीति कर्मनाम (नि० २.१.२२) * * * सर्वकर्मणां ज्योतिष्टोमादीनामधिपतिभूत'-इति वि०।

(२)—शग्धीति याचञाकर्मसु पञ्चमम् नि० ३, १९।

(३)—'न शब्द उपरिष्टादुपमार्थोयः, उक्तोपमार्थस्य सम्पत्यर्थे प्रयोग इति पदपूरणः। पालन-सहितं धनमित्यर्थः'-इति वि०।

अथ द्वितीया।

रेभः काश्यप ऋषिरिन्द्रं प्रार्थयते।

१ २ ३ २ ३ १ २ क २ ३ १ २
याइन्द्रभुजआभरःमर्वाञ्चसुरेभ्यः।

३ २ १ ३ १ ५ २ १ २
I याच्चोइ। ई२३४न्द्रा। भुजाइआभा१रा२ः।
१ २ ३ १ २ १ २ ३
सुवा२३च्चा। वाञ्चमू३राइभा१या२ः। स्तोताइच्चा।
१ ७ १ २ ३ ३ १
रमिन्मघवन्नस्यावर्द्धाया२। याइचाइच्चाइ। त्वेवृक्तब-
२ १
र्हा२३इषाइ४३ः। ओ२३४५इ। डा॥ १३॥

५ ३ ३ ५ २ १ २ १ ३
II याइन्द्रभुजआभार्हराः। सुववाञ्च। सुरेरेभा
५ २ ३ ५ ३ २ १
२३४याः। च्चा। ओच्चो२३४च्चा। स्तोतारमाइत्। मा-
१ ७ ३ ५ ३ ३ ५
घवन्ना। स्यवा२र्द्धा२३४या। च्चा। ओच्चो२३४च्चा।
३ १ २ २ ३ ५ २ १
येचत्वा२३इवृइ। च्चा। ओच्चो२३४च्चा। क्तवर्हा२३-
२ १
इषाइ४३ः। ओ२३४५इ। डा॥ १४॥

४ ५ ४ ५ ३ ५ ४ ५ १ ३ १
III याइन्द्रभुजआभरः। उङ्वाच्चाइ। सुववाञ्च-

I,II,III वाक्यानि त्रीणि।

३ ५ ३ १ २ ३ २ ३ २ २ १ २
स्तोतारमिन्मघवन्नस्यवद्ययेचत्वेवृक्तबर्हिषः ॥ २ ॥ २२

२२ १ २ २ १२ २ १
सुरेभ्यः। उक्थवा२३ह्वाइ। स्तोतारमिन्मघवन्न। स्या-
७ १ २ २ १ २ १
वर्द्धया२। उक्थवा२३ह्वाइ। येचत्वा२३इव। उक्थवा-
२ १ २ १
२३ह्वा। क्तबर्हा३३इषा३४३:। ओ२३४५वूइ। डा ॥१५॥२२

हे "इन्द्र"! "स्वर्वान्" सुखवान् स्वर्गवान्वा(१) (अथवा स्वःशब्दः सर्व-पर्यायः(२) सर्वं भूत-जातम् आत्मन एवोत्पन्नत्वात् तद्वान्(३)) एवं गुणस्त्वं "याः" यानि "भुजो" भोक्तव्यानि धनानि "असुरेभ्यो" बलवद्भ्यो राक्षसेभ्यः "आभरः" आहरः तान् हत्वा आहृतवानसि (हृग्रहोरिति भकारादेशः) अतएव हे "मघवन्"! धनवन्निन्द्र! "अस्य" (अत्वादेशे अग्रादेशः) एतस्य आहृतस्य धनस्य दानेन "स्तोतारमित्" तव स्तोत्रकारिणमेव "वर्धय" वृद्धिमन्तं कुरु। "ये च" अन्ये यष्टारः "त्वे" त्वदर्थं(४) "वृक्तबर्हिषः" स्तीर्णबर्हिषो भवन्ति तांश्च "धनेन वर्धय ॥ २ ॥ १२

---

२२ ऋग्वेदस्य ६,६,३६,१।

(१)—स्वःशब्दो निघण्टौ प्रथम-चतुर्थ दिवाद्यादित्यस्य च साधारण-नामसु प्रथमं पठितम्। स्वः सुखमिति तु प्रसिद्धम्।

(२ सर्वदर्शे,-दृत्यत नैरुक्ते तथैव व्याख्यानात्।

(३)—'स्वःशब्दो धन-वचनः, तद् यस्यास्ति स स्वर्वान् प्रथमैक वचनमिदं पञ्चमी बहुवचनस्थाने दृष्टव्यम्; स्वर्वद्भ्यः धनवद्भ्यः। केभ्यः पुनः स्वर्वद्भ्यः? उच्यते—असुरेभ्यः सकाशादित्यर्थः'-इति वि०।

(४)—त्वे इति "यस्य च भावेन भावलक्षणम् (२,३,३७)"-इति सप्तमी।

अथ तृतीया।

जमदग्निर्ऋषिः।

२ ३२ ३२३ १ २क२र

प्रमित्रायप्रार्यणमेमचथ्यमृतावसो।

५ २ र १ १

I प्रमित्रायप्राहाउ। आ२र्यम्णाइ। मचा२ह्वो।

२ १ २र१र १ २

थियौ२। ऊवाइ। आत्तावसाउ। वरा२ह्वो। थि-

१ र २र१ र

यौ२। ऊवाइ। वरुणेच्छा। दीयंवचाः। स्तोवा२ह्व-

१ २र १ २र१र २ १ ५

ह्वोइ। राजौ२। ऊवा। षुगायता३१उवा२३। ऊ३४पा॥१६॥

५ र र ४ ५ १ २ ३र २

II प्रमित्रायप्रौह्वोवा। आर्यम्ण। औह्वो३४इ।

२र ऽ २ १ २ १ २ ३र ६

औह्वो३वा। माचथ्यम्। ऋतावामा। औह्वो३४इ।

२र ऽ १ १ २र२र र १ २ ३र २

औह्वो३वा। वारुथ्यवरुणेच्छ। दियांवाचा। औह्वो-

२र ऽ २ १ २ ३र ७ २र

३४इ। औह्वो३वा। स्तोवाँराजा। औह्वो३४इ। औ

ऽ २ र १ २ ३र ऽ २र ऽ ०

ह्वो३वा। षुगायाता। औह्वो३४इ। औह्वो३वा३४३।

१

ओ२३४५। डा॥१७॥

५ र र ४ ५ ४ ५ १ २

III प्रमित्रायप्रार्यम्णेवा। ओवा। माचथ्यम्।

I,II,III वरुणसामानि त्रीणि।

३ २ १ २ २ ३ १ २ ३ १ २ २ २
वरूथ्ये३वरूणेक्न्द्यं वचःस्तोत्र्ँराजसुगायत ॥ ३ ॥२३

१ १ १ २ १ २ १ २ १ २ १
ऋतावा१मा २उ। वा२३रू। था२३याइ। वरूणेक्न्द्या।

२ १ २ १ २ २
दाया२३ँच्हाइ। वचो३आ। स्तोत्र्ँराजसुगायत।

१ २ १ २ १ २ ५ ४
स्तो२३त्राम्। राजसुगौ३। हो३१२३४। वा। यापूतो-

५
ईच्हाइ ॥ १८ ॥२३

हे "ऋतावसा"(१) यज्ञ-धन! "मित्राय" "सचथ्यं" सेवार्हं "क्न्द्यं" यज्ञ-गृह-भवम्(२) अभिप्रायानुसारं वा "वचः" स्तोत्रं "प्रगायत" प्रकर्षेण पठत। "अर्य्यम्णे" च प्रगायत। "वरूथ्ये"

---

* "वरूथ्यं१"-इति ऋक्पाठः अत्राप्येव मेव वि०-सम्मतः।

---

२३ ऋग्वेदस्य ६,६,३६,१।

(१)—ऋचि तु ऋतावसो-इति पदे। ऋतो यज्ञः, सएव वसुभूतो यस्य स ऋतवसुः; (ऋतवसुरेव ऋतावसुः छान्दसं दीर्घत्वम्) तस्य सम्बोधनम् ऋतावसो'-इति।

(२)—इदंइति गृह-नामसु ऊनविंशतिमम् पदम् नि० ३, ४। छन्दः छन्दः प्रच्छदेन स्तुतिरुच्यते, तस्यां स्तुतौ भवमित्यर्थः। किं पुनस्तत्? वचः वचनम् स्तोत्र-लक्षणम्' -इति वि०। अत्र मानं—छन्दसेरर्चंति कर्मसु पाठः (३,१८); 'स्तोत्र-नामसु छन्द-इति च (३,१६)।

अथ चतुर्थी।

मेधातिथिऋषिः।

३ १ ५ ३१२ ३२३ १२ ३ १२
अभित्वापूर्वपीतयइन्द्रस्तोमेभिरायवः।
३ १ २३२३१२ ३ १ २ ३२
समीचीनासऋभवःसमस्वरन्रुद्रागृणन्तपूर्व्यम् ॥४॥ २४

४३ ४र र३ ४र ५र २ ४र ५ ४र ५ २
I अभित्वापूर्वपीतये। अभित्वा३पूर्वपीतया३। इन्द्र-
र र १ ७ १ ५ १र ६ ५
स्तोमेभी३रायवा३:। भिराया१वा२३:। ओमी३वा।

यज्ञ-गृहावस्थिते(१) वरुणे च प्रगायत (प्रगायतेति बहुवचनं पूजार्थम्) एतदेव दर्शयति "राजसु" राजमानेषु मित्रादिषु स्तोत्रं गायत पठत। मित्रादीन् चोन् राज्ञः स्तुतेति समुदायार्थः ॥ ३ ॥ २३

हे "इन्द्र"! "आयवो"(१) मनुष्याः स्तोतारः "स्तोमेभिः"

---

२४ उत्तरार्चिकस्य ७,३,१,१ = ऋग्वेदस्य ५,७,२६,२ = आरण्यके प्र०१३—१४ = ऊहे एका०१६—हाविं १६।

I प्रजापतेः; वषट्कारनिधनम्।

(३)—वरुण्यमिति गृह-नामसु सप्तदशम् पदम् (नि०३,४) तदेवेहार्थे नियामकम्। विवरणे मते तु वरुण्ये इति सप्तमी द्वितीयार्थे, वरुण्यं वरणीयम्।

(१)—आयव इति मनुष्य नामसु सप्तदशम् पदम् नि० २, १।

र र र १ ७ १ २
समीचीनासऋभवःसाऽमास्वरा२न्। समास्वा१रा२३न्।
१२ऽ २ र १७ १ २
ओमोऽवा। रुद्रागृणन्ताऽपूर्विया२म्। तपूर्वा१या२३म्।
१र ६ ५र र ३ ५
ओम्। ओ२। वा२३४। औहोवा। ऊ२३४पा ॥१८॥ १४

स्तोत्रैः "त्वामभि" ष्टुवन्ति। किमर्थं? "पूर्वपीतये" सर्वेभ्यो देवेभ्यः पूर्वं प्रथमतएव सोमस्य पानाय (सवन-मुखे हि चमसगणैः इन्द्रस्यैव सोमो ह्रयते। तथा "समीचीनासः" सङ्गताः "ऋभवः"(१) प्रथम वाचकेन शब्देन त्रयोऽप्युपलक्ष्यन्ते ऋभुर्विभ्वावाजइत्येते च(२) "समस्वरन्" त्वामेव सम्यग् स्तुवन् (स्तृ शब्दो

---

(१)—ऋभवो मेधाविन इति वि०। ऋभव मानस--निघण्टौ मेधावि-नामसु ऋभुरिति पद-पाठः (३,१५,८)।

(२)—ऋभव इति पदे त्रीणि विविधं नैरुक्तम्—प्रकृति-प्रत्यय-लक्षम्, नैरुक्तिकम्, यौगरूढिकम्। तथाहि—"ऋभव उरुभाग्नोति वा, ऋतेन भाग्नोति वा, ऋतेन भवग्नोति वा (२,५,१५)"-इत्यौकम्। "ऋभु र्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुः ऋभवो विभ्वा वाजश्च ते मनुष्यगणा मनवश्च न मध्यमेन, तदेतदृभोश्च वज्रवचनेन चमसस्य च संस्तवेन बहूनि दर्शतयोपु सूक्तानि भवन्ति (२,५,१६)"-इत्यपरम्; दृश्यं मानमर्थं मन्त्रः—

"विष्टी शमी तरणित्वेन वाघतो
मर्त्तासः सन्तो अमृतत्व मानशुः।
सौधन्वना ऋभवः सूरचक्षसः
संवत्सरे सम पृच्यन्त धीतिभिः॥"

(ऋ०१म० १६अ० ५सू० ४मन्त्रः)

"स्तुत्वा कर्माणि क्षिप्रत्वेन धीतारो मेधाविनो वा मर्त्तासः सन्तो अमृतत्वम् आन-

अथ पञ्चमी।

अस्याः परस्याश्च नृमेध-पुरुमेधौ द्वावृषी(१)।

३१२ ३१२ २२३१२
प्रवद्युम्नायबृहतेमरुतोब्रह्मार्चत।

पतापयोः)"रुद्राः"(४) रुद्र-पुत्रा मरुतश्च(५) "पूर्व्यं" पुरातनं वृत्रं त्वामिव "गृणन्ते" अभ्यष्टुवन् (वृत्र-वध-समये प्रहर भगवो जहि-वीर्यस्वेत्येवं रूपया वाचा त्वां स्तुतवन्त इत्यर्थः॥ ४॥ २४

शिरे सौधन्वना ऋभवः सूरज्ञाना वा सूरप्रज्ञा वा संवत्सरे समग्रथ्नन्त धीतिभिः'-इति च यास्क-स्मृतं तद्व्याख्यानम।

"आदित्य-रश्मयोऽप्यृभव उच्यन्ते (२.५.१६)"-इति तु नृतोर्यं नैरुक्तम। अत्रापि मान मस्त्यर्थं मन्त्रः——

"अगोह्यस्य यदसस्तना गृहे
तदद्यदभवो नानु गच्छत।"

(ऋ०१म०२२अ०५सू०११ मन्त्रार्दः)

"अगोह्य आदित्योऽगूहनीयमस्य यदस्मथ गृहे यावत्तत्र भवथ न तावदिह भवथेति" इति च यास्क-स्मृत-मेतद् व्याख्यानम्।

तदत्र सायणेन भगवता नैरुक्तिकं नैरुक्त्यमेवावलम्ब्योक्तं मेतत्—प्रथम वाचकेन त्यादि॥

(४)—'रोदन-स्वभावकाः स्तुत्युच्चारक क्रीडादित्यर्थः'-इति वि०।

(५)—'मरुतो मितराविणः'-इति नै० २,५,१६।

(१)—"पुरुमेधा आत्मीया ऋत्विज आह"—इत्येकस्यैवर्षे रुभयो विवरणे दृश्यते।

३१ २ ३१ ३१ ३१ ३१ ३१ २
वृत्रꣳहनतिवृत्रहाशतक्रतुर्वज्रे णशतपर्वणा ॥ ५ ॥ २५

४५ ४५२ ४२ ५ ४ २ २ १ २
I प्रवइन्द्रायबृहते। प्रवाः। इन्द्रायावृहा१ते२३।

१२ ऽ २ २ १९ १२ ऽ २
ओमोइवा। मरुतोब्रह्मा३आर्चा१ता२३। ओमोइवा।

१ २ २ १ १२ ऽ २ १
वृत्रꣳहाना। तिवृ। त्राहा२३। ओमोइवा। शता-

२ ३ ५ ३ २ २ ४
क्रतूः। वा२३४ज्रे। णशा३। हाइहा। तपापूर्वणा।

४
हेपूइ। डा ॥२०॥ २५

हे "मरुतः"! मितराविणः स्तोतारः(२)! "बृहते" महते "वः" स्तुत्य-स्तोतृत्व-लक्षणेन सम्बन्धेन युष्मदीयायेन्द्राय "ब्रह्म"

---

२५ ऋग्वेदस्य ६,६,१२,३ = आरण्यके प्रथम-द्वितीये५-६ -तृतीये च २७-२८ द्वे।

I धृषतो मारुतस्य साम।

(२)—मरुतो मितराविणो वा मरुद्वन्तीति वा'-इति नै० २,५,१३। 'हे मरुतः! मदीया ऋत्विजः'-इति वि०। इह च सामस्थ निघण्टु-तृतीयाष्टादशे ऋत्विङ्नामसु मरुतइति पदस्य षष्ठत्वेन पाठः।

अथषष्ठी।

३ १र २र ३ १ २ ३ १ २
वृत्रहन्द्रायगायतमरुतोवृत्रहन्तमम्।

३ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
येनज्योतिरजनयन्नृतावृधोदेवन्देवायजागृवि ॥ ६ ॥२६

१ र २ १ २ १ ३
I सांत्वाहिन्व। तिधाइनाइभीइः। तारइ। भार-

५ र र १ २ १ र २ १
३४। औहेवा। सएअवमेइ। सांत्वारिण। तिधा-

साम-लक्षणं स्तोत्रं "प्रार्चत" प्रोच्चारयत(२)। ततो "वृत्रहा" वृत्रस्य मेघस्य(४) पापस्य वा हन्ता। "शतक्रतुः" शत-विध-कर्मा बहु-विध-प्रज्ञो वा इन्द्रः "शतपर्वणा" शत-सङ्ख्याक-धारेण वज्रेण एतन्नामकेनायुधेन वा "हवम्" अपामावरकं वृत्राख्य मसुरं(५) "हनति" युष्माभिरभिष्टुतः सन् हन्तु (हन्तेर्लेटाऽऽगमः(६) ॥५॥२५

---

२६ ऋग्वेदस्य ६,६,१२,१ = आरण्यके प्र० १६— द्वि० द्वि० २।

I संश्रवसः, विश्रवसः, सत्यश्रवसः, श्रवसो वा।

(३)—'ब्रह्म सोमलक्षणमन्नम्, प्रार्चत प्रकर्षेण स्तुत इत्यर्थः'-इति वि०। ब्रह्मशब्दो नानार्थः, अन्ननामसु च दृश्यते (नि० २,७,२५)।

(४)—हवइति निघण्टौ मेघनामसु षष्ठाविंशतितमम् पदम १,१०।

(५)—असुरइति च निघण्टौ मेघनामसु जलविंशतितमम पदम १,१०।

(६)—'लेटोऽडाटौ (३,४,९४)"-इति पा०।

२ १ ३ ५२ २ १ २
इताइभीइः। तारइइ। भा२३४। औहोवा। विश्व-
१ २ २ १ २ १ ३
सेइ। सांत्वातत। त्वुर्व्वाइताइभीइः। ताइइ। भा२-
५२ २ २ १ २
३४। औहोवा। सत्यश्रवसेइ॥२१॥

। १ २ २ १ २ १
II सांत्वाशिश्र। तिधाइता१इभी२ः। ताइभी२ः।
२ १ २ १ २ १
बृहदिन्द्रायाइगाया१ता२। याता२। मरुतोवत्राइहा-
२ १ २ २ १ २
न्ता१मा२म्। तामा२म्। येनज्योतिरजनयन्नृइतावा-
१ २ २ १ १
१र्व्वा२ः। वार्व्वा२ः। देवंदेवायाइजागृवी२। गृवी२।
१ २ २ १ २ १ ३
सांत्वाशिश्र। तिधाइताइभीइः। ताइइ। भा२३४।
५२ २ १ ३ १ १ १ १
औहोवा। अवसे२३४५॥२२॥ २६

हे "मरुतः"! रु शब्दे, मितं रुवन्तीति मरुतः हे मितभाषिणः(१) स्तोतारः! "वृत्रहन्तम्" अतिशयेन पापविनाशनं "वृ-

---

I वाघ्यानाम्, इन्द्रस्य वा।

(१) 'मरुतो मितराविणो वा, मितरोचिनो वा, महद्रवन्तीति वा' इति नै० २.५,१९।

अथ सप्तमी।

वसिष्ठऋषिः*।

२ ३१ २ ३१ २ ३२ ३२३ १२
इन्द्रक्रतुन्नआभरपितापुत्रेभ्योयथा।

१२ ३१ २ ३१२ ३ १२ २२
शिक्षाणोअस्मिन्पुरुहूतयामनिजीवाज्योतिरशीमहि ॥७॥२७

हत्" साम "इन्द्राय" इन्द्रार्थं "गायत" अस्मदीये यज्ञे गानं कुरुत। "ऋताषहः" ऋतस्य सत्यस्य वा वर्धका विश्वेदेवाः अङ्गिरसो वा ऋषयः "देवाय" द्योतमानायेन्द्राय "देवं" देवनशीलं(१) "जागृवि" सर्वेषां जागरण-शीलं(२) "ज्योतिः" सूर्यं "येन" साम्ना "अजनयन्(३)" इन्द्रार्थमुदपादयन् तत्साम गायतेति ॥ ६ ॥ २६

* 'शक्तिरिन्द्रमाह' इति वि०।

---

२७ उत्तरार्चिकस्य ६,३,६,१ = ऋग्वेदस्य ५,३,२१,६ = जघ्ने २,१७।

(१)—'कीदृशं पुनः स्तुतिरूपम् उच्चारयामः ? 'उच्यते—'देवं' द्वितीया तृतीयार्थे दृष्ट्वा, देवेन सोमेन संयुक्तम्।

(२)—'अतिप्रीतिकरत्वेन जागरणकरम्, अत्यन्तप्रीति करमित्यर्थः' इति वि०।

(३)—'जनितवान्, आरोपितवानित्यर्थः' इति वि०।

I इन्द्राऔ३ह्वो। क्रतुन्ना३आभा१रा२। पिताऔ-
३ह्वो। पुत्रेभी३योया१था२। शिक्षाऔ३ह्वो। णोअ-
स्मिन् पुरुहूतयामा१नी२। जीवा२३:। ज्यो२ता२३४औ-
ह्वोवा। अशीमह्वी२३४५ ॥२३॥

II इन्द्रक्रतूपुन्नआभरा। पितापुत्रेभियोयथा। शि-
क्षाणो२३आ। स्माइन्पुरुहू। तयामा१नी२। औ
२। ह्वो२। ऊवाइ। औ३ह्वो२३४वा। जीवाज्यो-
२३ती:। अशीमा२३ह्वा३४३इ। ओ२३४५ऊइ। डा ॥ २४ ॥

III इन्द्रक्रतुन्नआ। भराओ२३४वा। पितापूत्रेभि-
योयथा। ह्वा२३४५। पितापुत्रेभिय:। याथा२३४ह्वा-

I,II,III वाप्यानाम्, इन्दस्य वा; संयानानि, वास्त्राणि, वासिष्ठानि वा।

४ ५ ४ ५ ३ ४ ५ ४ २ १
इ। शाइन्त्राणोऽआ। स्माइन्पुरुहूतया। मानोऽ२३४-
५ ४ ५ ४ ५ २१ ५ ४ ५
च्छाइ। जीवाज्योतीः। अशोऽ२३४वा। मापुचोऽच्छाइ॥

॥ २५ ॥ २७

हे "इन्द्र!" "नः" अस्मभ्यं "क्रतुं" कर्म वा प्रज्ञानं वा "आभर" आहर। अपिच। "यथा पिता पुत्रेभ्यः" धनं प्रयच्छति तथा "नः" अस्मभ्यं "गिर्वः" धनं देहि। हे "पुरुहूत!" बहुभिराहूतेन्द्र! "यामनि" यज्ञे(१) "जीवा" वयं(२) "ज्योतिः" सूर्यम्(३) "अशीमहि" प्रतिदिनं प्राप्नुयामः। [यहा। हे इन्द्र! भूतानि प्रकाशयितरिन्द्र! तथाच यास्कः—"इन्द्रइरां दृणातीति वेरं ददातीति, वेरं दधातीति, वेरं दारयत इति, वेरं धारयतइति वेन्दवे द्रवतीति, वेन्दो रमत इति, वेन्वे भूतानीति वा तद्यदेनं प्राणैः सर्वः समैधत्तदिन्द्रस्येन्द्रत्व मिति विज्ञायते"(१०,८)-इति(४)। एवं गुण-विशिष्ट! परमात्मन्! त्वं क्रतुं कर्म स्व-विषय-ज्ञानं वा नः अस्मभ्यम् आभ-

(१)—यान्ति देवा यस्मिन् स यमो यज्ञः

(२)—जीवा जीवन्तो वयम् इति वि०।

(३) ज्योतिः ज्ञानम्-इति वि०।

४।—"इदं कर्णादित्यायणः। इद दर्शनादित्यौपमन्यवः। इन्दते वैश्वर्यकर्मणः। इच्छयणां दारयिता वा. द्रावयिता वा. दर्शयिता च यज्ञस्य"-इति च नै० दै० ४,८

अथाष्टम

रेभऋषिः।

१ २ ३१ २ ३ १ २ ७१ २
मानइन्द्रपरावृणक्भवानःसधमाद्ये।

१ २ ३ २उ ३ २ ३ १ २ ३१ २
त्वन्नऊतीत्वमिन्नआप्यंमानइन्द्रपरावृणक् ॥ ८ ॥ २८

५र १ २ २ १र २ ०
I मानइन्द्रा। परावा३र्णाक्। भवानः सधमा१दी-

२ १ र र २ २ १र र २
३याइ। त्वन्नऊतीत्वमिन्आपिश्याम्। मानइन्द्रपरावृ-

२ ५
णा३१उवा२३। ऊ३४पा ॥ २६ ॥

३र ४ ५ ४ ५र ३२ ३र ४ ५ २१र
II मानइन्द्रपरा। वृणाक्। मानइन्द्रा। परावा-

राहरप्रयच्छेत्यर्थः। तत्र दृष्टान्तः—पिता पुत्रेभ्यो यथा लोके विद्यां धनं वा प्रयच्छति तथा नोऽस्मभ्यं शिक्ष विद्यां प्रयच्छ। हे पुरुहूत! बहुभिराहूतेन्द्र! यामनि सर्वैः प्राप्तव्ये अस्मिन् प्रकृते ब्रह्मणि जीवा वयं ज्योतिः परं ज्योति रगीमहि सेवेमहि ॥ ७ ॥ २७

---

२८ ऋग्वेदस्य ६,६,३७,२।

I,II आङ्गिरस, अङ्गिरस वा सामनी द्वे।

२ १ ३ १ २ १ २
२३र्णाक्। भवा२नः साधमादा२३याइ। त्वन्नऊती२।

१ १२ २ २१ २ १२
त्वमिन्ना२आपियाम्। मानाआ२३इन्द्रा। परावा२३

२ १
र्णा३४३क्। ओ२३४५इ। डा॥ २७॥ २८

हे "इन्द्र"! "नः" हविषां प्रदातॄन् अस्मान् "मा परावर्णक्" मा परित्यात्तीः (वृजी वर्जने रौधादिकः। लङि रूपं) तदेवाह त्वं नोऽस्माकं "सधमाद्ये" सह मादन-हेतुभूते यज्ञे सोम-पानाय भव। किञ्च। हे "इन्द्र"! नोऽस्मान् त्वमेव "ऊती" ऊत्या स्थापय। यद्वा। ऊती। व्यत्ययेन कर्त्तरि क्विचा निपातितः त्वमेवास्माकं रक्षिता खलु। तथा "त्वमित्" (इदवधारणे) त्वमेव नोऽस्माकम् "आप्यं"(१) ज्ञातेयं त्वमेव बन्धुरित्यर्थः। अतएव मा न इन्द्रः परावर्णगिति गतार्थः॥

"सधमाद्ये"-"सधमाद्यः"-इति च पाठो॥ ८॥ २८

(१)—'आप्यम ज्ञातव्यमित्यर्थः'-इति वि०।

अथ नवमी।

मेधातिथिर्ऋषिः।

३ २ २ ३ १ २ ३ ५ ३ २ ३ १ २
वयङ्त्वासुतावन्तआपोनवृक्तबर्हिषः।

३ १ २ ३ १ २ ३ १ २ ३ १ २
पवित्रस्यप्रस्रवणेषुवृत्रहन्परिस्तोतारआसते ॥९॥ २९

५ २ ४२ ५२ ४ ५ १ २ २ १
I वयङ्त्वाऽत्वासुतावन्ताः। आपोनवृ। क्तवा२३र्हि-

२ १ १ १ २ १ २ १ २ १
षाउ। वा२३। पवित्रस्या। प्रस्रवणाइ। षुवृत्रा२३४-

५ ४ १ १२ २ १२
हान्। पा२३री। स्तोतारः। आसा२३४५ताई५ईइ।

३ १ १ १ १
आ२३४५ष्॥ २९॥

४२ ५२ ४ ५ ४ ५ २ ४ ५ ४२ ५२ ४ १२
II औहोवा। वयङ्त्वासुतावन्तः। औहोवा। औ

२ २ २ १ २
हेाइ। आपोनवृक्तबर्हिषः। पवाइत्रा३स्या। प्रस्रवणे-

---

२९ उत्तरार्चिकस्य २,२,१२,१ = ऋग्वेदस्य ९,३,७,१ जहे हि०१८—च०८—न०९—उन०हि०७।

I आष्-कार-निधनं कागुम्।

II महावैष्टभम्।

षुवा१र्त्रा३च्छान्। औहोइ३। औहोइ। परिस्रोता
रआमते। पराइस्रोा३ता। रआमता। औ३होवा।
होषुइ। डा ॥ २९ ॥

III औहोहोहाइ। आइहो। वायाम्। घा२३४-
त्वा। सूतावा२३४नाः। आपोना२३४वृ। क्तावर्हिषाः।
एहोइ। आ२३४इहो। पावित्रा२२४स्या। प्रास्तावा-
२३४णे। षुवृत्रहान्। एहोइ। आ२३४इहो। पा-
रिस्रो२३४ता। रआ३साषुना६षुइ। आ२३४भी ॥ ३० ॥

IV वयङ्क्त्वोहाइ। सुतावन्तोवा। आपोनवृ। क्त-
वार्हा१इषा२३ः। होवा३च्छाइ। पवित्रस्यप्रस्रवणे। षु-

I,II आभि-निधनं काण्वम्।
IV महावैष्टभम्।

अथ दशमी।

भरद्वाजऋषिः*।

१ २ ३१ २ ३ १र २र ३ १ २ ३ १ २
यदिन्द्रनाऽऋषीष्वाऽओजो+नृम्णञ्चकृष्टिषु।

१ २ १ २ २ १ २ १
वार्चा१ऽहा२३न्। होवाऽहाइ। पराइस्तो१त्ता२३। हो-

२ २ १ १ २ ५ र र ३
वाऽहा। रऽआ२३। सा२ता२३४ऽओ होवा। दी२३४-

५
ग्राः॥३१॥ २९

हे "वृत्रहन्" "त्वा" त्वां वयं "ध" खलु "सुतवन्तः"(१) सोममभिषुतवन्तः "आपोन" आपइव प्रवणमभिगच्छामः(२)। "पवित्रस्य" सोमस्य प्रस्रवणेषु "वृत्तबर्हिषः" स्तीर्ण-बर्हिषः स्तोतारश्च त्वां पर्युपासते॥९॥ २९

* 'संयुराह'-इति वि०।

+ "आ॰ ओजो"-इति ऋक्पाठः।

(१)—ऋषि सुतावन्त इति दीर्घः श्रूयते।

(२) "एतदुक्तम् भवति। यथा आपः नदीनिर्झरेण स्थानेषु द्वीपं परिवार्य्य व्यवतिष्ठन्ते तद्वद् वयं स्तोतारश्च त्वां परिवार्य्य व्यवतिष्ठाम इत्यर्थः"-इति वि०।

३ १ २ ३ २ ३ १र २र ३ १र २र ३ १ २
यद्वापञ्चक्षितीनांद्युम्नमाभरमत्रविश्वानिपौंस्या ॥१०॥३०

॥ इति द्वितीय-दशतिः ॥

५ र र ४ ५ ४र ५ र ५ १
I औहाइ। यदिन्द्रना। नृषीषुह्वा। ओजो२-
१
नाम्र्णा२म्। चक्रृष्टि। षु। ऐ२ह्वी१आइ ह्वो२। हा
१ २ १ र १
२ऊऊवाइ। या१दा२पाञ्चा२। क्षितीनाम्। ऐ२ह्वी-
१ १ र २ १
१आइ ह्वो२। हा२ऊऊवाइ। द्युम्नमाभ। रा। ऐ२-

हे "इन्द्र"! नाहुषीषु [नहुषइति मनुष्यनाम नि०२,३,९] तत्सम्बन्धिनीषु(१) "कृष्टिषु"(२) प्रजासु (आकारः ममुच्चये) यच्च "ओजो" बलं "नृम्णं" धनं च विद्यते। "यदा" यच्च "पञ्च" पञ्चानां "क्षितीनां"(३) निषादपञ्चमाश्चत्वारो वर्णाः पञ्च

---

३० ऋग्वेदस्य ४,७,२८,२।

I औष्ठीगवम्।

(१)—'नहुषइति मनुष्यनाम नि० २,३,९, तेषु भवो नाहुषः, मनुष्यजातीयो मायावान्तर-जातीयाभिप्रेतो, ते यत्तरक्षोगन्धर्वादयः, नासु, इति वि०।

(२)—'कृष्टिषु मनुष्येषु च' (नि०२,३,१) इति वि०।

(३)—'क्षितय इत्यपि मनुष्यनाम (नि० २,३,९। पञ्च चते क्षितयश्च। कतमे पुनस्ते। चत्वारो वर्णाः, निषादः पञ्चमः।

ह्वी१आइह्वी२। ह्वा२ऊऊवाइ। सा१वा२वाइस्वा२।
निपौ१ऽसि। या। ए२ह्वी१आइह्वी२। ह्वा२ऊऊवा
२। या२३४औह्वोवा। ऊ२३४पा॥३२॥ ३०

चितय. तषां स्वभूतम् "द्युम्नं" द्योतमानमन्नं तत्सर्वं मह्यम् "आभर" आहर प्रयच्छ। तथा "सत्वा"(४) महान्ति "विश्वानि" सर्वाणि "पौंस्या" पौंस्यानि बलानि(५) चास्मभ्य माहर॥ १०॥ ३०

इति श्रीमाधवीये सामवेदार्थ-प्रकाशे छन्दोग्याख्याने
उत्तरस्याध्यायस्य तृतीय. खण्ड॥ ३॥

अथ चतुर्थे खण्डे—

सैषा प्रथमा।

मेधातिथिर्ऋषिः।

सत्यमित्थावृषेदसिवृषजूतिर्नोविता।

(४)—'यद्यपि सत्वाशब्दः अन्ननामसु पठितः, तथापीह सर्वदा-शब्द-प्रयोगे दृश्यः। तथाच सर्वदा इत्यर्थः।

(५)—'पौंस्यानि इति निघण्टौ बल नामसु चतुर्विंशतितम् पदम् (२,९)। सुपां-सुलुगित्यादिना आत्वे च पौंस्या इति।

क २१ २ १ २ ३ २ ३ १ २ १ २ ३ २
वृषाह्युग्रष्टुग्विषेपरावतिवृषोअर्वावतिश्रुतः ॥ १ ॥ ३१

५ ४ ५ ४ २ ४ १ २ २
I सत्यमित्थावृ। षापुइद्माइ। बृषजूतिर्नोविता-

१ २ ० २ १
२। वृषाह्युग्राष्टुग्विषाइ। परावताइ। वृषो२३-

२ १ २ १
र्वा। वताइअू२३ता३४३:। ओ२३४५इ। डा ॥३३॥ ३१ *

हे "उग्र" उद्गूर्णेन्द्र! त्वं "सत्यम्" "इत्था" इत्थं "वृषेत्" कामानां वर्षकएवासि। "वृषजूतिः"(१) वृषभिः सेक्तृभिः सोम-रसस्य सोढृभिर्याहृता "नः" अस्मान् "अविता" रक्षिता भवसि। "वृषाहि" सेचकएव "ग्रुग्विषे" ग्रूयसे। "परावति" दूरेऽपि(२) "वृषेव" कामानां सेचक एवासि। "अर्वावति" समीपेऽपि "वृषा" सेचक एव "श्रुतः" श्रूयते ॥

"अविता" "अवृतः"-इति च पाठौ ॥ १ ॥ ३१

---

३१ ऋग्वेदस्य ६,३,८,६=आरण्यके च०हि०१८।

I इन्द्रस्य; वृषकर्म।

(१)—'वृषजूतिः—जूतिर्गमनं; (जवति गत्यर्थः) वृषस्येव गमनं यस्य स वृषजूतिः' इति वि०।

(२)—निघण्टौ 'परावते'-इति दूरनामसु पञ्चमं पदम्। ३,२६।

---

*॥ इति ग्रामे गेय-गाने षष्ठस्यार्द्ध-पञ्चाठकः ॥

अथ द्वितीया।

रेभऋषिः।

२ ३ १ २ ३ १ २ ३ १ २ १ २
यच्छक्रासिपरावतियदर्वावतिवृचद्दन्। अतस्त्वा-

१ २ २ १ २ ३ १ २ ३ २ ३ १ २
गीर्भिर्द्यगदिन्द्रकेशिभिःसुतावाꣳआविवासति॥२॥ ३२

I ५ २ ४ऽ ४र ५ १ ७र १ २
ओम्। यच्छक्राऽसीपरावती। यादर्वाव। तिवार्चा-

१ २ ६ २ ऽ २ २ १र र
१द्दारन्। अताऽः। औ३द्दोऽवा। त्वागीर्भिर्द्युग-

१ १ १ ३ ४र र
दिन्द्राकेऽशिभिऽः। सुताऽ३। वाꣳऽआ२३४औद्दो-

२ १ऽ१ ३ १ १ १ १
वा। ण३। विवाऽसती२३४५॥ १॥

४ ५ ४र ५ र ४ ५ ४ २र १ ७
II यच्छक्रासिपरावतियदोद्दाइ। र्वावा३ताइवृत्राद्दा

---

३२ ऋग्वेदस्य ६,६,३६,४=आरण्यके ८०१—२इति हे।

I,II द्यौते, दैगते वा।

३ २ ३२ २ १ २ १ २
२३४न्। अता३४स्त्वागाइ। भाइर्ध्वगदि। द्राकेइ-
१ १ ३ ५ २ १ २
शिभा२ः। सुता२३। वा२ऽआ२३४औहोवा। विवा-
१ २ १ १ १ १
२सति२३४५॥ २॥ ३२

हे "शक्र" शत्रु-हनन-समर्थेन्द्र! "यद्" यदा "परावति" विप्रकृष्टे दूरे द्युलोक-देशे "असि" विद्यसे। हे "वृत्रहन्" वृत्रस्य हन्तरिन्द्र! "यद्" यदि वा "अर्वावति" अर्वाचीने तस्माद्-धस्तात् स्थिते तदपेक्षया समीपे देशेऽन्तरिक्षे भवसि तस्मादपि। "अतः" अस्माद्भूलोकाद्वा हे "इन्द्र"! "द्युगत्"(१) (गम्लृ, सृघृ, गतौ। क्विपि "गमः क्वौ" विति अनुनासिक-लोपः। तुक्। "सुपां सुलुगिति" भिसो लुक्। द्युलोकं प्रति गच्छद्भिः स्वभासा-सर्वतोगच्छद्भिः "केशिभिः" केशवद्भिः हरिभिरिवस्थिताभिः "गीर्भिः" "त्वा" त्वां "सुतवान्" अभिषुत-सोम-वान् यजमानः "आविवासति" आत्मीयं यज्ञं प्रति आगमयति। त्वामेतैः स्तोत्रैः परिचरति वा(२)॥ २॥ ३२

---

(१)—'द्युगत् क्षिप्रम्'-इति वि०। 'द्युगत्'-इति निघण्टौ क्षिप्रनामसु वर्योवि-श्रुतितमम् पदम् (२, १५।

(२)—'स्तेभ्यात्मानमेव परोक्षकृतेन प्रतिनिर्दिशति। स्तोभनामायमपि. परि-चरतीत्यर्थः'-इति वि०।

अथ तृतीया।

वत्सऋषिः *।

९ १ २ ३ १र २र ३ १ २ ९ २ ३ १र २र
अभिवोवीरमन्धसोमदेषुगायगिरामच्छाविचेतसम्।

७ २ ३ १ २ ७ २ ३ २ ३ १ २
इन्द्रनामश्रूत्यꣳशाकिनंवचोयथा ॥ ३ ॥ ३२

५ ४ ५ र र ४ ५ ४ २ र १ १
I अभिवोवीरमन्धसाः। मदेषू३गाया२। गिरा-

९ १ २, ३ २ ४ ५ र ४ १ २र
माच्छा३। वोचेता२३४साम्। इन्द्रन्नामा। श्रूत्यꣳशा-

१ ३ ५र र २ र १ ३ १ १ १ १
कार३ इ। ना२३४औच्छोवा। वचोउपा२३४५ ॥ ३ ॥ ३२

इयं पिपीलिकमध्या(२) बृहतीति बह्वृचाः आद्यन्तौ पादौ त्रयोदशाक्षरौ, मध्यमोऽष्टाक्षरइति त्रिपदा। [हे उद्गात्रादयः! "वः" यूयम् (अथवा हे यजमानाः वो युष्माकं) "हिताय" "अन्धसः"

---

* 'वसुर्नाम ऋषिः'-इति वि०।

---

३२ ऋग्वेदस्य ६,४,३,४।

I कार्त्तयशं, कार्त्तवेशं वा।

(२)—'पिपीलिकमध्येत्यौपमिकम्. पिपीलिका पेलते गतिकर्मण'-इति यास्कः दै० १, १९।

अथ चतुर्थी।

भरद्वाजऋषिः*।

१ २ ३ १ २ ३२ ३१२ ३ १२
इन्द्रत्रिधातुशरणत्रिवरूथꣳस्वस्तये†।

३१२ ३१२ ३१२ ३१२ ३१२
छर्दिर्यच्छमघवद्भ्यश्चमत्स्वाच्चयावयादिद्युमेभ्यः॥४॥३४

४ ४ २१२ २१
I इन्द्रत्रिधातुशरणम्। त्रिवरूथꣳसुवस्तयइ।

सोमस्य "मदेषु" उत्साद्यमानेषु सत्सु "वीरं" शत्रूणां वीरयितारं। "नाम" शत्रूणां नामकं। "विचेतसं" विशिष्ट-प्रज्ञं "शुत्यं" सर्वत्र श्रोतव्यं स्तुत्यं(३)। "शाकिनं" शक्तिमन्तम्(४) ईदृशम् "इन्द्र"! "मह्या"(५) महत्या "गिरा" स्तुत्या "वचो" वाग्यज्ञ-

* 'संयराह'-इति वि०।

† "स्वस्तिमत्"-इति ऋग्वेद पाठः।

३४ ऋग्वेदस्य ४,७,१८,४।

I इन्द्रस्य शरणम्।

(३)—विवरणकारस्त्वेवं व्याचष्टे- कमिव स्तुहि? उच्यते- 'शुत्यं वचो यथा' शुनौ भवं शुत्यं, वचः वचनम्। यथा कश्चित् शुनौ भवं वचनं, अत्यर्थं न स्तौति] तद्वत् स्तुहीत्यर्थः।

(४)—शकन शाकः शक्तिः, सा यस्यास्ति, तम्।

(५) -मह इति निघण्टौ महन्नामसु प्रथम पदम ३, ३. सुपां सुलुगित्यात्वं रूपम्।

२ १ २ १ ७ २ २
छर्दिर्यार३च्छा। माघवद्भ्यः। चामच्छा३च्चा। या-
१ २ १ १ २ ४ ५ ४
वया३दी। द्यूमे३भिया। ओ३होवा। हो५इ।

डा ॥ ४ ॥ ३४

दीया "यथा" येन प्रकारेण प्रवर्त्तते गायत्र्या त्रिष्टुभा वा तथा "गाय" गायत स्तुतिं कुरुत ॥ ३ ॥ ३३

हे "इन्द्र"! "त्रिधातु" त्रिप्रकारं त्रिभूमिकं(२)। "त्रिवरूथं" त्रयाणां द्योतातपवर्षाणां वारकं(३)। "स्वस्तये" अविनाशाय "छर्दिः" छर्दिष्मत् आच्छादनयुक्तम्। एवं-गुण-विशिष्टं "शरणं" गृहं(४)। "मघवद्भ्यः" मघं हविर्लक्षणं धनं तद्वद्भ्योऽस्मदीयेभ्यो यजमानेभ्यः "मह्यं" भरद्वाजाय "च" "प्रयच्छ देहि। अपिच। "एभ्यः" सकाशात् "दिद्युं" शत्रु-प्रेरितं द्योतमानमायुधं(५) "यवय" पृथक्कुरु ॥ ४ ॥ ३४

(२)—'धातुशब्देन रसा उच्यन्ते। त्रयो रसाः, देवपितृमनुष्योपभोग्याः। अथवा धातवः, काम-क्रोध लोभाद्य स्त्रैविध्युक्तम्। अथवा सुवर्ण-रजत-माणिक्यैः त्रिभिः धातुभिः युक्तं यत् त्रिधातु-शरणं गृहम्'-इति वि०।

(३)—तच्च द्यौम्न वर्षा-क्षमत्व च दर्भागुरुकुङ्कुमादिरूपम् विवरण-सम्मतम्।

(४)—'छर्दिरिति यद्यपि गृहनामसु (नि० ३,४,१८) पठितम्, तथापि शरण-मित्यनेन पौनरुक्त्य-प्रसङ्गात् क्रियानामकं द्रष्टव्यम्। छर्दिर्दीप्तिदेवनयो रित्येतस्य दीप्त्यर्थस्येदं रूपम्। समृद्धा दीप्तिमित्यर्थः'-इति वि०।

(५)—'दिद्युम्'-इति वज्र नामसु प्रथमं पदम् (नि०२, २०)। 'दिद्युं देय मस्त्रमयम्'-इति वि०।

अथ पञ्चमी।

नृमेधऋषिः*।

१ २ ३ २ ३ १र २र
आयन्तइवसूर्य विश्वेदिन्द्रस्यभक्षत।

१ २ ३ १र २र ३ १ २ ३ १ २ ३ १र २र
वसूनिजातोजनिमान्योजसाप्रतिभागन्नदोधिमः† ॥५॥३५

५र ५र ५ १
I आयन्तीयम्। आयन्तइवसू४रायाम्। विश्वा२-

हे अस्मदीयाजनाः! "आयन्तइव सूर्य" यथा समाश्रिता रश्मयः "सूर्यं" भजन्ते तथा "इन्द्रस्य" "विश्वेत्" विश्वान्येव धनानि "भक्षत" भजत। स च यानि "वसूनि" धनानि "जाते" उत्पन्ने "जनिमानि" जायमाने जनिष्यमाणे च "ओजसा" बलेन करोति अतो "भागं न" पित्र्यं भागमिव तानि धनानि "प्रतिदोधिमः" प्रतिधारयेमेति [यद्वा। 'आयन्तइव सूर्य" यथा समा-

---

* 'नृमेधसआर्षम्'-इति वि०।

† "दोधिम"-इत्यपि पाठः क्वचिदृग्वे दीय-पुस्तके दृश्यते।

---

३५ उत्तरार्चिकस्य ५,२,१४,१ = ऋग्वे दस्य ६,७,३,३ = जहे प० हि०८—१४द०हि०२=जह्वे हि०१६—१८—द्व० हि०७।

I आयन्तीयम्।

१ १ १ २ २ १२ २२
इदिन्द्रा२। स्वभा२क्ता। वासूनिजातोजनिमा।
१ २ १ २२ १ ९२ १ २
नियोजा१सा२। प्रतिभागन्नदी२धिमः। प्रा२३ती।
२ २ २ १२ ७२ १ ५ ६ १ १
भागान्ना३दा। ङम्। धिमा३ः। ओ२३४वा। हे२३-
११
४५॥ ५॥ ३५

स्थिता रश्मयः सूर्यमुपतिष्ठन्ते तथा "इन्द्रस्य" "विश्वा" विश्वानि धनानि विभक्तुमिच्छन्तः समाश्रिता मरुतः इन्द्रमुपतिष्ठत इति शेषः। उपस्थाय च मरुतो 'वसूनि' उदक-लक्षणानि धनानि "जाते" जायमानाय "जनिमानि" जनिष्यमाणाय(१) मनुष्याय "ओजसा" बलेन "भक्षत(२)" विभजन्ते। तत्र चास्माकं यो भागः तं "भागं" (नेति सम्प्रत्यर्थे) प्रतीत्येषः अनुदात्तेतस्य स्थाने। "अनुदीधिमः' वयमनुध्यायेम(३)। [तथाच यास्कः—(नै०६,८) "समाश्रिताः सूर्यमुपतिष्ठन्तेऽपिवोपमार्थे स्यात्सूर्यमिवेन्द्र मुपतिष्ठन्त

(१)—'जाते'-'जनिमानि' इत्युभे अपि प्रथमैकवचने चतुर्थ्येकवचनस्य स्थाने दृष्टव्ये। जाताय, जनिष्यमाणाय च भूतग्रामस्यार्थाय इति वि०।

(२)—ग्राहोऽत्र्यं भक्ति वि-पूर्वो दृष्टव्यः।

(३)—'यथा कश्चित् पित्रास्य चार्थस्य साधारणस्य भागं ध्यायति, तद्वदयं तानि विभज्यमानानि उदकानि अनुध्यायामः'-इति वि०।

अथ षष्ठी।

पुरुहन्मा ऋषिः।

३ १२ ३१र २र ३१ २
नसीमदेवञ्आपतदिषन्दीर्घायोमर्त्यः।

१२ ३ १र २र ३ १२३२ ३ १२ ३ १२
एतग्वाचिद्यएतग्रोयुयोजतइन्द्रोहरी*युयोजते ॥६॥३६

३४र३४र५ र २ २ १
I नसीमदेवञ्आ। हाइहा३इ। पा२३४। तत्यतो-

५ १ १र १०
वा। इषꣳहो२इ। दीर्घाहो२। योमर्त्तायाः२।

इति सर्वाणीन्द्रस्य धनानि विभज्यमाणाः स यथा धनानि विभजति जाते जनिष्यमाणे च तं वयं भागमनुध्यायामोजसा बलेनेति॥

"जनिमानि" "जनिमानः" इति च पाठौ॥ ५॥ ३५

---

* "हरीइन्द्र"-इति व्यतिक्रमपाठश्च ऋग्वेदीयः।

---

३६ ऋग्वेदस्य ६,५,८,२।

I वाम्नम्, आच्छोलं वा।

१ २र १ २, ३ ३ २
आइतग्वाचित्। यआइताशी। युपाउवाइ। ऊ३४-

५ १ १ १ १ १
पा। जता२इ। आइन्द्रो२हारी२। युयो२३। जा-

५र र २, ५
इ४औहोवा। ऊ३२३४पा ॥ ६ ॥ ३६

हे "दोर्घायो"! निखेन्द्र! सः "अदेवः" इन्द्राख्य-देव-रहितः "मर्त्यः" मरण-धर्मा मनुष्यः "मी" सर्वं(१) "इषम्" अन्नं "नापतत्" न प्राप्नोति। "योमर्त्यः" यस्येन्द्रस्य "एतग्वाचित्" एतवर्णोपेताश्वो भवतोऽभिमत-देश-गमनाय सः "एतशः" एतशौ(२) "युजोजते" साजयति रथे, यन्त्रं गन्तुम्। (यश्चेन्द्रो हरी युजोजते न स्तौति स न प्राप्नोतीति समन्वयः।

"आपतत्"-"आपद्"इति च पाठौ। "एतशः"-"एतशाः"-इति पाठौ ॥ ६ ॥ ३६

---

(१) 'मीति पदपूरणः'-इति वि०।

(२) 'इषमिति निघण्टौ अन्ननामसु चतुर्दशस्पदम् (२, ७)।

(३) 'एतग्वा'-इति निघण्टावश्वनामसु नवमम् पदम्; 'एतश'-इति च दशमम्।

अथ सप्तमो।

नृमेध-पुरुमेधावृषी।

२ ३ १२ ३२३ १२ ३१२
आनोविश्वासुहव्यमिन्द्र*समसुभूपत।

४र५ ४ ५ २१ १
I आनः। एविश्वा। सुहाव्या२म्। आइन्द्र
२ १२ २ ३ ५ २ २ १२र
सम। त्मभू१पाता। ऊ२३४पा। हाउहाइ। ब्रह्मा-
२ २र ३ २ १ २१ २ १ २
णिसवना। निवृत्रहान्। परमा२उज्याः। आर्चाउ-
२ १ २ ४ ५ ३
हाइ। षमा। औउहोवा। होपुइ। डा॥ ७॥

५र र र र ४ ५ १ र र
II आनोविश्वासुहाहाव्याम्। इन्द्र*समत्मभूपतो।
२ २१ २१ १
पब्रा२उह्मा। णिसवना। निवृत्रहान्। परमा२उज्याः।
१ २ ३ १ २ ३ ५ ४
आर्चाउहाइ। षमा। औउहोवा। होपुइ। डा॥ ८॥

५र र र ४ ५ २ र
III आनोविश्वासुहाव्याम्। इन्द्राम्। समत्मभूपत।

---

* "हव्यइन्द्र"-इति च ऋग्वेदीयः पाठः।

I,II,III ग्राक्राणि वा, वामिष्ठानि वा, वैगस्वानि वा, आ-

३ १ २ ३ १ २ ३ १ २
उपब्रह्माणिसवनानिवृत्रहन्परमज्याऋचीषम* ॥ ॥३७

१ २ ३ ४ १ २
उपाब्रा१ह्मा२। णिसवनानिवृत्रहन्। परामा१ज्या२:।

१२ २ १
ऋचीषा२३मा३४३। ओ२३४५इ। डा ॥८॥ ३७

हे स्तोतारः! "विश्वासु" सर्वासु असुर-युद्धेषु "हव्यं" सर्वदेवैः रक्षा-रक्षार्थं माह्वातव्यम्। एतादृशम् "इन्द्रम्" उद्दिश्य "नः" अस्माकं यज्ञे "ब्रह्माणि" स्तोत्राणि हवोरूपान्नानि वा "उपभूषत" अलङ्कुरुत प्रेरयत। हे "वृत्रहन्" वृत्रस्यासुरस्य पापस्य वा हन्तः! "परमज्याः" युद्धेषु शत्रु-हननार्थं परमा अविनश्वरा ज्या मौर्वी यस्य तथोक्तः। यद्वा परमान् बलेन प्रकृष्टान् शत्रून् जिनाति हिनस्तीति परमज्याः हे "ऋचीषम"(१)! स्तुतिभिरभिमुखीकरणीयेन्द्र! एतादृशस्त्वं सवनानि प्रातः सवनादीनि त्रीणि "ब्रह्माणि" स्तोत्राणि च "उपभूषत" अलङ्कुरुत।

"भूषतः"-"भूषतु"-इति पाठौ। "वृत्रहन्"-"वृत्रहः" इति च ॥ ७ ॥ ३७

---

* "ऋचीषमः"-इत्युत्तरार्चिक-व्याख्यायां सायणाचार्यैः।

---

३७ उत्तरार्चिकस्य ७,१,२,१=ऋग्वेदस्य ६,६,१३,१=जर्हे द०२—हा०२०।

ग्रहानि वा, ग्रौह्यानि वा, सुत्रानि वा, युत्रानि वा, पृष्ठानि वा, यौज्ञाग्रहानि वा, सोमसामानि वा इमानि त्रीणि।

(१)—ऋचीषम इति त्वि ऋच स्तुताविति धातोः रूपम्।

अथाष्टमी।

वसिष्ठऋषिः*।

१२ २२ ३ ०२ १ २ ३ २
तवेदिन्द्रावमंवसुत्वंपुष्यसिमध्यमम्।
३ १२ २२ ३ १ २ ३ १ २ ३ १२
सत्राविश्वस्यपरमस्यराजसिनकिष्टागोषु ृणवते ॥८॥३८

४ २ ५ १ २ १ २
I तवेदिन्द्रावमंवसु। त्वंपुष्यसिमध्यमम्। सात्रा-
३ ५ १ २ १ २ २ १ २ ३ ५
वा२३४इत्था। स्यापरमस्यराजसि। नकिष्टा२३४गो।
१० २ १ २ १ २२
षूवृणवा२३ताइ। हेवाइहोइ। हो। वात्हा३१उवा-
१ १ १ १
२३४५॥ १०॥ ३८

हे "इन्द्र"! "अवमम्" अधमं वसु सीमादिकं "वसु" धनं। यद्वा। भौमं वसु अवमं "तवेत्" तवैव। "त्वं" त्वमेव "मध्यमं"

---

* 'प्रगाथः इन्द्रमाह'-इति वि०।

---

३८ ऋग्वेदस्य ५,३,२०१=आरण्यके प्र०२०—२१—द्वि० ४—५।

I प्रजापतेः, निधनकामम्।

अथ नवमी।

मेधातिथिर्मेध्यातिथिश्च ऋषिः।

१२र ३ १ २ ३ २ ३ २ ३ १ २
कयेथक्वेदसिपुरुत्राचिद्धितेमनः।

१ २ ३ १ २ ३ १ २
अलर्षियुध्नखजक्रत्पुरन्दरप्रगायत्रागमिषुः ॥८॥३८

५र २ र १ १ १र
कयेथा। कुवेदसा२इ। औहो२। औहोइ।

२ ५ २ १र २ र १ १
औ३हो२३४वा। पुरुत्राचाइत्। हितेमना२ः। औहो-

१र २ ५ २ १ २र १
२। औहोइ। औ३हो२३४वा। अलर्षियू। ध्नाख-

१ १र २ ५
जक्रू२त्। औहो२। औहोइ। औ३हो२३४वा।

वसु रजतहिरण्यादिकम् आन्तरिक्षं वा "पृथसि"। "विश्वस्य" सर्वस्य परमस्योत्तमस्यापि रत्नादे र्दिव्यस्य वा वसुनो "राजसि" ईशिषे "सत्रा" सत्यमेव(१)। अपिच। "त्वा" त्वां "गोषु" निमित्तेषु "न किर्हिंसन्ति" केऽपि न वारयन्ति॥ ८॥ ३८

३८ ऋग्वेदस्य ५,७,११,२।

I इन्द्रस्य।

(१)—'सत्रा'-इति निघण्टौ सत्यनामसु ततोयं पदम् (३,१०)। 'सत्रा सर्वदा'-इति वि०।

२ १ २ २ १ १ २ १ २ २
पुरन्दरा। प्रगायाचाः। औहो२। औहोइ। औ-

१ १ १ १ ५ ३ २ १ ३ ५ २ २ १
३हो२३४वा। अगा३। सा२इषू२३४औहोवा। सुश्रु-

१ १ १ १
सा२३४५ः॥ ११॥

४ ५ ४ ४ १ २ २ १ २
II कुवाकुवा। यथा। कुवेदमाइ। ऊवाइ। औ३-

१ १ १ १ २ १ २ २ १ २
हो२३४५। पुरुत्राचाइत्। हितेमनाः। ऊवाइ। औ

१ १ १ १ २ १ २ २ १ २
३हो२३४५। अलर्षियू। ध्माखजकृत्। ऊवाइ। औ-

१ १ १ १ २ २ २ २ १ २
३हा२३४५। पुरन्दरा। प्रगायाचाः। ऊवाइ। औ-

१ १ १ १ ३ २ १ ३ ५ २ २ २
३हो२३४५। अगा३। सा२इषू२३४औहोवा। सुश्रु-

१ १ १ १ १
३श्रुसा२३४५ः॥ १२॥

२ २ १ ५ ५ २ १
III क्व यथकू३वाइदा२३४मो। पुरुत्राचित्। हिता-

II,III वसिष्ठस्य वा ; प्रियाणि चीणि।

अथ दशमी।

कलिर्ऋषिः।

३१२ ३१र २र ३२३१२
वयमेनमिदाह्योपीपेमेन्द्रवज्रिणम्।

२ १ २ १ २ २
इमा२३नाः। आलर्षि। युध्माखजकृ३त्। इाउवा।

१ २ र१ १ १ ३
पुरन्दा२३रा। प्रगायाचा२ः। अगा२३। सा२दुषू२-

५र र ३१११११
३४औहोवा। सु२३४५॥ १३॥ ३९

हे "इन्द्र"! "क्व" कुत्र देशे "इयथ" गतवानसि पुरा? "क्वेत्" कुत्र वा "असि" भवसि इदानीं वर्त्तसे? "पुरुत्वाचिद्धि" बहुषु हि "ते" त्वदीयं "मनः" सञ्चरति। हे "युध्मक्रत्" युद्ध-कुशल!। "खजक्रत्" युद्धस्य कर्त्तः(१) हे "पुरन्दर" असुराणां पुरां दारयितर्हे इन्द्र! "अलर्षि" आगच्छ(२)। "गायत्राः"(३) गान-कुशला अस्मदीयाः स्तातारः "प्रगासिषुः" प्रगायन्ति स्तुवन्ति। (अलर्षीत्येतत् दाधर्त्यादौ(४)निपात्यते॥ ९॥ ३९

(१)—'खजे'-इति निघण्टौ सङ्ग्रामनामसु कलचत्वारिंशत् पदम् (२,१७)।

(२)—'अलर्षति'-इति निघण्टौ गति-कर्मसु दृश्यते (२,१४)।

(३)—'मन्त्राः'-इति वि०।

(४)—दाधर्त्ति दर्धर्त्ति दर्धर्षि बोभूतु नेतिक्लेऽलर्षा ऽऽपनीफणात् संसनिष्यदत् करिक्रत् कनिक्रदत् भरिष्वत् दविध्वतो दविद्युता तरित्नतः सरीसृपतं वरीवृजन् मन्त्रश्यागनीगन्तीति च (पा० ७।४।६५॥

१ २ ३ १र २र ३२ ३ २ ३ १ १ ३ २
तस्माउअद्यसवनेसुत*भरानूनंभूषतश्रुते ॥ १० ॥ ४०

॥ इति तृतीय-दशतिः ॥ ३ ॥

५ र १ ३ ५ र र ३
I वयमेनाम्। आ२इदा२३४ओहोवा। हो२३४
५ १ र २ र र १ १ १
याः। अपोपेमेहवज्रिणम्। तास्मा२उवा२। द्यासव-
७ र १ र ३ १ ३ र १
नाइ। सूतस्मारा२। आनूना२३भू। षातश्रुते। इ-
२ १
डा२३भा३४३। ओ२३४५इ। डा ॥ १४ ॥

५ र १ १ २ १ र ३ र
II वयमेनाम्। इदा२३हायाः। अपोहोइ। पे-
१ र ३ २ र १ २ र ? २ र १
मोहोइ। इ। हावज्रिणाम्। तस्माउवा। द्यासव-

"वयं" यजमानाः "एनं" वज्रिणं वज्रं युक्तमिन्द्रं "इदा" इदानीं। "ह्यः" श्वः अतीतेऽह्नि। "इह" यद्वाहर्गणे "अपोपेम"

---

* "ममनासुतम्"-इति ऋग्वेदीयः पाठः।

४० उत्तरार्चिकस्य ८,२,१३,१=ऋग्वेदस्य ४,४८(३१), २=जहे षो० हि० ५।

I,II इन्द्रस्य, वसिष्ठस्य वा वैरूपे।

२ २ १ २ २ १२ २ १ २ २ १ २
नाइ। सूतम्भरा। आनौचो। नम्रौचो। षातम्रता-

२ ५
३१उवा२३। ऊ३४पा॥ १५॥

४ ३ ४ २ ५ २ ३ २ १ ५ ४ ५
III वयमेनमिदा। हिय। ओ२३४वा। इयाहाइ।

२१ १ २ २ २ ० १ २
ऊवेचो२इ। अपीपेमेहावजिणा२म्। तस्माउअद्य-

७ ६ २ २ १ २ ५
सवनाइ। सूतम्भारा२। ईइया। आनूना२३४भू।

२१ २ १ १ १ १ १
षताअ्रू२३४५ता६५६इ। अवाइसा२३४५इ॥ १६॥ ४०

आप्यायाम(१) सोमेन। "तस्माउ" तस्मादेव "अद्य" अत्र "सवने" "सुतम्" अभिषुतं सोमं "भर" हर हे अध्वर्यो!। "नूनम्" इदानीं "श्रुते"(२) सति "आभूषत" अलङ्कुरुत॥ १०॥ ४०

इति श्रीमायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे ऐन्दोत्याख्याने तृतीयाध्यायस्य चतुर्थः खण्डः॥ ४॥

III इदश्चेन्द्रस्य वसिष्ठस्य वा वैरूपम्।

(१)—आयी श्री आयो इडा वित्यस्य रूपम्।

(२)—'श्रुते सप्तम्येकवचनमिदं चतुर्थ्येकवचनस्य स्थाने दृष्टव्यं, श्रुताय विख्यातायेत्यर्थः'-इति वि०।

अथ पञ्चमे खण्डे—

सैषा प्रथमा ।

पुरुहन्मा ऋषिः* ।

१२ २२ ३१३ १ १ २ १ १ २
योराजाचर्षणीनांयातारथेभिरध्रिगुः ।

१ १ ३१२ २२ ३ २ १ १ २ ३ २ ३ २
विश्वासान्तरुतापृतनानांज्येष्ठंयोवृत्रहागृणे ॥ १ ॥ ४१

२५ २ ४ ४ ५ १ २ ०२ १ २
I योराजा३चर्षणाइनाम् । यातारथे । भिराध्रा-

१ १ १ २ १ २
१इगू२ः । ध्राइगू२ः । वाइश्वासा३म् । तरुता३ ।

१ २ १ २ ३ ५ १ ५ २ १
तरुता३ । पार्त्नीना२३४नाम् । ज्याइन्द्रयोवा । त्रा-

२ ३ ५ ४ ४
त्रागा२३४र्णाइ । त्रत्रापूगृणाइ । त्रोपुइ । डा ॥ १७ ॥

* 'पुरुहन्मन आर्षम्'-इति वि० ।

† "ज्येष्ठो"-इति ऋग्वेदीयः पाठः ।

४१ उत्तरार्चिकस्य ३,१,१५,१ = ऋग्वेदस्य ६,५,८,१ = जै० हि० हि० १४—स० हि० ७—प्रा० हि० १३ ।

I पौरुहन्मनम् ।

अथ द्वितीया।

भर्गऋषिः।

१ २ ३ १ २ ३ १ २ ७ १ २
यतइन्द्रभयामहेततोनोअभयंकृधि।

१ २ २ ४ २ ५ ३ २ ५ १ २ २ २ १
II योराजाच। षणा३२३४इनाम्। यातारथेभिर-

२ १ २ २ २ २ २ १
ध्रा२३इगुः। विश्वासान्तरुतापृतनाऽ२३नाम्। ज्या२३इ-

१ १ २ १ २ १ ५ ४ ५
ष्ठाम्। योवृत्रहोवाऽओ२३४वा। गापूणाँ६ऽहाइ॥१८॥४१

"विश्वासां" सर्वासां "पृतनानां" सेनानां "तरुता"(१) तारकः। यश्च ज्येष्ठः गुणैर्गरीयान्। "यः" च "वृत्रहा" वृत्रं हतवान्। तं "ज्येष्ठं" सर्वैः रतिशयेन प्रशस्यम् अधिकं वृद्धं वा महाभागमिन्द्रं "गृणे" स्तौमि॥ १॥ ४१

II प्राकर्षम्।

(१) – "वसित-क्षुमित-क्षमित्रीणमित-चित-विकसाविशसृ यक्षृ-शासृ-तरुत-तरुत वरुतृ-वरुतृ-वरुतयो-रुजलिति-चरिति-वमित्यमिति च (पा०७।२।१४)"-इति सिद्धम्।

१२ ३२उ ३१९३२३ २उ ३ १र २र
मघवञ्छ्रुधितवतंनऊतयं*विद्विषोविम्रधोजहि ॥२॥४२

५ २ ५ ५४र ५ १र र २
I यतआइन्द्राभयामहाइ। ततोनोअभयङ्कार३इधी।

१ २१र २ १ २ १
मघवंछ्रुधितवतन्नऊताऽ३याइ। विद्वाइषोऽ३वो। मा

र २ १ २ १
द्वोजहि। इडाऽ३भाऽ४३। ओऽ३४५इ। डा ॥१८॥४२

हे "इन्द्र"! "यतः" हिंसकात् "भयामहे" वयं "ततः" "नः" अस्मभ्यम् "अभय" "क्रुधि" कुरु। हे "मघवन्"! "श्रुधि"(१) श्रोता भवसि "नः" अस्मभ्यमभयं कर्त्तुं। "तव" "ऊतये" रक्षणाय "विजहि" "द्विषः" अस्मद्द्वेष्टॄन्। "मृधः" अस्मद्धिंसकान्(२) "वि" जहि(३) ॥ २ ॥ ४२

---

* "ऊतिभिः"-इति ऋग्वेदीयः पाठः। उत्तरार्चिकभाष्ये सायण-सम्मतश्च।

---

४२ उत्तरार्चिकस्य ५,२,१५,१ = ऋग्वेदस्य ६,१,२४,४ = जहे प० हि०१०।

I इन्द्रस्य; अभयङ्करम्।

(१)—'श्रुधि याचामहे तव स्वभूत तत अभयम्'-इति वि०। 'श्रुधि'-इति निघण्टौ याच्ञाकर्मसु पञ्चमं पदम् (३.१९)।

(२)—मृध इति सङ्ग्राम-नाम (नि०२.१७,२)। मृधं करोति, "तत करोति"-इति णिच्, मृधयति-णाल्लात् क्विपि रूपं साध्यम्।

(३)—वोत्यपसर्जनत्वं तर्ङ्हौत्याख्यातात्।

अथ तृतीया।

इरिमिठऋषिः*।

१ २ ३ १र २र ३ १ २
वास्तोष्पते ध्रुवास्थूणाꣳसत्रꣳसोम्यानाम्।

३ २ ३ २३ १र २र ३ २ ३ १ २ ३ १ २
द्रप्सःपुरांभेत्ताशश्वतीनामिन्द्रोमुनीनाꣳसखा॥ ३॥४३

५ र र २ १ २ ३ ५ १
I वास्तोष्पताइ। ध्रुवा। स्थूणाओ२३४वा। अꣳ-

२ र १र ऽर १ र र र २
सत्रꣳसोम्यानाꣳम्। द्रप्सः पुराम्भेत्ताशश्वता२३इनाम्।

३ ५ १र ऽर
आ२३४इन्द्राः। मुनी२। ना३१उवा२३। सा२३४

५
खा॥ ३०॥

३र ४र ५ र र १र २ १ ५ र
II वास्तोष्पतेध्रुवा। स्थुणा३। आ२३४। सत्रꣳसो।

---

* "इरिमिरि"-इति वि०-पाठः।

† "भेत्तापुरां"-इति व्यतिक्रमेण पाठः ऋग्वेदीयः।

---

४३ ऋग्वेदस्य ६,१,२४,३।

I,II कावषे इे।

४र ५ २ १ र र र २ १
स्थानाम्। द्रप्सःपुराम्भेत्ताशश्वताऽइनाम्। आऽइ-

२ १ऽर १ ५ ३ ४
न्द्राः। मुनीऽ। नोऽ३४वा। साऽ३४खा॥ २१॥ ४३

हे "वास्तोष्पते"(१) गृहपते! "स्थूणा" गृहाधारभूतस्तम्भः "ध्रुवा"(२) स्थिरा भवतु। "सोम्यानां" सोमार्हाणां सोम-सम्पादिनां वास्माकम् "अंसत्रम्"(३) अंसत्राणं अंसोपलक्षितस्य छत्रस्य शरीरस्य त्रायकं बलं भवतु। अपिच। "द्रप्सः" द्रवण-शीलः सोमः तद्वान् [अर्शआदित्वादच् प्रत्ययः(४)] "शश्वतीनां"(५) बह्वीनां "पुराम्" असुर-पुराणां "भेत्ता" विदारयिता एवम्भूतः "इन्द्रः" "मुनीनाम्" ऋषीणामस्माकं "सखा" मित्रभूतो भवतु॥ ३॥ ४३

---

(१)—'वास्तोष्पतिर्वास्तु वंसते नितामकर्मणामस्य पाता वा पालयिता वा'-इति नि०दै०१०,१६।

(२)—'ध्रुवा स्थूणा' स्तम्भोपमानत्वं दृढत्वम्। ध्रुवा स्थूणा इव यथा गृहस्य ध्रुवा स्थूणा आश्रयभूता तद्वत् त्वमाश्रयभूत इत्यर्थः'-इति वि०।

(३)—'अंसत्रम्' एतदपि स्तम्भोपमम्। अंसवदिव अंसत्रं धनुः कवचं वा। यथा शत्रूणां जेतृ पालयितृ वा तद्वत् त्वं जेता पालयिता चेत्यर्थः'-इति वि०।

(४)—"अर्शआदिभ्य अच् (५,२,१२७)'-इति पा०।

(५)—'शश्वत्'-इति निघण्टौ बहुनामसु पठितम् पदम् (३,१)।

अथ चतुर्थी।

जमदग्निर्ऋषिः।

३ १ २ ३ १२ ३१ २
बण्महाꣳअसिसूर्यबडादित्यमहाꣳअसि।

३१२३१ २३१२ २३१ २३१ २
मह्स्तेसतोमहिमापनिष्टममङ्गा*देवमहाꣳअसि॥४॥४४

५ २ ४ ५२ १२ २ १ २
I बण्महाꣳ३असिसूर्या। बाडादित्य। महाꣳआ-

३४२ ३२४ ३२४५ २ २
१सा२३४इ। मह्स्तेसतोमहिमापनि। ष्टाऽमा। म-

१ २ २१ ५ ४ ५
ङ्गादा२३इवाऽ। मह्हो२३४वा। आपूसोऽह्वाइ॥२२॥४४

(अत्र शौनकः—"बण्महामिति दृष्ट्वार्कमुपतिष्टेत्तौ जपन्। वदन्नप्यनृतां वाणीन्नानृतेन स लिप्यते"-इति) हे "सूर्य"! (१)प्रेर-

* "अङ्गा"-इति च ऋग्वेदीयः पाठः।

४४ उत्तरार्चिकस्य ८,१,८,१ = ऋग्वेदस्य ६,७,८,१ = आरण्यके द्वि०१२ = ऊहे एका० ५ — त्रयो० ६ = ऊह्ये द्वि०१४।

I सूर्य्यसाम।

(१)—"सूर्यः सर्त्ता वा सुवते वा स्वीर्यते वा"-इति नि०दै०१२,१४। 'सुष्ठु ईरयिता नाम्नयिता प्रजूनां सूर्यः'-इति वि०।

अथ पञ्चमी।

देवातिथिर्ऋषिः।

३ २ ३ १ २ ३,२उ ४ १ २ ३१ २
अश्वीरथीसुरूपइद्गोमा॰*यदिन्द्रतेसखा।

३ २ ३ १ २ ३ १ २ ३ १ २ ३१ २ २
श्वात्रभाजावयसामचतेसदाचन्द्र+र्यातिसभामुप ॥५॥ ४५

केन्द्र! त्वं "महान्" तेजसाधिको "असि"। "बट्" सत्यं(१)। नै तन्मिथ्येत्यर्थः। हे "आदित्य" अदितेः पुत्र! (२)त्वं "महान्" बले नाप्यधिकः "असि" "वट्" सत्यमेव। "महो" महतः "मतो" भवतः "ते" तव "महिमा" महत्वं "पनिष्टम" पनस्यते(३) स्तोतृभिः स्तूयते। हे "देव" द्योतनादि-गुण युक्त! सूर्य! त्वं "मज्मा" महत्वेन वीर्येणाप्यधिको "असि" भवसि न संशयइत्यर्थः।

"पनिष्टम"-"पनस्यते"-इति पाठो ॥ ४ ॥ ४४

*"गोमा॰इदिन्द्र"-इति, +"चन्द्रो" इति च ऋग्वेदीयः पाठः।

४५ ऋग्वेदस्य ५,७,३१,४।

(१) 'वट्'-इति सत्यनाम प्रथमं पदम् नै०३,१०।

(२) 'आदित्यः कस्मादादत्तरसानादत्ते भासं ज्योतिषा सादीप्तो भासनादिति वादितेः पुत्र इति वा। अन्य-प्रयोगं तस्यैतदर्चाभ्याख्यायं मन्त्रभाक् सूर्यमादित्यमदितेः पुत्रम। एव सत्यामपि देवतानामादित्यवादाः स्तुतयो भवन्ति तद् यथा"-इत्यादि वि०।

(३)-'पनस्यति'-इति वि०. पणते पनते वा तत्कर्मार्चति कर्मण द्वाविंशतितमं पदम्।

I अश्वीअश्वी। रथीसूरूपा१ईं२त्। गोमाण्यदिं।
द्रान्ते१साखा२। श्वात्रा२भाजा२। वयसासचतेसा२३-
दा। चन्द्राइर्या३तीं३। सा२३भा३म्। ऊ३४५पो६-
ह्वाइ॥ २३॥

II अश्वीरथीसुरूपा६ईं२त्। गोमाण्यदिन्द्रतेसखाउ-
वा२३ह्वोवा२३ह्वा२ईया। श्वात्राभाजावयसासचतेसदा-
उवा२३ह्वोवा२३ह्वा२ईया। चन्द्राइर्या१तीं२। साभा-
मुप। इडा२३भा३४३। ओ२३४५इ। डा॥ २४॥ ४५

हे "इन्द्र"! "ते" तव "सखा" मित्रभूतः पुरुषः अश्वादि-गुण-विशिष्टएव भवति (इच्छब्दः प्रत्येक मभिसम्बध्यते) "अश्वी-इत्" बहुभिरश्वैरुपेतएव भवति न कदाचिदश्वैर्वियुज्यते। "रथी" रथवान् भवति। "सुरूपः" शोभन-रूपः शोभनावयवएव स

I,II वैश्वदेवे, आनूपे, वाध्र्यश्वे वा इमे द्वे।

अथ षष्ठी ।

पुरुहन्मा ऋषिः ।

१२ २२ ३२ ३१२ २२३२
यद्यावद्इन्द्रतेशतꣳशतंभमीरुतस्यूः ।

भवति । "गोमानित्" बह्वीभिर्गोभिर्युक्तएव स भवति न कदाचिदेतैर्वियुज्यतइत्यर्थः । अपिच "श्वात्रभाजा" (श्वात्रमिति धननाम(१) शु(२) आत्रम् अतनोयं शीघ्रं प्राप्तव्यं शोभनं धनं सम्भजता ईदृग्धन संयुक्तेन "वयसा" (अन्ननामैतत्(३)। अन्नेन सदा सर्वदा "सचते" समवेति सङ्गच्छते । अतएव "चन्द्रैः" सर्वेषामाह्लादकैः(४) स्तोत्रै र्युक्तः सन् "सभां" जन-संसदम् "उपयाति" उपगच्छति ॥ ५ ॥ ४५

---

(१)—श्वात्रमिति निघण्टौ धन-नामसु षष्ठं पदम् (२,१०)। 'श्वात्रमिति'-इति गति कर्मसु च पठ्यते (२,१४)। 'श्वात्रमिति क्षिप्रनाम। क्षिप्रं यत् सम्भजते तत् श्वात्रभाक्, तेन श्वात्रभाजा, क्षिप्रं सम्भजतेत्यर्थः-इति वि०। एतच्च वयसेत्यस्य विशेषणम्।

(२)—'शु'-इति क्षिप्रनामसु पञ्चदशम् (नि०२,१५)।

(३)—निघण्टौ अन्ननामसु 'वयः', 'सुतः', 'सुतम्'-इति पदत्रयं पाठभेदेन सप्तमम् पदम् (२,७)।

(४)—'चन्द्रश्चन्दतेः काम्यिकर्मणश्चन्दनमित्यस्य भवति। चारुरमति, चिरं रमति, चमेवा पूर्वम्। चारुरत्वेविपरीतस्य'-इति (नै० दै०११,५)।

१ २ ३ २ ३ १ २ १ २ ३ २ ३ १ २ ३ १ २
नत्वावज्रि॑न्त्स॒हस्र॑ꣳसू॒र्याअनु॒नजातमष्टरोद॒सी ॥ ६॥४६

२ १र ४ ५र २ १ र २ १
I यद्यावा२३इन्द्रतेश॒तम्। शतंभूमीरुत॒स्यूः२। न-
र र र १ १ २ १
त्वावज्रि॑न्त्स॒हस्र॑ꣳसू॒र्याअनू॒२। नाजा॒२तामा२३। ष्टरो-
५ । ४ ५
२३४वा। दा५सो६ह्वाइ॥ २५॥ ४६

हे "इन्द्र"! "ते" तव प्रतिमानार्थं "यद्" यदि "द्यावः" द्युलोकाः "शतं" शत-सङ्ख्याकाः स्युः तथापि नाश्नुवन्ति(१)। "उत" अपिच "भूमी" भूम्यः तव मूर्त्ति-प्रतिबिम्बाय शतं स्युः तथापि नाश्नुवन्ति। हे "वज्रिन्"! "त्वा" त्वां "सहस्रम्" अगणिता अपि सूर्याः नानुभवन्ति न प्रकाशयन्तीत्यर्थः (न तत्र सूर्यो भातीति श्रुतेः) किं बहुना "जातम्" पूर्वमुत्पन्नं किञ्चिदपि "न अष्ट"(२) नाश्नुते। तथा "रोदसी" द्यावापृथिव्यौ" नाश्नुवाते त्वां सर्वेभ्योऽतिरिच्यतइत्यर्थः ("ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवोज्यायानेभ्योलोकेभ्यः"-इति श्रुतेः ॥ ६ ॥ ४६

---

४६ उत्तरार्चिकस्य २,२,११,१ = ऋग्वेदस्य ६,५,८,५—आरण्यके प्र०,१—२—३—६—५—६—७—८=जहे हावि० १८=प्र०७—प०१८—प०हि०१—१८।

I वैरूपम्।

(१)—अनुपदमेव व्याख्यास्यमानाष्टेति पदं नेति पदस्य मनस्यानीयोच्यते नाश्नुवन्नीति।

(२)—'आष्ट', 'अष्ट', 'आष्टः', 'आष्टः'-इति पदचतुष्टयमेव निघण्टौ व्याप्तिकर्मसु पञ्चममिति पाठभेदेन पठ्यते (२,१८)। अतएव विवरणे 'नाष्ट' न व्याप्नुवन्नीत्युक्तम्।

अथ सप्तमी।

देवातिथिर्ऋषिः।

१ २ ३२३ ३ २ क २२ ३२३१२
यदिद्प्रागपागुदङ्न्यग्वाङ्ह्यसेनृभिः।

१२ ३१२ २२ ३२३१२ ३१०
सिमापुरूनृषूतोअस्यानवेसिप्रशर्ध ऊर्वशे ॥ ७ ॥ ४७

४५ ४२ १ २ २१२
I यदिद्प्रागपाक। उदाक। न्यग्वाङ्ह्यसनृभा२इः।

१ २ २ २२ २१० १ १
सिमापुरूनृषूतोअ। सियानवा२इ। आमो२प्राशा२।

१२ १ ५ ४ ५
धतोवाइअो२३४बा। वापुशो६ढाइ ॥ २६ ॥

५ २ २ ५ १ २२ २ १
II यदिद्प्रागपागुदा६गे। नायग्वाङ्ह। यसादृनृ-

हे "इन्द्र"! "यद्" यदि "प्राक्" प्राच्यां दिशि वर्त्तमानैः (सप्तम्यन्ताद्दिक्शब्दादिहितस्य अस्तातेरञ्लुगिति लुक्। यदि वा "अपाक्" प्रतीच्यां दिशि वर्त्तमानैः यदि वा "उदक्" उदीच्यां दिशि वर्त्तमानैः। यद्वा "न्यक्" नीच्यां दिशि अधस्ताद्वर्त्तमानैः (न्यधीचेति निः प्रकृति-स्वरत्वम्। उदात्त-स्वरितयोर्यणइति पर-

---

४७ उत्तरार्चिकस्य ५,१,१३,१ = ऋग्वेदस्य ५,७,३०,१ = जहे ४.२,१५।

I,II नैपातिथे हे।

अथाष्टमी।

वसिष्ठऋषिः।

१र २र ३ १र २र
कस्तमिन्द्रत्वावस*वामर्त्योदधर्षति।

२ २ ३र ५ १ ऽर र र २रर १
भीऽः। हा। ओहो२३४हा। सिमा२घुरून्घुतो।अ।
२ १ ४ २ ३र ५ १ २
सियानवे२३। हा। ओहो२३४हा। असाइप्राणा३।
२ ३र ५ १ ३ ५र र ३
हा। ओहो२३४हा। धा२तू२३४ओहोवा। वा२३
५
४शे॥ २७ ॥ ४७

स्यानुदात्तस्य स्वरितत्वम्। एवं भूतैः "नृभिः" स्तोतृभिस्त्वं "ह्रयसे" स्व-स्व-कार्यायाह्वयसे ("हसिम श्रेष्ठे हसिमइति वै श्रेष्ठमाचक्षत्-इति" वाजसनेयकम्)। यद्यप्येवं बाहुभिराह्वयसे तथापि "आनवे" अनु-नाम-राजा(१) तस्य पुत्रे राजर्षौ "पुरु" बहुलं "नृषूतः" नृभिस्तदीयैः स्तोतृभिः प्रेरितः "असि" भवसि। राज्ञो हित-करणे त्वां स्तोतारः प्रेरयन्तीत्यर्थः (षू प्रेरणे। अस्मात्कर्मणि निष्ठा। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वम्।) अपि हे "प्रगर्द!" प्रकर्षेण गर्दयितरभिभवितरिन्द्र! "तुर्वशे" एतत्संज्ञे च राजनि "नृषूतः" नृभिः प्रेरितो भवसि॥ ७ ॥ ३७

---

* "त्वावसु"-इति ऋग्वेदीयः पाठः।

---

(१)—'मनवः' इति मनुष्यनामसु उत्तरविंशं पदम् (निं० २,३)।

१ १र २र ३ १ २ ३ २ ३ १र २र
अद्वाहित *मघवान्पार्यं दिविवाजीवाजꣳसिषासति॥८॥१८

५ १ १र र
I कस्त्वमिन्द्रा। त्वा२वासा२उ। आमर्त्यादधर्षा-

२ र १ १ २ १र २
ताइ। अद्वाहाइते२। माघवन्पा। रियाइदा१इवी-

१र १र १ १ १ ५र र
२। वाजावाजा२म्। सिषा२३। सा२ता२३४औचो-

२ ५
वा। ऊ३२३४पा॥ २८ ॥

३ ४ ५ र ३ २ १ ५र
II कस्त्वमिन्द्रत्वा। वसा३ऊ। आ२३४। मर्त्यादध।

४ ५ २ र १ १ २ १र २
षताइ। अद्वाहाइते२। माघवन्पा। रियाइ। दाइवा-

---

* "अद्वाइत्ते"-इति च ऋग्वेदीयः पाठः ।

---

४८ उत्तरार्चिकस्य ८,२,९,१ = ऋग्वेदस्य ५,३,१९,४ = ऊहे१५,१८ !

I,II बृहतः कौसुदस्य सामनी द्वे ।

अथ नवमी।

भारद्वाज*ऋषिः।

१ २ ३२ ३१२ २२ ३१२
इन्द्राग्नीअपादियंपूर्व्वागात्पद्वतीभ्यः।

७१२ २२ ३२३ १२३१२१ २३१ २
हित्वाशिरोजिह्मयाररपच्चरत्रिꣳशत्पदान्यक्रमीत् ॥९॥४९

३ ५ ३ ५ ३२२२ १ १
ओ२३४वा। ऊ२३४पा। वाजीवाजा२म्। सिषा२३।

१ ३ ४२२ ३ ५
सा२ता२३४औहोवा। ऊ२३४पा॥ ॥ २९ ॥ ४८

हे "वसो" वासक! व्यापक! वा हे "इन्द्र"! तं प्रसिद्धं "त्वा" त्वां "कः" मर्त्यः "आदधर्षति आधर्षयेत्(१)। हे "मघवन्" "ते" त्वदर्थं यः "अद्रा" अद्रया युक्तः सन् "वाजी" हविष्मान् यजमानो भवेत्। "पार्ये दिवि" सौत्येऽहनि सः "वाजं"(२) हविर्लक्षणमन्नं "सिषासति" दातुमिच्छति(३) ॥ ८ ॥ ४८

* "भरद्वाज"-इति वि०-पाठः।

४९ ऋग्वेदस्य ४,८,२६,१।

(१)—"कः तं यजमानं हे इन्द्र! त्वावसो! त्वमेव वसु धनं यस्य स त्वावसुः, तद्धन मित्यर्थः। आदृत्यं दधर्षत्याख्यातेन सम्बन्धयितव्यः। मर्त्यः मनुष्यः अत्र कश्चित्यर्थः। आदधर्षति, अभिभवति। न कश्चित् तमभिभवतीत्यर्थः"-इति वि०।

(२)—'वाजः'-इति अन्ननामसु द्वितीयम् पदम् (नि० २,७)।

(३)—'वाजं अन्नं सोमयागं करोतीत्यर्थः'-इति वि०।

५ २ २ २ ५ १२ १ २
इन्द्राग्नी अपादियाꣳमे। पूर्वागा२त्। पदताइभा-
१२ ३ १ २ २ ७
१या२:। हित्वाशिरो२जिह्वयारा। रापच्चारा२त्।
१ २ १ १ ७ ५ २ ३
त्रिꣳशत्पदा। निया२३। क्रा२मा२३४औह्वोवा। ऊ२-
५
३४पा॥ ३०॥ ४८

हे "इन्द्राग्नी"(१)" "अपात्" पाद-रहिता "इयम्" उषाः(२) "पदतिभ्यः" पाद-युक्ताभ्यः" "सुपाङ्भ्यः" प्रजाभ्यः "पूर्वा" प्रथम-भाविनी सती "आगात्" आगच्छति। तथा प्राणिनां "शिरो" "हित्वा"(३) त्यक्त्वा स्वय मशिरस्कापि "जिह्वया" प्राणिस्थया तदी-येन वागिन्द्रियेण(४) "रारपत्" भृशं शब्दं कुर्व्वती(५) "चरत्" एवं चरन्ती(६) उषाः त्रिंशत्पदानि" अवयव-भूतान् त्रिंशन्मुख-

१ वाचःनाम।

१ इन्द्रो वायुः स च ततसदृचरिनो वैद्युताग्नेय इन्द्राग्नी, तथाहि 'वायुर्वेन्द्रो-वालन्दित्यमानः (नै० दै० १.५)" इति "अथैतानैन्द्रमक्तो न " " * अथास्य कर्म * * * अथास्य मन्त्रविका दवाः अग्निः सोमो वरुणः (नै० दै० १, १०) इत्यादि च।

(२) "उषाः कस्मादुच्छतीति सत्यावावं रपरः कान्तः (नै० नै० २,१८)" इति।

(३)—'शिरः आदित्यं विना, आदित्यादपि पूर्व्वमुदेतव्यमः' इति वि०।

(४—'जिह्वेति वाङ्नाम (नि० १, ११) तया, जिह्वया वाचेत्यर्थः' इति वि०।

(५)—'यदयं उषसः उदयवेलायां पक्षिणः शब्दं कुर्वन्ति तदुपन्यस्यते' इति वि०।

६ 'चरत्, इदमपि लोकिक प्रति उदयम्, चरनो आदित्योदय प्रति गच्छ-तीत्यर्थः' इति वि०।

अथ दशमी।

बालखिल्या ऋषयः*।

२३।२३१२ ३१२ ३१२
इन्द्रनेदीयएदिहिमितमेधाभिरूतिभिः।

४ ५ ४२५२ ४२५ ४ ५ ४५२ २ २१२
I इन्द्रनेदीयएदि। हाइ। मितमे। धा। भिरूतिभिः। आशन्ता२३मा। शन्तमाभिरभिष्टिभिः। आखा

२ १ २ ४ २ ३
२३पे। खाओ३हो३। पिभिरो२३४५इ। डा॥ ३१॥

र्त्तान् "न्यक्रमोत्" एकेन दिवसेनातिक्रामति (एतच्च युवयोः कर्मेति स्तुतिः),

"हित्वा शिरो", "हित्वा शिरः" इति पाठौ। "रारप्त्", "वावदद्"-इति च॥ ९॥ ४९

हे "इन्द्र।" "नेदीयः" "अन्तिकतममस्माकं यज्ञस्थानं "एदिहि" आगच्छैव। काभिः साकमिति? उच्यते। "मितमेधाभिः" परिमित-प्रज्ञाभिः(१) "ऊतिभिः" रक्षाभिः। यद्वा। निर्मित-यज्ञाभिर्मरुद्भिः सह। हे "शन्तम" सुखतम! "शन्तमाभिः"

* 'मेधातिथेरार्षम्'—इति वि०।

I, II वाम्रे, आग्नेये वा इमे द्वे।

(१ "मतः प्रज्ञानो मेधो यज्ञो यासु क्रतिषु ताः मितमेधाः, ताभिः यज्ञसहितैः पालनैर्निर्मितमतैः, यज्ञान् पालनानि च अस्माकं मन्यादयितुमित्यर्थः—इति वि०।

१ २ ३१ २ ३१ २३ १ २ ३ १ २

आशन्तमशन्तमाभिरभिष्टिभिरास्वापेस्वापिभिः ॥ १० ॥५०

॥ इति चतुर्थं दशति ॥

॥ इन्द्रनेदीयण्दि। हाइ। मितमे। धा। भिरूति

भाइः। आशन्तमशन्तमा २भाइः। आभिष्टिभिः। आ-

स्वा २पाइस्वा२३। हा३। पिभिरो२३४५इ। डा ॥ ३२ ॥५०

सुखतमाभिः "अभिष्टिभि." प्राप्तिभिः अभिमताभिर्वा(१) आग-

च्छेति शेषः (उपसर्गश्रुते र्योग्य-क्रियाध्याहार.) तथा हे "स्वापे"!

अस्माकं बन्धु-भूत-सुखस्य आपयितर्वा। "स्वापिभिः" बन्धुभूताभिः

सुखस्य प्रापयित्रिभिः "अभिष्टिभिः" आगच्छेति शेषः ॥ १० ॥ ५०

इति सायणाचार्य्य विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोआख्याने

तृतीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

---

५० ऋग्वेदस्य. ६,४,२३,१।

(१)— आभिमुख्येन दत्तस्य यासु दत्तात्माऽभिदृश्यः दृश्य इत्यर्थः, ताभिश्च निमि त्तभूताभि. तासु सम्यादयितु मित्यर्थः इति वि०

अथ षष्ठे खण्डे—

मैत्रा प्रथमा।

नृमेधऋषिः।

३२ ३१ २३ १२ ३२३१२
दूतऊतीवोऽअजरं प्रहेतारमप्रहितम्।

३ १२ २२३ १ २ ३१२३१२ ३ १२
आग्नुज्जेतारꣳहेतारꣳरथीतममतूर्त्तन्तुग्रियावृधम्*॥१॥१५

५ २ २ १२ २ ६ २ २ २
I दूतऊती। वोऽओजाऽराम्। औऽहोऽवा। प्रहे-

२ १ २ २ ६ २ २ २ २ २
तारमप्राचीऽताम्। औऽहोऽवा। आग्नुज्जेताराऽꣳ-

१ २ २ ६ २ २ १ २ ५
हाइनाऽराम्। औऽहोऽवा। रथाइतममतूर्त्ताऽ२३४न्तू।

३ २ १ २ ५ २ २ २
ग्रियाऽ। वाऽर्द्धाऽ२३४औऽहोवा। स्तुषे१॥ ३३॥

५ २ २ २ ५ २ २।२
II दूतऊतीवोऽअजाऽराम्। प्रहेतारमप्रहितमुहूवाऽ३-

* 'तुग्रावृधम्'-इति ऋ० पाठः।

५१ ऋग्वेदस्य ६,७,३,७।

I,II गौरीवीतेः प्रहितौ द्वौ। वासुक्रे वा इमे द्वे।

अथ द्वितीया।

वसिष्ठऋषिः।

१२ ९२ ३ १ २ ३ २३ ३ १२ २२
मोषुत्वावाघतश्चनारेअस्मन्निरीरमन्।

१ २ १ २ २ २ १ २२ १
हो३इ। आप्रुज्रेतार॰हाइतारमुहुवा२३हो। रथी। त-

३ २ ३ ५ ३ २ १ ३ ५२ २
मारम्। अतूर्त्ता२३४न्तू। ग्रिया३। वा२र्ह्या२३४औहो

२ १ १ १
वा। स्तौ३षा२३४५इ ॥ ३४ ॥ ५१

हे अस्मदीया जनाः! "वी" यूयम् "अजरं" जरा-रहितं "प्रहेतारं" शत्रूणां प्रेरकं "अप्रहितं" केनाप्यप्रेषितं "आशुं" वेगवन्तं "जेतारं" शत्रूणां। "हेतारं" गन्तारं। "रथीतमं" रथिनां श्रेष्ठं "अतूर्त्तं" केनाप्यहिंसितं। "तुग्र्याद्रुधं" उदकस्य(१) बर्धयितारमिन्द्रम् "जरी" जल्पे रक्षणाय "इतः" कुरुत पुरस्कृतेति यावत्॥ १॥ ५१

(१)—तुग्र्यादिति उदकनामसु एकादशनिगमेषु पठितम् (१.१२) षष्ठ्यर्थे प्रथमाविभक्तिरूपमयमस्मात्र प्रयोगमङ्गीकृतम्, सामवेदीयपाठे तु तुग्र्यिया इति छेदः।

३ १ २ ८ १ २ ३ १ २ ३ १ २ ३

आरात्ताद्वामधमादन्नआगह्योहवामन्नुपश्रुधि ॥ २ ॥५२

५ २ १ २ ५ २ १ २

। मोषुत्वावा। घाता२३४५। चा२३४ना। आरेअ-

१ २ १ २ १ २ १

स्मन्निरो२रमन्। आरा१त्ताद्वा२। साधमादा२म्। ना-

२ १ २ १ २ १ २

आगहि। आइहवामा२न्। ऊपश्रुधि। इडा२३भाइ-

१

४३। ओ२३४५इ। डा ॥ ३५ ॥

५ २ २ ५ २ १ २ २

II मोषुत्वावाघतश्चनाहं। आरेअस्मन्निरोरमा२न्।

१ १ २ १ २ २ २ २

हा२ऊऊवा२इ। ऊ। आरात्ताद्वासधमादा२म्। हा

हे इन्द्र! "त्वा" त्वां "वाघतश्चन" यजमाना(१) अपि "अस्मद्" अस्मत्तः "आरे" दूरे(२) "मो निरोरमत्" नितरां मा रमयन्तु।

---

५२ उत्तरार्चिकस्य ८,२,६,१ = ऋग्वेदस्य ५,३,१७,१ = जहे१५,१८।

I.II आत्रे हे।

(१) - वाघत इति मेधाविनामसु ऋक्षाम निघण्टुक्रमे ३।५

(२) आरे अदूरे इति नि ।

अथ द्वितीया

चमिठक्रीपि ।

३ १ २ ३ ४ ३ २ ३ १ ० ३ १ २
सुनोतसोमपावनेसोमसिन्द्रायवज्रिणे।

१ २ ३ १ २ २ ३ २ ३ ३ १ २ २ १ २ २
पचतापक्तीरवसे क्रुणुध्वमित् पृणन्नित् पृणते मयः ॥३॥५३

१ १ ३ ४ १
२ऊऊवा२इ। ऊ१२। नआगा२३४हो। आइह।

२ ३ ४ २ १ १
वामौवाओ२३४वा। उपशू२३धा३४३इ। ओ२३४५इ।

डा ॥ ३६ ॥ * ५२

अतस्त्वम् "आरात्ताद्वा" दूरेऽपि वर्त्तमानः "नः" अस्मदीयं "मधमादं" यज्ञम्(१) "आगहि" आगच्छ। "इह वा" यत्रापि वा "सन्" विद्यमानः "उपशृधि" अस्मदीयं स्तोत्रमुपशृणु ॥

"आरात्ताद्वा", "आरात्ताच्चित्" इति च पाठौ ॥ २ ॥ ५२

५३ ऋग्वेदस्य ५,३,१८,३ ।

(१.—'मद मादयन्ति यत्र देवताः स मधमादो यज्ञः तं प्रति'-इति वि०।

* इति ग्रामे गेये सप्तमः प्रपाठकः ॥

। ओं सुनोतसोमपावनाऽए। सोममिन्द्रा२३। चोवा
३च्हा। यवज्रा२३इणाइ। पचतापक्काइरवसेक्ता। णू। ध्वा
१मौ२३ङ्गाइ। पृ। णान्। आइत्पृ३च्हा। णताइमा-
२३या३४३ः। ओ२३४५इ। डा॥ १॥

॥ सुनोतसोमपा। आवनाओ२३४वा। इयाच्हाइ।
सोममिन्द्रा२। ऊवे२। ऊवे२च्हो। यावजिणा२इ।
पचतापक्काइरवसेक्ता। णू। ध्वा१मौ२३ङ्गाइ। पृ।
णान्। आइत्पृ३च्हा। णताइमा२३या३४३ः। ओ२३४५इ।
डा॥ २॥ ५३

हे मदीयाः पुरुषाः! "वज्रिणे" वज्रवते "सोमपाव्ने" सोमस्य पात्रे "इन्द्राय" "सोमं" "सुनोत" अभिषुणुत। "अवसे"-इन्द्र-

अथ चतुर्थी।

भरद्वाजऋषिः।

१ २ ३ १र २र ३ २ ३१ २ ३२
यः सत्राहाविचर्षणिरिन्द्रन्तꣳहमत्हेवयम्।

१ २ ३१२३१ २ ३ २
सहस्रमन्योतुविनृम्णसत्पतेभवासमत्मनोवृधे ॥ ४ ॥ ५४

३ ४र ६र ४५ २ ४र५ ४र ५
I यःसत्राहाविचर्षणिः। इन्द्रंताꣳहमत्हेवयाम्।

न्तर्पयितुं "पक्वोः" पक्वान्यान् पुरोडाशादीन् पचति। "क्रुणध्वमित्" इन्द्रप्रियकराणि कर्माणि च कुरुतैव। इन्द्रो हि "मयः" सुखं(१) "पृणन्वित्" यजमानाय प्रयच्छत्येव "पृणते" हवींषीति-शेषः ॥ ३ ॥ ५३

यः इन्द्रोह "सत्राहा" महतां शत्रूणां हन्ता। "विचर्षणीः" विशेषेण सर्वस्य द्रष्टा तमिन्द्रं वयं "हमहे" स्तुति-पदैं राध्नुयामः (उत्तरार्धः प्रत्यक्ष-कृतः(१) हे "सहस्रमन्योः" बहुविधं शत्रु-

५४ ऋग्वेदस्य ४,७,२७,३।

I वामदेव्यम्।

(१)—मयइति सुखनामसु 'सप्तमं नैघण्टुकम् ३,६।

(१)—"तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृताः आध्यात्मिकयश्च। तत्र परोक्ष-कृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य * * * अथ प्रत्यक्षकृता मध्यमपुरुषयोगात्त्वमिति चैतेन सर्वनाम्ना ** * अथापि प्रत्यक्षकृतास्तोतारो

ऋक् पञ्चमी।

पुरुच्छेप* ऋषिः।

१ २ ३ २ ३ १ २
शचीभिर्नः शचीवस्वदिवानक्तन्दिशस्यतम्।

१ २ १ २ ३ १ २ ३ १
दुन्द्र नः शुक्रमहे वा३३याम्। सहस्रमन्योतुविनृम्णसत्वा२३-

२ १ २ ३ १ २ ३ १ २
ताऽउ। भवासा२३मा। त्मूनोवृधे। दूडा२३भा३४३।

१
ओ२३४५३। डा॥ ३॥ ५४

नाशार्थं सहस्र-सङ्ख्याक-कोप-युक्त! यद्वा। मन्युः क्रतुः, सहस्र-सङ्ख्याकैः क्रतुभिः पूज्येन्द्र!। हे "तुविनृम्ण" बहु-धन(२)! "सत्पते" सतां पालयितरिन्द्र! "समसु" सङ्ग्रामेषु(३) "नः" अस्माकं "वृधे" वर्द्धनाय "भव"॥

"सहस्रमन्यो", "सहस्रमुष्क"-इति च पाठौ॥ ४॥ ५४

* 'पुरुच्छेप'-इति वि०पाठः।

भवन्ति परोक्षकृतानि स्तोतव्यानि * * * यथाध्यात्मिक्य उत्तमपुरुषयोगा यद्वन्मिति चैतेन सर्वनाम्ना"-इत्यादि नै० दै०१,१-३।

(२)—'तुविनृम्ण' बहुधन इति वि०-सम्मतोऽर्थः। तुवीति बहुनामसु द्वितीयं पदम् नि०३,१)।

(३)—'समसु'-इति सङ्ग्राममामसु द्वाविंशतितमम् पदम् (नि०२,१७)।

१ २ ३ १ २२ २ २ ३ २३ ३ २ २ २ १
मावा॒रातिरुपदसत्कदाचनास्मद्रातिःकदाचन ॥५॥ ५५

४ २ २ ४ १ २ २ १
I शचीभिर्नः॥५ शचीवसू। दिवानक्तन्दिशस्यताम्।

२ १ २ १२
मावा२म्। रातिरुपदसत्कदाचना। अस्मा२त्।

१ २ १ ५ ४ ५
रातिःकदो२३४वा। चापूनोर्हाइ ॥ ४ ॥ ५५

हे "शचीवसू" ! (शचीति कर्म-नाम(१) अस्मदनुष्ठितज्योतिष्टोमादि-कर्म-धनौ ! (२) युवां "शचीभिः" अस्मदीयैः कर्मभिर्यागादिभिर्निमित्तभूतैः "दिवानक्तम्" अहनि रात्रौ च "दिशस्यतं" विसृजतं अभिमतं दत्तमित्यर्थः(३)। अस्मद्दत्तं हविः सर्वदा भक्षयतं वा। "वां" युवयोः "रातिः" दानं "कदाचन" सर्वदा याग-कालेऽपि अ-याग-कालेऽपि "मोपदसत्" मोपक्षीणं भूत् (दसु उपक्षये। लुङि पुषादि-द्युतादीति च्लेरङ्) न केवलं युष्मदीयम्, अपितु "अस्मद्" अस्माकमपि "राति" दानं हविरादि-

---

५५ ऋग्वे दस्य २,२,३,५।

I अश्विनोः साम।

(१)—'शची' रति कर्मनामसु द्वाविंशतितमं पदम् (नि०२,१)।

(२)—'अश्विनौ' रति वि०।

(३)—'दाशनि' रति दानकर्मसु द्वितीयं पदम् (नि०३,२०)। तस्यैतद्रूपम् दिशस्यतमिति।

अथ षष्ठी।

वामदेवऋषिः।

३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
यदाकदाचमीढुषेस्तोताजरेतमर्य्यः।

१र २र ३ १ २ ३ २ ३ २ ३ २ ३ १ २
आदिद्वन्देतवरुणंविपागिराधर्त्तारंविव्रतानाम् ॥ ६ ॥ ५६

५ र १ ३ ५ र र ३ ५ २र
I यदाकदा। चा२मा२३४ओहोवा। ढू२३४षे। स्तो-

१र २र १ २ १ २ १ ७ ३
ताजरेतमर्त्तियाइः। आदिद्वंन्दे। तावरुणा२३४म्। वि-

२ ३ २ १ २र १ १ ३ ५ र र
पा३४गिरा। धार्त्तारांवी२३। व्रा२ता२३४ओहोवा।

३ १ १ ११
ना२३४५म् ॥ ५ ॥

प्रदानं सर्व-विषयं दानं वा, अर्थिभ्यः "कदाचन" सर्व्वावस्थायामपि "मोपदसत्" उपक्षीणं माभूत् सर्वदा वर्त्तताम्। अहमपि सर्वदा युष्मानुद्दिश्य दद्याम्। युवामपि मदभिमतं सर्वदादत्तमित्यर्थः।

"दिग्धस्यत", दग्धस्यतम्"-इति च पाठो ॥ ५ ॥ ५५

---

*"मोड्ढुषे"-इति ऋग्वेदीयोच्चारणम्।

I,II,III वसिष्ठस्य वासिष्ठस्यवा सफस्यवा, पाजस्यवा, पजस्यवा; पजानि त्रीणि।

II यदाकदाचमाहाउ। ढूषा२इस्तोता२। जराइ।
तमर्त्तियः। आदिद्वन्दा। औहोइहाइ। हाइइ। ता-
वा२रू२३४णाम्। विपागिरा। धर्त्तारंव्या। औहोइ-
हाइ। हाइ। व्रातानाम्। इडा२३भा३४३। ओ२३४५इ।
डा॥ ६॥

III यदा४क। दा४चमी। ढूषा३इ। स्तोता।
जराइ। तमार्त्तीया३ः। आदाइद्वन्दा३इ। तावा२रू-
२३४णाम्। विपा। गिरौवाओ२३४वा। धर्त्ता। रंव्यौ
वाओ२३४वा। व्रता५नाम्। हो५इ। डा॥ ७॥ ५६

"यदा कदा च" यस्मिन् काले "मीढुषे" सेक्त्रे हविःप्रदात्रे यजमानाय तस्य यागार्थं "मर्त्यो" मरणधर्मा "स्तोता" स्तुति

अथ सप्तमी।

मेध्यातिथि ऋषिः*।

३ १२ ७१ ३ २ ३ १ २
पाच्छिगाअन्धसोमदइन्द्रायमेध्यातिथे।

कर्त्तोद्गाता "जरेत" स्तूयात्। "आदित्" अनन्तरमेव तस्मिन्-काले इत्यर्थः। "वरुणं" पापस्य वारकं(१) "विव्रतानां" विविधानां कर्मणां(२) "धर्त्तारं" धारकं वरुण-नामानं देवं "विपा" विशेषेण रुचिकया "गिरा" स्तुत्या "वन्देत" स्तूयात्। यदा यजमानार्थं सुद्गाता स्तौति तदा वरुणमेव स्तौतीत्यर्थः। अथवा "मीढुषे" अभिमत-वर्षित्रे वरुणाय तत् प्रीतये "यदा कदा च" यस्मिन् कस्मिंश्चित् काले स्तुत्यर्हे "मर्त्यः" स्तोतोद्गाता "जरेत" स्तूयात्(३)। "आदिदनन्तरमेव" यजमानोऽपि उक्त-लक्षणं स्वयमपि "विपा गिरा" "वन्देत" नमस्कुर्यात् स्तूयाद्वा॥ ६॥ ५६

* 'वत्सइन्द्रमाह'-इति वि०।

(१) "वरुणः वृणोतीति मतः" इत्यादि नै० १०, १।
(२) "व्रतम् इति कर्म नामसु मन्त्रम पदम् (नि०२,१)।
(३) "जरते इति अर्चति कर्मसु मन्त्रम पदम् (नि०३,१४)।

१र २र३ २३ १ २१ २१।२ १।१ २।१।२
यःसम्मिश्लोहरियोर्यो हिरण्ययइन्द्रोवज्री हिरण्ययः ॥ ७ ॥५७

४र ५ र ४ २।१र २ १ र २ र
I पाहिगात्रा। धसोमा२३दाइ। आइन्द्रायमे।

१र २ १ २र १ २र १ ७
धियाता२३इथाइ। यःसम्मिश्लोहरियोर्यः। हाइरण्या-

१ २ २ २।१ ५ ४
या२ः। आइन्द्रोवा३ज्री३। हिरो२३४वा। ण्याप्यू-

५
योईहाइ ॥ ८ ॥

५र ४ ५ २र १र २ १ र
II पा। ह्मेपाहो। गात्रन्धसोमा२३दाइ। आइन्द्रा-

२र १र २ १ ३र १ र
यमे। धियाता२३इथाइ। यःसम्मिश्लो२हरियोर्यः।

इन्द्रायेति चतुर्थ्येकवचन मिदं सम्बुद्धेरेकवचनस्य स्थाने द्रष्टव्यम्। हे "इन्द्र"! "मेध्यातिथे"! मेधो यज्ञं तस्मिन् भवो मेध्यः मेध्यश्चासौ अतिथिश्चेति मेध्यातिथिः, तस्य सम्बोधनं हे मेध्यातिथे! यज्ञे भव अतिथि-भूत इन्द्र! "अन्धसः" सोतस्य

---

५७ ऋग्वेदस्य ६,३,७,४।

I,II सोभरे र्हे।

ऋषाष्टमी।

भर्गऋषिः।

३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २
उभयꣳशृण्वच्चनइन्द्रोअर्वागिदंवचः।

३ १ २ ३ २ ३ १ २ ३ १ २ २ ३ १ २
सचाच्यामघवांसोमपीतयेधियाशविष्ठआगमत्॥ ८॥ ५८

१ ७ १ २ २ २ १ ५
हाडूरण्याया२:। आइन्द्रोवा३ज्री३। हिरो२३४वा।

४ ५
ण्यापूयो६हाडू॥ ८॥ ५७

सोमस्य "मदे" सति त्वमस्मदीयाः "प्रजाः" "पाहि" रक्ष। "यः" इन्द्रः "हर्योः" अश्वयोः(१) "संमिश्लः" स्व-रथे संमिश्रयिता "इन्द्रो वज्री हिरण्ययः" हित-रमणीयः यस्य रथो हिरण्मयी हिरण्मयः।

"हर्यो र्यो हिरण्यय इन्द्रो वज्री हिरण्ययः"-इति छन्दोगाः। "हर्योर्यः सुते सचा वज्री रथो हिरण्ययः"-इति बह्वृचाः॥ ७॥ ५७

---

५८ उत्तरार्चिकस्य ५,१,१४,१ = ऋग्वेदस्य ६,४,३५(१८)१ = जैह ४,२,१६—१८,२,७।

(१)—'हरी रथस्य'-इति नि०१,१५,१।

५ ५ १ ३र १र
। उभयꣳशृणवच्चनाꣳए। आइन्द्रो२अर्वागिदंवचा

१ २ २ १र २र १ ३र १
२३ः। ह्वोवा३ह्वाइ। सत्राचियामघवान्२न्। सो। मा

२ २ ३ ५ २ १र १
पा३ह्वाइ। ता२३४याइ। धियाशविष्ठआ२३ह्वोइ।

२ १ ४ ५ ४
गमात्। आ२३ह्वोवा। म्होपुइ। डा॥ १०॥ ५८

"उभयं" स्तोत्रात्मकं शस्त्रात्मकं चोभय-विधम्(१) "इदं वचो" "अर्वाग्" अस्मदभिमुखं "इन्द्रः" "शृणवत्" शृणोतु। श्रुत्वा च "सत्राच्या" अस्माकं यज्ञं पूजयत्या(२) "धिया" युक्तः सन् "मघवान्" धनवानिन्द्रः "शविष्ठः" अतिशयेन बलवान् "सोमपीतये" सोम-पानाय "आगमत्" आगच्छत्॥

"मघवान्","मघवा" इति च पाठौ॥ ८॥ ५८

। इन्द्रस्य वैश्वदेवम्।

१. 'उभयं स्तुति प्रार्थनाख्यं इति वि०

२) 'सदागत्या इति वि

अथ नवमी।

अस्याः परस्याश्च मेधातिथि-मेध्यातिथी ऋषी*।

३ २ ३१ २ ६ १ २ ३ १ २
मह्देचनत्वाद्रि†वःपराशुल्कायदीयसे‡।

२ ३ १ २ ३१र २र ३ २ ३ १ २
नसहस्रायनायुतायवज्रिवोनशतायशतामघ॥ ९॥ ५९

५ र ४ ५ २ ३ ५ १ र र
I मह्देचनोवा। त्वाअद्रा२३४इवाः। परापशुल्का।

१ ० ४ ५ ३ २ १ र २ र १
याइदायासाइद्। नस। हस्राइ। यानायुता। यवा-

२ ४ ५ ३र २ १ ४ २
ज्राइवोइ। नश। तायाइ। शा२इताइ। माइ४५घो-

५
६हाइ॥ ११॥

५ र २ ४ ५ र ४ ५ १ र २ र १ २
II मह्देचाइनत्वात्रिवाः। पाराशुल्का। यदायाः

---

* 'प्रगाथइन्द्रमाह'-इति वि०।

†"त्वामद्रि"-इति, "त्वाअद्रि"-इति,‡"देयाम्"-इति च ऋग्वेदीयः।

---

५९ ऋग्वेदस्य ५,७,१०,५।

I,II सहस्रयुतीये; प्रजापतेः महोविश्वोये वा।

१ १ २ २ ० १
सा२इ। नसहस्रा२। यनायुतायावज्रिवा२ः। नशा-

१ १ १ ३ ५ २ २ १ २
ता२३या। शता२३। मा२घा२३४औच्चोवा। मह्नो-

१
विशे१॥ १२ ॥ ५८

हे "अद्रिवः"(१) वज्रवन्निन्द्र! (च नेति निपात-द्वय-समुदायो विभज्य योजनीयः) "महे च" महतेऽपि "शुल्काय" मूल्याय नाहं त्वां "परादीयसे" न विक्रीणामि (ददातेरुत्तमपुरुषस्य कर्त्तर्येव व्यत्ययेन रूपम्।

"परा शुल्काय देयाम्"-इति बह्वृचा आमनन्ति।

हे "वज्रिवः"(२) वज्रहस्तेन्द्र! "सहस्राय" सहस्र-सङ्ख्याकाय धनाय "च न" "परादीयसे" "अयुताय" दशसहस्राय शुल्काय न परादीयसे। हे "शतामघव" बहुधनेन्द्र! "शताय" (बहुनामैतत्) अपरिमिताय धनाय च न परादीयसे न विक्रीणासि। उक्त-सङ्ख्याकाद्धनादपि त्वां न परित्यजामि। किन्तु बहुभिर्हविर्भिः परिचरामीत्यर्थः॥ ९॥ ५८

---

(१)—'अद्रिवः'।

(२)—'वज्रिवः' इति च 'मनुषमोरुमम्भुशौ' वले रूपम्।

अथ दशमी।

१ २ ३ १ ३ २ ३ ३ १ २
वस्याꣳइन्द्रासिमेपितुरुतभ्रातुरभुञ्जतः।

३ १ २ ३ १ २ ३ २ ३ १ २
मातायमेकदयथःममावसोवसुत्वनायराधसे॥ १०॥ ६०

॥ इति पञ्चम-दशतिः॥*

४ ५ १ २ ३ ४ ५ १ २ ३ ४ ५
I वस्याꣳइन्द्रासिमे। ह्याउपितूः। उताभ्रा२३४तूः।

२ १ २ ३ ४ ५ २ १ २ ३
अभूञ्जातौ। वाओ२३४वा। मातायामौ। वाओ२३४

५ १ २ ३ ४ ५ २ १
वा। कदयथः। साꣳमावासौ। वाओ२३४वा। वसू-

हे "इन्द्र"! त्वं "मे" मदीयात् "पितुः" जनकादपि "वस्यान्" वसीयान् वसुमत्तरोऽसि। "उत" अपिच अभुञ्जतः" अपालयतो मम "भ्रातुः" अपि त्वं वसीयानधिकोऽसि। हे "वसो"! वासकेन्द्र "मे" मदीया "माता च" त्वं च "समासमौ" समानौ सन्तौ (पुमान् स्त्रियेति पुंसः शेषः) "कदयथः"

६० ऋग्वेदस्य ५,७,११,१।

I इन्द्राण्याः साम।

* ॥ इति तृतीयः प्रपाठकः॥

२ ३ ५ २ १ ५ ४
त्वानो। वाओ२३४वा। यरो२३४वा। धापूसो३-
५
ह्वाइ ॥ १३ ॥६०

(अर्चतिकर्मायं)(१) मां पूजितं कुरुष्व। किमर्थं ? "वसुत्वनाय" व्यापनाय "राधसे"(२) धनाय च उभयोर्लाभायेत्यर्थः ॥ १० ॥ ६०

इति श्रीसायणाचार्य्य विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने तृतीयस्याध्यायस्य षष्ठः खण्डः ॥ ६ ॥

अथ सप्तमे खण्डे—

मैषा प्रथमा।

वसिष्ठऋषिः।

११२ १२ १ १ २ ३ १ २
इमइन्द्रायसुन्विरेसोमासोदध्याशिरः।
१२ १२ ३२३१२ ३ २ १ २
ताँश्चमदायवज्रहस्तपीतयेहरिभ्यांयाह्योकआ ॥१॥६१

---

६१ ऋग्वेदस्य ५,३,१०,४।

(१)—'ह्वयति', 'ह्वयते' वा अर्चतिकर्मसु एकविंशतितमं पदमिदं ३.१४।

(२)—चतुर्थैकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम् इति वि०।

अथ द्वितीया।

वामदेवऋषिः।

३ १र ३ १ २ ३ १ २ ३ १ २
इमइन्द्रमदायतेसोमाश्चिकित्रउक्थिनः।
१ २ ३१र २र३ १ २ ३ १ २ ३ १ २
मधोःपपानउपनोगिरःशृणुराखस्तोत्रायगिर्वणः॥२॥ ६२

३ २ ५र ५ १र र
I इमा३४इ। इमइ। द्रायसुन्वा६इराद। सोमा-
र र २र १र र र
सोदध्याशिराः। ता७आमदायवज्रहस्तपीतायाइ। ह-
१ र १ २ १ १ ३ ५र
रा२३ह्वो। भ्यांया२३ह्वो। ह्वियो२३। का२आ२३४औ-
र ३ ५
ह्वोवा। ऊ२३४पा॥ १४॥ ७१॥

४ र ४ १र र
II इमइन्द्रापमदायताइ। सोमाश्चिकित्रउक्थिनाः।

हे "वज्रहस्त"! "दध्याशिरः" दधि-मिश्रणाः "इमे" "सोमासः" सोमाः "इन्द्राय" तुभ्यं "सुन्विरे" सुताबभूवुः। "तान्" सोमान् "मदाय" मदार्थं "पीतये" पानाय "ओको" यज्ञ-सदनम् "आ" अभि "हरिभ्याम्" अश्वाभ्याम् "आयाहि" आगच्छ॥ १॥ ६१

I. सौभरम्। II गर्त्समदम्।

अथ तृतीया।

मेधातिथि-मेध्यातिथी ऋषी*।

एके विश्वामित्र इत्याहुः।

२ ऽ३ १ २३१२ ३१२३१२
आ त्वा३† घसर्वर्दुघाऽऽ ऊवेगायत्ववेपसम्।

२ १ १ २ २ २ १
मा१धो२ःपापा२। नउपनोगिराःशा१र्णू२। रास्वस्तो-

२ १ २ १
२३त्रा। यगिर्वा२३णा३४३ः। ओ२३४५ङ्। डा॥ १५॥६२

हे "इन्द्र"! "ते" तव "मदाय" मदार्थम् "उक्थिनः" स्तोत्र-युक्ताः "इमे" सोमाः "चिकित्रे" ज्ञायन्ते दृश्यन्ते (कित ज्ञाने। कर्मणि लिट्। इरयोरे-इति रे-इत्यादेशः) किञ्च। "मधोः" मदकरस्य (कर्मणि षष्ठी) मदकर सोमं "पपानः" अत्यर्थं पिबन् अस्माकं "गिरः" स्तोत्र रूपा वाचः "उपशृणु" सम्यक् शृणु। "गिर्वणो" गीर्भिर्वननीय हे "इन्द्र"! स्तोत्राय स्तोत्र कर्त्रे मह्यं "राम्व" अभीष्टं देहि(१)॥ २॥ ६२

---

* 'सोमार्षम्'-इति वि०।

† "त्वा१"-इति ऋग्वेदीयः पाठः।

---

(१)—'रातिं'-इति दानकर्मसु चतुर्थं पदम्. नै०२,२०।

१ २ ३ २ ३ १ ३ .१ ३ १ १ ३ १ २ ३ १ २
इन्द्रं धेनुꣳसुदुघामन्यामिषमुरुधारामरंकृतम् ॥ ३ ॥६३

५ ४ ४ ५ २ १ ५ १ ५
I आत्वद्यासाꣳबर्दुघाम्। ऊवाइगा२यत्ववे२पसम्।

१ २ २ १ ४ १ ७ ३
आइन्द्रान्धे३नूम्। सुदुघाम्। आ। नियार२मा२३४इ-

५ ७ १ २ १ २ १
षाम्। उरुधा२३राम्। अरङ्का२३त्ता३४३म्। ओ२३४

५इ। डा ॥ १६ ॥ ६३

अनयेन्द्रं धेनु-रूपेण वृष्टिरूपेण च निरूपयन् स्तौति।

"अद्य" इदानीं "धेनुं" धेनुरूपमिन्द्रं "नु" क्षिप्रं "आहुवे" आह्वये। कीदृशीं धेनुं ? "सबर्दुघां" पयसोदोग्ध्रीं "गायत्ववे-पसं प्रशस्यवेगां। "सुदुघां" सुखेनदोग्धुं शक्यां। "अन्यां" उक्त-विलक्षणां "उरुधारां" बहूदकधारां "इषम्" एषणीयां वृष्टिं (लिङ्गव्यत्ययः) एतद्रूपेण वर्त्तमानं। "अरङ्कृतं" अलङ्कर्त्तारं पर्या-प्तकारिणं वेन्द्रं चाह्वये॥ ३ ॥ ६३

६३ ऋग्वेदस्य ५,७,११,५।

I वाचः साम।

अथ चतुर्थी।

नोधाऋषिः।

१ २ १२३ १२ ३ १२ १२ १२
न त्वा बृहन्तोऽद्रयोवरन्त इन्द्र वीडवः*।

१र २र १र २र२ १ २ ३ १र २र
यच्छित्तसिस्रुवतेमावतेवसुनकिष्टदामिनातिते ॥ ४ ॥ ६४

४ ५र ४ ४ १ २ १र २
I नत्वाबृह। तोऽद्रयाः। वरन्तइन्द्रवीडा२३वाः।

२ ७ १ ७ १र
याच्छित्तासी २। स्तूवताद्दमा २। वतेवसू। नकिष्टा२३दा।

१र २ १
मिनाता२३द्दताइ४३द्द। ओ२३४५द्द। डा ॥ १७ ॥ ६४

हे इन्द्र! "बृहन्तो" बलेन महान्तः अतएव "वीडवः"(१)। "यच्छित्तसि" "स्तुवते" "मावते" सर्वतो दृढा अपि "अद्रयः" पर्वताः "त्वा" त्वां "न वरन्ते" बलेन न निवारयन्ति(२)। अनिवारणमेवोत्तरार्द्धेन विवृणोति—'स्तुवते' त्वद्विषयं स्तोत्रं

---

* "वीलव"-इति च ऋग्वेदीयः पाठः।

---

६४ ऋग्वेदस्य ६,६,११,३।

I बार्हदुक्थम्।

(१)—'वीडवस्त्यस्त्रैवार्थमनुपदं वक्ष्यति दृढाइति।

(२)—'अद्रोऽयं हन्तिर्वारणार्थो दृष्टव्यः' इति वि०।

अथ पञ्चमी।

मेधातिथिर्ऋषिः।

१ २ ३२ उ ३ १ २ ३१ २ २
कर्ईंवेदसुतेसचापिबन्त्कद्रयोदधे।

३ १२ २२ ३ १२ २२ ७ २ ३ १ २
अयंयःपुरोविभिनत्त्योजसामन्दानः शिप्र्यन्धसः॥ ५॥ ६५

५ २ २ २ १ ३
I कर्ईंवेदा। सुताइसा१चा२। पिबन्त्कद्रायो१

कुर्वते 'मावते' मत्सदृशाय मादृशाय स्तोत्रे यद् "वसु" धनं "शिक्षसि" ददासि(१)। ते तव(२) तदेतद्धनं "नकिः" नैव कश्चित् "आ मिनाति" आभिमुख्येन हिनस्ति। [मीञ् हिंसायां। मीनातेर्निगमे(७,३,८१)इति ह्रस्वः। मावते। युष्मदस्मदोः सादृश्ये वतुब्वाच्यः(५,१,६१) इति वतुप्॥

"शिक्षसि" "दित्ससि"-इति च पाठौ॥ ४॥ ६४

---

६५ उत्तरार्चिकस्य ८,२,१५,१=ऋग्वेदस्य ६,३,८,३=जर्हे १६,२,२०—१८,२,८।

I वाशम्।

(१)—'शिक्षति'इति दानकर्मसु अष्टमं पदम् नै०३,१०।

(२)—'प्रसादेनेति शेषः'-इति वि०।

१ २ २ १२
दाधा२इ। अयंयःपुरोविभिनत्त्याओ१जासा२। मन्दाना

२ १ ३ ५२ २ ३ ५
२३:शो३। प्रा२या२३४औत्तोवा। धा२३४सा:॥१८॥ ६५

"सुते"(१) अभिषुते सोमे "सचा" ऋत्विग्भिः सह(२) सोमं "पिबन्तम्" एनमिन्द्रं "कोवेद" वेत्ति न कोपि वेत्तीत्यर्थः। "कत्" किंवा(३) "वयः" अन्नं(४) "दधे" धारयति(५)। "योऽयम्" इन्द्रः "शिप्री" हनुमान्(६) "अन्धसः" सोमेन "मन्दानः" मन्द-मानः(७) "ओजसा" बलेन "पुरो(८)विभिनत्ति"॥ ५॥ ६५

---

(१)—'सुते, सप्तम्येकवचन मिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्, सुतम् अभिषुतं सोमं, सचा मरुद्भिः सह, पिबन्तम्'-इति वि०।

(२)—'मरुद्भिः सह' इति वि०।

(३)—'कत्, प्रथमायाश्चयम् आदेशः कोवा, अत्रै इन्द्राय मन्त्रोऽस्य' इति वि०।

(४)—'वयः इत्यन्ननामसु पाठान्तरेण सप्तमं पदम्' नै० २,७।

(५)—'दधे ददातीत्यर्थः'-इति वि०।

(६)—'शिप्री, हनू नासिके वा, तद्वान् शिप्री' इति वि०"शिप्रे हनू नासिके वा'-इति नि० नै० ६,१७।

(७)—मदी तृप्तावित्यस्येदं रूपम्, तृप्यन्नित्यर्थः।

(८) 'पुरः, असुरपुरः असुरदुर्गाणीत्यर्थः'-इति वि०।

अथ षष्ठी।

अस्याः परस्याश्च वामदेवऋषिः। *

१ २ २ १ २ ३ २ ३ २ ३ १ २ ३ १ २
यदिन्द्र शासोअव्रतं चावयासदसस्परि।

३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
अस्माकमाꣳ ऋुम्मघवन्पुरुस्पृहं वसव्ये अधिबर्हय॥६॥६६

२ १ ४ ३ ५ २ ३ २
I यदिन्द्रा२३शासो अव्रताम्। चावयास। दा३-

१ २ १ २ १ २
सास्पारौ। वा३२। अस्माकामौ। वा३२। ऋुम्मघवन्।

१ २ १ २ २ १
पुरुस्पृहौ। वा३२। वसाव्यायौ। वा३२३। धिबो२३४

५ ४ ५
वा। चाप्रयोई चाइ॥ १९॥ ६६

हे "इन्द्र"! "यद्" यस्मात् कारणात् "शासः"(१) शिक्षणीयानां यज्ञविरोधिनां शिक्षकस्त्वं तस्मात् कारणात् "सदसः" अस्मद्याग-गृहस्य "परि" परितो वर्त्तमानम् "अव्रतम्" अकर्माणं यागविरोधिनमित्यर्थः। "चावय" दूरं निःसारय। अपिच—

* "तौरश्रवसं आर्षम्" इति वि०।

६६ आरण्यके ३,५ -६।

I तौरश्रवसम्।

(१) शासयति इति वि०

अथ सप्तमी।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
त्वष्टानोदैव्यंवचःपर्जन्योब्रह्मणस्पतिः।

१ १र २र ३ १ २ ३ १ २ ३ १ २
पुत्रैर्भ्रातृभिरदितिर्नुपातुनोदुष्टरन्त्रामणवचः॥ ७॥ ६७

३ २ २ र र ५ ४ ५ २१ र २१
I त्वष्टा३४। नोदैवियम्। वचाः। पर्जन्योब्रह्मण-

३ १र र २१र २ १
स्पा२३तीः। पुत्रैर्भ्रातृभिरदितिर्नुपातू२३नाः। दुष्टारा-

२ १ २ १
२३न्त्रा। मणंवा२३चा३४३ः। ओ२३४५हु। डा॥ २०॥ ६७

हे "मघवन्" धनवन्निन्द्र! "पुरुस्पृहं" बहुभिः स्पृहणीयम् "अस्माकम्" अस्मदीयम् "अंशुं" सोमं "वसव्ये" वस्तव्ये निवासयोग्ये स्थाने "अधि बर्हय" अधिकं वर्धय। यज्ञ-गृहे याग-विरोधिनो राक्षसादीन्निःसार्य सोमं प्रवर्धयेत्यर्थः॥ ६॥ ६६

"त्वष्टा" एतत्संज्ञको रूपाभिमानी देवः[1]) "नः" अस्मदीयं

I त्वाष्ट्रीसाम।

(१)- "त्वष्टाऽऽदित्यः" इति वि०। "त्वष्टा तूर्णमश्नुतइति नैरुक्ताख्यातेर्वा स्याद् दीप्तिकर्मणस्त्वचते वा स्यात् करोतिकर्मणः। * * * अग्निरिति शाकपूणिः" इति नि०दै०२,१३-१५।

"वचः"(२) पातु। "ब्रह्मणस्पतिः एतत्सञ्ज्ञको मन्त्राभिमानी देवः(३) अस्मदीयं वचः पातु। किञ्च। "अदितिर्नु"(४) अखण्डनीया अदीना वा एतन्नाम्नी देवमाता च(५) "पुत्रैर्भ्रातृभिः" स्वकीयैः सहिता "नः"(६) अस्माकं सम्बधि "दुस्तरं"(७)

---

(२)—'दैव्यं देवानां भवं, वचः वाक्यं, पर्जन्यः'-इति वि०। एतन्नये दैव्यमित्यपि कर्तृपदम्, 'नः' अस्मान् इत्येव सर्वत्र कर्मपदम्।

(३)—'ब्रह्मणस्पतिर्बृहस्पतिः'-इति वि०। "ब्रह्मणः (अन्नस्य) पाता वा पालयिता वा इत्यादि" नि०दै०४,१२-१३। एषच पर्जन्यः मन्त्रलिङ्गात्, तथाहि—

"अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभियमोजसातृणत्।
तमेव विश्वे पपिरे स्वर्दृशो बहुसाकं सिसिचुरुत्समुद्रिणम्॥
(ऋ०५म०२अ०१८सू०१मन्त्रः)।

"अश्मनवन्तमास्यन्दनवन्तमवातितं ब्रह्मणस्पतिर्मधुधारमभियमोजसा बलेनाभ्यतृणत्तमेव सर्वे पिबन्ति रश्मयः सूर्यदृशो बहुनं सह सिञ्चत्युत्समुद्रिणमुदकवन्तम्"-इति च यास्कलितं तद्व्याख्यानम्।

(४)—'नु इति पादपरणः'-इति वि०।

(५)—"अदितिरदीना देवमाता। ***। इत्यदितेर्विभूति माचष्ट एतान्यदीनानीति वा"-इति नि० नै०४,२२—२३।

"अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः।
विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्॥
(ऋ०१म०८अ०४सू०१०मन्त्रः)।"

(६)—'नः अस्मान्'-इति वि०।

(७)—'द्वितीयैकवचने दे दुस्तरं वामणम्, पञ्चम्येकवचनस्य स्मा ने दृष्टदम् दुस्तरात् वामणात् वचसः सकाशाद्रक्षत्वित्यर्थः' इति वि०।

अथाष्टमी।

बालखिल्या ऋषयः*।

३ २ ३२३१२३ १ २ ३१ १
कदाचनस्तरीरसिनेन्द्रसश्चसिदाशुषे।

३१र २र ३ १३२उ ३१ २ ३१ २
उपोपेन्नुमघवन्भूयइन्नुतेदानं देवस्यपृच्यते ॥ ८ ॥ ६८

५ र र ५र २, ३ ५ १
I कदाचनास्ताइरीरसाइ। नेन्द्रासा२३४श्चा। साइ-

कर्म विरोधिभि स्तरीतु मघवं "त्रामणं"(८) रक्षणीयं "वचः" पातु ॥ ७ ॥६७

हे "इन्द्र!" त्वं "कदाचन(१)"कदाचिदपि "स्तरीः" हिंसको "नासि"। यद्वा। स्तरीर्निवृत्त-प्रसवा गौ स्तथाविधो न भवसि। सा यथा वत्साभावात् गृहं प्रति नागच्छति न तथा करोषीत्यर्थः।

---

* वामदेवस्यार्षम्'-इति वि०।

---

६८ ऋग्वेदस्य ६,४,१८,२= यजुर्वेदस्य ३,३४--८,२।

I अदितेः साम।

(८)—त्रामणं मघवघकर्मेति वि०-सम्मतः।

(१)—विवरणमते 'कदा, च, न' इति पदत्रयम्, अतएवोक्तम् 'न मश्च चपिमश्चस्यार्थे, कदाचिदपि'।

अथ नवमी।

मेध्यातिथिऋषिः*।

३ १२ २२ ३ १ २ ३ १ २
युङ्क्ष्वा*हिवृत्रहन्तमहरीइन्द्रपरावतः।

३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
अर्वाचीनोमघवंत्सोमपीतयउग्रऋष्वेभिरागहि ॥ ९ ॥ ६९

३ ५ ३ ४ २ ३ २ ४ ५ ३ २ ४ ५ १ ३ ५
दाशूर२३४षाइ। उपोपेन्नुमघवन्भूयइत्। त्वार३इनू२३४ताइ।

२ ३ ५ २ १ ५ ४ ५
दानन्दा२३४इवा। स्यपो२३४वा। च्यापूतो३त्वाइ ॥२१॥६८

किन्तु, "दाशुषे" हविर्दात्रे यजमानाय "सश्चसि"(१) सङ्गच्छसे अस्मान्। हे "मघवन्" धनवन्निन्द्र! "देवस्य" द्योतनादि-गुणकस्य तव भूयः प्रभूतं दानं "उपोपेत् पृच्यते" (अपर उपशब्दः पूरणः) उपपृच्यत(२) एव अस्माभिः संपृच्यत इत्यर्थः ॥ ८ ॥ ६८

---

* 'मेध्यातिथिरिन्द्रमाह'-इति वि०।

* "युङ्क्ष्वा"-इत्यननुनासिकः पाठो बह्वृचाम्।

---

६९ ऋग्वेदस्य ५,७,२८,२।

(१)—'सश्चति गतिकर्मसु पठितः, तथापि दाशुष इति सम्प्रदानश्रुतेर्दानार्थो-ऽवगन्तव्यः'-इति वि०।

(२)—'उपपृच्यते, उपेत्य भवति, यावत् पूर्वदानं नैव क्षीयते तावदेव ददातीत्यर्थः'-इति वि०।

१ १ २ १ २ ३ ४ २
I आइद्धी२। आइद्धिहाइ। यंत्वाद्धिवाऽर्त्वाऽद्ध-

३ ४ १ ३ २ १ २ ३ २ ३ २
न्तम। द्धारोइन्द्र। परावा१ताऽ३४:। अर्वाऽ३४चीनाः।

१ २ १ ३ २ ३ २
माघवंत्सो। मपाइता१याऽ३४इ। उग्राऽ३४ऋष्वाऽइ।

२ १ ५ ५ ५
भिरो२३४वा। गापृच्छो६च्छाइ॥ २२॥ ६९

हे "हतहन्तम!" हतं हतवान् हतहा अतिशयेन हतं हत-वान् हतहन्तमः यथा पुनर्नोत्तिष्ठति तथा हतवानित्यर्थः(१) (अनो नुट् (८,२,१६) इति तमपो नुट्) हे तादृशेन्द्र! "हरी" स्वदीयावश्वौ "युङ्क्ष्व" (शिरवधारणे) आत्मीये रथे योजयैव। हे "मघवन्!" धनवन् "उग्रः" उद्गूर्णबलस्त्वं "सोमपीतये" सोमस्य पानार्थं (दामीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्(२)) "अर्वाचीनो" ऽस्मदभिमुखः "ऋष्वेभिः" ऋष्वैर्दर्शनीयै "मरुद्भिः" सार्द्धं "परावतः" (दूरनामैतत्) दूरे वर्त्तमानात् द्युलोकात् "आगहि" आगच्छ॥ ९॥ ६९

I आजीगर्त्तम्।

(१)—'अनोर्मघस्य वा हन्तरित्यर्थः' इति वि०।

(२—निघण्टु तृतीय षडविंशत्यन्तिम पदम्।

अथ दशमी

नृमेधऋषिः।

२ ३ १र　　२र　　३ १ २
त्वामिदाह्योनरोपीप्यन्वज्रिन्भूर्णयः।

१२ ३ १ २　　३ २ ३ २ ३ १ २ ३र २
सदून्द्रस्तोमवाहस*इहश्रुध्युपस्वसत्सागहि ॥ १० ॥ ७०

३र ४ ५र　२,　३ ४र ५ ५　२१ २ १
I त्वामिदा। ह्योद्व। हियोनराद्ए। अपादूप्यन्वा।

२ ३　५　१ २ १र २र　१ २
ज्राद्न्भूर्णा२३४याः। सदून्द्रस्तोमवाहसः। इहाश्रुधा।

हे "वज्रिन्!" इन्द्र! त्वां "भूर्णयो" हविर्भरणशीला(१) "नरः" कर्मणां नेतारो यजमानाः(२) "इदा" अद्य "ह्याः" पूर्वेद्युः(३) "अपीप्यन्" सोममपाययन्(४)। हे इन्द्र! स त्वं

* "स्तोमवाहसाम्"-इति ऋक्पाठः।

७० उत्तरार्चिकस्य २,१,१४,१ = ऋग्वेदस्य ६,७,३,१ = ऊहे२,४—१८,२,८।

I माधुच्छन्दसम्।

(१)—'तस्मिन्नेव वेदिप्रदेशे कर्मकरणार्थं भ्रमणशीलाः'-इति वि०।

(२)—'ऋत्विगलक्षणा मनुष्याः'-इति वि०।

(३)—सर्वकालमित्यर्थः।

(४)—'आयौ ओणायौ इडा वित्यस्येद रूपम् वर्द्धयन्नीत्यर्थः'-इति वि०।

३ २ २ ३ २ २ १ २ ३ २ २ ३ २ २ १ २
औहो३४वाहाइ। उपास्मासा। औहो३४वाहा। रमा-
२ १
गाः क्षा३४३इ। ओ२३४५इ। डा ॥ २३ ॥ ७०

"स्तोमवाहसः" (षष्ठ्यर्थे प्रथमा) स्तोमवाहसां स्तोत्रवाहकाना-मस्माकं स्तोत्रम् "इह" यज्ञे "सुधि" शृणु "खसरं" गृहं च। (दुर्याः खसराणीति (नै०३,४,१०) गृहनामसु पाठात्) "उपाशु" उपागच्छ ॥ १० ॥ ७०

इति सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दोग्याख्ये तृतीयाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

अथाष्टमे खण्डे—

मैषा प्रथमा।

हयोर्वसिष्ठऋषिः।

१ २ ३ २ १ १ २ ३ २ ३ २
प्रयुअदर्य्यायत्यू३च्छन्ती* दुहितादिवः।
१२ ३ १ ५ ३ १ २ ३ २ १ २ ३ १ २
अपोमचीवृणतेचक्षसातमोज्योतिष्कृणोतिसूनरी ॥ १ ॥७१

* "व्यू१च्छन्ती"-इति ऋग्वेदीयः पाठः, इदित्योपि सायण-सम्मतः परं न क्वापि पुस्तके तथोपलभ्यते।

७१ उत्तरार्चिकस्य १,२,१४,१ = ऋग्वेदस्य ५,६,१,१ = ऊहे२१,२,८—१२—१५ = ऊह्ये१,३—५,२।

२ १ ३ २ १ ३ २
। प्रताइ। इ॒ह्वा। आइ। इ॒ह्वा। उवह। शी३-

१ २ १ ३ २ १ ३ २ र
आयती। उक्था। इ॒ह्वा। आ। इ॒ह्वा। तीदु। हो-

१ ७ १ ७ १ ३ २ १ ३ २
३तादिवा २:। आदिवा २:। अपो। इ॒ह्वा। ओ। इ॒ह्वा

१ र २ र १ ७ १ ७ र १
माद्दोवृणुते च। क्षुधातमा २:। आतमा २:। ज्योताइ।

३ २ १ ३ २ र १ ७ १
इ॒ह्वा। आइ। इ॒ह्वा। क्षणो। तीं३मूनरी २। ओनरी-

१
२३४३। ओ२३४५इ। डा ॥ २४ ॥ ७१

"आयतो" आगच्छन्ती "व्युच्छन्ती" तमांसि विवासयन्ती वर्जयन्ती "दिवो" द्युलोकस्य सूर्यस्य(१) "दुहिता" पुत्री(२) एवंभूतोषाः "प्रत्यदर्शि" सर्वैः प्रतिदृश्यते (उइति पूरणः)

। उषसः।

(१) - यद्यपि द्यौर्नाम मूर्धपर्यायः तथापि द्युवाचक स्वादि-पदस्य तत्पर्यायत्वादस्यापि तत्समत्वम्। तथाहि--"स्वः, पृश्निः, नाकः, मौः, त्रिष्टुप, नभः-इति षट् माधारणानि" इति नि० नै०१,४। "माधारणान्यत्तराणि षट् दिवआदित्यस्य च"-इति च यास्कोक्तं तद्व्याख्यानम् नै० नै०२,१९। वस्तुतः आदित्यस्य द्युस्थत्वात् द्युवाचकशब्देन द्युशब्देन चोपचारात् सुग्रहः। तदुक्तम् "मूर्धा द्युस्थानः" नै० दै० १,५।

(२) -'द्युलोके जायमानत्वात् दिवः दुहिता'-इति वि०। अतएव प्रजापतिपरपर्यायस्यादित्यस्य पतिदिनं प्रथमं पश्चात् धावमानत्वात् कन्यत्वात्कारायणादः।

अथ द्वितीया।

३१ २३ १० ३१२
इमाउवान्दिविष्टयउस्राहवन्तेअश्विना।

३१२३१२ ३१२ ३ ४र ५र
अयवामक्षेवसेशचोवसूविश्रंविश्वहिगच्छथः॥ २॥ ७२

२ र र ३ ५र २ र र ३
I इमाउवान्दिविष्टयाऽ३४ऐहो। उस्राहवन्तेअश्विना

सैषा "महो" महतो। यद्वा महो महत्तमो नेशं तमोन्धकारं (अप उ इति निपातद्वयसमुदायः। अपेत्यर्थे) "अपोह्वणते" अपह्वणोति। कथं? "चक्षुषा" दर्शनेन। एवं कृत्वा "सूनरी"। जनानां सद्म नेत्रो(१) "उषाः" "ज्योतिः" प्रकाशं "कृणोति" करोति।

"अपो महो व्रणते चक्षुषा" इति छन्दोगाः। अपो मंहि व्यथति चक्षसे" इति बह्वृचाः॥ १॥ ७१

"इमाः" "दिविषृगः" दिवमिच्छन्त्यः प्रजाः ऋत्विजोपि

७२ उत्तरार्चिकस्य १,२,१५,१ = ऋग्वेदस्य ५,५,२१,१ = आरण्यके ४,१,१५—१६ = ऊहे २१,२,१० = ऊह्ये १,४-५,३।

I अश्विनोः साम।

(१) —शोभनाः नरः यस्याः लोचनकर्मणा सा सूनरी, शोभनैः लोचनकर्मभिः सम्बध्यते इति वि०।

अथ द्वतीया।

अश्विनौ वैवस्वतावृषी।

२ ३ १ २ ३ १ २ ३ १ २
कुष्ठः कोवामश्विनातपान॥देवामर्त्यः।

५र २ र र र ५र २
२३४ऐंहो। अयंवामङ्गवसेशचीवसू२३४ऐंहो। विशंवि-

३ ५र ४
शंहिगच्छथा२३४ऐंहो। होपुट्। डा॥२५॥७२

(उइतितु चार्थे। हे "अश्विना" अश्विनौ!(१) उस्रौ! वासकौ!(२) "वां" युवां "हवन्ते" आह्वयन्ति। अयमहं वसिष्ठोपि हे "शचीवसू" कर्मधनौ! "वां" युवां "अवसे" अस्मद्रक्षणाय युवयोस्तर्पणाय वा "अङ्गे" आह्वयामि। किमर्थमेवं प्रजामध्य अपीत्यादरोक्तिरिति तत्राह। "विशंविशं हि गच्छथः" हि यस्मात् सर्वाः स्तुतिकर्त्रीः प्रजाः प्रति युवां गच्छथः खलु, तस्मादेव सुच्यत इति॥२॥७२

---

(१)—"अश्विनौ यद् व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्यः। अयमश्विनावित्यौषवाभः। तत्कावश्विनौ द्यावापृथिव्या वित्येकेऽहोरात्रावित्यके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृता वित्येतिहासिकाः। तयोः काल ऊर्ध्वमर्धरात्रात् प्रकाशीभावस्यातुविष्टम्भमनुत्तमोभागो हि मध्यमो ज्योति र्भाग आदित्यः।"-इति नै० दै० ६.१।

(२)—"उस्रेति गोनाम। लुप्तोपमं चेदं दृष्टव्यम् उस्रा इव। यथा गावः स्वान् वत्सकान् हवनो आह्वयन्ति तद्वत्" इति नि०।

३ १ २ ३ १र २र ३ २ ३ २ ३ १ २
घ्नतावामश्नयाच्चयमाणोऽपूनेत्थमुश्राद्दन्यथा॥ ३॥७३

४ ५ ४र ५र र ४ १ र २र र १ ७ २
I कुष्ठःकोवामश्विनाश्रा। तापानोदे। वामर्त्तायाः३।

१ २ २ ३ २ ३र २ २ १ २ २
च्चोवा३च्चा३४इ। घ्नता३४वामा१। श्नाया३। च्चोवा३च्चा

३ २ ३र २ १ २ १ २ २
३४इ। च्चपा३४माणाः। श्राऽशूना३। च्चोवा३च्चा३४इ।

३ २ ३ २ १ ३ २ ५र र ३
इत्थाश्र४मुवा३त्। उवा२न्। यथा३४श्रौच्चोवा। ऊर-

५
३४पा॥ २६॥ ७३

"अश्विना" अश्विनौ! हे देवौ देवौ द्योतमानौ! "वां" युवां "कुष्ठः" कौ पृथिव्यां वर्त्तमानः "को" मर्त्यः मरण-धर्मा मनुष्यः स्तोता "तपानः" तापनः प्रकाशको भवति इति शेषः। न कश्चिच्छक्नुयादित्यर्थः। "वां" युवयोरर्थाय "अश्नया" (अश्न शब्दाद्विसो यादेशः(१) व्याप्तैरभिषवसाधनैरश्नुभिः(२) "घ्नता" हन्यमानेन अभिषूयमाणेन "अंशुना" सोमेन। यद्वा। अश्ना-

---

I अश्विनोः संयोजनम्।

(१)—"सुपांसुलुक पूर्वसवर्णाच्छेयाडाड्यालः। (७,१,३९)

(२)—'अश्नया क्षुधा' इति वि०।

अथ चतुर्थी।

प्रस्कण्व ऋषिः*।

२२३ १२ २२उ ३ १ २
अयंवामधुमत्तमःसुतःसोमोदिविष्टिषु।

१२ ३१२ ३१र २र ३ १२
तमश्विनापिबतन्तिरोअञ्ह्यंधत्तꣳरत्नानिदाशुषे॥ ४ ॥७४

३२ ५र४ ५ ५ २१
। I अयाउ४म्। अयंवाम्म। धुमत्ताई्माः। सुतः

र ऽर १ २ ऽ २ ऽ २ २र २
सोमोऽदिविष्टिषु। ओ३च्चा। ओ३च्चाउ४। ओच्चा।

भिरभिषुतेन "घृता" युवामभिगच्छता "अंशुना" सोमेन "चय-माणः" क्षीयमाणो यजमानः "इत्थम्" इत्थमेव भवति अत्यन्तं समृद्धो भवतीत्यर्थः। "आहन्" यथा अभिमतान्नरसादिभक्षण-वान् राजादिरिव। स यथा प्रहृष्टा दृष्टान्तविषयो भवति तद्वदयमपि भवतीत्यर्थः॥ २॥ ७३

हे "अश्विना" अश्विनौ! "वां" युवयोः "दिविष्टिषु" दिवए-षणेषु यज्ञेषु "अयं" पुरोवर्त्ती सोमः "सुतो" अभिषुतः। कौ-

* 'कुत्सस्यार्षम्' इति वि०।

७४ ऋग्वेदस्य १,४,२,१।

I अश्विनोः साम।

अथ पञ्चमी।

मेधातिथि-मेध्यातिथी ऋषी*।

३ ३ १ २ ३१२३ २३ १ २३१२
आ*त्वासोमस्यगन्दयासदायाचनहञ्जगा*।
१ २३१र २र ३१र २र ३१२
भूर्णिम्मगन्नसवनेषुचक्रुधंकईशाननयाचिषत ॥ ५ ॥७५

१ र र २ १ २ १ २
तामश्विनापिबतन्तिरोअञ्चियम्। ओ३ह्वा। ओ३ह्वा३४।
३र २ १ २ ९ २ ९ २ ३र२
ओह्वा। धत्ताऽरा१त्वा२। ओ३ह्वा। ओ३ह्वा३४। ओह्वा।
१ १ ३ ४र र ३ ५
निदा२३। मू२पा२३४ओह्वावा। ऊ२३४पा॥ २ ॥ ७४

दृशः। "मधुमत्तमः।" अतिशयेन माधुर्यवान्। "तिरोअन्द्म"(१) तिरोभूते पूर्वस्मिन्दिनेऽभिषुतं तं सोमं "पिबन्त"। "दाशुषे" हविर्दत्तवते यजमानाय "रत्नानि रमणीयानि धनानि "धत्त" प्रयच्छत।

"दिविष्टिषु" "ऋतावृधे" इति च पाठौ॥ ४ ॥ ७४

* 'प्रगाथस्यार्षम्' इति वि०।

* 'मा'-इति। * 'गिरा'-इति च ऋग्वेदीयः पाठः।

७५ ऋग्वेदस्य ५,७,१३,५।

(१) अहर्निभवम् अन्द्म। 'तिरो अन्द्मं तृतीयमवनिकम। अथवा तिर इति प्राप्तनाम, प्राप्ते यागाहनि भवः। तिरो अन्द्मः त तिरो अन्द्मम्' इति वि०।

५र र र २ १ ३ ५र र १ऽर
I आत्वासोमा। स्य। गल्दा२या२३४ओहोवा। सदा-

१र २१ १ २ ३ ५ २ १ २र
२याचन्नचुक्ष्रिया२३। भूर्णाओ२३४वा। मृगन्नसवनेषुच्-

हे "इन्द्र!" "त्वा" त्वां "सवनेषु" यज्ञेषु "सोमस्य" "गल्द-या"(१) गालनेन आस्रावणेन। "ज्या" जयशीलया स्तुत्या च (अतएव गिरेति बह्वृचाः पठन्ति(२)) तया युक्तो "अहं" "सदा" सर्वदा "याचन्" याचमानः सन् "आचुक्रुधं" मा चुक्रुधं क्रमोधयानि (आ इति प्रतिषेधार्थः, निपातानामनेकार्थत्वात्। अतएव बह्वृचाः मात्वेत्यामनन्ति) बहुशो याच्यमाने त्वयि क्रोधो जायते तं सोमगालनेन स्तुत्या चापनयामीत्यर्थः। कीदृशं त्वां? "भूर्णिं" भर्त्तारं(३) "मृगं न" सिंहमिव भीमं (स्वामिनः इन्द्रस्य

I सोमसाम।

(१)—'गल्दा' इति वाङ्नामसु चतुःपञ्चाशन्मध्ये पठ्यते कम् (१,११)। 'गल्दा धमनयो भवन्ति गलन मासु धीयते'-इति नैरुक्तम् (९,२४)।

"आत्वा विशन्त्विन्दव आगल्दा धमनीनाम्"—

(ऋ०८म०१अ०१सू०२०मन्त्रार्द्धः)

आगलना धमनीनाम्-इति तु नैगमम्। माता सोमस्य गल्देति बह्वृक्पठितमन्त्रव्याख्यानावसरे 'सोमस्य गालनेनेति यास्कः।

(२)—आग्रन्थोऽत्रगिर्वाचीत्यत गिरेति बह्वृक्पाठ एव मानम्।

(३)—'भ्रमणशीलम्'-इति वि०।

अथ षष्ठो।

देवातिथि*ऋषिः।

१ २ २ २ २३ २ १ २
अध्वर्योद्रावयात्वꣳसोममिन्द्रःपिपासति।

१ २३ २ २ १ २ २२ २ १ २ २ २
उपोनूनंयुयुजेवृषणाहरीआचजगामवृत्रहा॥ ६॥ ७६

१२ २ १ २ १ २
क्रुधम्। कईशा२३नाम्। नायाचिषत्। इडा२३भा

१
३४३। ओ२३४५इ। डा॥ २८॥ ७५

४ २ २ ४ १२ १
I अध्वर्योद्रा५वयातुवाम्। सोममिन्द्रा२ः। पिपा-

याचने लौकिकं न्यायं दर्शयति) -लोके को वा पुरुषः "ईशानम्" ईश्वरं स्वामिनं न "याचिषत्" न याचेत सर्वएव हि याचते। अतोऽहमपि त्वां स्वामिनं याचे इति भावः॥ ५॥ ७५

हे "अध्वर्यो!" अध्वरस्य नेतस्त्वं "सोमं" द्रावय उत्तरवेदिलक्षणं स्थानं प्रापय। यद्वा। रसात्मना द्रवणशीलं कुरु।

---

* 'देवतातिथिरिति वि० पाठः।

---

७६ ऋग्वेदस्य ५,७,३२,१।

I आजमायवम्।

अथ सप्तमी।

हयोर्वसिष्ठऋषिः।

३ २ १ १उ ३ २ ३ १ ३ १२
अभीषतस्तदाभरेन्द्रज्यायःकनीयसः।

३ २ ३ १२ ३ १ २ १२ ३ १२
पुरुवसुर्हिमघवन्बभूविथभरेभरेचहव्यः॥ ७॥ ७७

२ १ २ १ २ १ २ १ २
सा१तौ२। उपो२नूनं ययुजेवृ। षाणा१हारी२। आ

१ २ ३ २ १ २ ४ ५ ४
चाजा२३गा। मवृत्रहा। औ३होवा। होप्३। डा॥

॥ २८॥ ७६

अभिषुण्वित्यर्थः। किं कारणमिति चेत्? "इन्द्रः" "पिपासति" सोमं पातुमिच्छति (त्वयैतत्कथमवगतमितिचेत्तत्राह-"वृषणा" वर्षितारौ युवानौ वा। "हरी" अश्वौ "नूनं" अद्य "उपो ययुजे" उपगम्यैव सारथिर्योजितवान् रथे। "वृत्रहा" वृत्रस्य हन्ता(१) इन्द्रश्च "आ जगाम" आगतवान्॥

"उपोनूनं" "उपनूनम्"-इति पाठौ॥ ६॥ ७६

७७ ऋग्वेदस्य ५,३,२१,४।

(१)—'वृत्रहा मेघस्य हन्ता'-इति वि०।

I अभीषतस्तदाहाउ। भरा। इन्द्रज्यायः कनीया

ꣳसाः। पुरुवसुर्हिमघवन्बभूवाꣳइत्था। भराइभाꣳरे। चह्व्यः। इडाꣳभाꣳइ। ओꣳइडा॥

॥ ३० ॥ ७७

हे "ज्यायो" ज्यायन्निन्द्र ! ("आमन्त्रितं पूर्वं मविद्यमानवदि-तोन्द्रपदस्यविद्यमानवद्भावात् ज्यायइत्यस्य सर्वानुदात्तत्वाभा-वः। नकारस्य रुत्वं(१) व्यत्ययेन नुमभावो वा(२) "कनीयसः" सतो मम "तत्" प्रसिद्धम्। "अभ्याभर" अभ्याहर। हे "म-घवन्" धनवन्निन्द्र ! "पुरुवसुः" बहुभिर्वननीयो "बभूविथ" असि। "भरे भरे" सङ्ग्रामे(३) "च" "ह्व्यो" ह्वातव्यश्च बभू-विथ(४)॥

"मघवन् बभूविथ"-इति छन्दोगाः। 'मघवत्सना-दसि"-इति बह्वृचाः॥ ७॥ ७७

I समुद्रप्रियमेधम्।

(१)—"रुसम्बुद्धौ (८,३,१)"-इति।

(२)—"व्यत्ययोबहुलम् (३,१,८५)"-इति।

(३)- 'भरे' इति सङ्ग्रामनामसु पञ्चम नैघण्टुकम् (२,१७)।

(४)—"एतदुक्तं भवति—यस्मात् ईश्वरः प्रभुश्च तस्मादाभरेत्यर्थः"-इति वि०।

अथाष्टमी।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ २
यदिन्द्रयावतस्त्वमेतावदहमीशीय।

३ २ ३ १ २ ३ १ २ ३ १ २
स्तोतारमिद्धिषेरदावसोनपापत्वायरंसिषं ॥ ८ ॥ ७८

I यदिन्द्रा२३यावतस्तुवाम्। एतावदहमीशीया।

स्तोतारा२३मीत्। धोधिषे। रदावा१सा२उ। नपापा२३

४त्वा। यारीवाओ२३४वा। सा५इषोइच्छाइ ॥ ३१ ॥

II यदिन्द्रयावतस्तुवाम्। आइताउ। वादाउच्छामी।

हे "इन्द्र!" "यद्" यतो(१)"यावतो" धनस्य "ईशिषे" "एतावत्" (षष्ठ्यालुक्(२)) एतावतो धनस्य "अहमीशीय" ईश्वरो

---

७८ उत्तरार्चिकस्य ९,१,१२,१=ऋग्वेदस्य ५,३,२०,३=जहे २२,२०=जह्ये ५,२०—५,२२।

I,II वैरूपे द्वे।

(१)—'यच्छब्दो यदिशब्दस्यार्थे' इति नि०।

(२)—सुपां सुलुगित्यादिना।

अथ नवमी।

नृमेधऋषिः।

१ २ ३ १ २ ३ १ २ २ ३ १ २
त्वमिन्द्र प्रतूर्त्तिष्वभिविश्वाअसिस्पृधः।

१ २ १ २ १ ४ ५ २ १ २
शायाऽऽ१२। स्तोतारमो२३त्। दधिषेरदा। वासाऽ

१ २ १ १ २ ३ ४ ४
ऽ१२उ। नापापात्वा२३। यारौवाओ२३४वा। सा५-

५
इषो६च्छाइ॥ ३२॥ ७८

भवेयम्। हे "रदावसो!" रदति ददाति वसूनीति रदावसुः(१) तादृग् हे इन्द्र ततोऽहमस्मदीयं "स्तोतारम्" "इत् दधिषे" धनप्रदानेन धारयेयमेव। "पापत्वाय" क्षीणत्वाय(२) "न रंसिषं न दद्याम्।

"स्तोतारमिद्दधिषेरदावसोनपापत्वायरंसिषम्"-इति छन्दोगाः। "दिधिषेयरदावसोनपापत्वायरासीय"-इति बह्वृचाः॥ ८॥ ७८

(१)—रदावसो इति दीर्घमध्यपाठोऽपि ऋचि। "दाचोऽसिद्धः"-(६,३,१३५,)"-इति तत्साध्यम्।

(२)—'पापभक्षाय पापाक्षात्रः'-इति वि०।

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १
अशस्तिहाजनितावृत्रतू*रसित्वंतूर्यतेरुष्यतः ॥ ९ ॥ ७९

४ ५ ४ ५ ४ ५ १ २ ३
I त्वमिन्द्रोहाइ। प्रतूर्तिष्वोवा। आभिविश्वाः।

१ २ १ २ ३ ३ १ २
असाइस्या१र्ध२ः। आशस्तिहाजनितावृ। त्रातू१रा-

१ २ ३ २ १ २ ४ ५ ४
सा२इ। त्वांतू१र्या२। तरुष्यता। औ३होवा। हो-

५इ। डा ॥ ३३ ॥ ७९

हे "इन्द्र!" "त्वं" "प्रतूर्त्तिषु" सङ्ग्रामेषु(१) "विश्वाः" सर्वाः "स्पृधः" युद्धकारिणीः शत्रुसेनाः(२) "अभ्यसि" अभिभवसि किञ्च। हे "तूर्य!" शत्रूणां बाधक इन्द्र! त्वम् "अशस्तिहा" देवानामशस्तीनां हन्तासि। "जनिता" असुरेभ्यः अशस्तीनां

* "विश्वतू"-इत्यपि पाठः क्वचिट्टृग्वेदीयपुस्तके दृश्यते।

७९ उत्तरार्चिकस्य ८,१,८,१ = ऋग्वेदस्य ६,७,३,५= आरण्यके ८,१,३४।

I वैश्वदेवम्।

(१)—प्रकर्षेण तूर्यन्ते हिंस्यन्ते यत्र, स प्रतूर्त्तिः सङ्ग्रामः।

(२)—'स्पृधः'-इति सङ्ग्रामनामसु जनविंशतितमं नैघण्टुकम् (२,१७)। स्पर्धं कुर्वन्ति इति स्पृधयतेः क्विपि स्पृधः सङ्ग्रामकारिणीः सेनाः।

अथ दशमी।

मेधाऋषिः*।

१२ २२३१२ २२ ३१२ ९२३ १ २
प्रयोरिरिक्त*ओजसादिवःसदोभ्यस्परि†।
१ २ ३१२ ३ १ २३२३१ २
नत्वाविव्याचरजइन्द्रपार्थिवमनिविश्ववक्षित्थ‡॥ १०॥८०

॥ इति द्वितीय-दशतिः॥

जनयिता चासि। "व्रतनः"(३) सर्वस्य शत्रुवर्गस्य हिंसिता चासि। "तरुणतः" बाधकांश्च(४) बाधमानोसि॥ ९॥ ७९

* "मेधसआर्षम्" इति वि०।

* "प्रक्षिरिरिक्त"-इति
† "दिवोअन्तभ्यस्परि"-इति
‡ "पार्थिवमनुस्वधांववक्षित्थ"-इति च
} ऋग्वेदीयाः पाठाः।

८० ऋग्वेदस्य ६,६,११,५।

(३)—तूरिति तूर्यतेर्हिंसार्थस्य रूपम्।

(४)—तरुणतिर्वधकर्मा तस्येदं रूपम्. तथाहि—"वनुष्यतिर्हिंसाकर्मा"-इत्यादि "तरुणतिरप्येवं कर्मेति नैरुक्ताः दृश्यम् ५.२। विवरणकारस्तु 'तरुणतिर्वधकर्मा, तरुणतः मिच्छतः तान् तरुणतः (ये वा इत्यं मिच्छन्ति तान्) प्रतिहिंसेत्यर्थः' इति व्याचष्टे।

७९क,

५ २ २ ५ २ १ ३२ १
। प्रयोरिरिक्त्रओजसाह्ए। दिवः सदोऽभ्यस्परि। न

७ १२ ऽ २ १ २२ ऽ २
त्वाविव्या। औहोइवा। चा। रजः। औहोइवाइ।

१२ २ १ २ १
द्रपार्थिवाम्। अतिवाऽइद्स्वाम्। ववक्षिथ। इडाऽ-

२ १
इभाइ४३। ओऽ२३४५इ। डा॥ ३४ ॥८०

हे "इन्द्र!" यस्त्वं "दिवो" द्युलोकस्य "सदोभ्यः" स्थानेभ्यः(१) परिपर्यन्तेभ्यः "ओजसा" बलेनैव "प्र रिरिक्षे" प्रकर्षेणातिरिक्तो भवसि(२) (रिचिर्लटि बहुलञ्छन्दसीति श्लुः। प्रत्ययस्वरः) किञ्च। हे इन्द्र! "पार्थिवं" पृथिव्यां भवं "रजो" लोकः "त्वा" त्वां महता स्व-शरीरेण "न विव्याच" न व्याप्नोति (द्यावापृथिवीभ्यामपि स्वतः स त्वं बलेन समर्थोऽसीत्यर्थः) एवम्भूतः स त्वम् अस्मान् "विश्वम्" "अति" अतिक्रम्य "ववक्षिथ"।

I पुरीषम्।

(१)—'दिवः अवयवभूतानि सदःस्थानानि तेभ्यः। पञ्चमीनिर्देशात् आगत्येति वाक्यशेषः'-इति वि०।

(२)—'रिष हिंसायामित्यस्य मध्यमपुरुषैकवचने एतद्रूपं, यस्त्वं प्रकर्षेण हिंससीत्यर्थः। कान् सामर्थ्यात्तान्'-इति वि०।

वोढुमिच्छ(१) (वहेः सन्नन्तस्य छान्दसेर्लिटि रूपं मन्त्रत्वादाम-भावः ॥

इति श्रीसायणाचार्य-विरचिते माधवीये सामवेदार्थ प्रकाशे छन्दोब्राह्मणे तृतीयस्याध्यायस्याष्टमः खण्डः ॥ ८ ॥

॥ इति वार्हतमैन्द्रम्(२) ॥

असाविदेवमेकोनत्रिंशत्तासु प्रवोमहे ।
त्रिपदोक्तविराडन्याम्विष्टुभोष्टोर्ध्वविंशतिः(१) ।
ऐन्द्रीषु तासु तार्क्ष्यस्य स्तुति रेषा त्यमुष्विति ।
पर्वतेन सहेन्द्रस्य गौरिन्द्रापर्वतेत्यपि(२) ॥

---

(१)—'ववच्चिय' इति महन्नामसु चतुर्दशं नैघण्टुकम (३,३) अतएव 'महान् भवती त्यर्थः'-इति वि० ।

(१)—इन्द्रदेवताका वृहतीछन्दस्काः सप्तिंश मन्त्राख्येषां प्रकरण समाप्त मित्यर्थः ।

(१)—असावि देवमित्यारभ्य कोष्वयंति ऋक्पर्यन्तं एकविंशत्, तत्र असावीत्यारभ्य ततक्षुरित्यन्तास्तीयदशदात्मका नवमखण्डात्मका वा ऋचो दश, ततः अवश्एसो इत्यारभ्य ओषधीभित्यन्तास्तुर्यदशदात्मका दशमखण्डात्मका वा ऋचो नव, ततः त्यमुष्वित्यारभ्य सजोषादित्यन्ताः पञ्चमदशदात्मका एकादशखण्डात्मका वा ऋचो दशेति सङ्कलनयोनविंशत् । तासु ऋचु प्रवोमहे-इति तु षोडशतमा, त्रिपदा इयं विराट् इत्युक्ता त्रिपाद्विराट्छन्दस्का इति पूर्वाचार्ये कथितेत्यर्थः । 'अन्याः ऋष्टो-र्विंशतिः अष्टाविंशत्यृचः त्रिष्टुभः । इति सम्प्रति व्याख्यास्यमानानामृचां छन्दः-सङ्कलनं ।

(२)—ऐन्द्र-पर्व-गतानान्तु प्रकरणफलादैन्द्रत्वं सिद्धमेव, तासु ऐन्द्रीषु ऋचु त्यमुष्व इति विंशतितमा ऋक्, एषा तार्क्ष्यस्य मध्यमस्यानाग्निविंशस्य [तदाह याज्ञः— "तार्क्ष्यः तस्य व्याख्यान (दे०४,२७)" माध्यमिकस्यैवं तार्क्ष्यसंज्ञत्वं च स्थाने समाम्ना-

तत्र नवमखण्डे—

मैषा प्रथमा।

द्वयोर्वसिष्ठऋषिः।

१२ ३१र २र ३२ क२र ३ १२ ११२
असाविदेवंगोऋजीकमन्धोन्यस्मिन्निन्द्रोजनुषेमुवोच।
१ २ ३१र २र३ २ ३११३ १२
बोधामसित्वाहर्यश्वयज्ञैर्बोधानःस्तोममन्धसोमदेषु॥१॥८१

I २ र र ३ ४ ५ १ र २
असौहोवाऽहाइ। वो२३४दे। वाङ्गोऋ। जो-
३ ४ ५ २र र २ ३ ५ १
कमन्धाः। न्यौहोवाऽहा। स्मो२३४नी। द्रौजनु।
२ ३ ४ ५ २र र र २ ३ ५ १
षेमुवोचा। बोधौहोवाऽहाइ। मा२३४मी। त्वाहरि।

"देवं" दीप्तं(१) "गोऋजीकं" गोभिः संस्कृतं गव्येन मिश्रित-मित्यर्थः(२)। "अन्धः" सोमरूपं मद्यम् "असावि" अभिषुतम्।

---

८१ ऋग्वेदस्य ५,३,३,१=आरण्यके ३,२८—३०।

I प्राकर्षम्।

गोःअग्निरिति शाकपूणिः (दै०२,१९)] स्तुतिः; किंच 'इन्द्रस्यगोरिति सप्तविंशतिसमा ऋचोपि च 'इन्द्रापर्वता'-दिति षड्विंशतितमा ऋक्, इषमपि पर्वते न सच इन्द्रस्य स्तुतिः न केवलेन्द्रस्येत्यर्थः।

(१)—'देवं द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यं, देवस्य इन्द्रस्यार्थाय' -इति वि०।

(२)—गो-शब्देनेह गोविकारं गव्यं, ऋजीकं च मिश्रम्।

अश्वयज्ञैः। बोधीहावाइच्हाइ। नाइ३४स्तो। ममन्ध।
सोइ४३। माइदाऽइषुर्ऽ५६ ॥ ३५ ॥

॥ आइच्हीइ। आइच्हो। एहिया। ओइ३४वा।
च्हाइ। असाविदेवङ्गोचृजोकाइमान्धाइः। आन्धाः।
अन्धा। ओइ३४वा। च्हाइ। न्यस्मिन्निन्द्रोजनुषेमूइ-
बोचाइ। वोचा। वोचा। ओइ३४वा। च्हाइ। बो-
धामसित्वाचर्यस्वाइयाज्ञइः। याज्ञैः। यज्ञा। ओइ३
४वा। च्हाइ। बोधानस्तोममन्धसेमाइदाइषृइ। आ-
इषु। एषुवा। ओइ३४वा। च्हाइ। आइच्हीइ। आइच्हो।

॥ निगदः।

अथ द्वितीया।

१ २ ३१२ ३१२ २२ ३१२
योनिष्टइन्द्रसदनेअकारिमानृभिःपुरुहूतप्रयाहि।

३२ २ ३ ५ २ ५२ २ ३ १११
एहिया। ओ२३४वा। हा३४। औहोवा। ई२३४५॥

॥ ३६ ॥ ८१

"ईम्" अयम्(३) "इन्द्रः" "अस्मिन्" अभिषुते सोमरूपेऽध्वसि "जनुषा"(४) स्वभावत एव "न्यवीच" नितरां सङ्गतो भवति(५) (उच समवाये) [अथ प्रत्यक्षस्तुतिः(६)-हे "हर्यश्व!"(७) "त्वा" त्वां "यज्ञैः" स्तोत्रैः हविर्भिर्वा "बोधामसि" बोधयामः। "अन्धसः" सोमस्य "मदेषु" "नो" अस्माकं "स्तोमं" स्तोत्रं "बोध" बुध्यस्व॥ १ ॥ ८१ *

(३)—निरुक्तं तु 'ईम्'-इति पदपूरार्थे व्यवस्थितम्, तथाहि-"अथ ये प्रष्टव्येऽर्थे ऽसिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणाश्च ते मिताक्षरेष्वनर्थकाः; कमीमिद्वृत्रि" नै०१,९। अत एव 'ईमिति पादपूरणः'-इति वि०।

(४)—'जनुषेति तृतीयैकवचनमिदं पञ्चम्यर्थस्य स्थाने द्रष्टव्यम्, पञ्चमी-निर्देशाच्च प्रभवतीति वाक्यशेषः, जन्मनः प्रभृति'-इति वि०।

(५)—'उवोच उक्तवान्'-इति वि०।

(६) बोधेति मध्यमपुरुषयोगादित्यर्थः। तथाहि—"अथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना"-इत्यादि नि०७,२।

(७)—हरी हरिद्वर्णौ अश्वौ यस्य, हे तादृश!।

* ॥ इति अर्द्धः प्रपाठकः ॥

३ १ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ १ २
असोयथानोवितावृधश्चिद्दोवसूनिममदश्चसोमैः ॥२॥८२

४ ५ १ २ १ २, ३ ४ ५
I योनोः। तआइ। द्राइसद्। नाअकारी।

४ ५ १ २ २, ३ ४ ५ ४ ५
तामा। नृभाइः। पुरुहूइ३। ताप्रयाही। आमाः।

१ २ १ २, ३ ४ ५ ४ ५ १
यथा। नोइअवि। तावृधश्चीत्। दादाः। वसू।

२ १ २ २ ४
नीइमम। दाइ४इः। चाइसोऽमाई५६इ ॥१॥

१ २ ३ २, ३ ४ ५ ४ ५ १ २
II योनिष्टआइ। द्रसदनाइ। होवा। आकाइ।

२, ३ ४र ५ ४ ५ १ २ २, ३ ४र ५
राइतमानृभीः। होवा। पू। रुहूइ३। ताप्रयाही।

हे "इन्द्र!" "ते" तव "सदने" "सदनार्थं" "योनिः" स्थानम् "अकारि"। हे "पुरुहूत" बहुभिराहूतेन्द्र! "नृभिः" नटभिर्मरुद्भिः(१) सार्द्धं "तं" योनिम् "आ प्रयाहि"। "नो" अस्माकं "यथा"

---

८२ ऋग्वेदस्य ५,३,८,१।

I,II योनिनी इे।

(१)—'नभिः ऋत्विग्भिः' इति वि०।

अथ ह्नोत्रा ।

गातुर्ऋषिः* ।

१२३ ३ ३ १२ ३ २३ ३ १ २ ३ १ २
अदर्हरुत्समसृजोविखानित्वमर्णवान्बद्बधानाँअरम्णः ।

११ २ ३ १२३ २उ ३२उ ३ २ ३११ ३१
मह्यान्तमिन्द्रपर्वतंवियदःसृजद्वारा अवयद्दानवान्हन् ॥१॥८२

४ ५ १ २र ३ २ ३र ४ ५ ४ ५ १ २
होवा । आमोयथा । नोअविता । होवा । वाजेभिः ।

२ १४र ५ ४ ५ १ २ ३ २ १४र ५ ४
चादुर्दोषस्वा । होवा । नाइममदः । चसोमैः । हो-

५ ४
ष्वा । होषुइ । डा ॥ २ ॥ ८२

"असः" भवसि । नोऽस्माकं "बुधश्चित्" बुधे वर्धनाय चासः ।
("वृधेच"-इति बहृचाः) तथा "वसूनि" "ददो" ऽस्मभ्यं देहि ।
"सोमैः" अस्मदीयैः "ममदो" मादय च ॥ २ ॥ ८२

* "गृत्समदो नाम ऋषिः"-इति वि० ।

८३ ऋग्वेदस्य ४,१,३२,१ ।

४५ ४ २ २ १ २ १
I अदर्हरूत्। समसृजोविखानि। त्वमर्णा२३-

५ २ २ २ १ २ १२ ५ २
४वान्। बहुधानाऽअरामणः। महान्ता२३४मी। द्रप-

१ २ १ ५ १२१२२ १
र्वतंविदद्रः। सृजाश्वा२३४राः। अवयहान। वा२३न्-

२ १
द्रा३४३न्। ओ२३४५हु। डा ॥ ३ ॥

हे "इन्द्र!" "त्वम्" "उत्सम्" उत्स्यन्दमानं मेघं "अदर्दः" विदारितवानसि। तदनन्तरं "खानि" मेघस्योदकनिर्गमनद्वाराणि(१) "व्यसृजः" विशेषेण सृष्टवानसि। किञ्च। "बहुधानाम्" "अर्णवान्" उदकवतो मेघान् "अरमणाः" "विसर्जयसि" क्षारयसीत्यर्थः (अत्र रमणातिर्विसर्जनकर्मा(२)) हे इन्द्र! "यत्" यस्मं (यदिति लिङ्गव्यत्ययः) "महान्त" प्रभूतं "पर्वतं" मेघं(३) विहत-

---

(१)—'खानि खाकाशानि उदकाभिगमनस्रोतांसीत्यर्थः।

(२)—अन्यत्र संयमनकर्मेत्याह माधवः।

(३)—पर्वतमिति मेघ-नामसु पठितम्।

८० क.

४५ ४५ ४५ ४ १२ २
II, अदर्दरुत्समसृजाः। विखानि। त्वमर्णवान्बद्ब-

२२ २१ २ १२ २१ २
धानाँ३अरा२३म्णाः। मह्यान्मिन्द्रपर्वतंविया२३द्वाः।

१ २२ १२२ १२२ १ ३ ५२ २
ब्रजाद्वारा२ः। अवा२यद्दान। वा२। या२३४औशो-

३ १११११
वा। ह्वा२३४५पुन्॥ ४॥ ८३

वानसि। "धारा" अपां "वि सृजत्" व्यसृजः विसर्जितवानसि। "यद्" यदा "दानवान्" दनोः पुत्रान्। यद्वा। उदकस्य दातॄन् मेघान् "अवहन्" अभिहतवानसि। [अत्र निरुक्तम्—"अदर्णा उत्समुत्सउत्सरणाद्दोत्सदनाद्दोत्स्यन्दनाद्दोनत्तेर्वाव्यसृजोस्य खानि त्वमर्णवानर्णस्वत एतानित्यादि(४)]।

"वियद्दः ब्रजद्वारा अवयद्दानवान्"—"वियद्दः ब्रजोविधारा अवद्दानवं ब्रन्"—इति च पाठौ॥ ३॥ ८३

I,II औशनये द्वे।

(४)—इत्यादि पदेभ्योऽपरांशोपात्तः, तथाहि—(एतानित्यस्यानन्तरम्) "माध्यमिकास्थानस्थायान् बाधमानानरमणाः। रमणातिः सयमनकर्मा विसर्जनकर्मा वा। मह्यान्मिन्द्र पर्वतं मेघं यद् व्यवृणोर्व्यसृजो ऽस्य धारा अवदानं दानं दानकर्मोच्यम्"-इति।

अथ चतुर्थी।

पृथौवैन्यऋषिः।

३ १ २ ३ १ २ ३ १ २ ३ १ २
सुष्वाणासइन्द्रस्तुमसित्वासनिष्यन्तश्चित्तुविनृम्णवाजम्।
१ २ ३१ २र३ २उ ३१ २ ३१ २
आनोभरसुवितंयस्यकोनातनात्मनासच्चामात्वोताः ॥४॥८४

I ४५ ४ ५ ३२३ २३५ ४ १
सुष्वाणासः। इन्द्रस्तु। मसित्वा। सनिष्य-
४ ५ ३ र र १
न्तश्चित्तुवि। नृ। म्णवा२३४जाम्। आनः। भरा-
३ ५ ४ ५ र ४ ५ ४ ५ २
ओ२३४वा। सुवितंयस्यको। ना। तानात्माना। सच्चि-
र २ २ ४
या। मा३४३। तू३वोपूता६५६ः ॥ ५ ॥

II २ २ २ ३ ५ १र ३२१
औ३च्चोइच्चोइ। सु२३४ष्वा। णासः। इन्द्रस्तु।

हे "इन्द्र!" "सुष्वाणासः" सोममभिषुतवन्तो वयं त्वां "स्तु-मसि" स्तुमः। हे "तुविनृम्ण" बहुबल बहुधन वा इन्द्र! "वाजं" चरु-पुरोडाशादि-लक्षणमन्नं "सनिष्यन्तः" दत्तवन्तः सम्भक्तवन्तो वा वयं त्वां स्तुमः। यत एवं अतो हेतोः "नो" ऽस्मभ्यं "सुवितं" सुष्ठु प्राप्तव्यं शोभनं धनम् "आभर" आहर प्रयच्छ। "यस्य" यद्धनमतिप्रियत्वेन "कोना" (कुमैः कान्तिकर्मण

८४ ऋग्वेदस्य ८,८,९,१।

I,II पार्थे द्वे।

२ ३ ५ १ २ २ ३ ५ १
मसित्वा। औ३ह्वो३ह्वोइ। सा२३४नी। .ष्यन्ताः।

२ १ २ ३ ४ ५ २ २ २ ३
चो३त्तुवि। नृम्णवाजाम्। औ३ह्वो३ह्वोइ। आ२३४

५ १ २ २ ३ ४ ५ २ २
नाः। भरा। सुविताऽम्। यस्यकोना। औ३ह्वो३

२ ३ ५ १ २ १२ २ ४ २ ४
ह्वोइ। ता२३४ना। त्मना। सचिया। मा३४३। तू३वोपू-

ताई५६ः ॥ ६ ॥ ८४

इदं रूपं। पचाद्यच्। अकारस्य व्यत्ययेन ओकारः। प्रथमैकवचनस्याकारः) कामयमानो भवसि तद्धनमाभरेत्यर्थः(१)। वयं च "त्वोताः" त्वया रक्षिताः सन्तः। "तना" (धननामैतत्(२) विस्तृतानि धनानि "त्मना"(३) आत्मना स्वयमेव अन्य-नैरपेक्ष्येणैव "सह्याम" (सह अभिभवे। धातूनामनेकार्थत्वात्) त्वत्प्रसादाल्लभेमहि।

"सनिष्यन्तश्चित्तुविनृम्णवाजम्"-इति छन्दोगाः। "सस्वांसश्च"-इति बह्वृचाः।

"कोनातनात्मनासह्याम"-"चाकन्त्मनातनासनुयाम"-इति पाठो ॥ ४ ॥ ८४

---

(१)—"किं पुनरभि भवेम? कोनाः। कुत्सितनाथ ते जनाश्च कोनाः। छान्दसत्वात कु-शब्दस्य क-भावः। पञ्चम्यै कवचनस्य छान्दसत्वाच्छादेशः। कोनात्। कुत्सिताद् जनाच्च इत्यर्थः"-इति वि०।

(२)—तनेति धननामसु जनविंशतितमं नैघण्टुकम् २,१०।

(३)—"मन्त्रे घाह्वाद्देरात्मनः। ६। ४। १४१।"-इत्यात्मनश्चाकारलोपः।

अथ पञ्चमी।

सप्तगुर्ऋषिः*।

३ २ ३ १ २ ३ १ २ १ २ ३ १ २ ३ १ २
जगृह्मा*नेदक्षिणमिन्द्रहस्तंवसुवयोवसुपतेवसूनाम्। विह्मा

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
हित्वांगोपतिꣳपुरगोनामस्मभ्यंचित्वंवृषणꣳरयिन्दाः॥५॥ ८५

५ ४ ३ ४ ४ ४ ५ १ २
I जगृह्मानेदक्षिणमोह्मओह्मꣳए। इन्द्रह्म२३स्ता-

४ १ २ २ ३५ २
म्। वसूयवो। वसूपा३। ताइवसू। नाम्। ओ३।

२ ३ २ १४ ४ २
ह्मा। ओ३। ह्मा३ए। विह्माहित्वा। गोपतीꣳम्।

२३५ २ ३ २ २
पुरगो। नाम्। ओ३। ह्मा। ओ३। ह्मा३ए। अ-

१ २ १ २ ३५ २
स्मभ्यञ्चाइ। त्वा३०वृष। णꣳरयिम्। दाः। ओ३।

२ ३ २ १ ३ २ २ ५
ह्मा। ओ३। ह्मा३ए। रयाइन्द्रा३उवा३। ऊ३४पा।

२४ १४ २४ १४ १ १ १ १ ३ १ १ १ १
ओह्मओह्मोवा२३३५उ। वा। ई२३४५॥ ७॥

---

* "सप्तगोरार्षम्"-इति वि०।

---

* "जगृह्मा"-इति ऋग्वेदीयः पाठः।

---

८५ ऋग्वेदस्य ८,१,३,१।

II जगृभ्मातेदक्षिणम्। औहोवाहाइ। इन्द्रा
हा२३४स्ताम्। वह्नयवो। वसुपाइ। ताइवसू। नौ।
वाओ२३४वा। हाइहाइ। विश्माक्षित्वा। गोपतीइ
म्। प्रूरगो। नौ। वाओ२३४वा। हाइहाइ। अस्मभ्य
म्वाइ। वाइ०वृष। णरयिम्। दौ। वाओ२३४वा।
हाइ४। औहोवा। ई२३४५॥ ८॥

III होई२। होई२। होई२। जगृभ्मातेदक्षिणम्।
इन्द्रहास्ता२म्। हास्ता२म्। हास्ता२म्। वसूयवो२
वसुप। तेवसूना२म्। सूना२म्। सूना२म्। वि-
श्माक्षित्वागोपतिम्। प्रूरगोना२म्। गोना२म्। गो-
ना२म्। अस्मभ्यक्षित्रवृष। णरयाइन्दा२। आइ-
न्दा२ः। आइन्दा२। होई२। होई२। होया२।
वा२३४औहोवा। ई२३४५॥ ९॥

I,II सौपर्णे हे।

४ ५र ४ ५र ४ ५र ५ ऽ
IV आआऔहोइ। आआऔहोइ। आआऔहोईवा। औ

२ ऽ १ र २ १र २
३होइ। औ३होइ। औ२३होवा। जगृह्मातांइ। दक्षिणा३म्।

२ ३ ४ ५ ४ ५ ४ ५ २ र १ २
इन्द्रहस्तम्। द्रहस्ताम्। द्रहस्ताम्। वसूयवो। वसुपाइ।

२ २ ४ ५ ४ ५ ४ ५ २ १र र
ताइवसूनाम्। वसूनाम्। वसूनाम्। विद्माहित्वा। गो

२ २ ३ ४ ५ ४ ५ ४ ५
पतीइम्। पूरगोनाम्। रगोनाम्। रगोनाम्।

२ १ २ १ २ ३ ४ ५ ४ ५
अस्मभ्यंचाइ। चा३०वृष। ण०रयिन्दाः। रयिन्दाः।

४ ५ ४ ५र ४ ५र ४ ५र ५
रयिन्दाः। आआऔहोइ। आआऔहोइ। आआऔहोईवा।

ऽ २ ऽ २ १ र २ ५र र
औ३होइ। औ३होइ। औ२३होवा३४। औहोवा।

३ १ १ १ १
ई२३४५॥ १०॥

५र र र १ २ १
V हाउहाउहाउ। ओ। होहोवा। ओ। हो

हे "वसुपते"! वसूनां धनानां स्वामिन्निन्द्र! "ते" तव

III,IV,V वाग्यप्राणि त्रीणि।

२ १र २ २ ३ ४ ५
हावा। जगृह्मात३। दक्षिणा३म्। इन्द्रहस्तम्।

४ ५ ४ ५ २ र १ २ २
द्रहस्तम्। द्रहस्ताम्। वसूयवो। वसुपा३। ताइ-

३ ४ ५ ४ ५ ४ ५ ९ १र
वहनाम्। वहनाम्। वहनाम्। विह्वाहित्वा।

र २ २ ३ ४ ५ ४ ५ ४ ५
गोपतीम्। भूरगोनाम्। रगोनाम्। रगोनाम्।

२ १ २ १ २ ३ ४ ५ ४ ५
अस्मभ्यम्वाइ। वा३०वृष। णरयिंन्दाः। रयिन्दाः।

र र र १ २ १ २
हाउहाउहाउ। ओ। होहोवा। ओ। होहोवा।

१ २ ५र र ३ १ १ १
ओ। हो। हो२। वा२३४। ओहोवा। ई२३४५॥

॥ ११ ॥ ८५

"दक्षिणं" हस्तं(१) "वसूयवो" धनकामा वयं "जगृह्म" गृह्णीमः

---

(१)—यदिचेन्द्रस्य तेजोरूपत्वात् हस्ताद्यभाव एव सिद्धान्तः तथाप्यत्र चारोपितत्वेन समाधेयम् यावादीनामचेतन-प्रसिद्धानामपि तथा स्तुति-दर्शनात्। तथाच यास्कः—"अथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते—

"ऋष्यात इन्द्र स्थविरस्य बाहू।
यत् संगृभ्णा मघवन् काशिरित्ते॥"

*** यथो एतस् पौरुषविधिकैरङ्गैः संस्तूयन्ते इत्यचेतनेष्वपेक्षते भवति "अभिश्रस्त्रभि षरिसेभि राजभिः" इति "यावयन्तिः"-इत्यादि नै० दै०१,७।

अथ षष्ठी।

वसिष्ठऋषिः।

३ १ २ ३ १ २ ३ १२ ३ २ ३ १ २ ३ १ २ ३ २

इन्द्रंनरोनेमधिताहवन्तेयत्पार्यायुनजतेधियस्ताः।

३ १ २ ३ १ २ ३ २ ३ १२ ३२ ३ १ २ ३ १ २

शूरोनृषाताश्रवसश्चकामश्रागोमतिव्रजेभजात्वनः॥६॥८६

२ ३ ४ २ ३ ४ २ १

I इन्द्रन्ना२३४रो। नेमाधा२३४इता। हवन्ता-

२ ३ ४ २ ३ ४ २ १

२३इ। यत्पारा२३४याः। यूनाजौ२३४ताइ। धिया-

(यथा बहुप्रद अर्थिनोऽस्मभ्यमदत्वा न गन्तव्यमिति हस्तं गृह्णन्ति तद्वत्) हे "शूर" विक्रान्तेन्द्र"! त्वां "गोपतिं" (अत्र व्युत्पत्तिभ्यां स्वामित्वं बहुत्वं च प्रतिपाद्यते) बह्वीनां गवां गोपतिं "विप्र" जानीम। अतोऽस्मभ्यं "चित्र" पूजनीयं "वृषणं" वर्षकं "रयिं(२)"धनं "दाः" धेहि॥ ५॥ ८५

८६ ऋग्वेदस्य ५,३,११,१ = यजुर्वेदस्य २८,१ = आरण्यके १.२,१—२—१४—१५—२,२,१—२—३—४—५—६—७—८—४,१४—४.२,१—१४—१६—१९—२०—५,४—५,२,१५।

I गोरीवितम्।

रयिं गो लक्षणं धनम इति वि०।

२ ३ ४ २ ३ ४ २ १
स्ता२३ः। शूरोना२३४र्षा। ताश्रावा२३४साः। चका-

३ ३ ४ २ ३ ४ १ ५
मा२३इ। आगोमा२३४नो। व्रजाइभा२३४जा। त्वन्ना-

२ २ १ ३ ११ ११
३उवाइ। एइ। उपा२३४पू॥ १२ ॥ ८६

"यद्" यदा(१) "पार्य्याः(२)" युद्धे भरण-निमित्तभूतास्ताः प्रसिद्धाः "धियः" कर्माणि "युनजते" प्रयुञ्जन्ते। तदा "नरो" नेतारो "यज्ञानां" सङ्ग्रामाणां वा "नेमधिता" नेमधितौ यज्ञे सङ्ग्रामे वा(३) यमिन्द्रं "हवन्ते" ह्वयन्ति। हे "इन्द्र!" स त्वं "शूरः" "नृषाता" नृणां सम्भक्ता(४)। "अवसो" बलस्य अन्नस्य(५) वा "चकामे" चकाने काम्यमाने सति "गोमति" गोयुते "व्रजे" गोष्ठे "नो" अस्मान् "भज" भागिनः कुरु।

"अवसश्चकामे"-"अवसश्चकाने"-इति पाठौ॥ ६ ॥८६

(१) 'यत् यस्मात्'-इति वि०।

(२) 'पार्य्याः पालयितव्याः प्राप्तव्याः'-इति वि०।

(३)—'नेमधितिः सङ्ग्राम-नामसु यथोदयं मैधयद्कम् (२,१७), यज्ञ-नामसु तु न दृश्यते। विवरणकारस्तु सङ्ग्रामार्थ एव स्वीकृतः।

(४)—'नृषाता—नरो मनुष्याः ऋत्विग्लक्षणात्ते सत्यन्ते सम्भजन्ते यजन्ते नृषाति र्यज्ञः। वन षण सम्भक्तावित्यस्येदं रूपम्। तस्मात् परस्य सप्तम्येकवचनस्य आदेशः। नृषाता—नृषानौ यज्ञ इत्यर्थः'-इति वि०।

(५)—'ऋविर्लक्षणस्येत्यर्थः'।

अथ सप्तमी।

गौरिवीतऋषिः।

वयःसुपर्णाउपसेदुरिन्द्रम्प्रियमेधाऋषयोनाधमानाः।
अपध्वान्तमूर्णुहिपूर्धिचक्षुर्मुमुग्ध्यस्मान्निधयेवबद्धान्॥९॥८७

I वयोचाचाउ। सुपर्णाउपसेदुराइन्द्रम्। प्रियमेधाऋषयोनाधमाउनाः। अपध्वान्तमूर्णुहिपूर्धिचाउक्षुः।

"वयो" गन्तारः(१) "सुपर्णाः" सुपतनाः आदित्यरश्मयः "इन्द्रम्" "उपसेदुः" उपसन्नाअभवन्। कीदृशाः? "प्रियमेधाः" प्रिययज्ञाः(२) "ऋषयो" द्रष्टारः(३) "नाधमानाः" प्रज्ञां याच-

८७ ऋग्वेदस्य ८.३,४.५।

I वैदन्वतम्।

(१)—"वयः पक्षिमदृगादित्यर्थः"-इति वि-।

(२)—मेधदति यज्ञ-नामसु चतुर्थं नैघण्टुकम् ३.१७। प्रियमेधवदविषदित्यस्य व्याख्यानावसरे तु 'प्रियमेधः प्रिया अस्य मेधा' इत्यादि यास्कः ४.१७।

(३)—ऋषिरिति दर्शनमिति नैघण्टुकभाष्यादौ। "माध्यन्दिनसवनाग्नि ऋषयो बभूवुः"-इत्यादि लिं० मै०१.२०।

मुमुग्धि। औ३ह्वोऽइ। आ२१। स्मा३न्निध। येऽ-
४३। वा३बा५ड्वा६५६न्॥ १८॥ ८७

माना:(४) (याचनप्रकारउच्यते)· हे इन्द्र ! "ध्वान्तम्" अन्धकारम् "अपार्णुहि" परिहर ("अपध्वान्तमूर्णुहीति येन तमसा प्रावृतो मन्येत तन्मनसा गच्छेदपहैवास्मात्तद्व्यपत्यत"-इत्यैतरेयब्राह्मण-मत्रानुसन्धेयम्) "पूर्धि" पूरय(५) "चक्षुः" तेजश्च(६)। "मुमुग्धि" मोचय च "अस्मान् निधयेव बद्धान्"। "निधा" पाश्या भवति पाश्या पाश-समूहः(७)। पाश-समूहेन बद्धान् यथा मुञ्चन्ति तद्वत्। (अत्र "वयो वैर्वहुवचन मित्यादि निरुक्तं(८) द्रष्टव्यम्॥ ॥ ७॥ ८७

---

(४) माधमाना: इत्यस्य याचमाना: इत्यर्थ: कृतो याच्ञेनैव नै०४,३।

(५)—"पूर्धि पूरय"-इति नि० नै०४,६।

(६)—"चक्षु: ख्यातेर्वा चष्टेर्वा"-इति नि०नै०४,६।

(७)—"निधा पाश्या भवति, यन्निधत्ते। पाश्या पाशसमूहः। पाशः पाशयते, निपाशनात्"-इति नि० नै०४,२।

८)—नैगमकाण्डेय तनीयखण्डम्।

अथाष्टमी

वैनोभार्गवऋषिः।

१ ० १२३ १।२ २२ ० १२२२ ३ १ ०
नोकेसुपर्णमुपयत्यन्तꣳहृदावेनन्तोअभ्यचक्षतत्वा।

१२ ३ १ ० ० २ ३ २ ३ १ ० ३ १ २ ३ ०
चिरꣳपत्त वरुणस्यदूतयमस्ययोनौसकुनंभरण्यम् ॥८॥८८

I आ२याम। अयायम। औ३च्चो३इ। आ२इ।

१२ २ ३ २ १ ३ १ १ ६ २
ऊ२। नाकेसुपार्णमुपयात्यन्ताम्। पतन्तम्। औ३च्चो३इ।

आ२इ। ऊ२। आ२याम। अयायम। औ३च्चो

३इ। आ२इ। ऊ२। हृदावेनान्तोअभ्यचाक्षतत्वा।

३ २ ६ ० १
क्षतत्वौ३। च्चो३इ। आ२इ। ऊ२। आ२याम।

३ २२ १ ६ २ १
अयायम। औ३च्चो३इ। आ२इ। ऊ२। चिर

८८ उत्तरार्चिकस्य ९,२,१३,१ = ऋग्वेदस्य ८,७,८,३ = आरण्यके ३,२,३।

I यामम्।

३ २ १ ३ २ १ २ २
एषपात्तंवरुणास्यदूताम्। स्यदूतम्। औ३ह्वो३इ।

१ ३ २ १ ऽ २
आ२इ। ऊ२। आ२याम्। अयायम्। औ३ह्वो-

४ २ २ १ २ २ ३ २ १
३इ। आ२इ। ऊ२। यमस्ययोनौशकुनांभुरण्यूम्।

३ २ १ ऽ २
भुरण्युम्। औ३ह्वो३इ। आ२इ। ऊ२। आ२-

१ ३ २ १ ऽ २ १
याम्। अयायम्। औ३ह्वो३इ। आ२इ। ऊ२।

२ २ १ २ १ २
वाचा३१उवा२३। ए३। दिवम्। ए३। दिवम्। ए३।

१ २ १ १ १ १
दिवम्। ए३। दिवा२३४५॥ १४॥ ८८

हे "वेन!"(१) "त्वा" त्वां "हृदा" हृदयेन मनसा "वेनन्तः" कामयमानाः स्तोतारः "नाके" अन्तरिक्षे "अभ्यचत" अभिपश्यन्ति तदानीं त्वम् उपगच्छसीति शेषः। कथंभूतं? "सुपर्णं" शोभन-पतनं "पतन्तं" अन्तरिक्षं गच्छन्तं। "हिरण्यपक्षं" हिरण्मयाभ्यां पक्षाभ्यां युक्तम्। "वरुणस्य" जलाभिमानिनो

(१)—"वेनति" इति काण्डिकर्मसु चतुर्थं नैघण्टुकम्, (२.६) अर्थनिकर्मसु च हि चत्वारिंशत्तमम् (३,१४)।

अथ नवमी।

बृहस्पति र्नकुलो वा ऋषिः।

१ २ ३१ २३२ ३२३१ २ ३२ १ २ ३ ६ २

ब्रह्मजज्ञानं प्रथमं पुरस्ता दिसीमतः सुरुचो वेन आवः।

क २४ ३१२ ३ २ ३२३ २ ३१२ ३ १ २

सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥९॥८८

देवस्य(२) "दूतं" चारम्। "यमस्य" नियामकस्य वैद्युताग्नेः(३) "योनौ" स्थाने अन्तरिक्षे अन्तरिक्षे "शकुनं" पक्षिरूपेण वर्त्तमानम्(४)। "भुरण्युं" भर्तारं वृष्टि दानादिना सर्वस्य जगतः पोषकं(५) (भुरण् धारण-पोषणयोः कण्ड्वादिः। अस्मादौणादिक उ प्रत्ययः॥ ८॥ ८८

८९ अथर्ववेदस्य ५,४,१।

(२)—वरुणो मेघ-वर्षण-हेतु-भूतो वायु विशेषः "वरुणो वृणातीति सतः"-इत्यारभ्य "वृष्टिर्वुनक्ति भूमिम"-इत्यन्तेन यास्कोक्तेः।

(३)—यमशब्दस्य तु नियामकत्व योगार्थ लभ्यम् "अग्निरपि यम उच्यते नि०दै०४, २०)"-इति "तृतीयो अग्निः (नि०दै०४,२१)" इति च यास्कोक्तेः वैद्युताग्नित्वञ्च लभ्यते तृतीयो अग्नि-इत्युक्तेः तृतीयस्थानो द्युलोकः, तस्याः यथारूपोऽग्नि इति च लभ्यते। अतएवाह विवरणकृत् 'यमस्य योनौ यम आदित्य, तस्य योनिः स्थान मण्डलं, द्युलोके यदा आदित्यमण्डल तत्र व्यवस्थितम' इति।

(४) 'शकुन शक्त योनित' आत्मात् कर्त्तु ममर्थ मित्यर्थ' इति वि०।

(५)- 'भरण्यु' भरणशीलं मित्यर्थ' इति वि०। 'भरण्यु' इति विश्वनामसु पठितम् निघण्टुकम् ३,१५।

I ब्रह्मा। ब्रा२३ह्मा। जज्ञानंप्रथमंपुरास्तात्।
विसाइ। वा२३इसो। मत सुरुचोवेनआवः। सबु।
सा२३वू। घ्नियाउपमाअस्यवाइष्ठाः। सताः। सा२३-
ताः। चयोनिममतश्चवाइवा३४३ः। ओ२३४५इ। डा॥

॥ १५ ॥ ८९

II ऊवेइ३ह्वा३इ। ऊवेइ३हो३इ। चिपाइया। ब्रह्मज-
ज्ञा। नाइ०प्रथ। मंपुरस्तात। विसीमताः। सुरु-
चः। वेनआवाः। मबुध्नियाः। उपमाः। अस्यवि-
ष्ठाः। मतश्चयो। नीइमस। तश्चिवाः। ऊवेइह्वा-

I,II ऋतसामनी हे।

३इ। ऊवे३ऽहा३इ। हि। षाः३। आ२३४। औ-
होवा। ए३। ऋतमसृतम् ए३। ऋतमसृता२३४५म्॥

॥ १६ ॥ ८९

वेनो नाम कश्चित् कमनीयो(१) गन्धर्वः। तथाच शाखान्तरे "वेनस्तत्पश्यन्नित्यारभ्य गन्धर्वो नाम नित्याम्नातम्।

स च "वेनः" "परस्तात्" पूर्वस्मिन् काले "जज्ञानम्" उत्पन्नम् "अभिज्ञं" वा "ब्रह्म" ब्राह्मण-जातिरूपं(२) "प्रथमम्" आद्य-शरीरम। अतोऽस्याः सर्वं दृश्यमानायाः "सुरुचः" शोभनायाः कान्तेः "आवो" रक्षितवान् (वसुमित्यनुग्रहसूचकः कश्चिदनुकरणशब्दः तथाविधं शब्दं मुखेनाभिव्यञ्जयन्। ब्राह्मण-शरीर-महत्या कान्त्या योजितवानित्यर्थः) स वेनः "बुध्नाः" मूलं अन्तरिक्षं वा बुध्नः, तत्र भवाः, अस्योपमाः एतदीय-शरीर-कान्ति-सदृशाः, आदित्य-प्रकाशादि-रूपाः कान्तीः(३) "विष्ठाः" विशेषेण स्थापितवान् तथा "सतश्च" इदानीं विद्यमानस्य च "असतश्च" भविष्यद्रूपत्वेदानीमविद्यमानस्य च "योनिम्" उत्पत्तिकारणं निवास-स्थानं वा "विवः" विस्तृतवान् निष्पादितवानित्यर्थः॥ ९॥ ८९

(१)—"वेनो वेनतेः कान्तिकर्मणः" इति नि०दै०४,३८।

(२)—"ब्रह्म-शब्दं नादित्याद्यं च स्मृयते" इति वि०।

(३)—"बुध्नाः दिशः" इति वि०।

अथ दशमी।

सुहोत्रऋषिः।

१२ ३१२ ३२३ १२११२३१२
अपूर्व्यापुरुतमान्यस्मैमह्वेवीरायतवसेतुराय।

३ १२३२३१२ ३१२ ३१२
विरप्शिनेवज्रिणेशन्तमानिवचःस्यस्मैस्थविरायतक्षुः॥१०॥९०

इति तृतीय-दशतिः॥ ३॥

५२२ २ ४ ५ २२२ २३४५ २
I अपूर्व्याऽओहोवोहाइ। पूरुत। मानियस्मै। म-

१२२ २ १ २ ३४५ १
ह्वेवीरा। याऽतव। साइतुराया। विरप्शि। नाइ-

३४५२ २ २२५ २१२ २ १
वज्रिणे। शाऽ४३०तमानि। वचाꣳसिया। स्माऽइस्थ-

"अपूर्व्या" अपूर्व्याणि पूर्वैरकृतानि नूतनानि "पुरुतमानि" बहुतमानि "शन्तमानि" सुखकृत्तमानि "वचांसि" स्तुति-रूपाणि वाक्यानि "अस्मै" इन्द्राय "तक्षुः" ततक्षुः (तक्षतिः करोतीत्यर्थे। कुर्वन्ति स्तोतार इति शेषः। कीदृशाय?

---

९० ऋग्वेदस्य ४,७,४,१।

I वारवन्तीयम्।

२ २ ४ ५ ३ ४ ५ २ २
वि। रायतत्नूः। स्थविरायतत्नूः। स्थवि। रा३४३।
२ ४ १ २२ २ १ १ १
या३ताप्तुत्नु६५६ः। स्थविरायतत्नू२३४५ः॥ १०॥ ९०

"महे" महते। "वीराय" विविध-शत्रूणां मारयित्रे। "तवसे" तवस्विने बलवते(१)। "तुराय" त्वरमाणाय "विरप्शिने" विशेषेण स्तुत्याय "वज्रिणे" वज्रवते। "स्थविराय" प्रवृद्धाय।

इति श्रीसायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दीयाख्याने तृतीयस्याध्यायस्य नवमः खण्डः॥ ९॥

अथ दशमे खण्डे

सेषा प्रथमाः।

अस्याः परस्याश्च धृतानऋषिः*।

१ १ २ १ १ २ १ २ २ २ १ २ १ १ २
अवद्रप्सअंशुमतीमतिष्ठदायान.ंक्रृष्णोदशभिःसहस्रैः।
२ २ ३ १ २ ३ १ २ ३ १ २ १ २ १ २
आवत्तमिद्रःशच्याधमन्तमपस्नीहितिंनृमणाअधद्राः‡॥ १॥ ९१

---

* 'तिरश्चैकतानस्यार्षम्'-इति वि०।

† "इयानः"-इति, ‡ "स्नेहितीनमणाअधत्त"-इति च ऋग्वेदीय पाठः।

---

९१ ऋग्वेदस्य ६,६,३४,३।

(१) —तवः इति बलनामसु चतुर्थं निघण्टुकम् १,९

I अवद्रा२३४प्सा:। आ॒शूमा२३४तीम्। आ-
तीइ। ष्ठा२३४पृत्। ईयाना२३४:क्र। ष्णोदाशा२३४
भी:। साह्वाइ। स्वा२३४५इ:। अवत्ता२३४मो।
द्र:शाची२३४या। धामाइ। ता२३४५म्। आप:स्नो२३-
४क्षी। तिनृमा२३४णा:। अधाऽद्रा२३४औह्वीवा।
अधाइद्रा२३४५:॥ १८॥

II अवद्रप्सा६ए। आ॒शूमतीमतिच्छा२३त्। ईया-
न:क्रष्णा:। दाशभि:सह्स्रा२३इ। आवत्तमिन्द्रा:।
शाचियाधमन्ता२३म्। अपास्नोद्धितीम्। नृमणा२३।
अधाऽद्रा स्नोऽइ। डा॥ १८॥

I,II शुरपर्विणौ द्वे।

I अवद्रोषाअ॑ण्यमतीम्। औ३ह्वो३४इ। औह्वो-
वा। आतीइष्ठात्। औ३ह्वो३४इ। औह्वोवा। ई-
यानःकृष्णाः। औ३ह्वो३४इ। औह्वोवा। दाश्। भा-
इःसचसैः। औ३ह्वो३४इ। औह्वोवा। आवर्त्तमिन्द्राः।
औ३ह्वो३४इ। औह्वोवा। शाचि। याधमन्ताम्।
औ३ह्वो३४इ। औह्वोवा। अपास्नीहितीम्। औ३ह्वो३४इ।
औह्वोवा। नृमा२णा२३४औह्वोवा। अधा३द्रा२३४५ः ॥२०॥

II अवद्रोषाअ॑ण्यमतीम्। ए३। औ३ह्वो५वा।
आता२३४५इषा६५इत्। ईयानःकृष्णोदश्भिःसचभुवः।
आवर्त्तम्। आइ। द्रा३शचि। याधमन्ताम्। अप-
स्नीहितिनृमणाः। ओवा। अधद्रा३आ२३४५ ॥ २१ ॥९१

I,II स्तोमरश्मि दे।

(अत्रेतिहास माचक्षते—पुरा किल कृष्णो नामासुरः दश-सहस्र-संख्याकै रसुरैः परिवृतः मन् अंशूमतीनामधेयाया नद्या-स्तीरे अतिष्ठत् । तत्र तं कृष्णं सुदक-मध्ये स्थितम् इन्द्रो बृहस्पति-महागच्छत् । आगत्य तं कृष्णं तस्यानुचरांश्च बृह-स्पति-सहायो जघानेति केचिदन्यथा वदन्ति । तेषां कथा-हेतुः—दृषच्छब्दात्सुदक कृष्णोऽभिधीयते । स तु सोमः 'दृषच्चश्चस्कंदेत्यादिषु-सोमपर्यवेनोक्तत्वात्[१]) । एतत्पदमाश्रित्याहुः—

"अपक्रम्य तु देवेभ्यः सोमो वृत्रभयार्दितः ।
नदीं मंशुमतीं नाम अभ्यतिष्ठत् कुरुं प्रति ।
तं बृहस्पतिनैकेन सोभ्ययात्तत्र वृत्रहा ।
योत्स्यमानः ससंहृष्टै र्मरुद्भि र्विविधायुधैः ।
दृष्ट्वा तानागतान् सोमः स्व-बलेन व्यवस्थितः ।
मन्वानो वृत्रहायान्तं जिघांसु मरिसेनया ।
व्यवस्थितं धनुष्मन्तं त मुवाच बृहस्पतिः ।
मरुत्पतिं रयिं सोम प्रेहि देवान् पुनर्विभो ! ।
सोऽब्रवीन्नेति तं शक्रः खड्ग एव बलाद्बली ।
इन्द्राय देवानादाय तं पुनर्विधिवत्पुरा ।
जघ्नुः पोत्वा च दैत्यानां समरे नवतीर्नव ।

---

(१)—निरुक्तावित्थम् तथाहि "दृषत् स्थाने वृक्षणा दैत्येन. दृषत् संस्कृत-स्थानीयो

तदवद्रप्सइत्यस्मिन्नृचे सर्वं निगद्यते। एतदनार्षत्वेऽनादरणीयं भवति। एषोर्थः क्रमेण ऋचि वक्ष्यते। तथाचास्य ऋचोऽयमर्थः—

द्रप्सो द्रुतं सरति गच्छतीति "द्रप्सः"(प्रषादरादिः) द्रुतं गच्छन् "दशभिः सहस्रैः" दशसहस्र-सङ्ख्याकै रसुरैः "इयानः" इयमानः "कृष्णः" एतन्नामकोऽसुरः अंशुमतीं नाम नदीं मनु "अवातिष्ठत्" अवतिष्ठते। ततः "अध्वा" स्व-कर्मणा प्रज्ञाने न वा(१) "धमम्" उदकस्यान्तरच्छसन्तम्। यद्वा। जगद्भीतिकरं शब्दं कुर्वन्तं "तं" कृष्णासुर"मिन्द्रो" मरुद्भिः सह "आवत्" प्राप्नोत्। "अथ" अनन्तरं पश्चात् "तं" कृष्णासुरं तस्यानुचरांश्च हतवान् इति वदति। "नृमणाः" नृषु मनो यस्य सः। यद्वा। कर्मनेष्वृत्विक्षु एकविधं मनो यस्य स तथोक्तः। तादृशो भूत्वा "स्रोहितिं" (स्रोहितिर्वधकर्मसु पठितः (नि० नै० ३,१९) हिंसित्वो तस्य सेनाम् "अपद्राः" (द्राति: कुत्सित-गति-कर्मा। स इन्द्रः "अपगमयत्" अबधीदित्यर्थः। तस्यानुचरान् हत्वा तम् असुरं हतवानित्यभिप्रायः॥ १॥ ९१

भवति। सर्वे देवा पुष्करे त्वाधारयन्। पुष्करमन्तरीक्षं भवति भूतानि। उदकं पुष्करं पूजाकरं पूजयितव्यम। इदमपीतरत् पुष्करमेतस्मादेव पुष्करं वा पृथं पृथतेः"-इति नि० नै० ५,१४॥

(१)—अध्वेति कर्मनामसु द्वाविंशतितमं पदम् (नै० २,१) प्रज्ञा-नामसु च मध्यमम् (नै० ३,९)।

अथ द्वितीया।

३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ २र
वृत्रस्यत्वास्वमथादीषमाणाविश्वे देवाअजङ्घ्र्येसखायः।

३ १ २ ३ १ २ ३ २ ३ २३ ३ १ २
मरुद्भिरिन्द्रसख्यन्ते अस्त्वथेमाविश्वाःपृतनाजयासि ॥ २ ॥९२

२ ऽ २ ऽ २ २ १
I हाऽ। ओ३हाऽ। ओ३हाऽ। हाइ। वृत्रस्यत्वा।

२ १ र २, ३ ४ ५ २ १ र र २ २, ३
स्वमथात्। ईषमाणाः। विश्वेदेवाः। अजङ्घ्रऽः। येस-

४ ५ २ १ २ १ २ ३ र ४ ५ २ १ र
खायाः। मरुद्भिराइ। द्राऽसखि। यन्तेअस्तू। अथे

र २ १ २ ३ ४ ५ २ ऽ २
मावाइ। स्वाऽःपृत। नाजयासी। हाऽ। ओ३हाऽ।

ऽ २ २ ५र र १ २ १ १ १ १
ओ३हाऽ। हाऽ४। औहोवा। आ औ३हो२३४५ ॥२२॥

१ २ २ १ २ २, ७र ५
II होये३। हयाये३। हया। औहो२३४वा।

२ १ २ १ र २ ३ ४ ५ २ १ र
हाइ। वृत्रस्यत्वा। स्वमथात्। ईषमाणाः। विश्वे-

---

९२ ऋग्वेदस्य ६,६,३३,२।

I,II धृषतो मारुतस्य सामनी द्वे।

र १ २ ३ ४ ५ २१ २
देवाः। अजहुः। येमखायाः। मरुद्भिराइ। द्राइ-

१ ३ ३र ४ ५ २१र र २ १ २ ३
सखि। यन्तेअलू। अशेमावाइ। स्वाइःपृत। नाज-

४ ५ १ २ २१ २ २ ३र ५
यासी। हुये३। हुयाये३। हुया। औहो२३४वा।

२ र५ र १ २ २ १ २ १ १ १ १
हा३४। औहोवा। आओ३हो। आओ३हो३२४५॥

॥ २३ ॥ ९२

हे इन्द्र! तव ये "विश्वदेवाः" प्राक् मखायः मङ्क्ष्यामि मखित्वं कुर्यामिति मित्राख्यभवन्। सर्वे देवाः "हतस्य" हतासुरस्य "श्वसथात्" (श्वसेरोणादिकोऽथप्रत्ययः (, ,)। सर्वान् आगच्छतो दृष्ट्वा तेषां भीत्युत्पादनाय हतासुरः श्वास मकार्षीत्) श्वासाङ्गीताः मत्तः अतएव "ईषमाणाः" सर्वतः पलायमानाः "त्वा" त्वाम् "अजहुः" मङ्क्ष्यामि त्यक्तवन्तः। एवं सति हे इन्द्र! "मरुद्भिः" सह "सख्यं" सखिभावः "ते" तवास्तु। ये मरुत्सख्यं न परित्यजन्ति तैः सहेति। "अथ" अनन्तरम् "इमाः" विश्वाः सर्वाः "पृतनाः" शत्रुसेनाः "जयासि" स्व-बलेनाभि-

८३क,

अथ तृतीया।

बृहद्रथन्तरऋषिः।

३ १ २ ३ १र २र ३ १र २र ३ १ २ ३ १ २
विधुन्दद्राणꣳसमनेबहूनांयुवानꣳसन्तंपलितोजगार।
३ १ २ ३ १ २ ३ १ २ ३ २ ३ १र २र
देवस्यपश्यकाव्यंमहित्वाद्याममारसद्यःसमान ॥ ३ ॥ ९३

४ ५ १ ७ २ १ २ ३ ४
I वीधूम्। दद्रादद्रा। णा३ꣳसम। नाइबहू-
५ ४ ५ १ ७ २ १ २ ३
नाम्। यूवा। नꣳसानꣳसा। ता३०पलि। तोज-
४ ५ ४ ५ १ ७ २ १र २ ३ ४
गारा। देवा। स्यपास्यपा। श्या३काव्वि। यम्महि-

भवसि(१) (अनेन हतघ्नं तमिन्द्रमाह(२)। अत्र मन्त्रे "इन्द्रो वै वृत्रं हनिष्यन्" इत्यादि ऐतरेय-ब्राह्मण मनुसन्धेयम् ॥ २ ॥ ९२

---

९३ उत्तरार्चिकस्य ९,१,७,१ = ऋग्वेदस्य ८,१,१९,५ = अथर्ववेदस्य १४,२६,९।

(१)—'वृत्रस्य' मेघस्य (क) 'असथात्' आमर्षणात् गर्जितशब्दादेवेत्यर्थः 'दृषमाणाः' पशवश्च; 'विश्वे देवाः' सर्वे देवाः 'अजञ्ज; त्यक्तवन्तः, के? उच्यतेऽत्र—'सखायः' ये तव सखीभूता आसन्; केवलैर्मरुद्भिः (ख) हे इन्द्र! 'सख' 'ते' तव 'अक्तु' (ज्ञोदयं सदर्थे दृश्यः)'-इत्यादि वि०।

(क)—वृत्रः इति मेघ-नामसु अष्टाविंशति पदम् नै०१, १०।

(ख)—"मरुतः मितराविणो वा मितरोचिनो वा मरुद्वन्नीति वा"-इत्यादि नि०दै०५,१२।

(२)—एष एव मन्त्रः पौराणिक इन्द्रोपाख्याने बीजमिति भावः।

५ ४ ५ १ ७ २ १ २
त्वा। आद्या। मममामा। राऽमहि। याऽ४३:।
२ ४
साऽमाऽनाऽ५ऽ६ ॥ २४ ॥

II ३ ३ ३ १११ २ १
ह्यु४। आ४५। ह्यु। ह्यु२३४५। विधुं-
२ १ २ ३ ४ ५ २ १२
दद्रा। णाऽ्यसम। नाऽबह्वनाम्। युवानऽ्मा।
२ १ २ ३ ४ ५ २ १२ १
ताऽ०पलि। तीजगारा। देवस्यपा। ग्याऽकावि।
२ ३ ४ ५ ३ ३ ३ १११
यन्मन्वित्वा। ह्यु४। आ४५। ह्यु। ह्यु२३४४।
२ १२ २ १ २ २ ४
अद्याममा। राऽसहि। याऽ४३:। साऽमाऽनाऽ५ऽ६॥

॥ २५ ॥ ९३

अनया कालात्मक इन्द्रः स्तूयते—"विधुं" विधातारं सर्वस्य युद्धादेः कर्त्तारं(१) (वि-पूर्वो दधातिः करोत्यर्थे) तथा "समने" (अनन मनः प्राणनं। सम्यगनोपेते) सङ्ग्रामे(२) "बह्वनां" शत्रूणां

I,II सोममामनी द्वे।

(१)—'दृष्टि-प्रदानादिना उपकरणेन सर्वजगतः धारयितारम्'-इति वि०।
(२)—'समनम्' इति सङ्ग्रामनामसु पठितम् निघण्टुकम०२.१७।

अथ चतुर्थी।

द्युतानऋषिः।

२ ३ २३२३ १ २ ३ १ २ ३ १ २
त्वꣳहित्यशत्रुभ्योजायमानोशत्रुभ्योअभवः शचीन्द्र।

३१२ २२ ३ १२ २२ ३ २ ३ १ २ ३ १ २
गूढेद्यावापृथिवीअन्वविन्दोविभुमद्भ्योभुवनेभ्योरणन्धाः॥ ॥९४

"ददृाण" द्रावकम्। ईदृक्समर्थ्यापेतमपि "युवान" रुन्तम्। "पलितोजगार"(३) निगिरतीन्द्र-कृपया। एव मुक्त-लक्षणं वक्ष्यमाण-लक्षणं च "देवस्य" कालात्मकस्येन्द्रस्य "महित्वा" महत्त्वेनोपेतं "काव्यं" सामर्थ्यं(४) पश्य हे बृहदुक्थ! (ऋषिरात्मान मामन्त्र्य वदति—) तथा यो जरां प्राप्तोऽद्य "ममार" म्रियते "म" "ह्यः" परेद्यः; "समान" सम्यग् जीवति पुनर्जन्मान्तरे प्रादुर्भवतीत्यर्थः(५)॥ ३॥ ९३

९४ ऋग्वेदस्य ६,६,३५,१।

(३)—'पलितः पलितत्वं वृद्धत्वस्यैः पलक्षणम्, वृद्धः सन्नहम जगार, गृ स्तावित्यस्य उत्तमपुरुषस्यैकवचनमिदम् स्तौमीत्यर्थः' इति वि०।

(४) 'कविर्मेधावी, तस्य भावः काव्य कवित्व मित्यर्थः, कीदृशं पुनः कवित्वम्? उच्यते—महित्वा महत्त्वेन स्वमाहात्म्येनेत्यर्थः' इति वि०।

(५)—यास्कस्त्विमं मंत्रं व्याचष्टे—"विधुं" विधमनशीलं 'ददृाण' दमनशीलं 'युवान' चन्द्रमसं 'पलितः' आदित्यो 'जगार' गिरति स ह्यो म्रियते स दिवा समर्दित इत्यधिदैवतम्, अथाध्यात्मं—विधुं विधमनशीलं 'ददृाण' दमनशीलं 'युवान' महान्त 'पलितः' आत्मा गिरति रात्रौ म्रियते रात्रिः समर्दितेत्यात्मगतिमाचष्टे" इति नि० ५१२,१८।

I औहोइतुवाम्। हत्वत्मन्नभ्योजायमानाऽ२३४:। औ-
होअग्ना। चभ्याअभवः शतक्रिन्द्रा२३४। औहोइगढे।
घावापृथिवोअन्वविन्दा२३४:। औहोइविभू। मङ्गयो-
भुवनेभ्योरणन्धा२३४५:॥ २६॥

II ओहाइ। हत्यौवाओ२३४वा। मन्नभ्योजायमा।
नोवाउ। औवा२३४५। ओमोहाइ। चभ्यौवाउ२३४वा।
अभवःशतक्रि। द्रोवाउ। ओवा३४५। गटोहाइ।
घौवाओ२३४वा। पृथिवोजन्वि। दोवाउ। ओवा३४५।
विभोहाइ। मङ्गयौवाओ२३४वा। भूवने। भ्योवाउ।
ओवा३४५। रणापुन्धाः। हो५इ। डा॥ २७॥ ९४

I,II द्रुन्द्रवज्रे दे।

अथ पञ्चमी।

वामदेवऋषिः।

३१२ २२३ १ २ ३ १ २ ३ १ २ २२ ३ १ २
मेडिन्नत्वावज्रिणम्भृष्टिमन्तम्रूधस्वानंवृषभंस्थिरप्सुम्।

३ २२ ३ १ २ ३१२ २२ ३ १ २ ३ १ २
करोष्यर्यक्षरुषीर्दुवस्युरिन्द्रद्युक्षवृत्रहणंगृणीषे ॥ ५ ॥९५

हे "इन्द्र!" "त्वं हि" त्व खलु "त्यत्" तदेतत् कर्म कृतवानसि। किं तदुच्यते? "जायमानः" त्वं प्रादुर्भवन्नेव "अशत्रुभ्यः" शत्रु-रहितेभ्यः "सप्तभ्यः" कृष्णा-वृत्र-नमुचि-वराहारादिभ्यः सप्तभ्यो बलवद्भ्यः प्राणिभ्यः "शत्रुः" "अभवः" सप्तभ्यः पूर्व्यः शत्रुः शातयिता दारयिता अभवः (सप्त यत्पुरःशर्म-शार-दीर्दर्त्ति इति हि निगमः) अथवा सप्तभ्यःसप्त होत्र-प्रभृतयो होत्रकाः, तदर्थं यज्ञेषु प्रादुर्भवन्नेव कर्म-विघ्नकारिभ्यः शत्रुरभवः। किञ्च। हे इन्द्र! त्वं "गृढे संवृते द्यावापृथिव्यौ सूर्यात्मना प्रकाश्य अनुक्रमेण ते "अविन्दः" अलभथाः तथा "विभुमद्भ्यो" महत्त्व-युक्तेभ्यः "भुवनेभ्यो" लोकेभ्यः "रणं" रमणं "धाः" धारयसि विदधासीत्यर्थः ॥ ४ ॥ ९४

I मेडीम्। नत्वावज्रिण्भृष्टिमा२३न्ताम्। पुरु-
धस्मानंवृषभ॰स्थिरा२३स्नम्। करोष्यर्यस्तरुषाइदुंवा२३-
स्यूः। आइन्द्रद्युत्तम्। वृत्रा२३। हारणा२३४औहो-
वा। गृणीइषे२३४५॥ २८॥

II मेडिन्नत्वा। वा३४औहो। ज्राइ। णभार्ष्टाइ-
मौ। वा३२३४। ताम्। पुरा३४औहो। धस्मान
वृ। षभ॰स्थाइरौ। वा३२३४। स्नूम्। करा३४-
औहो। षिअर्यस्त। रुषाइदूंवौ। वा३२३४। स्यूः।
इन्द्रा३४औहो। द्युत्तम्। वृत्रा२३। हारणा२३४
औहोवा। गृणीषे२३४५॥ २९॥ ९५

I,II भृष्टिमतः सूर्यवर्चसः सामनी द्वे।

हे "इन्द्र!" "दुवस्यः" दुवः परिचरणं स्तुत्यादि-लक्षणं(१) तदिच्छुस्त्वं यतः "अर्यः" अरीन् अस्मद्विरोधिनः(२) "तरुषीः"(३) तारकान् जेतॄनस्मान् करोषि (यद्वा। तरुषीः तरणस्वभावात्। पक्षद्वयेऽपि लिङ्ग-व्यत्ययः। अर्यः अरीनस्माकं शत्रून् करोषि उपचीर्णानिति शेषः) अतः "मेढिंन" (मेढिरितिबलङ्नाम) [नै०१,११,१८] माध्यमिकीं वृष्टि-प्रदां वाचमिव तां यथाहयर्थं स्तुवन्ति तद्वत्(४) "त्वा" त्वां "गृणीषे" स्तौत्र मुच्चारयामि स्तौमि(५) कीदृशं त्वां? "वृत्रहणं" वृत्रस्यासुरस्य मेघस्य वहन्तारं। "द्यृक्षं"(६) द्यौ लोके वर्त्तमानम्। "पुरुधस्मानं" वहना मुदकानां धारकं(७) (यद्वा। वर्ण-व्यत्ययः(८)। पुरूणां बहूनां दासयितारं शत्रूणां क्षपयितारं) "वृषभं" कामानां वर्षकम्(९)। "स्थिरप्सुं" स्थिररूपं। न ह्यैन्द्रस्य रूपं कदाचिदपि प्रच्यतं भवति (यद्वा। स्थिराणां शत्रूणां भक्षकं विघातिन

(१)—'दुवस्यते'-इति परिचरण-कर्मसु पञ्चमं नघण्टुकम ३,५।

(२)—'अर्यः'-इति ईश्वर-नामसु द्वितीयं नैघण्टुकम् २.२२। अतएव 'अर्यः ईश्वरः'-इति वि०।

(३)- 'तरुषमिति वधकर्म वधेन सङ्क्रामो लक्ष्यते, सङ्क्रामयितारमित्यर्थः'-इति वि०।

(४) 'अन्नमौदकमित्यर्थश्च दृश्यम्, वारिमन मित्यर्थः'-इति वि०।

(५)—'गृणीषे मध्यमपुरुषैकवचनमिदम् उत्तमपुरुषैकवचनस्य स्थाने दृश्यम्' इति वि०।

(६)—दिवि द्यौलोके क्षियति निवसति इति द्यृक्षः, तम्।

(७)—'पुरुरिति धननाम. धस्मान मिति धमे ह्मने इत्यस्येदं रूपम्'-इति वि०।

(८) दस्मानमित्येवं दकारवर्णे पठितव्ये धस्मानमिति धकारवर्णपाठो वर्णव्यत्ययः

(९)—'वर्षणाद् वृषभः'-इत्यादि नैरुक्तम् दै०३,२३।

अथ षष्ठी।

वसिष्ठऋषिः।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
प्रवोमहेमहेवृधे*भरध्वप्रचेतसेप्रसुमतिंकृणुध्वं।

१ २ ३ १ २ ३ २ ३ २
विशःपूर्वीःप्रचरचर्षणिप्राः॥ ६ ॥ ९६

५ ४ १ २ ३ २ ३ १ २ ३ १
1 प्रवाः। माहेमहेवृधे। भराधू३वाम्। प्रचाइ-

२ १ २ ३ ५ १ ३
तसाइ। प्रासूमा२३४तोभ्। कृणुध्वम्। इन्हा२वा२३-

मित्यर्थः।)' "वज्रिणं" वज्रवन्तम् "भृष्टिमन्तं" शत्रूणां भर्जन-

वन्तं'(९) ॥ ५ ॥ ९५

---

* "महिवृधे"-इति, "चरा चर्षणि प्राः"-इति च ऋग्वेदीय पाठः।

---

९६ उत्तरार्चिकस्य ८,१,११,१ = ऋग्वेदस्य ५,३,१६,४ आरण्यके ४,२,१३।

(९)—'अधिगच्छेन शिखराण्युच्यन्ते, तानि चात्र वज्रशिखराणि परिगृह्यन्ते, तैद-वन्तम्' इति वि०।

५ १ २ १ २ १
४इशाः। पू२३वीः। प्रचा। रा२३चा। षणाइ।

२ ४ ५ ४
प्रा। ओ३हेावा। हेापुइ। डा॥ ३०॥

३ १ १ ११ २ र ३ ५ ३ २
II ह्उ२३४५। प्रवामह्राइमा२३४ह्वे। वृधा३४३इ।

२ ३ ५ ३ ११११ २ ३ ५
भरा२३४ध्वाम्। ह्उ२३४५। प्रचेतसाइप्रा२३४ह्व।

३ २ २ ३ ५ ३ १ १११ २ र
मता३४३इम्। क्रणू२३४ध्वाम्। ह्उ२३४५। विशःपू-

३ ५ ३ २ २ ३ ५ ६ १
र्वाइःप्रा२३४चा। रचा३४३। षणा२३४इप्राः। ह्उ२

१ १ १ र र ४ ५ ५ ३ १ १ १ १
३३५। ह्राउह्वौहेावाई। ह्राउवा। ई२२४५॥ ३१॥ ९६

हे अस्मदीयाः पुरुषाः! "वी" यूयं "महेवृधे" महतां धनानां वर्द्धयित्रे "महे" महत इन्द्राय "प्रभरध्वं" सोमान् प्रणयत। "प्रचेतसे" प्रकृष्ट-ज्ञानाय इन्द्राय "सुमतिं" सुष्टुतिं च(१) "प्रक्रणुध्वं" प्रकुरुत।

I,II अङ्कौ दे।

(१)—'मन्यते इत्यर्थवति कर्मणः (नै०३,१४,१८) सुशब्दः सत्यर्थः; शोभनां स्तुतिमित्यर्थः' इति वि०।

अथ सप्तमी।

विश्वामित्रऋषिः।

३ १ २ ३ १ २ ३ १ २ ३ २उ ३ १ २ ३ १ २
प्रुनऽऊवेममघवानमिन्द्रमस्मिन्नरेनृतमंवाजसातौ।

३ १ २ ३ २३ १ २३ २ ३ १ २३ १ ३ ३ २ ३ १ २
पूर्णवन्तमुग्रमूतयेसमत्सुप्लतंवृत्राणिसञ्जितंधनानि*॥७॥ ९७

५ ४ ५ २ ४ ५ २ ४ ३ १ २
1 प्रुनऽऊवेममघवानमिन्द्राम्। अस्मिन्भरेनृत-

२ २ १ २ १ २ २ १ २
मंवाचसा३३ताउ। पूर्णवन्तमुग्रमूतयेसमा३३त्सू।

अथ प्रत्यच-स्तुतिः(२)। हेइन्द्र! "चर्षणिप्राः"(३) कामैः प्रजानां पूरयिता त्वं "पूर्वीः" हविषां पूरयित्रीः "विशः" प्रजाः "प्रचर" अभिगच्छ॥ ६॥ ९६

---

* "धनानाम्"-इति ऋग्वेदीयः पाठः।

९७ ऋग्वेदस्य ३,२,४.६।

1 भारद्वाजम्।

(२ प्रचरेति मध्यमपुरुषयोगात।

३) चर्षणयो मनुष्य-नै.२.३.८.

१ २ १ २ २ १ २
घ्न। तंवा२३र्त्रा३। त्वावा३त्रा। णिसञ्जितम्।

१ ० १ २ २ १
धना२३नी३। त्वावा३त्रा३४३इ। ओ२३४५इ। डा॥

॥ ३२ ॥ ९७

हे "इन्द्र!" "वाजसातौ" वाजस्यान्नस्य सातिर्लाभो यस्मिन् सोऽयं वाजसातिः तस्मिन् "भरे" (बिभर्ति जय-लक्ष्मीं मनेन योद्धार इति भरः संग्रामः तस्मिन्) सङ्ग्रामे "शून" शूनम् उत्साहेन प्रवर्त्तमानं[१]) "मघवानं" धनवन्तम् अतएव "इन्द्र" निरतिशयैश्वर्य्यसम्पन्नं "नृतमं" सर्वस्य जगतोऽतिशयेन नेतारं त्वां "हुवेम" कुशिकावयं यज्ञार्थं माव्हयेमा। तथा "शृण्वन्तम्" अस्माभिः क्रियमाणां स्तुतिं शृण्वन्तम्। "उग्र" शत्रूणामुद्गूर्णं। "समत्सु" सङ्ग्रामेषु[२]) "वृत्राणि" वृत्रोपलक्षितानि सर्वाणि रक्षांसि "घ्नन्तं" हिंसन्तं। "धनानि" शत्रु-सम्बन्धीनि सञ्जितं सम्यग्जेतारं त्वाम् "ऊतये" रक्षणाय वयं माव्हयेम॥ ७॥ ९७

(१)—'शून सुखं (नै०३,६,११), सुखकरमिन्द्र मिति वि०।

(२)—'समत्' इति सङ्ग्रामनामसु दाक्षिणात्यनिघण्टुकम् २.१७।

अथाष्टमी।

वसिष्ठ ऋषिः।

२ ३ १ २ ३ १ २ ३ १ २
उदुब्रह्माण्यैरतश्रवस्येन्द्रसमर्यमच्छयावसिष्ट।

१२ २२ ३ १ २ ३ १ २ ३ २ १ २ ३ १ २
आयोविश्वानिश्रवसा*तनानोपश्रोतामईवतोवचाꣳसि॥८॥९८

१ २२ १ २ ३ २ २ १ २
I दिवया। ओवा। औ३च्होश्वा। उदुब्रह्मा। णी३-

१२ २ ३ ४ ५ २ १ २ १ २ ३ ४
एर। तश्रवस्या। इन्द्रꣳसमा। र्यं३मच्छ। यावसि-

५ २२ १२ २ १ २ ३ ४ ५ १
ष्ठा। आयोविश्वा। नो३श्रव। सातताना। दिव-

२२ १ २ ३ २ २ २ १ २ १२
या। ओवा। औ३च्होश्वा। उपश्रोता। मईव।

२ १ ४
तो३४३। वाश्चापूꣳसा६५६६॥ २३ ॥ ९८

* "श्रवसा"-इति ऋग्वेदीयः पाठः।

---

९८ ऋग्वेदस्य ५,३,७,१ = आरण्यके ४,२,८-१०।

I वैश्वदैवम्।

अथ नवमी।

गौरिवीतिऋषिः।

३ १र २र३ १र २र ३ १र २र३१र २र

चक्रं यदस्यार्चानषत्तमुतीतदस्मै मध्विच्चकद्यात्।

"अवस्या" अन्नेच्छया(१) "ब्रह्माणि" स्तोत्राणि हवींषि च इन्द्रार्थम् "उदैरत" सर्व ऋषय इति शेषः(उइतिपूरणः(२) हे वसिष्ठ! त्वमपि "समर्ये" यज्ञे(३) "इन्द्रं" "महय" स्तोत्रेण हविषा च पूजय। अपिच "यइन्द्रो" "विश्वानि" भुवनानि "अवसा" अन्नेन कीर्त्या वा "आततान" सः "ईवतः"(४) उपगमनवती "मे" मम "वचांसि" स्तुति-रूपाणि वाक्यानि "उपश्रोता" भवतु॥८॥ ९८

---

(१)—अवोऽन्नमिति निरुक्तम्। 'अवस्या अवणीयानि उत्कृष्टानीत्यर्थः'-इति वि०।

(२)—'अथ ये प्रश्नेऽर्थे मितात्तरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति, पदपूरणास्ते मितात्तरेष्वनर्थकाः कर्मीमि द्विति' इति नै०१,९।

(३)—'समर्ये सङ्ग्रामस्थानीय यज्ञे'-इति वि०। 'समर्ये' इति सङ्ग्रामनामसु वर्योविंश्रुतितम नैघण्टुकम् २.१७।

(४)—'ईवतः ईन्वतेर्व्याप्तिकर्मणः, एतद्रूपं व्याप्तिमतः, अन्येषु-गुणप्रकाशनस्येत्यर्थः। कस्य पुनर्व्याप्तिमतः उपश्रुता! उच्यते—वचांसि, प्रथमावहुवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम्, वचसः वचनस्येत्यर्थः। यो विश्वानीति पूरणायच्छब्दमध्याहृत्यैकवाक्यता योजयितव्या'-इति वि०। 'ईन्वति' 'ईन्वति' च पाठभेदेन व्याप्तिकर्मसु प्रथम नैघण्टुकम् २.१८।

३ १र २र ३२र ३ २ ३१र २र३ १ २
पृथिव्यामतिषितंयदूधःपयोगोष्वदधाओषधीषु॥ ८॥९९

॥ चतुर्थ-दशति ॥

५४ ५ र ४ र ५४ २१र र २
चक्रं यदस्यापसुवानिषत्तम्। उतोतदस्मैमध्वित्च-

१ २ १र २१ २ १र
क्का२३द्यात्। पृथिव्यामतिषितंयदू२३धाः। पयोगो२३-

"अस्य" इन्द्रस्य "चक्रम्" आयुधं(१) "अपसु" अन्तरिक्षे "आ" सर्वतो "निषत्त" निषण्णमासीन्मे वहननार्थम्। "उतो" तत् अपिच "अस्मै" इन्द्राय "मध्वित्" उदकमपि(२) "चच्छद्यात्"

९९ ऋग्वेदस्य ८,३,४,३।

I पुरोषम्।

(१)—"चक्रं चकते वा चरते वा क्रामते वा" इति नि० नै०४,२०।

(१)—'आप'-इति अन्तरीक्षनामसु अष्टमं नैघण्टुकम् १,३।

(२)—इच्छेदोऽर्थः। 'मधु' इति उदकनामसु एकादशं नैरुक्तम् १,१२। मध्वी-दिति ऋचि दीर्घश्छान्दसः।

२ १ २२ १२ ९२ १ २ १
षू। आदधाओषधीषु। इडा२३भा३४३। ओ२३४५ऊ।

डा * ॥ ३४ ॥९९

वयं नयति। "पृथिव्याम्" अतिधितं" अतिधितं" विमुक्तं यदूधः" उदकमस्ति तत् "पयोगोष्वोषधीषुच "आदधा" आदधाति ॥ ८ ॥ ९९

इति श्रीसायणाचार्य्य विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोत्याख्याने तृतीयस्याध्यायस्य दशमः खण्डः ॥ १० ॥

अथैकादशे खण्डे—

मैषा प्रथमा।

तार्क्ष्यपुत्रोऽरिष्टनेमिरृषिः।

३ ३ २ ३ १ २ ३ १ २ ३ १ २ २ ३ १ २ ३ २ ३ १ २
त्यमूषुवाजिनन्देवजूतꣳसहोवानं*तरुतारꣳरथानाम्।

१ २ ३ १ २ ३ २ २ ३ १ २ ३ १ २
अरिष्टनेमिंपृतनाजमाशुꣳस्वस्तयेतार्क्ष्यमिहाहुवेम॥१॥१००

॥ * इति ग्रामगेये अष्टमः प्रपाठकः ॥

---

* "सहावानम्"-इति ऋग्वेदीयः पाठः।

१०० ऋग्वेदस्य ८,८,३६,१।

५ र २र ११११ २र र ३
I ओम्। त्यमूषू। वाजि। नाऽ४५ऊम्। देवजूताऽ३-

५ र३र२ १ २ २ ३ ४ ५ २
४म्। सद्योवानन्ता। रुताऽ। रꣳरथानाम्। अरि

३ ५ २ २३र ५ २ १
ष्टनाऽ२३४इमीम्। पृतनाऽ४३जमाशुम्। स्वस्त। याइ।

र २ ३ २ २ ४
तार्ष्यमिद्धाऽ४३। हुऽ३वाऽ५इमाऽ६५६॥ ॥ १ ॥

२र २ २ र र ४ ३ ३र ५
II ईयइयाऽ३द्धाइ। त्यमूषुवाजिनाऽ३०देऽ३वजूतम्।

३ ५ ४ ५र ३ ५र ३र २ १ २
ईऽ४यइयाऽ। द्धाऽ२३४इ। सद्योवानन्ता। रुताऽ३।

२ ३ ४ ५ २र २ १ २
रꣳरथानाम्। ईयइयाऽ३द्धाइ। अरिष्टाऽ३। नाइ। मो-

१ २ ३ ४ ५ ३ ५ ४ ५र ३ ११ ११
३०घृत। नाजमाशुम्। ईऽ४यइयाऽ। द्धाऽ२३४५इ।

२ १ र २ ३ २ २ ४
स्वस्त। याइ। तार्ष्यमिद्धाऽ४३। हुऽ३वाऽ५इमाऽ६५६॥

॥ २ ॥ १००

I,II तार्ष्यसामनी दे।

"त्यमु"(१) तं प्रसिद्धमेव "तार्क्ष्यं" तृक्ष-पुत्रं "सुपर्णं" (तृक्ष-पुत्रो गर्गादिः(२) "स्वस्तये" क्षेमाय "इह" अस्मिन् कर्मणि "हुवेम" शृण माह्वयेमहि ("बहुलं छन्दसीति (६,१,३४) ह्वयतेः संप्रसारणं। "लिङ्याशिष्यङ् (३,१,८६)"। यद्वा। प्रार्थनायां लिङि व्यत्ययेन शः(३,१,८५)। कीदृशं? "वाजिनम्" अन्नवन्तं बलवन्तं वा "देवजूतं" देवैः सोमाहरणाय प्रेरितं (जू इति गत्यर्थः, सौत्रो धातुः; अस्मात् क्तः पूर्वपद-प्रकृति-स्वरत्वम्) [यद्वा। देवैः प्रीयमाणं तर्प्यमाणं। यदाह यास्कः—"जूतिर्गतिः प्रीतिर्वा(३)देवजूतं देवप्रीतं वेति] "सहोवानं" सहस्वन्तं (सहशब्दाद्दनिप् मत्वर्थीयः) बलवन्तं वा। अतएव "रथानाम्" अन्यदीयानां "तरुतारं" सङ्ग्रामे तारकं। यद्वा। रंहणशीला अमी इमे लोका रथाः(४) तान् सोमाहरण-समये शीघ्रं तरीतारं (श्रूयते हि—"एष हीमान् लोकान् सद्यस्तरतीति"। तरते स्तुचि "ग्रसित-स्कभितेत्यादौ (७,२,३४) उड़ागमो निपात्यते) "अरिष्टनेमिं" अहिंसित-रथं (यद्वा। नेमि र्नमन-शील मायुधम्(५) अहिंसितायुधम्। अथवा उपचारा ज्ञानके जन्यशब्दः।

(१)—ऋचि "त्यमूषु"-इति "निपातस्य च (६,३,१३६)"-इति दीर्घः।" सुऊः (८,३,१०७)"-इति षत्वं च।

(२)—तथाच गर्गादिलात् यञ् (४,१,१०५,)।

(३)—तथाहि,—तदाश्वत्थमसुदिनमिदं "नीर्णऽस्तरिचे चियति, तूर्णमर्थं रक्षत्यशूनेर्वा तस्यैषा भवति 'त्यमूषु वाजिनं' तं शृणमन्नवन्तं जूतिर्गतिः प्रीतिर्वा, देवजूतं देवगतं देवप्रीतं वा सहस्वन्तं तारयितारं रथाना मरिष्टनेमिं पृतनाजितमाशुं खस्तये तार्क्ष्यमिह हुवेमेति"-इति दै०४,२८।

(४)—"रथो रंहतेर्गतिकर्मणः स्थिरते वा स्यादिपरीतस्य रममाणऽस्मिंल्लिष्यतीति वा रपते वा रमते वा"-इति नि० दै०७,११।

(५)—'नेमिः'-इति वज्र नामसु द्वितीय नैघण्टुकम् २,२०।

अथ द्वितीया।

भरद्वाज ऋषिः*।

३ २ ३१ २ ३२ ३ २ ३ १२ ३ २३ २ ३ १ २
त्रातारमिन्द्रमवितारमिन्द्र॰ हवेहवेसुहव॰ शूरमिन्द्रम्।

३१उ ३ २ ३१र २र ३ २ ३१ २ ३ १ २
हुवेनु शक्रं पुरुहूतमिन्द्रमिद॰ हविर्मघवावेत्विन्द्रः॥२॥१०१

२र १र ३ २ १र र
I त्रातारमिन्द्रमविता। रमी२३०द्राम्। हवेहवे-

३ २ १
सुहव॰शूरु। रमी२३०द्राम्। हुवादनुशक्रंपुरुहू।

अरिष्टनेमे र्मम जनकं) "पृतनाजं" पृतनानां शत्रुसेनाना माजितारं प्रगमयितारं जेतारंवा (अज गति-क्षेपणयोः। अस्मात् क्विप्। "वलादावार्द्धधातुकेविकल्पइष्यते" (२,४,५६वा०) इति वत्तनात् वी-भावाभावः। यजते र्वा ङिग्प्रत्ययः) "आशुं" शीघ्रगामिनम्॥ १॥ १००

---

* "गर्गस्यार्षम्" इति वि०।

† "हुवामि शक्रम्"-इति ऋग्वेदीयः पाठः।

---

१०१ ऋग्वेदस्य ४,७,३२,१।

I इन्द्रस्य च तातम।

अथ तृतीया।

वसुश्रुतो विमदो वा ऋषिः।

१२ ३२ ३१२ १२ १२ १२ १२
यजामहइन्द्रं वज्रदक्षिणꣳहरीणाꣳरथ्या३०*विव्रतानाम्।

१२ २२३१ २ ३१२ ३१२ २२ ३१२ १२ २२
प्रशस्यभिर्दाधुवद्वर्धाभुवद्विसेनाभिर्भयमानोविराधसा।३।१०२

१ २ १ २ १ २१२ २
तमी२३०द्राम्। इदꣳह। वाइः। मघवा। वाइ-

२ ४
४३इ। तू३वाꣳइन्द्राइꣳईः॥ ३॥ १०१

"त्रातारं" शत्रुभ्यः पालयितारम् "इन्द्रं" "हुवे" आह्वयामि। तथा "अवितारं" कामैस्तर्पयितार मिन्द्र माह्वयामि। "आ हुवे हुवे" सर्वेष्वाहवनेषु "सुहवं" सुखेनाह्वातुं शक्यम्। "शूरं" शौर्यवन्तं "शक्रं" सर्वकार्येषु शक्तं "पुरुहुतं" पुरुभिर्बहुभिः पालनार्थं माहूतम्। एवंविध मिन्द्रम् "आहुवे" आह्वयामि। एव माहूतो 'मघवा" धनवान् स "इन्द्रः" "इदं" पुरोवर्त्ति हविः "वैतु" भक्षयतु॥ २॥ १०१

---

* "रथ्यम्"-इति ऋग्वेदीयः पाठः।

---

१०२ ऋग्वेदस्य ७,७,६,१।

५ २ ४ ५ १ २ १ २
I यजामहेवा। आइन्द्रंवज्र। दक्षा२३इणाम्।
१ २ २ १ २ १ २ १ २
हरीणाꣳरथ्यंवि। व्रता२३नाम्। प्रश्नश्रुभिर्दोधुवत्।
१ २ ३ ५ १ २ १
ऊ। ध्वाधाभू२३४वात्। विसाइ। ना। भिर्भयमा-
१ २ २ ५
ना२३:। वा२३इरा३। धा३४पूसोइ्हाइ॥ ४॥ १०२

वयं "इन्द्रं" "यजामहे" सोमलक्षणैर्हविर्भिः पूजयामः। कीदृशं? "वज्रदक्षिणं" शत्रु-वधाय सततं "वज्रो दक्षिणे हस्ते यस्य तम्। "विव्रतानां" रथ-वाहनादि-विविध-कर्मणां(१) "हरीणाम्" एतत्संज्ञकानां मखानां(२) "रथ्यम्" आनेतारम्। स इन्द्रः सोमपानानन्तरं "श्मश्रुभिः(३)" स्वकीयैः "दोधुवत्" पुनः पुनः धून्वानः सन् "ऊर्ध्वधाः" "वि भुवत्(४)" विशेषेण प्रादुर्भवति। किञ्च। "सेनाभिः" मरुदादिभिः स्वकीयैः सैन्यैः "भयमानः" शत्रून् कम्पयन् "राधसा" [द्वितीयार्थे तृतीया (२,१,८५)] राधो धनं (वीत्युपसर्ग-श्रुते र्योग्य क्रियाध्याहारः) विविधं स्तोतृभ्यो ददाति॥ ३॥ १०२

I वार्चातुरम्।

(१)—वि र्वविधार्थे। व्रतमिति कर्म-नामसु सप्तमं नैघण्टुकम् २,१।

(२)—"हरी इन्द्रस्य"-इति नैघण्टुकम् १,१५,१।

(३)—'श्मश्रुभिः तृतीया-बहुवचनमिदं द्वितीया-बहुवचनस्य स्थाने द्रष्टव्यम्, श्मश्रु-प्रदेशं यावत् प्रदर्शनार्थम्, सर्वरोमाणि श्मश्रूणां दोधुवन' इति वि०।

(४) भवदिति लेटोरूपम् (३,४,७ किञ्च ३,४,९४)।

अथ चतुर्थी।

एतदादि-तिसृणां वामदेवऋषिः।

३ २ ३ १ २ ३ २ ३ १ २ ३१ २ ३ १ २ ३ २ ३ १ २
सत्राहणंदाधृषिंतुम्रमिन्द्रं मन्हामपारंवृषभꣳसुवज्रम्।

३ २ ३ १र २र ३ २उ ३ १ २ ३१ २ ३ १ २ ३ १ २
हन्तायोवृत्रꣳसनितोतवाजन्दातामघानिमघवासुराधाः॥४॥
१०३

५ र ३ २ ३ र ४ र ५ १ २ १
I सत्रा। हणा३४औन्हीवा। दाधृषिन्तू। म्रमि-

२ ३ ५ २ १ र २ र १ २ १ २ १ १
न्द्राओ२३४वा। मन्हामपारंवृषभꣳसुवज्रा२३म्। हन्ता

२ ३ ५ १ २ २ ४
यो२३४वृ। त्राꣳसनि। तो३४३। ता३वा५जा६५

१र २र १र १ २ ३र १र ३ १ १ १ १
६म्। दातामघानिमघवा२सुराधा२३४५ः॥ ५॥

४ र ३ ४ ३र ४ ५ २ २ ३ ५ २ १र
II सत्राहणंदाधृषिम्। तू३४३म्रमिन्द्रम्। मन्हा-

२र १ २ १ २ १ २ ३ ५ १
मपारंवृषभꣳसुवज्रा२३म्। हन्तायो२३४वृ। त्राꣳसनि।

---

१०३ ऋग्वेदस्य ३,५,२२,३।

I,II धृषतो मारुतस्य सामनी द्वे।

२ २ ४ १२२२ १२ २१२२
तोइ४३। ताइवाधूजाई५ई६म्। दातामघानिमघवा२

१२ ३ १ १ १ १
सुराधाइ३४धूः॥ ६॥ १०३

"सत्राहणं" बहूनां शत्रूणां हन्तारं(१) "दाधृषिं" अतिशयेन धर्षकम्। "तुम्र" (तुमिः प्रेरण-कर्मा) शत्रूणां प्रेरकं। "महां" महान्तम्। "अपारम्" अपरिमाणं विनाश-रहितमित्यर्थः। "वृषभं" कामानां वर्षितारं। "सुवज्रं" शोभनेन वज्रेणोपेत-मिन्द्रं वयं स्तोतारः स्तुम इति शेषः। "यः" इन्द्रो "वृत्र" वृत्र-नामान मसुरं "हन्ता" हिंसिता भवति। उतापिच। यः इन्द्रो "वाजम्" अन्नं "सनिता" दाता भवति। "सुराधाः" शोभन-धन-युक्तो यो मघवेन्द्रः "मघानि" धनानि(२) दाता भवति तमिन्द्रं स्तुम इति पूर्वेण सबन्धः। (अत्र सर्वत्र वृत्रन्त-त्वात् "न लोकाव्ययेत्यादिना(२,३,६९) षष्ठी-प्रतिषेधे सति द्वितीयैव भवति॥ ४॥ १०३

---

(१)—'सत्रा-शब्दः सदा-शब्द-पर्यायः'-इति वि०। 'सत्रा' इति सत्य-नामसु च तृतीयं नैघण्टुकम् ३,१०।

(२)—'मघम्' इति धन-नामसु प्रथमं नैघण्टुकम् २.१०।

अथ पञ्चमी।

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
योनोवनुष्यन्नभिदातिमर्त्तउगणावामन्यमानस्तरोवा।

३ २ ३ १ २ २ ३ १ २ ३ १ २ ३ १ २
त्रिधीयुधाश्रवसावातमिन्द्राभीष्यामवृषमणस्त्वोताः॥५॥ १०४

३ २ ४ २ ३ ४ ५ २ ३ २ ५ १ २
I योनोवनुष्यन्नभिदा। तिमा३२३४र्त्ता:। उगणा

२ २ २ १ २ १ २ २ २ २ १
वामन्यमानस्तरो२३वा। त्रिधीयुधाश्रवसावातमा२३इ

१ १ २ २ १ २ २ १ २
न्द्रा। अभाद्युष्टमा। वृषाम्रा३णा३:। त्वो२३ता३४

१
३:। ओ२३४५इ। डा॥ ७॥ १०४

हे इन्द्र! "यो" "मर्त्तो" मनुष्यः "नः" अस्मान् "वनुष्यन्" हन्तुमिच्छन्(१) "अभि दाति" आभिमुख्येनागच्छति(२)। यो वा "मन्यमानः" आत्मानं बहु मन्यमानो मर्त्तः "उगणा वा" उत्कृष्ट-

---

१०४ आरण्यके ५,२,१४।

I आत्रेयम्।

(१)—'वनुष्यम् हन्ति-कर्म'-इति वि०।

(२)—'अभिदाति आभिमुख्येन ददाति योऽस्माकमदत्वा अन्येभ्यो ददातीत्यर्थः'-इति वि०। 'दाति'-इति दान कर्मसु प्रथम नैघण्ट कम् ३,२०।

अथ षष्ठी।

२३ १२ ३ २३ १२ २ २ ३ १ २ ३ १ २ ३ १२
यंवृत्रेषुक्षितयस्पर्धमानाययुक्षेषुतुरयन्तोक्षवन्ते।

१२ २२ ३ २ ३ १२ २ २ ३ २ १ २ ३ १२ २२
यऽगूरसातीयमपामुपज्म*न्यंविप्रासोवाजयन्तस्इन्द्रः॥६॥

१०५

गणाः उद्गूर्णगणाः(३) "तुरो(४)" हिंसित्वा रक्षदीयाः प्रजाः अभिगच्छति। केन साधनेन हिंसित्वन्? "क्षिधो" [क्षिः क्षयो धीयते क्रियते अनेनेति क्षिधिः ततीयैकवचनस्य पूर्वसवर्णः(५)] क्षयकरणेन "युधा" आयुधेन (६) "शवसा" वेगेन बलेन वा आयाति। "क्षोताः" क्षया रक्षिताः(७) "वृषमणः" वृषा इवाचरन्तो वयं "तम्" "अभिष्याम" अभिभवेम(८)॥ ५॥ १०४

---

* "मुपज्म"-इति मुद्रितपुस्तकपाठः सायणाचार्यादि-धृतश्च।

---

(३)—'उरु गणयतीत्युरुगणाः, उरुगणाः उगणाः उच्यन्ते; एतदुक्तं भवति—योऽस्मभ्यमन्नं दत्वा बहु गणयति जनेभ्यः कथयति यस्त्वं मन्यमानः वाचा पूजयन्"-इति वि०। "उरु"-इति बहुनामसु प्रथमं पदम (नै० ३,१)।

(४)—'तुवतेर्वधकर्मणः (नै० २, १९) एतद्रूपम्; वाचा पूजयन हृदयेन छिनत्तीत्यर्थः' इति वि०।

(५)—"सुपां सु लुक्-पूर्वसवर्णाच्छेयाडाड्यायाजालः (७,१,३९)।

(६)—'युधा युद्धेन' इति वि०।

(७)—'त्वया उताः'-इति क्षोताः। उताः रक्षिताः।

(८)—इत्येतदाशास्महे इति भावः। "निपातस्यच (६,३,१३६)"-इति मन्त्रे दीर्घः-अभीष्याम इति।

I ह्वाउयंवृत्रेषू। क्षितयाइः। स्पर्द्धमानाः। धमा-
नाइः। ई२३४यद्वया। ह्वाउयंयुक्तेषु। तुरयाइ।
तोह्ववन्ताइ। ह्ववन्ताइइ। ई२३४यद्वया। ह्वाउयए
प्रूरसा। ताइउयम। पामुपय्यान्। उपय्याइन्।
ई२३४यद्वया। ह्वाउयंविप्रासाः। वाइजय। ताइसइ
न्द्राः। स इन्द्राइः। ई२३४य। इयाए। ह्वाउवा।
ई२३४५॥ ८॥

II यंयंया। ह्वाउयंवृत्रेषू। क्षितयाइः। स्पर्द्धमा
नाः। धमानाः। यंयंय२०याम्। यंयया। ह्वाउयंयुक्तेषू।
तुरयाइ। तोह्ववन्ताइ। ह्ववन्ते। यंयंय२०याम्।

I,II गार्त्समदे द्वे।

५ ८ ८ ८ ४ २३ २ ३४५
यंयंया। ह्वाउयंशूरसा। ताइउयम। पामुपमान्।

१ २ १ ऽ १ ५ ८ ८ ८
उपमन्। यंयंय२०याम्। यंयया। ह्वाउयंविप्रासाः।

४ २३ २ ३४५ १ २ १ ऽ १
वाइजय। ताइसइन्द्राः। सइन्द्रः। यंयंय२०याम्।

५ ५ ३ ११११
यंयंयाइ। ह्वाउवा। ई२३४५॥ ८॥ १०५

(०)"ह्वयेषु" वरकेषु युद्धेषु(१) "स्पर्धमानाः" क्रोधयुक्ताः "चित्तयो" मनुष्याः(२) (चयन्ति निवसन्त्यत्रेति चित्तयो मनुष्याः) "यम्" इन्द्रं "हवन्ते" आह्वयन्ति "युक्तेषु" सन्नद्धेषु आयुधैर्युक्तेषु सङ्ग्रामेषु "तुरयन्तः" परस्परं हिंसन्तो जनाः(३) यमाह्वयन्ति। "शूरसातौ" शूराणां सम्भजने(४) यमाह्वयन्ति। युद्धजयार्थमिति शेषः। किञ्च। "अपाम्" उदकानां "सातौ" लाभे "यम्" "उ-

---

(०)—'वामदेव इन्द्रस्यातिभक्ततया इन्द्ररूपमास्थितः, असुरै रर्दीनो हन्यमान आह—यं हवे त्विति'-इति वि०।

(१)—'ह्वयेषु' शत्रुषु, हन्त्यैत्विति वाक्य-शेषः'-इति वि०।

(२)—चित्तयइति मनुष्य नामसु षष्ठं नैघण्टुकम् २,३।

(३)—'तुरयन्तः त्वरमाणाः' इति वि०। "तूर्णिः"-इति क्षिप्र-नामसु द्वादशं नैघण्टुकम् (२,१५) तदेवैवं व्याख्याने बीजम्।

(४)—'शूरसातौ सङ्ग्रामे'-इति वि०। शूरसातौ-इति सङ्ग्राम नामसु पञ्चमि शब्दे घण्टुकम् २,१७।

अथ सप्तमी।

विश्वामित्रः स्तौति।

१ २ ३ १र २र ३ २उ ३ १ २ ३ १ २
इन्द्रापर्वतावृहतारथेनवामीरिषमावहतꣳसुवीराः।

३र ३ १ २ ३ १ २ ३ १ २ ३ १र २र ३ १ २
वौतꣳहव्यान्यध्वरेषुदेवावड्ढयाङ्गीभिरिड्यामदन्ताम्॥१०६

४ ५ २र १ र ३
I इन्द्राहाउ। हाहोइ। पर्वतावृहतारथा२इना

पज्मन्" वृष्टिप्रदानार्थं(५) यमुपगच्छन्ति आह्वयन्तीत्यर्थः(६)। विप्रासो(७) विप्राः मेधाविनो यजमानाः य मिन्द्रं "वाजयन्ते"(८) वाजिनं कुर्वन्ति हविर्भि र्बलिनं कुर्वन्ति स तादृश इन्द्रः॥ ६॥ १०५

I वैश्वामित्रम्।

१०६ ऋग्वेदस्य ३,३,१८,१।

(५)—"सुपां सुलुगिति (७,१,३९) चतुर्थ्या लुक्।

(६)—'अपामुपज्मन्—उप पूर्वस्याज गति-क्षेपणयो (भ्वा०) रित्यस्येदं रूपम्। आपः समीपे यस्मिन् काले आगच्छन्ति स अपामुपज्मा वर्षाकालः; तस्मिन् अपामुपज्मन्। उदकार्थं वर्षाकाले यमाह्वयन्तीत्यभिप्रायः'-इति वि०-अव मथे "सुपां सु लुक्(७,१,३९)"-इत्यादिना सप्तम्येकस्य लुक्।

(७)—"आज्जसेरसुक् (७,१,५०)"-इत्यसुकि रूपम्। "विप्रः"-इति मेधावि-नामसु प्रथमं नैघण्टुकम् ३,१५।

(८)—'वाजयन्ते पूजयन्ति'-इति वि०। वाजयतीति अर्चति-कर्मसु षट्त्रिंशन्नमं नैघण्टुकम् ३,१४।

१ २ ५ ४२ ५ २२ १ २
उवाइ। ऊ३४पा। वामीर्हाउ। हाहोइ। इषआ-
३ २ २ ५ ४२ ५
वहतꣳसुवी२इराउवाइ। ऊ३४पा। वीतꣳहाउ।
२२ १ २ २ ४ २ २ ५
हाहोइ। हव्यान्यध्वरेषुदा२इवाउवाइ। ऊ३४पा।
४ ५ २२ १ २ २ ३ २
वर्द्धाहाउ। हाहो। थाङ्गीर्भिरिड़यामदा०२ताउवाइ।
२ ५
ऊ३३३४पा॥ १०॥ १०६

"इन्द्रापर्वता" [इन्द्रश्च पर्वतश्च(१)] हेइन्द्रापर्वतौ! "बृह-ता" महता रथेनागत्य "तामो" वननीयाः(२) "सुवीराः" शोभन-पुत्रोपेताः "इषः" अन्नानि "आवहन्तम्" अस्मदर्थं धारयन्त'(३) प्रयच्छन्तमित्यर्थः। किञ्च। हे "देवा" देवौ द्योतमानौ! हे इन्द्रापर्वतौ! "अध्वरेषु" अस्मत्-सम्बन्धि-यज्ञेषु "हव्यानि" हवन-योग्यानि पुरोडाशादीनि हवींषि "वीत" भक्षयन्तम्। तथा "इड़या" अस्माभि र्दत्तेनान्नेन(४) "मदन्ता" हृष्यन्तौ युवां "गीर्भिः" स्तुतिलक्षणाभि रस्मदीयाभिर्वाग्भिः "वर्द्धया" प्रवृद्धौ भवतौ॥ ७॥ १०६

(१)—"देवता द्वन्द्वे च (६,३,२६)"-इत्यालं, "सुपां सु लुक् (७,१,३९)"-इत्यालं च रूपम्।

(२)—मनुष्यजनीया इत्यर्थः।

(३)—'आवहन्त मानयन्त' मिति वि०।

(४)—'इड़ा'-इत्यन्न-नामसु तथोदकं नैघण्टुकम् २,७।

अथाष्टमी।

रेणुऋषिः*।

१ २ ३ २ ३ १ २ ३१र २र३ १ २ ७ १ २
इन्द्रायगिरोअनिशितसर्गाअपःप्रैरय†त्सगरस्यबुधात्।

१र २र ३ २ ३ १ २ ३ १२३ १ २ ३ २ ३ २
योअक्तेणेवचक्रियो‡रचोभिर्विष्णक्तस्तम्पृथिवीमुतद्याम् ॥८॥

१०७

२ २ १र २ १ २
I ह्वाउ। ह्वाइ। इन्द्रायगाइ। राउअनि। शी-

३ ४ ५ २ १र २
तसर्गाः। १। असाउ। असाउ। इन्द्रायगाइ। राउ

१ २ ३ ४ ५ २ १र
अनि। शीतसर्गाः। २। कुवा। कुवा। इन्द्रायगाइ।

२ १ २ ३ ४ ५ २ १
राउअनि। शीतसर्गाः। ३। अयाम्। अयाम्। अपः

---

* 'गिरिर्णोरार्षम्'-इति वि०।

† "प्रेरय"-इति ऋग्वेदीयः पाठः, "प्र। ईरयम्।"-इति च ऋग्वेदीय-पद-पाठः।

‡ "चक्रिया"-इति च ऋग्वेदीय-पाठः।

---

१०७ ऋग्वेदस्य ८,४,१४,४।

I सावित्रम्।

र २ १ २ ३४५ १ २ १
प्रैरा। याꣳत्सग। रस्यबुध्नात्। अविदाꣳत्। अवि-

२ र १ र २ १ २ ३ ४ ५ २ १
दत्। योअत्तेणाइ। वाꣳचक्रि। यौशचीभिः। ईच्चा

२ ५ २१ २ १ २
२३। ईꣳ४च्चा। विष्वक्तस्ता। भाꣳपृथि। वीꣳ४ꣳम्।

२ ४
ऊꣳतापुद्याꣳ६५६म्॥ ११॥ १०७

"इन्द्राय" इन्द्रार्थम् "अनिशितसर्गाः" अतनूकृत-विसर्गाः उपर्युपरि वर्त्तमानाः(१) याः "गिरः" स्तुतयः ताभिर्गीर्भिः "सगरस्य" अन्तरिक्षस्य(२) "बुध्नात्" प्रदेशात् "अपः" उदकानि(३) "प्रैरयत्" प्रेरयति। यः इन्द्रः "शचीभिः" कर्मभिः(४) "पृथिवीम्" "उत" अपिच। "द्याम्" दिवं च "चक्रियौ"(५) रथचक्राणि(६) "अत्तेणेव" यथा रथाक्षेण तद्वत् "विष्वक्" सर्वतः "तस्तम्भ" अस्तम्भात्॥ ८॥ १०७

---

(१)—अनिशितसर्गाः—शित इति 'शो तनूकरणे' इत्यस्य निष्ठायां रूपम्। सर्गः संसर्गः सङ्घातः। शितः सर्गो यासां ताः शितसर्गाः तनूकृत सङ्घाः। न शितसर्गा अशित सर्गाः, बव्हीरित्यर्थः।

(२)—"सगरः" इति अन्तरीक्ष-नामसु चतुर्दशं नैघण्टुकम् १,३।

(३)—दृष्टि-लक्षणानि।

(४)—शचीनि कर्म-नामसु द्वाविंशतितमं नैघण्टुकम् २,१।

(५)—"दयाडियाजिकाराशमपमक्षानम् (७,१,२८)"-इति दय् भावे, क्विप्-प्रत्यये च (३,१,८५) रूपं चक्रियाविति।

(६)—चक्रे इति द्विवचनान्तेन व्याख्यानम् विवरणकृता।

अथ नवमी।

वामदेवऋषिः*।

३ १ २ ३ १ २ ३ २ ३१ २ ३१ २
आत्वासखायःसख्यावव्रुत्युस्तिरःपुरूचिदर्णवाञ्जगम्याः†।

३१र २र ३ १ २ ३ २ ३ १र २र ३१र २र
पितुर्नपातमादधीतवेधाअस्मिन्क्षयेप्रतरांदीद्यानः ॥९॥१०८

४र ५र ४ ५र ४र ५ ४ २१ र र
I आत्वासखायःसख्यावव्रुत्यूः। तिरःपुरूचिदर्णवांज-

र र २ १ र र र र
गाऽरम्यौ। द्यौर्होऽवा। पितुर्नपातमादधीतवाऽरद्यौ।

---

* 'वसुराह'-इति वि०।

† "ओ चित् सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान्"-इति ऋग्वेदीय-पाठः।

‡ "अधि क्षमि प्रतरं"-इति, "अधि शमि मतरं"-इति च ऋग्वेदीय-पाठः।

---

१०८ ऋग्वेदस्य ७,९,९,१।

I कुतोपादवैरूपस्य साम।

२ १ र र र र र
ह्वौहोश्वा। अस्मिन्नयेप्रतरान्दीदियाऽरनौ। ह्वौहो-
२ र १ ३ २१११
श्वा। औहो२। इहा२३४५॥ १२॥ १०८

हे इन्द्र! "त्वा" त्वां "मखायः" स्तोतारः "सख्या" सख्येन-स्तुतिभिरित्यर्थः। ताभिः "आ वहत्युः" अभिमुखं कुर्वन्ति। यत-स्त्वं "तिरः" तिर्यग्भूत्वा "पुरु" विस्तीर्णम् "अर्णवम्" अन्त-रिक्षं(१) "जगम्याः" अगच्छः। चिच्छब्दः कारण-परः(२) [अथ-परोक्षकृतः(३)]—"वेधा" विधाता(४) इन्द्रः "पितः" मदीयस्य "नपातं" पौत्रं मम पुत्रमित्यर्थः(५)। तं मादधीत प्रयच्छतु।

---

(१)—यद्यप्यर्णवम् इत्यन्तरीक्ष-नामसु न दृश्यते, तथापि समुद्र इति तु दृश्यत एव (१,३)।

(२)—तथा च यत एवं ततः इदं क्रमं इति भावः। "चिदित्यपोऽनेक-कर्मा; आचार्यश्चिदिदं ब्रूयादिति पूजायाम्, (* * *) दधिचिदित्युपमार्थे, कुत्समार्षिं-दाहरत्यवकुत्सिते, (* * *)।"-इति नि०१,४।

(३)—"परोक्षकृतः—सर्वाभिर्नामविभक्तिभिर्युज्यते प्रथमपुरुषेणाख्यातस्य" इति नि० दै० ७,१।

(४)—'वेधा मेधावी भवान्' इति वि० "वेधा" इति मेधावि नामसु षष्ठं नैघण्ट-कम् १,१३।

(५)—"पितुरित्यन्न-नाम; पाते र्वा पिबते र्वा प्यायते र्वा"-इति दैवत-निरुक्तम् ९,२४॥ विवरणकारस्तु 'पितुः', 'न', 'पातम्'-इति पदत्रयं विच्छिद्य व्याचष्टौ; तथाहि—'पितुर्न नशब्द उपरिष्टादुपचारादुपमार्थीयः, पितु रिव; पात पा रक्षणे इत्यस्य "नपुंसके भावे क्तः (३,४,११४ उ०)"-इति क्त-प्रत्यये पतद्रूपम्, पात रक्षणम्। यथा कश्चित् पितुः रक्षणमाधत्ते, तद्वत् भवानपि अस्माकम् आदधीत आदधानं करोत्वित्यर्थः-इति।

८७क,

अथ दशमी।

गीतमऋषिः।

२ ३ १२ ३ २३ ३२ ३१२ ३ १ २ ३ २
कोअद्ययुंक्तेधुरिगाऋतस्यशिमीवतोभामिनोदुर्हणायून्
१ १२ ३१२ ३ १र २र १ २३ २३ १ २
आसन्नेषामप्सुवाचोमयोभून्यएषांभृत्यामृणधत्सजीवात्॥
१०॥१०९

॥ पञ्चम-दशतिः ॥*

५र र र ५ १ र र र
I कोअद्ययुंक्तेधुरिगाऋतस्याई॒ए। शिमीवतोभामि-
र २१ २ र १ र र र र २१ २
नोदुर्हणा२३यून्। आसन्नेषामप्सुवाचोमयो२३भूत्।
१ र र र ऽ २ २ ५
यएषाभृत्यामृणधत्सजाइवा३उवा३। ऊ३४पा॥१३॥१०९

कीदृशः? अस्मिन् "क्षये"(१) निवास-भूते यज्ञे "प्रतरां" प्रकृष्टं "दीद्यानः"(२) तेजसा दीप्यमान इन्द्रः पुत्रं ददातु॥ ९॥ १०८

---

१०९ ऋग्वेदस्य १,६,८,१।

I आमहीयवम्।

(१)—निवासार्थ-क्षि-धातो रूपमिदं क्षयदिति।

(२)—दीधिङो रूपम्।

---

* ॥ इति चतुर्थस्यार्द्धः प्रपाठकः ॥

"अद्य" अस्मिन् कर्मणि "ऋतस्य" यज्ञस्य(१) गच्छत इन्द्र-सम्बन्धिनो रथस्य "धुरि" अश्व-वहन-प्रदेशे "गाः" गतिमतोऽश्वान्(२) एषा मघवानां सम्बन्धिनः प्रग्रहान्वा "आसन्" आस्येन तज्जनितेन स्तोत्रेण "को युङ्क्ते" को नाम नियोक्तुं शक्नोति(३) न कोपीत्यर्थः। कीदृशानश्वान्?। "शिमीवतः" वीर्यकर्मोपेतान्(४)। "भामिन्" तेजसा युक्तान्(५) "दुर्हणायून्" परैर्दुःसहेन क्रोधेन युक्तान् (हृणीयतिः क्रुध्यति-कर्मा (नै०२, १३)। "अप्स्वाहः" आपः कर्माणि(६) तेषु इन्द्रं वहन्तीति तान्(७)"मयोभून्' मयसः सुखस्य भावयितॄन्(८)। स्वकीयानां सुखप्रदानित्यर्थः। "यो" यजमानः "एषाम्" ईदृशाना मघवानां "भृत्यां" भरण-क्रियां रथ-वहन-क्रियां "ऋणधत्" समर्धयति स्तौतीति यावत्(९) "स" ह यजमानो "जीवात्" जीवनवान् भवेत्॥

---

(१)—'ऋतस्य सत्यस्य सर्वगतस्य वा इन्द्रस्य'-इति वि०।

(२)—'गाः गो-शब्देनाव समय-योगात् अश्वा उच्यन्ते'-इति वि०।

(३)—'आदित्य-स्तुति-करण-द्वारेणेति विवरणे विशेषः।

(४)—"शिमी"-इति कर्म-नामसु चतुर्विंशतितमं नैघण्टुकम् २,१।

(५)—'भामिनः शत्रूणां परः क्रुद्धान्'-इति वि०। "भामते"-इति क्रुध्यति-कर्मसु (नै०२,१२) पठित मित्येव तत्र बीजम्। 'भामिनः कुत्सित-क्रोधान्' इति वि०।

(६)—"अपः"-इति कर्म-नामसु प्रथमं नैघण्टुकम् २,१।

(७)—'अप्सु निमित्त-भूतासु ये वहन्ति त अप्सुवाहः, उदकस्य यातयितारः; तान्'-इति वि०।

(८—"मयः"-इति सुख-नामसु सप्तमं नैघण्टुकम्।

(९)—ऋणधदिति "ऋधहि"-इति परिचरण-कर्मणो रूपम ३,५।

यहा। "कः" इति प्रजापतिरुच्यते ("कोह वै नाम प्रजापति" रिति श्रुतेः) "ऋतस्य" यज्ञस्य "धुरि" निर्वाहे "गाः" वेदरूपान् वाग्विशेषान्(१०) "अद्य" इदानीं "युङ्क्ते" संयोजयति कीदृशान्? "ग्रमीवतः" प्रतिपाद्यैः कर्मभिर्युक्तान् "भामिनः" उज्ज्वलान् "दुर्हणायून्" हृणीयति हीनि-कर्मा। हातु मग्क्यान् वेदाध्ययनस्य नित्यत्वात् एषां शब्दानां आत्म-प्रतिपादकानाम् "आसन्" आस्यानि मुखवदाकरभूतानित्यर्थः। "अप्सुवाहः" अप्सु अन्तरिक्षे तदुपलक्षिते स्वर्गे वहन्ति यजमानं प्रापयन्ति तान्। "मयोभून्" मयसः अध्ययन-प्रभवस्य सुख-साधनस्यादृष्टस्य भावयितॄन्। "यो" यजमानः 'एषां" वचसां "भृत्यां" भरण-क्रियां "ऋणधत्" ऋद्धिमतीं करोति "स जीवात्"(११) स एव जीवति। अन्ये जीवन्मृता इत्यर्थः॥

"आसन्नेषामप्सुवाहः" इति, "आसन्निषून् हृत्सुः"-इति पाठो॥ १०॥ १०९

इति श्रीमायणाचार्य्यविरचिते माधवीये सामवेदार्थ-प्रकाशे ऐन्द्रोत्याख्याने तृतीयस्याध्यायस्यैकादशः खण्डः॥ ११॥

॥ इति चैष्टुभमैन्द्रम्॥

---

(१०)—"गौः"-इति वाङ्नाममु चतुर्थं निघण्टुकम् १,११।

(११)—लेटि आडागमे रूपम्(३.४.९४)।

द्वाष्टाविंशति ऋचो गायन्तित्वेत्यनुष्टुभः (क)।
यदीवहन्तीत्यनया स्तूयन्ते मरुतोऽत्र हि (ख)।
ईडितोऽग्नि र्दधिक्रावा दधिक्रावणो इति ऋचा (ग)।
वयश्चिदित्यष्टयेयं वैश्वदेवीत्यमी इति (घ)।
ऋक्सामयोः स्तुति र्ऋचंसामेत्यैन्द्रोऽपरा ऋचः (ङ)।
समाख्या प्राणभृन्न्यायादिति पूर्वमुदीरितम् (च)।

(क)—"गायन्ति त्वा" इत्यारभ्य "ऋचमामयजामहे"-इत्युक्ताः दशत्रयात्मका अष्टाविंशति र्ऋचः अनुष्टुप्छन्दस्काइत्यर्थः। इति व्याख्यायमानाष्टादशर्च्छन्दः सङ्गतिः।

(ख)—अत्र अष्टादशसु ऋक्षु "यदीवहन्ती" इति पञ्चदशी ऋक्, अनया मरुतो देवताः स्तूयन्ते।

(ग)—"दधिक्रावणः" इति हि सप्तदशी ऋक्, ऋचा अनया, दधिक्रावा नामकः अग्निः, ईडितः स्तुतः।

(घ)—"वयश्चित्" इति विंशतितमा ऋक्, इयं, उषस्या उषोदेवताका। "अमी" इति एकविंशतितमा ऋक् वैश्वदेवी अस्याः; विश्वेदेवा देवताः इत्यर्थः।

(ङ)—"ऋचंसाम"-इति चरिमा ऋक्, अनया तु ऋक्सामयोः देवतयोः स्तुतिः प्रकाश्यते। अपराः एतत्-पश्चात्तिरिक्ताः त्रयोविंशति र्ऋचः ऐन्द्राः इन्द्रदेवताकाः। इति दैवत-सङ्गतिः।

(च)—ननु मरुदादि-देवतानामृचां साहित्येऽप्यस्य पर्वस्य ऐन्द्रमिति व्यपदेशः कथमित्याह—समाख्या तु प्राणभृन्न्यायात् सिद्धाति, गौण्या इत्यर्थः। प्राणभृन्न्यायस्तु मीमांसा-शास्त्र-प्रसिद्धः। तथाहि, जैमिनी-सूत्रम्—"तत्तसिद्धि र्जाति-साकाङ्क्ष्य प्रयोजन-भूम-लिङ्गसमवायात् (१.४,१९)।"-इति, तत्तसिद्धादि-हेतुतो गौण्यपि वाक्यशेषेति तदर्थः। एतच्च स्फुटं भट्टकारिकायाम्—"तत्तसिद्धि र्जाति साकाङ्क्ष्य-प्रयोजन-लिङ्ग भूमभिः षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पिता॥"-इति; तथा च 'अग्नं नयोभवस्यस्य प्राणो भौवायनः'-इत्यस्य एकस्यैव मन्त्रस्य प्राणभृत्त्वेऽपि लिङ्ग समवाय-हेतुतः तत्तत्सहचरिताः सर्व एव मन्त्रा गौण्या वृत्त्या प्राणभृच्छब्देन लक्ष्यन्ते ग्रहणन्त एव "प्राणभृत उपदधाति"-इत्यादि विधौ—तथैवात्रापि यदीवहन्तीत्यादीनां ऐन्द्र लिङ्गकत्वाभावे

अथ द्वादशे खण्डे—

सैषा प्रथमा।

मधुच्छन्दा ऋषिः।

१ २ ३ १र २र३ २ ३ १ २
गायन्तित्वागायत्रिणोर्चन्त्यर्कमर्किणः॥

३ १ २ ३ २ ३ १ २
ब्रह्माणस्त्वाशतक्रतउद्वꣳशमिवयेमिरे॥ १॥ ११०

१र २ ३ २ र ५ २ २
। गाया३१। त्वा३१२३४। गाय। त्रा३इणाः।

१ २ १ २ ५ २ २ ३ २
अर्चा३१। त्रिया३१२३४। कम। का३इणाः। ब्रह्मा-

१ २ ५ २ २ ३ २
३१। णस्त्वा३१२३४। शत। क्रा३ताउ। उद्वा३१।

---

११० उत्तरार्चिकस्य ५,२,२३,१ = ऋग्वेदस्य १,११८,१ = जर्हे ६,८—२२,२,५—२३,१—५।

I,II ग्रैखण्डिने द्वे।

ऽपि ऐन्द्र समुदाय-मध्य-पतितत्वेन इन्द्र-लिङ्ग-साचर्य्यात् गौणा ऐन्द्रत्व मित्यस्य पर्वस्यै-न्द्रत्व मयुक्तम्। किञ्च नैतदिह नूतनमुच्यते उदीरितञ्चैवं पुरस्तादिति स्मारितम्; तथाग्नेयैकादश-खण्डारम्भे द्रष्टव्यम् (२५८पृ०२५०) क्वचि न्यायो ऽप्येवम्, स तु लौकिक इत्येव विशेषः, अतएव माधवेन "एकस्मिन् मन्त्रस्य प्राणभक्षत्वेऽपि ऋत्विग्भो गच्छन्तीति-वत् तत्-सम्बन्धिताः सर्वे मन्त्राः प्राणभक्षत्वेन लक्ष्यन्ते (न्या०टी०१,४,१८)" इति।

३ २ ४
शमा३१२३४इ। वयापुइमिराइ। च्चोपुइ। डा॥१४॥

४र ४ ५ ११र २, ३ ५ १
II गायन्तित्वोच्चाइ। गायात्री२३४णाः। अर्चन्त्यर्क-

२ २ २ १ ५ १ २ ३ ४
मा१र्की३णाः। अर्चन्तियो२३४च्चा। कमार्की२३४णाः।

२ १र र २ २ २ र ३ ५
ब्रह्माणस्त्वा शता१क्रा३तो। ब्रह्माणस्त्वो२३४च्चाइ।

१ २ १ ५ १ २ २ २
शताक्रा२३४ताउ। उद्वꣳशमिवया१इमी३रे। उद्वꣳ

३ ५ ७ २ ४
शमो२३४च्चाइ। वयाइइमापुइरा१६५६इ॥१५॥

४र ५ र र ४ ५ ४ १
I,II,III गायन्तित्वागायत्रिणआ। अर्चन्त्यर्कमर्का

२ १र २ १
२३इणाः। ब्रह्माणस्त्वा२च्चो३१इ। शतक्रा२३ताउ। उद्वꣳ

१ २ २ १ ५ १ ३ २
शमिवया१इमी३रे। उद्वꣳशा२३४मो। वायाइउवाइ।

१ २
उप्। माऽइरो३५च्चाइ॥१६॥११०

हे "शतक्रतो" बहुकर्मन् बहुप्रज्ञ वेन्द्र! "त्वा" त्वां "गायत्रिणः"(१)

III ओहꣳशीयम्।

(१)—'गायत्रं साम, तद् येषामस्ति तद् गायत्रिणः, उद्गातार इत्यर्थः'-इति वि०। गायत्रीछन्दस्का सावित्र्यामृचि गीतं गायत्रं स्वरसङ्गम्, मेयं भवति तदन्यास्वपि ऋक्ष,

उद्गातारः "गायन्ति" स्तुवन्ति(२)। "अर्किणो" ऽर्चनहेतु-मन्त्र(३)-युक्ता ह्यातारः "अर्कम्" अर्चनीय मिन्द्रं "अर्चन्ति" शस्त्र(४)-गतै र्मन्त्रैः प्रशंसन्ति। "ब्रह्माणो" ब्रह्मप्रभृतयः इतरे ब्राह्मणाः(५)। "त्वा" त्वाम् "उद्येमिरे" उन्नतिं प्रापयन्ति। तत्र दृष्टान्तः—"वंश मिव" यथा वशांग्रे नृत्यन्तः शिल्पिनः प्रौढं वंशं उन्नतं कुर्वन्ति। यथा वा सन्मार्ग-वर्त्तिनः पुत्राः स्वकीयं कुलं उन्नतं कुर्वन्ति तद्वत्॥

एतामृचं यास्कएवं व्याचष्टे—"गायन्ति त्वा गायत्रिणः प्रार्चन्ति तेऽर्कं मर्किणो ब्राह्मणा त्वा शतक्रत उद्येमिरे वंशमिव वंशो वनगयो भवति वननाच्छूयत इति वेति(५,४,) ॥१॥ ११०

न तदक्षरान्वित-स्वरसङ्घस्य नाम गायत्रं प्रत्युत गानसाधनस्यैवेति तु ध्येयम्। अत एव मीमांसा न्यायमालायां सप्तमाध्यायस्य प्रथमपादारम्भे निर्णीतम्—"अतिदेशं विनियेतुं कवनीयं रथन्तरम्। गायतीत्यृग् गानयुक्ता शब्दार्था गान मेव वा"-इत्यादि। गायत्रादि लक्षणन्तु ताण्ड्या ब्राह्मणादिभ्योऽवगन्तव्यम्; तथाहि, तदीय-षष्ठ-तृतीय-खण्डे "अष्टाक्षरा गायत्री नवमो हिङ्कारः" इत्येव मादि।

(२)—गायतीत्यर्चति-कर्मसु द्वितीय नैघण्टुक सं १.१४।

(३)—"अर्को देवो भवति यदेन मर्चन्ति। अर्को मन्त्रो भवति यदनेनार्चन्ति अर्कं मन्नं भवत्यर्चति भूतानि। अर्को दृष्टो भवति स दृष्टः कटुकिल्वा"-इति नि० नै० ५,४।

(४)—प्रगीताप्रगीतभेदेन स्तोत्रशस्त्रे इति नामभेदः, स्तोत्रैव शस्त्रमन्त्राः पठ्यन्ते अत उक्तम्—"शस्त्रयाज्यानुवाक्याभिर्हौत्रालङ्कृतेऽध्वरम्। ऋग्भिरप्रगादिभिः स्तोत्रैर्ब्रह्मात्रालङ्करोत्यमुम्" इति (२पृ०)।

(५)—"इत्यादिवद्वचनान्ता गणस्य सूचकाः" इति नियमात् मदस्यादीनामपि ग्रह इति भावः।

अथ द्वितीया।

जेता माधुच्छन्दसऋषिः*।

२ ३ १ २ ३ १ २ ३ १ २
इन्द्रं विश्वा अवीवृधंत्समुद्रव्यचसङ्गिरः।

३ १ २ ३ १ २ १ २ ३ १ २ १ २ ३ १ २
रथीतमꣳरथानांवाजानाꣳसत्पतिंपतिम्॥ २॥ १११

५ १ १ १ २ १
I, इन्द्रं विश्वाः। अवीवृधान्। सामुद्रव्या।

२ १ २ २ १ २
चासङ्गिराः। राथीतमाय३उवा२। रथानाम्२। वा

१२ २ १ २ १ २ १
जानाय३ꣳसात्। पतिंपतिम्। इडा२य३भा३४३। ओ२

३४५इ। डा॥ १७॥

२ ३ ४ ५ २ २ १ १
II, ओइन्द्रं विश्वाः। अवी। वृधान्। सा१मू२

---

* 'यता नाम ऋषिः तस्येदमार्षम्'-इति वि०।

---

१११ उत्तरार्चिकस्य २,१,१९,१ = ऋग्विदस्य १,१,२१,१ = यजुर्वेदस्य १२,५६—१५,६१ = ऐतरेय-ब्राह्मणस्य ५,७ = जैमि २,१२—७,११—२१,३—२१,२,३।

१ १ २ १
द्राव्या२। चसम्। गिराः। रा१था२तामा२म्।
२ १ १ १ २
रथी। नाम्। वाजा२नाꣳसा२त्। पतिंपा२३तीं३४
१
३म्। ओ२३४५इ। डा॥ १८॥

३४ ३४२५२ २, ३ ५ ५
III, इन्द्रंविश्वाअवीवृधन्। समुद्रा२३४व्या। चा३-
१ २ २ १ २२
साङ्गीरा२राः। राथीतमा२म्। ऊ२। घा२इ। ऊ२।
१ २२ २
रथाइनाम्। वाजानाꣳसा२त्। ऊ२। घा२इ।
१ २ १
ऊ२। पतिं पा२३तीं३४३म्। ओ२३४५इ।
डा॥ १९॥

४५ ४५२ २ ४ ५ २१२
IV इन्द्रंविश्वाअवीवृधन्। एयाहाइ। समुद्रा-

I,II,III प्रथखण्डिनानि त्रीणि।

IV पूर्वमादृष्टम्।

१व्या२। चसांगा१इरा२३ः। ऐया२३ह्वाइ। रथाइ-
ना१मा२म्। रथाइनाइ२३म्। ऐया२३ह्वाइ। वाजा-
ना१ए्सा२त्। पताइंपा१तीइ२म्। ऐया२३ह्वा३४३इ।
ओ२३४५ूइ। डा॥ २०॥

V इन्द्रंविश्वाअवीवृधन्नैयादो। ह्वो६वा। समु-
द्रव्यचसम्। गाइरा२३ः। ऐया२३त्। औ२३ह्वोवा।
रथाइतमए्र। थाइना२३म्। ऐया२३त्। औ२३ह्वो-
वा। वाजानाए्सत्पतिम्। पातीइ२३म्। ऐया२३त्।
औ२३ह्वोवा३४३। ओ२३४५ूइ। डा॥ २१॥

V उत्तरमादए्ष्टम्।

VI, ह्वयाइ। ह्वयाइ३। ओहाओहा। ह्वयाइ।
ह्वयाइ३। ओहाओहा। ह्वयाइ। ह्वयाइ३। ओहा
ओहा। इन्द्रंविश्वाः। अवीवार्द्धन्। समुद्रव्या।
चसंगाइरा२ः। रथीतमम्। रथाइना२म्। वाजा-
नाऽसात्। पतिंपाती२म्। ह्वयाइ। ह्वयाइ३। ओहा
ओहा। ह्वयाइ। ह्वयाइ३। ओहाओहा। हो४इडा॥
हो४इडा। हो२३४५इ। डा॥ २२॥

VII ह्वयायेइ३। ह्वयायेइ३। ह्वया२३४५। ह७२
३। आ२३४इ। द्रंविश्वाअवी। वृधाइन्। सा२३४।
मुद्रव्यचसम्। गिराइः। रा२३४। थीतमऽरथी।

VI,VII महावख्रामित्रे हे।

अथ तृतीया।

गौतम*ऋषिः।

१ १ २ ३ १ २ २ २ ३ १ २ १ १ २
इमेमिन्द्रसुतम्पिबज्येष्ठममर्त्यंमदम्।

२ १ २ २ ३ ४ ५ १ २ २
नाऽम्। वाऽ२३४। जानाऽसत्पतिम्। पताऽइम्। च

१ १ २ १ २ ११११ ३ ११११ १
यायेऽ। चयायेऽ। चयाऽ२३४५। चऽ२३४५। चोऽ४इ

५ १ ५ ३
डा। चोऽ४इडा। चोऽ२३४५इ। डा॥ २३॥ १११

"विश्वाः" सर्वाः "गिरः" अस्मदीयाः स्तुतयः "इन्द्रम्" "अवीवृधन्"(१) वर्द्धितवत्यः। कीदृशमिन्द्रं? "समुद्रव्यचसं"(२) समुद्रव्याप्तवन्तं। "रथीनां" रथयुक्तानां योद्धॄणां मध्ये "रथीतमम्" अतिशयेन रथयुक्तं "वाजानाम्" अन्नानां "पतिं" सन्मार्गवर्त्तिनां पालकम्॥ २॥ १११

---

* 'गोतम'-इति वि० पाठः।

---

(१)—"नित्य वृद्धि (७,४,८)"-इति वृद्धिनित्यम्।

(२)—'समुद्रव्यचसं—समुद्रव्यचसा समुद्रस्य प्राप्तिरुच्यते समुद्रस्येव व्यचः प्राप्तिर्यस्य स समुद्रव्यचाः, तं समुद्रव्यचसं समुद्रव्याप्तिमित्यर्थः'-इति वि०।

३ १ २ ३क १२ ३ १ २ ३२ ३ १ २

पूक्रस्यत्वाभ्यक्षरन्धाराऋतस्यसादने ॥ ३ ॥ ११२

२१ ५ २१ ३ ५२२

I इममा२३४इन्द्रा। सुतम्। पा३इबा२३४ओहो

१२२१ऽर १२ २ १

वा। ज्येष्ठममा२र्तियम्मदम्। पूक्रा। स्यत्वाभी३या२

१ ३ २५ २ १२ऽर १ २१२ ३१११

३। क्षा२रा२३४ओहोवा। धारा२ऋतस्यसादने२३४

२

५ ॥ २४ ॥

५ ३२३३५ २२ १२ १ २ १

II, इममिन्द्रसुतंपिबा। ज्येष्ठाममा। तियम्मदा

३ २ ३२ ५ २ २ १ २ ३२

२म्। पूक्रा। ओहो२३४वा। स्यत्वाभ्यक्षरन्। धा-

२ ३२ ५ ३ २ ३२ ५ ४

रा। ओहो२३४वा। ऋता। ओहो२३४वा। स्यसा

४

पूदनाद्। होपूद्। डा ॥ २५ ॥

---

११२ उत्तरार्चिकस्य ३,१,२१,१ = ऋग्वेदस्य १,६,५,४। = जहे३,१—२२,२,१७—२३,३।

III, इमिन्द्रापुस्तुतंपिबा। ज्येष्ठममाऽर्त्तायम्मादा२ म्। औ२। हौ२। ऊवाइ। औ३ह्वो२३४वा। प्रुक्रास्यत्वा३भायत्तारा२न्। औ२। हौ२। ऊवाइ। औ३ह्वो२३४वा। धारा१क्टता२। औ२। हौ२। ऊवाइ। औ३ह्वो२३४वा। स्यसादा२३ना३४३इ। ओ२३४५इ। डा॥ २६॥

IV इमिमी२३। द्रस्तुतंपिब। ज्येष्ठाम्। अमाऽर्त्ता-यम्मादा२म्। प्रुक्रास्यत्वा३। भिया२त्ता२३४रान्। धाराओ२३४वा। आर्त्ताओ२३४वा। स्यसापूदनाइ। हो-५इ। डा॥ २७॥ ११२

I,II,III,IV वसिष्ठस्य प्रियाणि चत्वारि।

अथ चतुर्थी।

अत्रिर्ऋषिः।

१ २ ३ २उ ३ १ २
यदिन्द्रचित्रमद्दना*स्तित्वादातमद्रिवः।

३ १ २ २ १ २
राधस्तन्नोविदद्वसउभयाहस्त्याभर॥ ४॥ ११३

हे "इन्द्र!" "सुतम्" अभिषुतं "इमं" सोमं "पिब"। कीदृशं? "ज्येष्ठं" अतिशयेन प्रशस्यं "मदं" मदकरं "अमर्त्यम्" अमारकं (सोम-पान-जन्यो मदो मदान्तरवन्मारको न भवतीत्यर्थः) तथा "ऋतस्य" यज्ञस्य सम्बन्धिनि "सदने(१)" गृहे वर्त्तमानस्य "शुक्रस्य"(२) दीप्तस्यास्य सोमस्य "धाराः" "त्वा" "अभ्यक्षरन्"(३) आभिमुख्येन सञ्चलन्ति त्वां प्राप्तुं स्वयमेवागच्छन्तीत्यर्थः॥ ३॥ ११२

---

* "यदिन्द्र चित्र मेहना" इति वङ्गवृक्पाठः।

---

११३ उत्तरार्चिकस्य ४,२,१४,१ = ऋग्वेदस्य ४,२,१०,१ = जैह ४,१९—२२,२,१९ = जैह्मे ५,२,७।

(१)—सदने वेद्याख्येऽग्नौ, धाराः, अभ्यक्षरन् क्षरन्ति इति वि०-सम्बन्धोऽयं।

(२)—'शुक्रस्य, शुक्रसंज्ञकस्य प्रवस्य'-इति वि०।

(३)—'अभि, अभिशब्दः "अभिरभागे (१,१,९१)" इत्येवं कर्मप्रवचनीयः, प्रतिशब्देन समानार्थः। त्वां प्रति अक्षरन् क्षरितवन्त्यः क्षरन्ति। काः? धाराः' इति वि०।

४ ५ ४ २ १ १
I यदिन्द्रोद्दाइ। चित्रमदुहनाइ२३। आ२३४। स्ति

२ ५ २ २ १ १ ३ ४ २
त्वादा। द्दा३इ। तमद्राइवा२३:। रा२३४। धस्तन्नो-

५ २ १ २ १
विदा। द्दा३। वा। साउ। उभयाद्दा२३। स्तिया-

२ ५
उवा३४३।/ भा३४५रोऽद्दाइ॥ २८॥

५ २ ४ ५ ३ ५ १ २ २
II यदिन्द्रचित्रमीद्दोवा। द्दा२३४ना। अस्तित्वादा-

२ १ २ ३ ५ १ २ २
तमीवाइ। ओवा। द्रा२३४इवाः। राधस्तन्नोविदो-

२ १ २ ३ ५ १ २ २
वाइ। ओवा। वा२३४साउ। उभयाद्दस्तियोवाइ।

१ २ २ ५
ओवा३४३। भा३४५रोऽद्दाइ॥ २९॥

I,II वोकि दे।

I यदिन्द्रा२३चित्र। मद्द्वा२३४ना। अस्ता२इ-
त्वादा। तमद्राइवो। राधस्तान्ना२ः। विद्दसाउ।
उभयाद्दा२३। स्ता२३या३। भा३४५रोई३द्दाइ ॥ ३० ॥

II यदिन्द्रचित्रमइ। द्दना३। आस्ती। त्वादात-
मद्रिवः। राधस्ता२३न्नाः। वीवी२। द्दसाउ। उ-
भया२३द्दा। स्तायाइ३। भा२३रा३४३। ओ२३४५इ।

डा ॥ ३१ ॥ ११३*

हे "अद्रिवो"(१) वज्रवन्! "चित्र" चायनीयेन्द्र! "यद्" इदं "त्वादातं" त्वया दातव्यं यद् "राधो" धनम् "द्दह" अस्मिन्

I आकूपारमनादेश्यम्।

II वीङ्क्रम्।

(१)—'मतुवसोरिति (८,३,१) रुत्वं रूपम्।

---

* ॥ इति ग्रामे गेये नवमस्यार्द्धः प्रपाठकः ॥

अथ पञ्चमी।

तिरश्ची आङ्गिरसऋषिः।

३ १र २र ३ २उ ३ १ २ ३ १ २
श्रुधीहवन्तिरश्चाइन्द्रयस्त्वासपर्यति।

३ १ २ ३ १ २ ३ १ २ ३ १ २
सुवीर्यस्यगोमतीरायस्पूर्द्धिमत्ताꣳअसि ॥ ५ ॥ ११४

लोके "मे" मम नास्ति तद्धनं हे "विदद्वसो" लब्धधनेन्द्र! "नः" अस्मभ्यम् "उभया हस्त्या"(२) उभाभ्यां हस्ताभ्याम् "आभर" आहर॥

अत्र निरुक्तं—"यदिन्द्र चित्रं चायनीयं मंहनीयं धनमस्ति यन्म इह नास्तीति वेति द्रष्टव्यम्(३) ॥ ४ ॥ ११३

---

११४ उत्तरार्चिकस्य २,२,१९,१ = ऋग्वेदस्य ६,६,३०,५ = ऊहे २,२,७—१३,१४।

(२,—आर्ते (७,१,३९) रूपम।

(३)—तथाच—"यदिन्द्र चित्रं चायनीयं, मंहनीयं धनमस्ति। यन्मदर्थं नास्तीति वा (तीणि मध्यमानि पदानि) त्वया न क्षुद् दातव्यम्। अद्रिवन् (अद्रिरादृणात्येनेनापि वाभिः स्यात्। ते सोमाद इति ह विज्ञायते। राध इति धन नाम राध्नोत्येनेन) तन्नस्त्व विद्यधनोभाभ्यां हस्ताभ्यामाहर उभौ मम्रक्षौ भवतः' इति ४,४।

I ओम् ॥ ५ ४ १ १ १ अधी। हावा२ऽहावा२म्। तिरश्चियाः।

२१ २ ऽ २ १ ऽ २ १२ इन्द्रया२३त्वा। सपौ३हो। र्यतीश्या। सुवीर्यस्य-

२ २२१ २ १ २ ३ ३ गोमताः। रायास्पू२३र्ध्वो। मद्दा३ऽ२३। असिया३४३।

१ ओ२३४५ऽ३। डा ॥ १ ॥

५ २ २ ४ ५ २ १ १ १ २ ३ २ II अधीहा३वन्तिराश्चियाः। इन्द्रायत्वा। सपर्य-

१ २ ५२ ३ २ ३ ५ १ १ ताये३४। सुवी। रिया स्या२३४गो। माता२ः। रा-

२ २ २ ४ ४ यास्पूर्ध्वो३। हाइहाइ। मद्दा३ऽ५ऽअसी। हो ५ ऽ३

डा ॥ २ ॥ ११४

हे इन्द्र! यः "त्वा" त्वां "सपर्यति" (सपर-शब्दः(१) कण्ड्वादिः)

I,II तैरश्चेऽहे ।

(१)—"सपर्यति"-इति परिचरण कर्मसु नामधेयं वैयाकरणकम् ३.१ ।

अथ षष्ठी।

गोतमऋषिः।

१२ ३१२ ३१२ ३१२
असाविसोमइन्द्रतेशविष्ठधष्वागहि।

१ २ ३२३ ३२३ २३१ २
आत्वापृणक्तिन्द्रियꣳरजःसूर्योनरश्मिभिः॥ ६॥ ११५

हविर्भिः परिचरति तादृशस्य "तिरश्चा" एतन्नामकस्य ऋषेर्मम "हवं" स्तुतिं "श्रुधि"(२) शृणु। श्रुत्वा च हे इन्द्र! त्वं "सुवीर्यस्य" शोभनवीर्योपेतस्य। यद्वा (वीरे पुत्रे भवं वीर्यं) सुपुत्रवतः। "गोमतः" गवादि-पशुमतः(३)। "मयो" धनस्य दानेन "पूर्धि" अस्मान् पूरय(४)। एतत्सामर्थ्यं कुत इत्यत आह— त्वं "महान्" गुणाधिकः देवानां श्रेष्ठस्य "असि" भवसि खलु॥ ५॥ ११४

---

११५ उत्तरार्चिकस्य ३,२,२३,१=ऋग्वेदस्य १,६,५,१,= जघे ३,१८,—२२,२ १८—२३,४।

(२)—"शृ-ध्रु-स्रु कु-टुभ्यस्छन्दसि (६,४,१०२)"-इति सिद्धम्। मन्त्रे तु दीर्घः पाठः 'श्रुधी'-इति, स च "सुधोऽत (६,१,७५)"-इत्यत्र अत इत्यधिकारेण साध्यः।

(३)—'गो-शब्देनात्र सोम उच्यते सोमवत्त्व इत्यर्थः'-इति वि०।

(४)—"पूर्धि"-इति याज्ञा कर्मणि षष्ठं नैघण्टुकम ३,१९। "शृ-ध्रु-स्रु-पॄ कु-टुभ्यस्छन्दसि (६,४,१०२)"-इति सिद्धम्। "पूर्धि पूरय देवेति वा"-इति नि० नै०४,२।

३ ४र ३र ५ ५ र २ ३ ५ ३ १
I असाविसोमइन्द्रते। शाविष्ठा२३४धृ। ष्णोऽआ-
२ १ १ २र २ २ १ २ ५
गाऽहो। आत्वापृणा२३हाऽ। क्तुई२०द्रा२३४याम्।
१ २ ३ ५ ४ ४
रजाः। सूर्योवा ओ२३४वा। नरापृञ्जिभीः। हो ५ इ
डा ॥ २ ॥ ११५ ॥

हे "इन्द्र"! "ते" त्वदर्थं "सोमः" "असावि" अभिषुतोऽभूत्। हे "शविष्ठ" अतिशयेन बलवन्! अतएव "धृष्णो" शत्रूणां धर्षयितरिन्द्र! "आ गहि"(१) देव-यजन-देश मागच्छ। आगतश्च "त्वा" त्वां "इन्द्रियं" सोम-पानेनोत्पन्नं प्रभूतं सामर्थ्यम्(२) "आ पृणक्तु"(३) आ पूरयतु। "रजः" अन्तरिक्षं(४) "रश्मिभिः" किरणैः "सूर्यो न" यथा सूर्यः पूरयति तद्वत् ॥ ६ ॥ ११५

I महावैश्वामित्रम्।

(१)—"वा छन्दसि (३,४,८८)"- इति सिद्धम्।

(२)—'इन्द्रियं, बलमेतेन-मत्वर्थमिदं द्रष्टव्यम्, इन्द्रियवन्तम्, अविकलेन्द्रियमित्यर्थः-इति वि०।

(३)—पृच सम्पर्के-इति 'वर्धादेरूपमिदम्, अर्थान्तरत्वाद।

(४)—'रजसी'-इति द्यावापृथिवी-नामसु अष्टमं नैघण्टुकम् १,३०। अतश्चाह विवरणकृत्—'रजः-शब्दो लोकवचनः। ● ● ●। यथा पृथिवी-लोके अन्तरीक्ष-लोके च सूर्यः'-इति।

अथ सप्तमी।

कण्वो नीपातिथिर्ऋषिः*।

१२ ३१ २३२३१२ ३२
ऐन्द्र॰याच्चिद्धरिभिरुपकण्वस्यसुष्टुतिम्।

३२ २३ ३१ २३ १२३१३
दिवोअमुष्यशासतोदिवंययदिवावसौ॥ ७॥ ११६

५२२ ३ ४२ ५ ४ ५ २ १ २३
I ऐन्द्राऽ३याच्चिद्धरिभाइः। उपाकण्वाऽ३। स्यासुष्टूऽ२३४

५ २२ १ २, ३ ५ १ २
तोम्। दिवोअमूऽ३। ष्याशासाऽ२३४ताः। दाइवंयया

१ ४ २ ५
३१उवाऽ२३। दाऽ२३इवाऽ३। वाऽ३४५सोऽ६च्चाइ॥ ४॥

४२५२ ४ ३ ५ ५ १ २१
II ऐन्द्रयाच्चिद्धरिभिः। उऊवाच्चाइ। उपकण्वस्यसु-

---

* 'मेधातिथिराह'-इति वि०।

॰ "ऐन्द्र"-इति ऋग्वेदीयः पाठः।

---

११६ उत्तरार्चिकस्य ९,१,१६,१=ऋग्वेदस्य ६,३,२,१।

I,II काण्वे द्वे।

२ १ २ १२ २ १ २, १
ष्टतिम्। उऊवा२३ह्वाइ। दिवोऽमू३। ष्याशासा२३-

५ १ ३२ ५ ४
४ताः। दाइवंययाउ। वाइ। दे२३४वा। वसोपूह्वा।

५
ह्वोपूइ। डा॥ ५॥ ११६

हे "इन्द्र!" "कण्वस्य" एतन्नामकस्य ऋषेः(१) "सुष्टुतिं"(२) शोभनां स्तुतिं प्रति "हरिभिः" अश्वैः "उपायाहि" आगच्छ। "दिवो" द्युलोकं [द्वितीयार्थे षष्ठी(३,१,८५)] "अमुष्य" अमुष्मिन्द्रे "शासतः" शासति [विभक्ति-व्यत्ययः(३,१,८५)] तत्र वयं सुखमास्महे। हे "दिवावसो" दीप्त-हविष्केन्द्र! "दिवं" स्वर्गं "यय" यूयं गच्छत (बहुवचनं पूजार्थम्)।

यद्वा। हे "दिवावसो" दिवो द्यु नामकं "अमुष्य" अमुं लोकं "शासतः" शासनं कुर्वन्तो यूयं "दिवं" स्वर्गं "यय" गच्छत (अत्र बहुवचनं पूजार्थमित्यर्थः॥ ७॥ ११६

---

(१)—'कण्वस्य सुष्टुतिं, लुप्तोपमेयमेतद् द्रष्टव्यम्—कण्वस्य स्तुतिमिव'-इति वि०।
(२)—"पूर्वपदात्(८,३,१०६)"-इति षत्वम्।

अथाष्टमी।

अस्याः परस्याश्च तिरश्ची ऋषिः।

२ ३ १ १ ३ २ ३ १ २ ३ १ २
आत्वागिरोरथीरिवास्थुःसुतेषुगिर्वणः।

२ २ ३ १ २ ३ १ २ ३ २ ३ ३ १ २
अभित्वासमनूषतगावोवत्संनधेनवः * ॥ ८ ॥ ११७

५ २ २ २ ४ २ ५ ४ २ ५ २ ३ २ १ ७ ६
I आत्वागाइइरोरथीरिवा। अस्थुः सुतेइषूगिर्वणा

२ ५ २ ५ २ २ १ २ २
इः। ओ३४वा। ओ२३४वा। अभित्वामाइमानू१षाताइ।

२ ४ ३ ५ १ २ २ २ १ ५
ओ३४वा। ओ३४वा। गावोवाइत्साइम्। नधो२३४वा।

४ ५
नापूवोईच्चाइ ॥ ६ ॥ ११७

"गिर्वणः" गोभिर्वननीय हे इन्द्र! "सुतेषु" सोमेषु अभिषुतेषु सत्सु "गिरः" अस्माकं स्तुतिलक्षणा वाचः "त्वा" त्वाम्

* "समनूषतेन्द्रं वत्सं न मातरः"-इति ऋग्वेदीय पाठः।

११७ ऋग्वेदस्य ६,६,३०,१।

I वैश्वामित्रम्।

अथ नवमी।

विश्वामित्र ऋषिः।

२३ २ ३ १२ ३२ ३ २३१ २
एतोन्विन्द्रꣳस्तवामशुद्धꣳशुद्धेनसाम्ना।

३२ ३१ २ ३१ २ ३२ ३ १ २
शुद्धैरुक्थैर्वावृध्वाꣳसꣳशुद्धैराशीर्वान्ममत्तु ॥९॥ ११८

"आ स्युः"(१) आभिमुख्येन शीघ्रं गच्छन्ति तिष्ठन्तीत्यर्थः। तत्र दृष्टान्तः—"रथीरिव" यथा रथवान् रथेन गच्छन् वीरः प्राप्यं देशं क्षिप्रं गच्छति तद्वत्। किञ्च। हे इन्द्र! अस्मदीया गिरः "त्वा" त्वाम् "अभि" लक्ष्य "समनूषत" सम्यक् शब्दायन्ते स्तुवन्तीत्यर्थः (नु स्तवने। कुटादिः(२)। तस्य लुङि रूपं) तत्र दृष्टान्तः—"वत्सम्न" यथा "धेनवः" प्रीति-युक्ता गमन-शीला वा "गावः" वत्सं मभिलक्ष्य हम्भा-रवादि-शब्दं कुर्वन्ति तद्वत्॥ ८॥ ११७

---

* 'विश्वमना आह आत्मीयान् ऋत्विजः'-इति वि०।

---

११८ उत्तरार्चिकस्य ६,२,८,१ = ऋग्वेदस्य ६,६,३१,२ = उक्थे ७,२,१२।

(१)—"छन्दसि लुङ्लुङ्लिटः (३,४,६)"-इति सार्वकालिके लिटि रूपम्।

(२)—तथाच—"गाङ्कुटादिभ्योऽञ्णिन्ङित् (१,२,१)"-इति ङिच्चो ऽपित्त्वे ङिति गुणाभावः फलम्।

४२५२ ४ ५ ४ ५२४ २ १ २ २१ २
I एतोन्विन्द्रꣳस्तवामा। शुद्धꣳशुद्धेनसा२३स्ना।

१२ २ २ २१ २ १२ २ १
शुद्धैरुक्थैर्वावृध्वा२३ꣳसाम्। शुद्धरा२३शी३। र्वाऽन्।

१२ ५२ २ ३ १ १ १ १
ममा३४औहोवा। ह्व२३४५॥ ७॥

५२२२ ५ २ १ २ १
II एतोन्विन्द्रꣳस्तवाऽमा। शुद्धꣳशुद्धे। न। साम्ना-

१ २ २ १२ ३ ५ २
२। शुद्धाऽद्धरुक्थाऽदः। वावा२र्ध्वा२३४ꣳसाम्। शु-

१२ २ १ २ १ २ १
द्धैरा२३शी। र्वान्ममत्तु। दूडा२३भा३४३। ओ२३४५दू।

डा॥ ८॥ ११८

अत्रेतिहास मात्तत्ते—पुरा किलेन्द्रो व्रतादिकानसुरान् हत्वा ब्रह्महत्यादि-दोषेणात्मान मपरिशुद्ध मित्यमन्यत। तद्दोषपरिहाराय इन्द्र ऋषीनवोचत्——यूयं अपूतं मां युष्मदीयेन साम्ना

I शुद्धाशुद्धीयम्।

II शुद्धाशुद्धीयोत्तरम्।

शुद्धं कुरुतेति। तत स्ते च शुद्धात्पादकेन साम्ना शस्त्रैश्च परिशुद्धमकार्षुः। पश्चात्पूतायेन्द्राय यागादि-कर्मणि सोमादीनि-हवींषि च प्रादुरिति। एषोऽर्थः शाटायनक-ब्राह्मणे प्रतिपादितः—"इन्द्रो वा असुरान् हत्वा पूत इवामेध्यो अमन्यत असौ अकामयत शुद्धमेव मासन्तं शुद्धेन साम्ना स्तुयुरिति। स ऋषीनब्रवीत् स्तुत मेति। त ऋषयः सामापश्यन् तेनास्तुवन् एतोन्विन्द्रमिति ततो वा इन्द्रः पूतः शुद्धो मेध्यो भवदिति"।

तथाच अस्या ऋचोऽयमर्थः—

ऋषयः परस्परं ब्रुवन्ति। "नु" क्षिप्रम्(१) "एतो" आगच्छतैव। आगत्य च "शुद्धेन" शुद्धात्पादकेन साम्ना। तथा शुद्धैः शुद्धि-हेतुभिः "उक्थैः" शस्त्रैश्चेन्द्रं "शुद्धम्" अपापिनं कृत्वा "स्तवाम" स्तुयाम। ततः "साम्ना" शस्त्रैः "वावृध्वांसं" पाप-राहित्येन वर्द्धमानं "शुद्धैः" शुद्धात्पादकैः स्तोत्रैः क्रियाविशेषैः "आशीर्वान्" आश्रयणवान्(२) गव्यादिभिः संस्कृतः सोमः "ममत्तु" इन्द्रं मादयतु (माद्यतेश्छान्दसः श्लुः(३))॥

"शुद्धैराशीर्वान्"-"शुद्धआशीर्वान्"—इति पाठो॥८॥११८

---

(१)—"'नु-इति क्षिप्र-नामसु प्रथमं नैघण्टुकम् २,१५।

(२)—'सोममिश्रितं दधि आशिरमुच्यते, तद् यस्यास्ति सः आशीर्वान्'-इति वि०।

(३)—दिसीयाशीर्य-यजुस्-वचनात् (२,४,७६)।

अथ दशमी।

शंयुर्बार्हस्पत्य ऋषिः।

२ ३ १ २ ३१ २ ३ २ ३ १ २
योरयिंवो*रयिन्तमोयोद्युम्नैर्द्युम्नवत्तमः।
१ २ ३१ २र ३१ २ ३१ २
सोमःसुतःसइन्द्रतेऽस्तिस्वधापतेमदः॥ १०॥ ११९

॥ प्रथम-दशतिः॥

५र र र ३ ५ १र र
I योरयिंवोरयाहाउ। ता२३४माः। योद्युम्नैर्द्युम्नव-
२ १र १ ७ १ र
त्तमः। सोमःसुतःसआ२३ह्वोइ। द्रता २इ। अस्तिस्वधा-
१ २
पता२३ह्वोये३। मदो२३४५इ। डा॥ ९॥

३र ४ ३ ४र ५ ३ ५ ३र ४ ३र ४ ५
II योरयिंवोरयि। तमो२३४ह्वाइ। योद्युम्नैर्द्युम्नव।

---

* "योरयिवो"-इति निरनुस्वार ऋग्वेदीय-पाठः।

---

११९ ऋग्वेदस्य ४,७,१६,१ = आरण्यगाने ३,२,१४।

I,II रयिम्रि हे।

२ ५ ३र४ ३ ४५ ३ ५ २
तमो२३४हाइ। सोमःसुतःसइ। द्रतो२३४हाइ। अ-

४५र र ३ ५ ४
स्तिस्वधापते। मदो२३४हा। हो५इ। डा॥ १०॥११९

हे इन्द्र! "वः" (वचन-व्यत्ययः—(३,१,८) तव परिचारकेभ्यः स्तोतृभ्यः "यः" सोमः "रयिं" धनं प्रयच्छतीति शेषः। कीदृशः "रयिन्तमः" अतिशयेन रयिमान्। यश्च "द्युभिः" द्योतमानैर्यज्ञैः(१) "द्युमत्तमः" अतिशयेन यशस्वी। हे "स्वधापते" स्वधाया अन्नस्य(२) सोमलक्षणस्य पालकेन्द्र! स "सोमः" अभिषुतः सन् "ते" तव "मदः" मदकरः "अस्ति" भवति॥ १०॥ ११९

वेदार्थस्य प्रकाशेन तमोहार्दन्निवारयन्*।
पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वर-वैदिकमार्ग-प्रवर्तक-श्री-वीर-बुक्क-भूपाल-साम्राज्यधुरन्धरेण सायणाचार्य-विरचिते माधवीये सामवेदार्थप्रकाशे छन्दो-व्याख्याने तृतीयाध्यायस्य द्वादशः खण्डः॥ १२॥

---

(१)—"द्युभिः सवनीय-पुरोडाशादिभिः"-इति वि०।
(२)—"स्वधा"-इति अन्न-नामसु सप्तदशनमं नैघण्टुकम् २,७।
* "निरामयन्" इति रा० शा० पु० पाठः।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

अथ चतुर्थाध्याय आरभ्यते ।

तत्र प्रथम-खण्डे—

मैषा प्रथमा ।

भरद्वाजऋषिः ।

१ २ ३ १२ ३ १ २ ११२
प्रत्यस्मै पिपीषते विश्वानिविदुषेभर ।
३ २ १ २ ३ १ २ १ १ २
अरङ्गमायजग्मयेऽपश्चादघ्वनेनरः ॥ १ ॥ १२०

---

१२० उत्तरार्चिकस्य ६,३,२,१ = ऋग्वेदस्य ४,७,१४,१ = जघे १०,१—१६,१—२ = जघ्ने २,२ = ८ ।

१ २ २ १ २ २ १ २२
I प्रत्यस्मैपिपाहाउ। आइषाइताइ। वाइश्वानि-

१ २ २ २ २ १ ऽर १
वाइ। दूषेइहाइहाइइ। भाइरा। आरा२०गमा। या-

२ २ २ २ २ १ ३ ५२
जाइहाइ। ग्माइयाइ। अपा२३। श्वा२दा२३४औ-

२ १ ऽर १ ३ १ १ ११
होवा। घ्वने२नरा२३४५: ॥ ११ ॥

५ २ ५२ १ २२ १ २२१
II प्रत्यस्मैपी६पीषताइ। वाइश्वानिवाइ। दूषेभा-

१ ऽर १ २
रा२। आरा२०गमा। यजग्मा। याइ। अपश्वाद-

१ २१ २ ४ ५ ४
घ्वना२३होइ। नरा। औ३होवा। हो५इ। डा ॥१२॥

३ ४ ५२ ४ ५२ ३ २ १ २ ५
II प्रत्यस्मैपिपी। षताइइ। वा२३४इ। श्वानि-

I,II कौल्मलवर्हिषे द्वे।

II नानदम।

र ४५ ४ ३र४५ ३ ५
विदुषे। भारा। अरङ्गमायज। गमयो२३४चाद्व।

४५४५ २१ ५ ४ ५
आपश्चादा। घ्वनो२३४वा। नापुरोदृचाद्व ॥ १३ ॥१२०

हे अध्वर्यो! "नरः" कर्मणि नेतस्त्वं "अस्मै" इन्द्राय प्रति-भर"(१) प्रतिहर सोमं प्रयच्छेत्यर्थः। कीदृशायेन्द्राय? "पिपी-षते" पातुमिच्छते(२)। "विश्वानि" सर्वाणि वेद्यानि "विदुषे" जानते। "अरङ्गमाय" पर्याप्त-गमनाय। "जग्मये" यज्ञेषु गमन-शीलाय। "अपश्चादघ्वने" [दधि गति-कर्मा(३)] अपश्चाद्गम-नाय सर्वेषा मग्रगामिने (नरः नृ शब्दाच्चतुर्थ्यर्थे षष्ठी(४)। ङसि ऋतो गुणश्छान्दस(५)) नरे कर्मणेत्रे(६)। अतएव बह्वृचा "अपश्चादघ्वने नरे" इति चतुर्थ्यन्तत्वेनामनन्ति ॥ १ ॥ १२०

---

(१)—भरदिति "हृग्रहोर्भच्छन्दसि"-इति वचनाद् हरतेर्भलेन रूपम् यतो व्याचष्टे प्रति हरेति।

(२)—ग्रह-चमसादीनि पायाणीति शेषः।

(३—निघण्टौ "दधति"-इत्य गति-कर्मसु एकपठितमत्वेन पाठात् (२,१४)।

(४)—"चतुर्थ्यर्थे बहुलं छन्दसि (२,३,६२)"-इति पा०।

(५)—"बहुलं छन्दसि (७,३,९,७)"-इति पा०।

(६)—'नरः प्रथमैकवचनमिदं चतुर्थ्येकवचनस्य स्थाने द्रष्टव्यम, नराय मनुष्या-कारायं'-इति वि०।

अथ द्वितीया।

वामदेवः शाकपूतो वा*ऋषिः।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २
आनोवयोवयःशयंमहान्तंमङ्करेष्टांमहान्तंपूर्विनेष्टाम्।

३ २ उ १ १ २
उग्रंवचोअपावधीः ॥ २ ॥ १२१

५ २ २ २ ५ २ २ १ ५
I आनोवयोवयःशाꣳयाम्। महान्तङ्कराऽ३४इष्टा-

२ २ २ ३ ५ २ १ २ १
म्। महान्तंपूर्विनाऽ३४इष्टाम्। उग्रंवाऽ३चाः। अ-

२ ४
पाऽ३वाधूधाꣳऽ५ऽः ॥ १४ ॥ १२१

हे "वयस्य"(१) मित्रभूतेन्द्र! "अयम्" ईदृशस्त्वं "महान्तं" महत्प्रभूतं "गङ्करेष्टां" गिरि-गुहादौ वर्त्तमानं "नः" अस्म-

---

* 'वामदेवस्यार्षम्' इत्येव वि०।

---

१२१ यजुर्वेदस्य ५,८।

I शाकपूतम्।

(१)—मूले "वयः अयम्"-इति यद् दृश्यते, तत्रैव 'वयस्य!'—'अयम्'-इत्येवं छेदः स्वीकृतो भाष्यकृतेति बध्यते। विवरणकारेण तु नात्र किमपि व्याख्यातम।

अथ तृतीया।

प्रियमेधऋषिः।

२ ३ १ ३ २ ३ १ २ ३ १ २
आत्वारथंयथोतयेसुम्नायवर्त्तयामसि।

२ १ १ ३ २ ३ १ १ ३ १ २
तुविकूर्मिंमृतीषहमिन्द्रंशविष्ठसत्पतिम्* ॥ ३ ॥ १२२

दीयं "वयः" सोम-लक्षण मन्नम्(१) "आ" हर [उपसर्ग-श्रुतेर्योग्य-क्रियाध्याहारः(२)] आहृत्य "महान्तं" महत्-प्रभूतं "पूर्विनेष्टां" पूर्वमादौ संसारे प्रवर्त्तमानम्। "उग्रं" क्षुत्पिपासा-निमित्तेन भयङ्करं। "वचः" अस्मदीयं वचनं ("अशनायापिपासे ह त्वा उग्रं वचः"—इति श्रुतेः) "अपावधीः" अपजहि, देवत्वं प्रापयेत्यर्थः ("तत् प्राप्नोत्यशनायापिपासे निवर्त्तते। न वै देवा अश्नन्ति न पिबन्ति"—इति श्रुतेः ॥ २ ॥ १२१

---

* "इन्द्र शविष्ठ सत्पते"-इति ऋग्वेदीय-पाठः।

---

१२२ उत्तरार्चिकस्य ८,१,३,१=ऋग्वेदस्य ६,५,१,१= अच्छे २१,१८।

(१)—वय इति सुत इति च अन्न-नामसु पाठ-भेदेन सप्तमं नैघण्टुकम् १,७।

(२)—"आनो वयो"-इति मूले आ-इत्युपसर्ग-श्रवणात् वराणामरेति क्रिया अध्याहार्येति भावः।

I आत्वारथंयथौहोवा। तायाइ॒ह२३४म्ना। यवर्त्त-
यामसितुविकूर्मीम्। आ२३४र्त्तौ। षहम्। आइन्द्रा-
ग्ँ॒ग्नावी। ष्ठसत्या २ ३ ती ३ ४ ३ म्। ओ २ ३ ४५इ।
डा ॥ १५ ॥

II आत्वारथंयथो। तयाइ। आत्वारथाम्। यथो
तायाः। औहो२३४वा। ई२३४हा। सुम्नायवर्त्ता३या-
मसी। औहो३१इ। औ२हो२३४वा। तुविकूर्मिम्ना-
इषहम्। औहो३१इ। औ२हो२३४वा। इन्द्रग्ँ॒ग्नवि-
ष्ठा३सात्यतिम्। औहो३१इ। औ२हो२३४५वाइ५इ।
ई२३४हा ॥ १६ ॥ १२२

I,II कौथमलवह्निषे इ ।

अथ चतुर्थी।

प्रगाथऋषिः।

२ १ २ १ १ २ ३१ २
सपूर्व्यामच्छोनांवेनःक्रतुभिरानजे।

३ २ १ २ २ ३२ १ २३ १ २ ३१
यस्यद्वारामनुःपिता*देवेष्वधियआनजे॥ ४॥ १२३

हे इन्द्र! "त्वा" त्वां "आवर्त्तयामसि" आवर्त्तयामः। किमर्थम्? "ऊतये" अस्माकं रक्षणाय "सुम्नाय" सुखाय च(१)। किमिव? "रथं यथा" ऊतये सुखाय चावर्त्तयन्ति तद्वत्। हे "गविष्ठ"(२) बलवत्तमेन्द्र! "तुविकूर्मि"" बहु-कर्माण(३) "ऋती-

* "मनुष्पिता"(क) -इति सायणाचार्य्य-धृतपाठः, ऋ पाठश्च।

१२३ ऋग्वेदस्य ६,४,४१(२४)१।

(१)—"सुम्नम्"-इति सुख-नामसु षोड़शतमं मैघष्ठुकम ३,६।

(२)—'सम्बुध्येकवचनमिदं द्वितीयैकवचनस्य स्थाने द्रष्टव्यम्, गविष्ठम् अतिशयेन बलवन्तम्'-इति वि०।

(३)—'तुवीति बल-नाम (नै०३,१,२), कूर्मिः कर्मा, बहूनां हवनधादीनां कर्मणां कर्त्तारम्'-इति वि०।

(क)—"इन्द्रमि षाऽप्राम्रेडितयोः (८,३,३४)"-इति विसर्गस्य सत्व-विकल्प-विधानात्।

५ र र र ५ २र १ र २ २
I सपूर्व्यामहोनाꣳमे। वेनःक्रत्वाऽभाइरानजेऽ। हा

२ ऽ २ २ १ र ऽर १
ऽहा। औऽहोऽवा। आइहीऽ२। यस्यद्वाराऽमानुः-

२ २ २ ऽ २ २ १ १ र
पिताऽ। हाऽहा। औऽहोऽवा। आइहीऽ२। दाइवेषू-

२ २ २ ऽ २ २ १ १
धाऽ। हाऽहाइ। औऽहोऽवा। आइहीऽ२। यआऽ-

१ ३ ५र र २ १ ३ ११ ११
३। नाऽजाऽ३४औहीवा। मधुꣳसुताऽ३४५ः॥ १७॥ १२३

षन्नम्" हिंसकाना मभिभवितारं। "सत्पतिं" सतां पालकमिन्द्रं त्वामिति समन्वयः॥ ३॥ १२२

"स" इन्द्रः(१) "पूर्व्यो" मुख्यः(२) "महोनां"(३) पूज्यानां यजमानानां "क्रतुभिः" यज्ञैर्निमित्तभूतैः "वेनः" कान्तः(४)

I मधुꣳसुविधनम्।

(१)—'स मनुष्यः'-इति वि०।

(२)—'पूर्व्यः प्रथम इत्यर्थः'-इति वि०।

(३)—'महोनां धकारस्य हकारापत्तिश्छान्दसः, महोनां मघवतां धनवतां मध्ये, वेनः कान्तः'-इति वि०।

(४)—"वेनति"-इति कान्ति कर्मसु चतुर्थं नैघण्टुकम् २,६।

अथ पञ्चमी।

श्यावाश्व आत्रेयऋषिः*।

३ १ २ ३ २ ३ १ २ ३ २ ३ २
यदीवृधन्त्याप्यवीभ्राजमानारुशेषा।

१ २ ३ २ ३ ३ २ ३ १ २
पिबन्तोमदिरंमधुतत्रअवाण्मिक्रण्वते ॥ ५ ॥ १२४

तेषां हविः कामायमानः "आनजे" आगच्छति(५)। "यस्य" इन्द्रस्य "द्वारा" द्वाराणि प्राप्य पापानि "धियः" कर्माणि देवेषु" एतेषु मध्ये "पिता" सर्वेषां पालकः "मनुः" "आनजे" प्रापयति [नजिः प्राप्ति-कर्मा(६)]।

"मद्दोनां"-"मद्दानाम्"-इति पाठो ॥ ४ ॥ १२३

---

* वामदेवस्यार्षम्'-इति वि०।

---

(५)—आनजे इति अञ्जतेरूपम् 'अक्तीकरोति'-इति वि०।

(६)—निघण्टौ व्याप्ति-कर्मसु नञ्चतेः पाठात् (२,१८)। विवरणकारस्त्वेव माह—'आनजे-अञ्जु व्यक्ति-म्रक्षण-गतिषु इत्येतस्य गत्यर्थस्य अन्तर्णीत-ण्यर्थस्य वेद रूपम्, आगमयति उत्पादयति इत्यर्थः। एतदुक्तं भवति—यस्य यागद्वारभूतानि आधानादीनि यागविषयाश्च बुद्धीः सर्वस्य ज्ञाता इन्द्र उत्पादयति स प्रथमं यागं करोतीति समस्तार्थः' इति।

४ ५ ४ ५ ४ ५ ४ ५ १
I यदीवृधंत्याशवः। य। द्योदौ। ओइवहंता-

१ १ ४ ४ ४ ४ २ १
आ१शावा२ः। ओइभ्राजमानारथाइषू१वा२। ओइपि-

४ २ १ ४ २ १
बन्तोमदिराम्मा१धू२। ओइ। तत्रअवाꣳसिकोवा३ओ२-

५ ४ ५
३४वा। एवापुनोई३हाइ॥ १८॥ १२४

हे इन्द्र! "यदि" यत्र यस्मिन् यज्ञे "रथेषु" "भ्राजमानाः" दीप्यमानाः(१) "आशवः" क्षिप्र-गामिन स्वदीया मरुतः "आ वहन्ति"। यत्र आभिमुख्येन त्वां प्रापयन्ति "तत्र" तस्मिन् यज्ञे "मदिरं" मदकरं "मधु" उदकादि-रस-विशेषितं सोम-लक्षण मन्नं वा 'पिबन्तः' "अवांसि" अन्नानि "कृणुते"(२) तृप्ति-द्वारा कुर्वन्ति। [यद्वा। अस्मिन्यज्ञे "भ्राजमानाः" दीप्यमानाः "आशवः" शीघ्रगामिनः "मदिरं" मदकरं "मधु" सोमं "पिबन्तः" पास्यन्त ऋत्विग्यजमानाः "रथेषु" सोम मावहन्ति "तत्र" तस्मिन्यज्ञे "अवांसि" अभिषवादि-कर्मभिः प्रशस्तान्यन्नानि "कृणुते" कुर्वन्ति॥ ५॥ १२४

I उषःसाम।

(१)—'भ्राजमानाः रथेषु नियुक्ताः, सन्नहति वाक्यशेषः-इति वि०।

(२)—'डुकृञ् हिंसायाम्'-इत्यस्य स्वादे रूपम्, अर्थस्तु करोतेरेव। अथवा विक रण-व्यत्ययेन रूपम् (३,१,८५)।

अथ पञ्चमी।

शंयुर्ऋषिः*।

१२३ १२ ३ १२ २१३ १ २
त्यमुवोअप्रहणंगृणीषेशवसस्यतिम्।
१२ ३ २ ३२३ १२ ३१२
इन्द्रंविश्वासाचंनरंशचिष्ठंविश्ववेदसम्† ॥६॥२१५

३ ४५२ ३२ ३ ५ २ २ १२
I त्यमुवोअ। प्रहा। चा२३४णाम्। गृणीषेशव-
२ १ २ ४ ५ १२ १ २
सः। पताइम्। आइन्द्रा३०वाइश्वा। सचा३ंश्चोये-
५ ३२ २ १ ५ १ २ १
३४। नारमो३इ। शचिष्ठा२३४०वी। श्ववा३च्चो२३४।
५ ४ ५
वा। दा५सोइचाइ॥ १८ ॥१२५

* संयुरिति दन्त्यादि-पाठो विवरणे।

† "नरं मंशचिष्ठं विश्वचर्षणिम्"-इति ऋग्वेदीयःपाठः।

१२५ ऋग्वेदस्य ४,२,१६,४।

I भारद्वाजम्।

अथ सप्तमी।

वामदेव ऋषिः।

३ १ २ ३ १र २र ३ १ २
दधिक्रावणोअकारिषंजिष्णोरश्वस्यवाजिनः।

४ ५ ४र ५र र ४ १
I ओहाइ। दधिक्रावणोअकारिषम्। ओहाइ। ओ-

हे ऋत्विग्यजमानाः! "वो" युष्मदर्थं "त्यम्" तमेवेन्द्रं "गृणीषे" स्तौमि [यद्वा। "वो" यूयं "गृणीत" स्तुत वचन-व्यत्ययः(१)] कीदृशमिन्द्रम्? "अग्रहणं"(२) अग्रहर्त्तारं भक्ताना मनुग्राहकं। "अवसो" बलस्य "पतिं" पालकं। "विश्वासाहं"(३) विश्वस्य शत्रो रभिभवितारं "नरं" नेतारं "शचिष्ठं" यज्ञादि-कर्म-स्थितं(४)। "विश्ववेदसं" विश्वं वेदो धनं(५) यस्यासौ विश्ववेदाः तम्॥ ६॥ १२५

I दधिक्रावणम्।

(१)—"व्यत्ययो बहुलम् (३,१,८५)"-इति। विवरणकारस्त्वेवं व्याचष्टे—'गृ-णुता वित्यस्येदं रूपम्, मध्यम-पुरुषैकवचनस्योत्तमपुरुषैकवचनस्य स्थाने द्रष्टव्यम्; गृणे स्तौमीत्यर्थः'-इति।

(२)—'केनचित् प्रहर्तुं मशक्यम्'-इति वि०।

(३)—"विश्वस्य वसु-राटोः (६,४,१२८)"-इति सूत्रस्थ-वार्त्तिक-वचनात् साहेऽपि दीर्घः।

(४)—"शची"-"शचि" च पाठभेदेन कर्म-नामसु द्वाविंशतितमं नैघण्टुकम्(२,१) तत्र निष्कर्षमित्यर्थः।—"शचिष्ठम्"-इति विवरण-सम्मतः पाठः, अतएव तत्र 'शचिष्ठम् अतिशयेन अन्नवन्तम्'-इति व्याख्यातम्। अत्र इत्यन्न-नामसु दृश्यते हि निघण्टौ२,७।

(५)—"वेदः"-इति धन-नामसु चतुर्थं नैघण्टुकम् (२,१०)।

३ २३१२ ३२३१२
सुरभिनोमुखाकरत्प्रन*आयूंषितारिषत् ॥७॥ १२६

र र १ २ १२१२
ह्वाइ। जिष्णोरश्वस्यवाजिना२३ह्वोइ। सुरभिनोमुखाका-

२ १ १ र १ २११२
२३रान्। प्रना२३ह्वोइ। आयू२३ह्वो। षितारा२३इ-

२ १
षा३४३त्। ओ२३४५इ। डा॥ २०॥ १२६

दधिक्रावाऽग्नि-विशेषः। स चाश्वरूपः(१) "अग्निर्देवेभ्यो-निलीयत अश्वो रूपं कृत्वा यदश्वेत्यतिष्ठदि" त्यादिअध्वर्यु-ब्राह्मण-मनुसन्धेयम्।

* "प्रणा"-इति मूर्द्धन्य-पाठः ऋग्वेदीयः।

१२६ ऋग्वेदस्य ३,७,१३,६।

(१)—अत्र यास्कः—"दधिक्रावा इत्येतद् दधत् क्रामतीति वा दधत् क्रन्दतीति वा दधदाकारी भवतीति वा। तस्याश्ववद् देवतावच्च निगमा भवन्ति (१,२७)"-इति। तस्य चोदाहरणे द्वयोरेव, तथा हि अत्र-रूपस्योदाहरणम्—

"उतस्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि-

"दधिक्रावणो" देवस्य स्तुतिम् "अकारिषं" करवाणि। "जिष्णोः" जयशीलस्य "अश्वस्य" तद्रूपस्य "वाजिनो" वेगवतः। स देवो "नो" ऽस्माकं "मुखा(१)" मुखानि चक्षुरादीनीन्द्रियाणि "सुरभी" सुरभीणि "करत्"(२) करोतु। "नो" ऽस्मभ्यम् "आयूंषि" "प्र तारिषत्" प्रवर्धयन्तु (प्र-पूर्वस्तिरतिर्वर्धनार्थः ॥७॥ १२६

कक्ष आसनं। क्रतुं दधिक्रा अनु सन्त वीत्वत्पथामङ्कां स्यन्वापनीफणत् ॥" (ऋ० ४म० ४अ० ८सू० ४ऋ०ऋक्)

"अपि स वाजी वेजनवान् त्वेषम् मनु तूर्णं मश्नुते ऽध्वानं ग्रीवायां बद्धो (ग्रीवा गिरतेर्वा ग्रसते वा ग्रङ्क्ते वापि कक्ष आसनीति व्याख्यातम्)। क्रतुं दधिक्राः कर्म वा प्रज्ञां वा अनुसन्तवीत्वत्। तनोतेः पूर्वया प्रक्रत्या निगमः। पथा मङ्कासि पथां कुटिलानि (पन्थाः प्रसते वा पद्यते वा पन्यते वा) अङ्कोऽञ्चते वापनीफणदिति फणते चकरीतष्टम्"-इति च तद्भाष्यम्।

देवता वपस्योदाहरत्यस्मिन्दम्—

"आ दधिक्राः शवसा पञ्च कृष्टीः सूर्यं इव ज्योतिषा पप्रथानः। सहस्रसाः शतसा वाज्यर्वा पूणक्तु मध्वा समिमा वचांसि ॥" (ऋ० ४म० ४अ० ६सू० १० ऋक्)

"आ तनोति दधिक्राः शवसा बलेनापः सूर्यइव ज्योतिषा पथ मनुष्य-जातानि सहस्रसाः शतसा वाजी वेजनवानर्वेरणवान्तत्सम्पृक्तु नो मधुनोदकेन वचनानीमानीति। (मधु धमतेर्विपरीतस्य)"-इति च तद् भाष्यम्।

(१)—"सुपां सु-लुगिति (७,१,३९)"-इत्यालं रूपम्।

(२)—लेटो रूपम् (१,४,७)।

षष्ठाष्टमौ।

जेता माधुछन्दस ऋषिः।

३ २ १ १र २र१ १र २र
पुरांभिन्दुर्युवाकविरमितौजाअजायत।

२३ १२३ १० १ २ ३ १२ ३२
इन्द्रोविश्वस्यकर्मणोधर्त्तावज्रीपुरुष्टुतः॥ ८॥ १२७

द्वितीय-दशति॥ २॥

५र ३ १२ ४र ५ १ र र २१र
I पुराम्भिन्दर्युवाक। वीः। अमितौजाअजाया२-

२ १ र २ १ २ ३ ५ १
३ता। आइन्द्रोविश्वा३। स्याकर्मा२३४णाः। धर्त्ता। वा-

२, ३ ५ ४ ४
ज्रीवाओ२३४वा। पुरु५ष्टुताः। ह्वोपुट्। डा॥२१॥ १२७

अयम् "इन्द्रः" उच्यमान-गुण-युक्तः "अजायत" सम्पन्नः। कीदृग्गुणक इति? तदुच्यते—"पुरां" पुराणां "भिन्दुः" भेत्ता "युवा" कदाचिदपि बली-पलितादि-वार्द्धक्य-रहितः। "कविः" मेधावी "अमितौजाः" प्रभूत-बलः "विश्वकर्मणः" कृत्स्नस्य ज्योतिष्टोमादेः

---

१२७ उत्तरार्चिकस्य ५,१,२०,१ = ऋग्वेदस्य १,१,२१,४ = जहे ५,१२—२२, २,२०।

I माधुतम्।

"धर्त्ता" पोषकः(१) "वज्री" यजमान-रक्षणार्थं सर्वदा वज्रयुक्तः "पुरुष्टुतः" बहुभिर्होत्रादिभि स्तुतः ॥ ८ ॥ १२७

इति श्रीसायणाचार्य्य विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दो व्याख्याने चतुर्थस्याध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीय-खण्डे—

मैषा प्रथमा।

प्रियमेधा ऋषिः।

१२ ३ २ ३ १ २ ३ १ २ ३ १ २
प्रप्रवस्त्रिष्टुभमिषंवन्दद्वीरा*येन्द्वे।

३ १ २ ३ १ २ ३ २ ३ १ २
धियावोमेधसातयेपुरन्ध्याविवासति ॥ १ ॥ १२८

---

* "मन्दद्वीरा"-इति ऋग्वेदीय-पाठः।

---

१२८ ऋग्वेदस्य ६,५,५.१।

(१)—'धर्त्ता धारयिता. कथं सर्वस्य कर्मणः ? दृष्टाधीनत्वात्. दृष्टेश्च इन्द्राधीनत्वात्-इति वि०।

५ र र र ५ २१ २
I प्रप्रवस्त्रिष्टुभमिषमोहाओहाइ॒ए। वन्दद्वीरा। य-

१ ० ऽ २ ऽ २ २ २र र र २
आइन्द्वे२। ओ३ह्वा। ओ३ह्वाइ॒ए। धियावोमेधसा-

२ २ ऽ २ ऽ २ २ १ २ २
१ताइयादू। ओ३ह्वा। ओ३ह्वाइ॒ए। पुरान्धीइयाइ।

२१ ५ ४ ५
विवो२३४वा। मापुतोइ॒ह्वादू॥ २२ ॥ १२८

हे अध्वर्युादयः! "वो" यूयं [प्रथमार्थे द्वितीया(१)]"त्रिष्टुभं" स्तोभ-त्रयोपेतम्(२). "इषम्" अन्नं(३) "प्र प्र" [अपरः प्र-शब्दः

I वामदेव्यम्।

(१)—'वः युष्मभ्यम्' इति वि०।

(२)—साम-मन्त्रान्वितमित्यर्थः सामसु एव स्तोभादेः श्रवणात्, सत्यप्यदनार्थ एव विकार-विश्लेष-विकर्षण- विरामाभ्याम लोपागम स्तोभादयः क्रियन्ते; अतएवैवं साम-विधानं ब्राह्मणम्—"एतस्य साम्न ऋगेवास्तोनि, स्वरो मांसानि, स्तोभा स्तोमानि" इति (१,१) स च स्तोभः त्रिविधः—पद-वाक्याक्षर-भेदात्। पद-स्तोभाः हाउ-कारादयः पञ्च दश, मन्त्र-ब्राह्मण-छन्दोग-प्रपाठकीय-त्रयोदश-खण्ड-परिगणिताः, अनाद्यं तं सर्वत्र गान-ग्रन्थे, विशेषेण आरण्ये। वाक्यस्तोभाः पुनरायन्त्यादि-भेदान्नव, तथाहि—"आशास्तिः स्तुतिः संस्तानं प्रलयः परिदेवनम्। प्रैष मन्त्रेषणश्चैव सृष्टिरांख्यानमेव च"-इति, एभ्यश्च स्तोभाः ग्रन्थे श्रुताः आरण्यादौ च गीयन्ते। वर्णस्तोभ-लक्षणस्याधिकत्वं त्वगविलक्षणत्व-मिति, तदुक्तम् माधवेन—"स्तोभस्य लक्षणं नास्ति किं वास्ति न विवक्षितम्। आधिक्य मप्यनिष्टापं विशिष्टं लक्षणं भवेत् (८अ० २पा० ११ अधि०)"-इति तदुदाहरणम्

पूरणः(४)।] भरतेति शेषः। उपसर्ग-श्रुते र्योग्य-क्रियाध्याहारः। कस्मै? "वन्दद्वीराय" यो वीरान् स्तौति स वन्दद्वीरः(५) तस्मै "इन्द्वे" इद्राय। [इन्दते रैश्वर्य-कर्मणः(६) इदं रूपम्। [अथवा(७) फलैर्वृष्टिभिर्वा उनत्तीतीन्दरिन्द्रः तस्मै। स चेन्द्रो "वो" युष्मान् "मेधसातये" यज्ञ-सम्भजनाय(८) "पुरन्ध्या" बहु-प्रज्ञया(९) "धिया" कर्मणा(१०) "आ विवासति" परिचरति(११)। अभिमत-फल-योजनेन सत्करोतीत्यर्थः॥ १॥ १२८

सर्वत्रैव ग्रामगेयं, प्रायः सर्व-सामस्वेत्यत्रापि नात्युक्तिः; दृश्यते ऋचि गीतं यत साम तत्रापि श्रूयते। तथाहि—

३ १ २ ३ ४ २ २ २
'मेधसातये'-इत्यत्र 'मेधसा १ ता ३याइ'-इत्यादि।

(३)—"इषम्"-इत्यन्ननामसु चतुर्दशतमं निघण्टुकम् २,७।

(४)—'प्रसमुपोदः पादपूरणे'-इति व्याकरणादित्यभिप्रायः।

(५)—"वीरो वीरयत्यभिवान् वेतेर्वा स्याद् गति-कर्मणो वीरयते र्वा इति यास्कः(१,७)।

(६)—'इदि परमैश्वर्ये (भ्वा० प०)।

(७)—"इन्दुः" इति उदक-नामसु चतुरशीतितमं निघण्टुकम्(१,१२)—यज्ञ-नामसु च त्रयोदशतमम् (३,१७)—दैवतकाण्डे नैरुक्ते चाष्टविधात्तु देवतानाम-धेय गणनासु चान्तिमम्,तथाहि यास्कः—"इन्दुरिन्धेरुनत्ते र्वा"-इत्यारभ्य "तेषामेतान्यष्टविधान्यि वेनो ऽनुनोतिर्ऋतनदिन्दुः"-इति ४,४१—४२।

(८)—"मेधः"-इति यज्ञ-नामसु चतुर्थं निघण्टुकम् ३,१७। विवरणकारस्त्वेव माह—'मेधसातये ऋपठितमपि यज्ञ-नामैतद् द्रष्टव्यम्, चतुर्थ्येकवचनमिदं सप्तम्येकवचनस्य स्थाने द्रष्टव्यम्, मेधसातौ यज्ञे इत्यर्थः'-इति।

(९)—"पुरन्धिः बहुधी स्तुतकः पुरन्धिर्भरः पुरस्तात् तस्याभ्यादेश इत्येकमिन्द्र इत्यपरम्, सवनकर्मतमः, पुरांच दारयितृतमो वरुणइत्यपरम्, सं प्रज्ञया स्तौति"-इति नि० नै० ६,१२।

(१०)—"धीः"-इति कर्म-नामसु विंशतितमं निघण्टुकम् २,१।

(११)—"विवासति"-इति परिचरण-कर्मसु दशमं निघण्टुकम् ३,५।

अथ द्वितीया।

वामदेव ऋषिः*।

३ १ २ ३ २ १ २ १ २ ३ २ ३ १ २
कश्यपस्यस्वर्विदोयावाङ्ःसयुजाविति।

२ १ २ ३ १ २ ३ २ १ २ २ ३ १ २ १ २
ययोर्विश्वमपिव्रतंयङ्गंधीरानिचाय्य ॥ २ ॥ १२९

५ ५ १ २ २ १ २
I कश्यपस्यसुर्वर्विदा१९ए। यावाङ्ःस। युजावा१-

२ ४ २ ३ ४ ५ ३ २ १ २ २
इतौ२३४। ययोर्विश्वमपि। व्रताऽम्। यङ्गांधी३राः।

१ १ ३ ५ २ ३ ४
निचा२३। आ२या२३४औ३होवा। ऊ२३४पा ॥२३॥१२९

पश्यतीति कश्यपः। "कश्यपः पश्यको भवती"तिशुल्बान्तरम्। तस्य "कश्यपस्य" सर्वज्ञस्येन्द्रस्य सख्युर्मित्रस्य "यौ" अश्वौ। "ययोः" च "विश्वं" सर्वम् "अपि" "व्रतं" कर्म "यङ्गं" प्रति

---

* "कश्यपस्यार्षम्"-इति वि०।

---

१२९ आरण्यगानस्य ४,१९,२०।

I काश्यपम्।

अथ तृतीया।

प्रियमेध ऋषिः।

१ २ ३ १ २ २ १ २ ३ १ २
अर्चतप्रार्चतानरःप्रियमेधासोअर्चत।

यजनीय-देशं प्रतीत्यैवं "निचाय्य" निश्चित्य "सयुजौ" (सह एव युञ्जाते-इति) "स्वर्विदः" स्वर्गं लब्धवन्तो "धीराः" जनाः आहुः(१)।

अथवा "कश्यपः" प्रजापतिः ("कश्यपोऽष्टमः स महामेरुं न जहातीति" श्रुत्यन्तरात्) तस्य "स्वर्विदः" सर्वं पश्यतः "यौ" देवौ "सयुजौ" सहचरौ जना आहुः वेदविद स्तौ मित्रावरुणौ। ("अहर्वै मित्रो रात्रिर्वरुणः" इत्यैतरेय-ब्राह्मणम्। सर्वस्य कार्यस्य तयोरेवान्तर्भावात् (इन्द्राग्नी वा देवौ तयो रेव सर्व-निर्वाहकत्वात्) तदभिप्राणेय मृक् मैत्रावरुणी ऐन्द्राग्नी वेति पूर्वमभिहितम्॥ २॥ १२९

---

१३० ऋग्वेदस्य ६,५,६,३,।

(१)—विवरण-मते स्वर्विद इति षष्ठ्यन्तं कश्यपस्येत्यस्य विशेषणं, धीरा इति च द्विवचन-स्थानिकं बहुवचनम् आहुरित्यस्य विशेषणम्।

१२ ३२ ३१उ ३२ ३क २८
अर्चन्तुपुत्रकाउतपुरमिद्*धृष्णुर्चत ॥ ३ ॥ १३०

२ ८ ३ ५ २ ८ ४ २ ३५
I अर्चतप्रार्चतानाऽ३४राः। प्रियमेधाऽसोऽ३अर्चत।

२१ ४ २८ ३५ १ २ ४
अर्चन्तुपू२३चाऽ३काउत। पुरमिद्धाऽ२३। धृष्णुवाऽ३र्चा५ता

६५६ ॥ २४ ॥ १३०

हे "नरः" कर्मणां नेतारोऽध्वर्यादयः! यूयं इन्द्रम् "अर्चत" पूजयत स्तुत्या "प्रार्चत" प्रकर्षेणार्चतेन्द्र मेव। हे "प्रियमेधासः!" प्रियमेध-सम्बधिनस्तद्गोत्रा यूयं अर्चतेन्द्रम्। "पुत्रकाः" पुत्रा अप्यर्चन्त्विन्द्रम्। "उत" अपिच "पुरमित्" पुरमेव(१) स्तोतृणा मभिमतस्य पूरकं। "धृष्णु" धर्षणशीलं तादृश मिन्द्रम् "अर्चत" ॥ ३ ॥ १३०

---

* "पुरं न"-इति ऋ० पाठः।

I प्रैयमेधम्।

(१)—'इच्छब्द इव-शब्दस्यार्थे, पुरमिव धृष्णुम्। यथा कश्चित् प्रमान् धृष्णुं दृढम् अभिभवनं परकीयाणां सेनानाम् अर्चति तद्वदित्यर्थः'-इति वि०।

अथ चतुर्थी।

मधुच्छन्दा ऋषिः।

३१र २र ३२ ३ १र ३ १२
उक्थमिन्द्रायशꣳसंवर्द्धनंपुरूनिषिधे*।

३१र २र ३१२ ३१२३ १२
शक्रोयथासुतेषुनो†रारणत्सख्येषुच ॥ ४ ॥ १३१ ॥

१ २१ २ १ २ १
I उक्थमिन्द्रा। यशꣳसा२३याम्। वार्द्धनंपु। रूनिः

२ १ २ २ १६ ३ ५ २र१
षा२३धाइ। शक्रोऽयाऽथाऽ। सूतेषू२३४नाः। रार-

२ १ २ १
णा२३त्सा। खियाइषू २ ३ चा ३ ४ ३। ओ २३४५ इ।

डा ॥ २५ ॥१३१

---

* "निः षिधे"-इति ऋ०—पाठः, इहापि च सायण-धृतः।

† "सुतेषुणो" इति ऋ०-पाठः, जर्मन्मुद्रित-पाठश्च।

---

१३१ ऋग्वेदस्य १,१,१,८५।

I बार्हदुक्थम्।

अथ पञ्चमी।

प्रियमेध ऋषिः।

२ १ २ ३ २ ३ १ २ ३ १ २
विश्वानरस्यवस्पतिमनानतस्यशवसः।

१ २ ३ २ ३ १ २ ३ १ २
एवैश्चर्षणीनामूतीऊवेरथानाम् ॥ ५ ॥ १३२ ॥

५ २ २ १ १ २ २
I विश्वानरा। स्यवा२स्यातो२म्। आनानत।

१ २ १ २ ३ २ १ १ १
स्यशावा१सा२ः। एवैश्वा। चर्षणा२इनाम्। ऊ२ती।

२ १ २ १ ५ ५
ऊवाइर। था२३४नो६३३इ ॥ २६ ॥

"इन्द्राय" इन्द्रार्थं "वर्द्धनं" वृद्धि-साधनं "उक्थं" शस्त्रं "शस्यम्" अस्माभिः शंसनीयम्। कीदृशायेन्द्राय ? "पुरु निःषिधे" पुरूणां बहूनां शत्रूणां निषेध-कारिणे। "शक्रः" इन्द्रो "नो" ऽस्मदीयेषु "सुतेषु" पुत्रेषु "सख्येषु च" सखित्वेष्वपि "यथा" येन प्रकारेण "रारणत्" अतिशयेन शब्दं कुर्यात् तथा शंस्य मिति पूर्ववान्वयः। (अस्मदीयेन शस्त्रेण परितुष्ट इन्द्रः नो ऽस्माकं पुत्रान् अस्मत्सख्यानि च बहुधा प्रशंसन्वित्यर्थः ॥ ४ ॥ १३१

---

१३२ ऋग्वेदस्य ६,५,१,४।

२ २ २ २ ४ ५ २।२ २
II विश्वा३४। नरस्यवोचोस्यातीम्। अनानता३।

१ २ ३ ५ १ २ २ १ ५ २२
स्याशावा२३४सा:। एवैश्वा। चर्षणा२३४नाम्। ऊ

१२ २ १ २ १ ५ ५
तीऊवाइर। था२३४नोइन्द्राइ॥ २७॥ १३२

"विश्वानरस्य"(१)विश्वान् शत्रून् नयतस्य"अनानतस्य"शत्रूणामप्रह्वस्य "शवसो" बलस्य "पतिं" स्वामिन मिन्द्रं "वः" (अत्र इन्द्र-सम्बन्धिनो मरुतोऽपि सङ्कीर्त्यन्ते) हे मरुतः! "वो" युष्माकमित्यर्थः (यद्यपि मरुत्सु शब्दनं नास्ति तथापि व इति सामर्थ्यालभ्यते)युष्माकं"चर्षणीनाम्"सैनिकानाम्(२) "एवैः" गमनै(३) सह (यद्वा। चर्षणीना मिन्द्रस्य सेना-रूपाणां वो युष्माकं गमनैरिति सामानाधिकरण्यम्) युष्माकं "रथानां" च "ऊती"(४) ऊतिभि

I,II वैश्वानरस्य सामनी हे।

(१)—"नरे सञ्ज्ञायाम् (६,४,१२९)"-इति विश्वस्याकारो दीर्घः विश्वानर-पदस्य यास्क-कृतं व्याख्यानं भिन्नं विस्तृतं विद्यते—"वैश्वानरः कस्मादित्यारभ्य—"अयमेव सोऽग्निर्वैश्वानरो निपातमेवैतत् उत्तरे ओतिषी एतेन नामधेयेन भजते"-इत्यध्याय शेषान्ता-न्येकादश-खण्डानि द्रष्टव्यानि (नै० दै० १,२१—३१)।

(२)—"चर्षणय इति मनुष्य-नामसु पठितं नैघण्टुकम् २,३।

(३)—एवैरिति गति-कर्मण एतद् रूपम् (२,१४,१२०)।

(४)—"ऊती"-इति पूर्वसवर्णदीर्घे (७,१,३९) रूपम्। "ऊतिरवनात्"-इति यास्कः (५,२)। अतएव 'ऊती-ऊतये रक्षणाय'-इति वि०।

अथ षष्ठः।

भरद्वाज ऋषिः।

६ १२ ३१ २र ३१र २र ३ १२
सघायस्ते दिवोनरोधियामर्त्तस्यशमतः*।

३१र २र३२ ६२ ३२उ ३ १२
ऊतीष्†बृहतोदिवोदिषोअर्च्चीननरति ॥६॥ १३३॥

र्गमनैश्च सह "हुवे"(५) आह्वयामि। गन्तृभी रथैर्गन्तृभि र्मरुद्भिश्च स हेन्द्रं हुवे इत्यर्थः॥

यद्वा। हे यजमानाः! युष्मदीय-सैनिकानां रथा यदा प्रविशन्ति युद्धाय स्व-सङ्ग्रामं, तदानीं तेषां साहाय्यायेन्द्रं हुवे इत्यर्थः(६)॥ ५॥ १३२

---

*"ऋधद् यस्ते सु दानवे धिया मर्त्तः शशमते"-इति ऋ०।

†"ऊतीष"—इति मूर्द्धन्य-पाठः ऋ०।

---

१३३ ऋग्वेदस्य ६,५,१,५।

(५)—अत्र ऊतिः सम्प्रसारणं छान्दसम् (६,१,१४)।

(६)—"विश्वानरस्यादित्यस्याननस्य मरुतो मरुतो बलस्येव कामे रथने रथनैर्वा वर्षीयसां मनुष्याणामूत्या च यथा रथाना मिन्द्र मस्मिन् यज्ञे हुवामि"-इति यास्कः (दै०११,२१)।

I सघायस्ताइदु। ए। दिवोनराइः। ए। धि-
यामर्त्ताइ। ए। स्यशमताइः। ए। ऊताइदसवृइ। ए।
दतोदिवाइः। ए। दिषोअएच्छाइः। ए। नातरति।
इडा२३भा३४३। ओ२३४५दु। डा॥ २८॥

II सघायस्तादु। दिवोनराः। धियामार्त्ता२। स्य
शमताः। ऊतीसाबु२। दतोदिवाः। दिषोआएच्छा-
२ः। नातरति। इडा २ ३ भा ३ ४ ३। ओ २ ३ ४५ दु।
डा॥ २८॥ १३३

"शमतः" कर्मानुष्ठानेन शान्तस्य दृत्तस्य निज-मार्ग-वर्तिन इत्यर्थः। "मर्त्तस्य" मनुष्यस्य मध्ये [जात्येक-वचनं(१)] "दिवो"

I,II शाकपूते हे।

(१)—"जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्"-इति पा० १,२,५८ सू०

द्योतनादि गुणकस्य(२) "ते" तव "धिया" कर्मणा स्तुत्या(३) "नरः" मनुष्यः "सखा" स्तोता(४) भवति "सः" नरः। "यः" "बृहतो" महतो "दिवो" द्योतमस्य तव सम्बन्धिन्या "ऊती"(५) ऊत्या रक्षया "दिषो" द्वेष्टॄन् "अंहो न" आहनन शीलं पापमिव "तरति" अतिक्रामति ॥ ६ ॥ १३३

(२) 'दिवु, क्रीडा-विजिगीषा-व्यवहार द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु' इति दि० प०।

(३ —"भीः" इति कर्म नामसु एकविंशतितम मेघगृह्यम् (२,१) इह च स्तुत्याख्यं कर्म। स्तुतिक्रिययेत्यर्थः।

(४) —स्तृत्य-स्तोतृलक्षणं सख्यत्वमिह गृह्यते। मन्त्रे तु सर्वपृष्ठके "सखा"-इत्येव पाठः, तत्र घ-इत्यनर्थकं "निपातस्य च (६.३.१३६)"-इति दीर्घान्वितम्। परमिह तदतीव चिरं यत् सर्वेति भाष्यकृता कुत आमादितमिति।

(५)—पूर्वसवर्णदीर्घः (७,२,८९)।

(६) —अंहः पापम् अतएव ऋग्वेद प्रथम-मण्डलान्तर्गत पञ्चदशानुवाकीय-द्वादश मन्त्रस्य सप्तदश्या ऋचो व्याख्याने यास्कः

("सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात्")

"सप्तैव मर्यादाः कवयश्चक्रुस्तासामेका मप्यभिगात्पापकृत्वान् भवति। स्तेयं(१) मतल्पारोहणं २) ब्रह्महत्यां(३) भ्रूणहत्यां(४) सुरापानं(५) दुष्कृतस्य कर्मणः पुनः पुनः सेवां(६) पातके नत्वेव(७)मिति" इति ६ २७।

षष्ठ सप्तमी।

अत्रि ऋषिः।

३ १ २ ३ १ २ ३ २ ३ १ २
विभोष्ट*इन्द्रराधसोविभ्वीरातिःशतक्रतो।

१ २ ३ १ २
अथानो†विश्वचर्षणेद्यु म्न‡ꣳसुदꣳच¶मꣳहय ॥७॥ १३४

५ २ २ ५ २१२ऽ२ १ २ २
I विभोष्टइन्द्रराधाऽसाः। विभ्वीरा२तिःशतक्रतो।

१ १ २२ २ १
अथा२नोविश्वचर्षणे। द्यु म्ना२र्षाणाऽ।

२ १ २ ३ २ ४
द्यु म्नꣳसुदꣳचमꣳहय। ꣳचमा३ꣳहापूयाऽ५ऽ६ ॥ ३० ॥१३४

---

* "उरोष्ट"-इति,
† "अधानो"-इति,
‡ "द्यु म्ना"-इति,
¶ "सुꣳच"-इतिच
} ऋग्वेदीयाः पाठाः।

---

१३४ ऋ ४,२,९,१।

I वरुणान्याः साम।

अथाष्टमी।

प्रस्कण्व ऋषिः।

१२ ३१२३१२ २२
वयश्चित्ते पतत्रिणो द्विपाच्चतुष्पादर्जुनि*।

हे "शतक्रतो" बहुकर्मन्निन्द्र! "विभोः" प्रभूतस्य "राधसो" धनस्य "ते" तव "रातिः" दानं "विभ्वी" महती "अथ" अतः कारणात् हे "विश्वचर्षणे!"(१) सर्वस्य द्रष्टः "सुदत्र" कल्याण-दानेन्द्र!(२) "नो" अस्मभ्यं "दात्रं" धनं "महय" प्रयच्छ(३)॥ ७॥१३४

* "द्विपच्चतुष्पदर्जुनि"-इति ऋग्वेदीय-पाठः।

(१)—"विश्वचर्षणिः" इति पश्यति-कर्मसु दशमं निघण्टुकम्. 'विचर्षणिः"-इति च नवमम् (३,११)। हविषेति (ऋ०१म० ९४सू०२मं ४ ऋक) मन्त्र-व्याख्यानावसरे यास्कर्षणिरितिपदस्य चायितेत्यर्थमाह। तथाहि—

"हविषा जारो अपां पिपर्त्ति पपुरिर्नरा।
पिता कुटस्य चर्षणिः॥"

"हविषापां जरयिता पिपर्त्ति पपुरिरिति पृणातिनिगमौ वा प्रीणातिनिगमौ वा। पिता क्रतस्य कर्मण आयितादित्यः"-इति (५.२४)।

(२) "सुदत्रः कल्याण-दानः"-इत्यत्र नै०६.१४।

(३) —"मंहते" इति दान कर्मसु दशमं निघण्टुकम् ३.२०।

१ ३ १ २ ३ १र २र ३ १र २र ३ १ १
उषःप्रारन्नृतूँरनुदिवोअन्तेभ्यस्परि ॥ ८ ॥ १३५

५ २ ४र ५ २ १र र २
। वयश्चा३इत्तेपतत्रिणाः। द्विपाच्चतुष्पादर्जुनाये३।

४ ५ ४ ५ २र १ २ र १ १ ४
उषःप्रारान्। ऋतूँरनू। दिवोअान्ते२३। भा२३या३ः।

२ ५
पा३४५रोइ्चोइ ॥ ३१ ॥ १३५

हे "अर्जुनि"(१) शुभ्रवर्णे "उषः" उषोदेवते "ते" तव "ऋतूननु" गमनान्यनुलक्ष्य "द्विपात्" मनुष्यादिकं "चतुष्पाद्" गवादिकं तथा "पतत्रिणः" पतत्रवन्तः पक्षोपेताः "वयश्चित्" पक्षिणश्च(२) "दिवोअन्तेभ्यः" आकाशप्रान्तेभ्यः "परि" उपरि "प्रारन्"(३) प्रकर्षेण गच्छन्ति (रात्रावन्धकारेणाभिभूताः सर्वे प्राणिनस्त्वदागमनानन्तरञ्चेष्टावन्तो भवन्तीत्यर्थः ॥ ८ ॥ १३५

---

१३५ ऋग्वेदस्य १,४,६,२।

I उषसम्।

(१)—"अर्जुनी" इति उषोनामसु षष्ठं नैघण्टुकम् १,८।

(२) "वयश्चित्, चिच्छब्द इव-शब्दस्यार्थे. वयइव-पक्षिणइव" इति वि०। अत्र मते पतत्रिण इति नतु विशेषणम् पदम्।

(३)—गतिकर्मणो ऋच्छतेरूपम (नै० २,१४,३५)।

अथ नवमः।

आप्त्यस्त्रित* ऋषिः(°)।

३ १२ २४ ३ २ ३ २ ३ १ २ ३ २ २ २

अमीयेदेवास्थनमध्आरो॑ चने दिव.।

१ २ ३ २३ ३ २ ३ २ ३ २ ३ २ २

कदृक्षतंकदमृतं॑ कांप्रत्ना॑ वयाऋतिः॥ ९॥ १३९

---

* "हतः"-इति वि० पाठः।

* "त्रिष्वारो"-इति
† "कदनृतम्"-इति
‡ "कांप्रत्ना"-इति च
ऋग्वेदीयाः पाठाः।

१३९ ऋग्वेदस्य १,७,२०,५।

(०)—इदानीं विवरण-ग्रन्थं इतिहासं दर्शयम्। तद्यथा——आप्त्यस्य ऋषेः त्रयः पुत्राः एकत-द्वित-त्रित इति। ते यज्ञकामाः याज्ञान् यजमानानश्वौ गाः आयाचिरे, लेभिरे च ताः। आयान्तो गृहं जग्मुः। तद्गच्छतो मेधा सरस्वत्यामीरेण परस्मिन् काले निषण्णो गवोदकः। ददर्श, दृष्ट्वा चोत्थाय अभिमुखः सरस्वतो तीर्थ रायो वामायमानाः। तेषां वामात्तस्यतां ततः कूपे निर्जले तृणैर्वल्लिभि श्वावकीर्णे पपात। तस्य तत्रस्थस्यैवं मनः प्रादुरभूत्——हत-याग-सङ्कल्पस्य अहत यागस्य मम मृत्यु-र्मा श्रेयसे! तत् कथ मिदस्य एवाहं सोम पिबेयम्?-इति-अन्ये तु पुनरेतदेवेति-हास मन्यथा व्याचक्षते-एकत-द्विताभ्यां स्वसृभ्यां गावो लब्धा स्तेन बद्धाः; ततः ईर्ष्यया ताभ्यां कूपे वीरुध मुत्तीर्णं ददर्श। स ताभ्यां सोमोऽयमिति मनसा निश्चित्य यागैश्वर्यम् अन्यान्यपि याग साधनानि मनसा सङ्कल्पा प्रकरा अभिषवाद्याश्च लब्धा तां वीरुध मभिषुषाव। अभिषुत्य च देवानाजुहाव। ते देवा आहूता मन्त्र आह्वान

५ र र र र ५ ५ १ र र र २
। अमीयेदेवास्थाना। मध्यआरोचनेदिवः। कद-
१ २ १ १र र ९ १र २
ऋताम्। कदमार्त्ताँ२म्। काप्रत्नावआऽ२३तीँ३४३।
ओ२३४५६। डा॥ ३२ ॥ १३९

हे "देवाः!" इन्द्रादयः "ये" अमी यूयं "दिवो" द्योतमानस्य सूर्यस्य[१]) "आरोचने" द्योतिविषये "मध्ये" अन्तरिक्षलोके "स्थ"

। देवानां रुचिः।

कारण मनतुबुध्यमाना उद्दिग्या बभूवुः। तद् बृहस्पतिः शुश्राव। श्रुत्वा च देवानुवाच, सुतस्य यज्ञो वर्त्तते, तत्र गच्छाम इति। ततस्ते देवा आ जगमुः। तानागतान् कूपादुत्तरणार्थो तृष्टाय, उपायं लब्धवांश्च="अमी ये देवाः स्थ"-इति॥

इम मेवेतिहासं "सम्मातपन्त्यभितः"-इति मन्त्र व्याख्यानावसरे यास्कोऽप्यवतनार। तथाहि——— (ऋ०१म०१५अनु०१२सू०८ऋक्)

"सम्मा तपन्त्यभितः सपत्नी रिव पर्शवः। मूषो न शिश्ना व्यदन्ति माध स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी॥"

"सम्मातपन्ति मामभितः सपत्ना इवेमाः पर्शवः कूपपर्शवो मूषिका इवाखातानि मूलानि व्यदन्ति। स्वाङ्गाभिधानं वा स्याच्छिश्नानि व्यदन्तीति। सन्मातपन्ति माधः। कामास्तोतारं ते शतक्रतो। वित्तं मे अस्य रोदसी। जानीतं मेऽस्य द्यावापृथिव्याविति। चित्तं कूपेऽवस्थितं स्रोतस् सूक्ष्म प्रतिबभौ। तच्च ब्रह्मनिरासमिमं मृङ्क्ष्वं गाथामिमां भवति। चित्तशोर्णतभो मेधया बभूवापि वा मङ्क्ष्वा मामेवाभिप्रेतं स्यादेकतो द्वित स्थित इति वयो बभूव"-इति ४.६।

(१—यद्यपि निघण्टावादित्य-नामसु "स्थः"-इत्यादि षट्कमेव पठितं तथाप्यत्रि

अथ दशमी।

वामदेव ऋषिः।

३ १ २ ४२३ १२ ३ १ २
ऋचꣳसामयजामच्छेयाभ्यांकर्माणिक्रण्वते।

१२ २२ ३ २ ३ १ २
वितेसदꣳसिराजतोयञ्छन्दꣳसेषुवक्षतः॥ १०॥ १३७

॥ तृतीय-दशतिः ॥

भवथ (सूर्य-प्रकाश्य स्थाने) इत्यर्थः। तेषां "वो" युष्माकं सम्बन्धि स्तोत्र-विषयं "ऋतं" सत्यं "कत्" कस्मिन्देशे वर्त्तते? "अमृतं (न-कारस्य स्थाने मकारः) अमृतं "कत्" कुत्रास्ति? "वो" युष्मदीया "प्रज्ञा" पुराणी "आकूतिः" "का" कीदृशी? युष्मदीयं दानं किमभूदित्यर्थः (इष्टरूपत-दुःखानुभवेन मया पूर्वं मनुष्ठितो याग-समूहो युष्मान्न प्राप्नोदित्यनुमन्ये(२)॥ ९॥ १३६

"खः"-पर्याय-दिव्-शब्दस्यापि आदित्य-वाचकत्वम्, तथाहि यास्कः—"खरादित्यो भवति सु सरणः सु ईरणः; सृतो रसान्न सृतो भासं ज्योतिषां सृतो भासेति वैतेन धौर्व्याख्याता"-इति २,१४।

(२)—'एतदुक्तं भवति। कृत मग्नं तदत्र नास्ति कूपे निर्जले, तत् कत्। अमृतं सोमाख्यम्। हविः, घानाः, करम्भः, पुरोडाशः, प्रतीवापः, पयस्यापरसुरग्रीवोमीयः पशुः सवनीयः एव मौदिकं कृतम् अमृतं च क्वात्र विद्यते?"-इति वि०।

I ऋचꣳसामयजा। महाइ। याभ्यांकर्माणिक्रण्वा
ताइ। वितेसदसिराजाताः। यज्ञंदाइवे।
षूवक्षतः। इडाभाइ। ओ२४५इ। डा ॥ ३३ ॥

II ऋचꣳसाꣳमायजामहाइ। याभ्यांकर्मा। णिका
र्णाइता२इ। णाताइ२इ। वाइतेसद। सिराजाइता
ः। जाताः। यज्ञांदाइवे। षूवक्षतः। इडा
भाइ। ओ२४५इ। डा ॥ ३४ ॥ १३७

"याभ्याम्" ऋक्सामाभ्यां "कर्माणि" शस्त्र-स्तोत्र-प्रमुखानि "क्रण्वते" होतार उद्गातारः कुर्वन्ति। ताम् "ऋचं" "तत् साम" च "यजामहे" वयं पूजयामः "ते" ऋक्साम "सदसि" ऋत्विक्समूहे सदोमण्डपे "विराजतः" स्तोत्र-शस्त्र-रूपेण विशेषेण प्रका-

---

I,II ऋक्साम्नोः सामनी दे।

शयतः। ते च ऋक्सामे देवते "देवेषु" इन्द्रादिषु "यज्ञं" "वहतः"(१) प्रापयतः॥ १३७

इति श्रीसायणाचार्य्य विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोग्याख्ये चतुर्थस्याध्यायस्य द्वितीयः खण्डः॥ २॥

इत्यानुष्टुभमैन्द्रम्॥

सन्त्येकादश या विश्वाः पृतना इति संमताः।
जगत्य ऐन्द्रा रोदस्योः स्तुतिर्घृतवतो इति॥
उभे यदिन्द्ररोदसी महापंक्ति रितीरिता(क)॥

---

(१)—प्रापणार्थस्य वहते (भ्वा०उभ०) रूप मिदम्।

(क)—अनन्तरमिह "विश्वाःपृतना" इत्यारभ्य "प्रमन्दिने" इत्यन्ताः चतुर्थ-दशदशात्मकाः या एकादश ऋचः सन्ति, तत्र "घृतवतो" इति नवमी ऋक् रोदस्योः द्यावापृथिव्योः स्तुतिः, अन्याः दश ऐन्द्राः, किञ्च "उभे यदिन्द्र रोदसी" इति दशमी ऋक् महापंक्ति ऋचस्काः अपरा जगत्यः। इति छन्दोदैवत-सङ्गतिः।

मैषा प्रथमा।

रेभ ऋषिः*।

२ ३ १ २ ३ १ २ ३ १२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
विश्वाःपृतनाअभिभूतरंनरः†सजूस्ततक्षुरिन्द्रंजजनुश्चराजसे

३ १ २ ३ २ ३ १ २ ३ १ २ २ १ ३ १
क्रत्वे वरेस्थेमन्यामु‡रीमुतोग्रमोजिष्ठन्तरसं¶तरस्विनम्॥१।

१३८

५ ४ १ २ २ १ २ २ ३ २ १ ३ १ २
I विश्वोहाइ। पृतनाअभिभू। तरन्नराः। सजू-

२ १ २ १ २ २ १ ५ २ २ २
स्ततक्षुराइन्द्रंजजनूः। चराजासो२३४हाइ। क्रत्वोहोइ।

---

* "तृचोकस्यार्षम्"-इति वि०।

† "नरं"-इति ऋग्वेदीयः पाठः।

‡ "क्रत्वा वरिष्ठं वर आमु०"--इति ऋग्वेदीयः, सायणकृतोत्तर भाष्ये च।

¶ "आमुरिम्"-इति ऋग्वेदीय-पाठः।

§ "तवसं"-इति च ऋग्वेदीयः पाठः।

---

१३८ उत्तरार्चिकस्य ३,१,१४,१=ऋग्वेदस्य ६,६,३७,५=जहे २२,१३।

I त्रैगोकम्।

२ १र ३ ५ ४ २१
वरौहोइ। स्तेमन्या२मू२३४रीम्। उतोहाइ। उग्र-
५ २ ३ ५ २ ३२
मो२३४जौ। ष्टन्तारा२३४साम्। होइ। तरा३४।
५ ५ २ ३ ५
स्विनम्। ओ६वा। ओइदो२३४वा॥ ३५॥* १३८

"विश्वाः" सर्व्वाः व्याप्ता वा "पृतनाः" [पृङ् व्यायामे (तु०आ०)] व्याप्रियन्त इति पृतनाः सेनाः(१) "नरो" नेतारः "सजूः" परस्परं सङ्गताः सत्यः "अभिभूतरं" शत्रूणां मत्यर्थमभिभवितारम् "इन्द्रं" "ततक्षुः" आयुधादिभिः स्तोत्तोचक्रुः आयुधवन्तं चक्रुरित्यर्थः [यद्वा पृतना इति सङ्ग्रामनाम (नि०२,१७,) व्याप्रियन्ते अत्रेति "पृतनाः" सङ्ग्रामाः सर्व्वानेव संग्रामानभिभावुकमिन्द्रं "नरो" नेतारोऽन्ये स्तोतारः अन्योन्यं सङ्गताः स्तुतिभिः स्तोत्तॄन् मकुर्वन्। [यद्वा। यष्टारो हविःप्रदानेन वीर्य्यवन्तं कुर्वन्तीति।] किञ्च स्तोतारः "राजसे" [राजते स्तुमर्थे असे प्रत्ययः(२)] आत्मनो विराजनार्थं सूर्य्यात्मनमिन्द्रं "जजनुः"(३) जनयामासुः स्तोत्रस्तैः

(१)—"पृतनाः"-इति निघण्टौ मनुष्यनामसु(२,३) सङ्ग्रामनामसु च(२,१७) दृश्यते।

(२)—"तुमर्थे से-सेन-ऽसेनेन्-क्से-कसेन-ऽध्यै अध्यैन् कध्यै-कध्यैन्-ग्रध्यै-ग्रध्यैन्-तवै तवेङ्-तवेन: (३,४,९)"-इति पा०।

(३)—"इन्दस्युभयथा (३,४,११७)"-इति सिद्धम।

* ॥ इति ग्रामे गेये नवमः प्रपाठकः ॥

अथ द्वितीया।

सुवेदः शैलूषिर्ऋषिः*।

१२ २१२१२उ २२उ २१२ १२१२
अत्तेदधामिप्रथमायमन्यवेऽहन्यद्दस्युर्नर्यं †विवेरपः॥

१२उ १ १२१ २२१ १ २ १ २ ३१२
उभेयत्त्वारोदसीधावतामनुभ्यसात्तेपूष्मा‡त्पृथिवीचि

दद्रिवः॥ २॥ १३९

स्व-यज्ञे प्रादुरभावयन्नित्यर्थः। "उत" अपिच "क्रत्वे" स्वकीय-हन्त्र-वधादि-कर्मणे "वरे" श्रेष्ठे "स्थेमनि" (स्थिर-शब्दादिमनिच् ५,१,१२२) स्थैर्य-युक्ते स्थाने स्थितम् "आमुरिं" शत्रूणां मार-यितारमिन्द्रम् आत्मनां धन-लाभार्थं स्तोतारः स्तवन्तीत्यर्थः। कीदृशम्? "उग्रम्" उद्गूर्णबलम् अतएव "ओजिष्ठम्" ओज-स्वितमं "तरो" बलं तदन्तं "तरस्विनं" सङ्ग्रामे शत्रु-बधार्थं बलवन्तं वेगवन्तं वा॥ २॥ १३८

---

* "सुमेधस आर्षम्"-इति वि०।

† "यद्दृत्रं नर्यं"-इति ऋग्वेदीयः पाठः।

‡ "यत्त्वा भवतो रोदसी अनु रेजते पूष्म०"-इति ऋग्वेदीयः पाठः।

---

१३९ ऋग्वेदस्य ८,८,५,१।

I ओं॥ अत्ते३च्छोइ। दधा३च्छो२३४। मिप्रथमायम।
न्यवाइन्यवाइ। अच्छा३न्छोइ। यद्दा३च्छो२३४। स्यन्नयं
विवे। अपाअपाः। उभे३च्छोइ। यत्वा३च्छो२३४।
रोदसीधावताम्। अनूअनू। भ्यसा३ङ्खोइ। तेशु३च्छो-
२३४। यात्पृथिवीचिद्। द्रिवोद्रिवाः। द्रिवआ।
अच्छोवाइ। च्छाउवा। ई२३४५॥ १॥

II अत्ता३१इ। दधा३१२३४। मिप्रथमायम। न्यवाइ-
न्यवाइ। अच्छा३२न्। यद्दा३१२३४। स्यन्नयं वोवेः। अपा-
अपाः। उभा ३१इ। यत्वा३१२३४। रोदसीधावताम्।
अनूअनू। भ्यसा३१त्। तेशु३१२३४। यात्पृथिवीचिद्।
द्रिवोद्रिवाः। द्रिवए। छियाइच्छा। च्छोपइ। डा॥ २॥

III अयो२३४वा। अयायो२३४वा। आत्ताइ। दा-
२३४धा। मिप्रथमायम। न्यवाइन्यवाइ। अयो२३४-

I,II *गैरवर्गिङने दे।

५ ३ २ ३ ५ ४ ५ १ ५ ४ ५ ४र
वा। अयायो२३४वा। आत्तान्। या२३४इ। स्रुन्नर्यंविवः।

५ ४ ५ ३ ५ ३ २ ३ ५ ४ ५
अपाअपा.। अयो२३४वा। अयायो२३४वा। ऊभाइ।

१ र र ५ र ४र ५ र ४ ५ ४ ५ ३
या२३४त्वा। रोदसीधावताम्। अनूअनू। अयो२३४

५ ३ २ ३ ५ ४ ५ २ ४र
वा। अयायो२३४वा। भ्यासात्। ता२२४इ५ु। ष्मात्पृ-

४र ५ ४ ५ ४ ५ ४ ५ र र ५
थिवीचिद्। द्रिवोद्रिवः। द्रिवआ। औत्तोवाइ। त्ता-

२ र २
उवा। द्रिवइत्तो२त्त१॥ ३॥

३ ५ ३ २ ३ ५ ४ ५
IV इयो२३४वा। इयायो२३४वा। आत्ताइ।

१ र ५ ४र ५ ४ ५ ४ ५ ३
दा२३४धा। मिप्रथमायम। न्यवाइन्यवाइ। इयो२३४-

५ ३ २ ३ ५ ४ ५ १ ५ ४
वा। इयायो२३४वा। आत्तान्। या२३४इ। स्रुन्न-

५ ४र ५ ४ ५ १ ५ ३ २ ३ ५
र्यंविवेः। अपाअपाः। इयो२३३वा। इयायो२३४वा।

४ ५ १ र र ५ र ४र ५ र ४ ५ ४ ५
ऊभाइ। या२३४त्वा। रोदसीधावताम्। अनूअनू।

१ ५ ३ २ ३ ५ ४ ५ १
इयो२३४वा। इयायो२३४वा। भ्यासात्। ता२३४इ५ु।

III,IV अत्रेर्विवर्त्तौ द्वौ।

४२ ४२ ५ ३ ५ ३ ५ ३ ५ ३ ५२ २
ष्मात्पृथिवीचिद्। द्रिवोद्रिवाः। द्रिवस्पा। औह्वावाई।
५ २ २
ह्वाउवा। द्रिवइह्वाइह्व॒१॥ ४॥

१ २ ३ ५ १ २ ५
V आ२३याइम्। आत्ताइ। दा२३४धा। मिप्र-
४२५ ३ ५ ३ ५ १ २ ३ ५
थमायम। न्यवाइन्यवाइ। आ२३याइम्। आह्वान्।
१ ५ ३ ५ ४२ ५ ३ ५ १ २
या२३४इ। स्युन्नर्यविवेः। अपाअपाः। आ२३याइम्।
३ ५ १ २ २ ५ २ ४२ ५ २ ३ ५ ३ ५
ऊभाइ। या२३४त्वा। रोदसीधावताम्। अनूअनू।
१ २ ३ ५ १ ५२
आ२३याइम्। भ्यासात्। ता२३४यिशू। ष्मात्पृथि-
४२ ५ ३ ५ ३ ५ ३ ५ ३ ५२ २ ५
वीचिद। द्रिवोद्रिवाः। द्रिवस्पा। औह्वावाई। ह्वा-
२ १ १ १ १ १
उवा। द्रिवोइद्रिवा२३४५ः॥ ५॥

२ ३ ५ १ २ ५
VI अयंयाइः। आत्ताइ। दधा३१२३४। मिप्र-
४२ ५ ३ ५ ३ ५ २ ३ ५
थमायम। न्यवाइन्यवाइ। अययाइः। आह्वान्।
१ २ ५ ४२ ५ ३ ५ २
यद्वा३१२३४। स्युन्नर्यविवेः। अपाअपाः। अययाइः।
३ ५ १ २ २ ५ २ ४२ ५ २ ३ ५ ३ ५
ऊभाइ। यत्वा३१२३४। रोदसीधावताम्। अनूअनू।

V,VI महासावेतसे द्वे।

२ ४ १ २ २ ५
अयंयाइः। भ्यासात्। ताइग्गू३१२३४। क्षात्पृथि-
४२ ५ ४ ५ ४ ५ ४ ५ ४ ५२ २ ५
वीचिद्। द्रिवोद्रिवाः। द्रिवआ। औहोवाई। हा-
२ १ १ १ १ १
उवा। द्रिवाइई२३४५॥ ६॥

५२ ४ ५ ४ ५ ३ ५
VII औहोहोहाइ। आत्ताइ। दा२३४धा।
२ ३ ५ २ ३ ५ २ ३ ५
मिप्राथा२३४मा। यमन्या२३४व। यमन्या२३४वाइ।
३ २ ३ ५ २ ३ ५ २ ३
अहा३१२न्। या२३४दा। स्युन्नारी२३४याम्। विवेरा-
५ २ ३ ५ ३ २ ३ ५
२३४पो। विवेरा२३४पाः। उभा३१२इ या२३४त्वा।
२ ३ ५ २ ३ ५ २ ३ ५
रोदासो२३४धा। वतामा२३४नू। वतामा२३४नू।
३ २ ३ ५ २ ३ ५ २ ३
भ्यसा३१२त्ता२३४इग्गू। क्षात्पृथी२३४वी। चिद्द्रो२३-
३ २ ३ ५ ४ ५ ४ ५२ २ १
४वः। चिद्द्रा२३४इवाः। द्रिवआ। औहोवाई। हा-
२ २ १ १ १ १ १
उवा। ए३। द्रिवइहा२३४५॥ ७॥

५ २ २ ४ ५ १२ ५ ४२
VIII अत्ताऔहोहोहाइ। दधा३१२३४। मिप्रथमा-
५ ४ ५ ४ ५ २ २ ४ ५ १२
यम। न्यवाइन्यवाइ। अहाऔहोहाइ। यद्दा३१२३४।

VII, VIII, महाशैरोषे हे।

५ ४र ५ र ५ र ५ १२
स्युन्नर्यविवेः। अपाअपाः। उभाऔहोहोहाइ। यत्वा-

र ५ र ४र५ र ४५ ४५ र
३१२३४। रोदसीधावताम्। अनूअनू। भ्यसाऔ-

४ ५ १ २ र ५ ४र ५ ४
होहोहाइ। ताइमृ३१२३४। ष्यान्पृथिवीचिद्। द्रि-

५ ४ ५ ४५ ४ ५र र ५ १ १
वोद्रिवाः। द्रिवआ। औहोवाइ। हाउवा। द्रिवए-

१ १२१
३द्रिवा२३४५ः॥ ८ ॥१३९

हे "अद्रिवः" वज्रवन्निन्द्र! "ते" तव "मन्यवे" कोपाय तेजसे वा "प्रथमाय" मुख्याय "अहधामि" अहामादरातिशयन्तद्विषयं-करोमि(१)। "यत्" येन मन्युना "दस्युं" कर्माण्युपक्षपयितारम् असुरम् "अहन्" अवधीः (नर्यमिति क्रिया-विशेषणम्) नरहितं यथा भवति तथा तेन हत्वा च मेघेनाहताः "अपः" उदकानि च "विवेः" इमं लोकं प्रत्यागमयः (तस्मै मन्यवइत्यन्वयः) "यद्"

(१)—'अत् सत्यं, ते तुभ्यं, दधामि ददामि'-इति वि०। "अत्"-इति सत्य-नामसु द्वितीयं नैघण्टुकम् ३,१०।

अथ तृतीया।

वामदेव ऋषिः।

१ २ ३ १ ३ १ २ ३ १ २ ३ २उ ३१र १ २र ३ १ २
समेतविश्वाओजसापतिंदिवोयएकइद्भूरतिथिर्जनानाम्।

३ १र २र ३ १ २ ३ १ २ ३ १र २र ३२ ३ २
सपूर्व्योनूतनमाजिगीषन्तंवज्रिन्नीरनुवावृतएकदूत् ॥३॥१४०

४ ५ १ र र २ १ २
। समाज्ञाउ। आदृतविश्वाओजसाइ। पतिमाइद्।

१ २र २ १ २ १
दिवाइ२३४ः। ज्ञाज्ञोइ। यआदुकाइ१ईरत्। भूर-

यदा "उभे" "रोदसी" द्यावापृथिव्यौ "त्वा" त्वाम् "अनुधावताम्" गच्छतां त्वदधीने भवत इत्यर्थः। तदानीं "पृथिवी चित्" पृथिवीत्यन्तरिक्षनाम (नि० १,३,९) प्रथितं विस्तीर्णमन्तरिक्षमपि(२) "शुष्मात्" त्वदीयाद्बलात्(३) "भ्यसाते" बिभेति [भ्यस भये (भ्वा० आ०) पञ्चम-लकारे(४) रूपम्] बिभीयात् भयेन कम्पतइत्यर्थः॥ २ ॥ १३९

---

(२)—चयर्थश्चिच्छब्दः, विवरणे तु पादपूरणार्थः। किञ्च 'अन्तरीक्ष-मन्नयं प्रदर्शनार्थम्, चयोऽपि लोका इत्यर्थः'-इति विवरणे विशेषः।

(३)—"शुष्मम्"-इति बल-नामसु एकादशं निघण्टुकम् २,९।

(४)—लेटीति भावः। तथाच "लिङर्थे लेट्(३,४,७)"—"लेटोऽडाटौ(३,४,९४)"-"इतश्च लोपः परस्मैपदेषु (३,४,९७)"-इति सूत्र-त्रयं विशेषेण ज्ञातव्यम्।

१ १ २ ३र २ १ ७
तिथिः। जना२३ना३४म्। ह्वाहोइ। सपूर्विया२:।
१र २ र १ २ ३र २ १ २
नूतनमा। जिगा२३इषा३४न्। ह्वाहोइ। तंवार्त्ता-
१ २र र १ २ २ २
१नी२:। अनुवावृते। आये३। कयाउवाऽ। वृधे१॥

॥ ८ ॥

५ ४र५ ४ ५र ४र५ र ४ ५ ४ ५ १ २र
II समेतविश्वाओजसापतिम्। एपातीम्। दिवया।
ऽ २ १ ऽ २ १ २ १र
द्यौ२। द्यौ३द्योऽवाई३या। यआइका१ई२त्। भूर-
२ १ २ ऽ २ २ ऽ २
तिथिः। जना२३नाम्। द्यौ२। द्यौ३द्योऽवाई३या।
१७ १र २ र १ २
सपूर्विया२:। नूतनमा। जिगा२३इषान्। द्यौ२।
ऽ २ २ ऽ २ १ २ १ २र र
द्यौ३द्योऽवा। ई३या। तंवार्त्ता१नी२:। अनुवावृते।
१ २ २ २
आये३। कयाउवाऽ। मह्ये१॥ १०॥

५ ४र५ ४ ५र ४र५ र ४ ५ ४ ५ र
III समेतविश्वाओजसापतिम्। एपातीम्। दाइ-
१ ऽ २ १ १० २ १
वा१या२। औ२। द्यौ३द्योऽवा। ओमोवा। यआइ-

I, II, III इन्द्रस्य प्रियाणि त्रीणि।

२ १र २ १ २ ऽ
काऽई२त्। भूरतिथिः। जना२३नाम्। औ२। ह्वौ-
२ २ १ २ १ २ १र २ र
२ह्वोऽवा। ओमोवा। सपूर्वा१या२ः। नूतनमा।
१ २ ऽ २ २ १ २
जिगा२३इषान्। औ२। ह्वौऽह्वोऽवा। ओमोवा।
१ २ १ २र र १ २ २
तंवार्ता१नो२ः। अनुवावृते। आये३। कयाउवा३।
१ ३ १ १ १
धर्मणे२३४५॥ ११॥ १४०

हे "विश्वाः" सर्वाः प्रजाः! "दिवः" स्वर्गस्य "ओजसा" बलेन "पतिं" स्वामिनमिन्द्रं(१) "समेत" स्तोत्रेण हविषा वा सम्यक् प्राप्नुत। इन्द्रः "एकइत्" एक एव सन् "जनानां" यजमानानां "अतिथिः" अतिथिवत् प्रियो "भूः" भवति। "पूर्व्यः"(२) पुरातनः "स" इन्द्रः "आजिगीषन्तं" स्व-शत्रून् जेतुमिच्छन्तं "नूतनम्" अद्यतनं स्तोतारं प्रति "एकइत्" एकएव वर्त्तनिर्मार्गः सन् "अनुवावृते"(३) अनुवर्त्तयति॥ ३॥ १४०

(१)—"युलोक ग्रहणं चात्र प्रदर्शनार्थम्, द्यवापृथिव्योरपि लोकानां स्वामिनमित्यर्थः" इति वि०।

(२)—"पूर्वः छत्र मिनि यौ च (५,४,१२३)" इति य-प्रत्यये रूपम्।

(३)—सार्वकालिको लिट् (३,४,६)—"नृजादीनादीनां दीर्घोऽया ग्रस्य (६,१,७)"—इति दीर्घश्च नि विशेषः।

अथ चतुर्थी।

सत्यश्राङ्गिरसऋषिः*।

३१२ ३२३२२ ३२३ २३ १२
इमेतइन्द्रतेवयंपुरुष्टुतयेत्वारभ्यचरामसिप्रभूवसो।
२उ ३ २ २ ३ २ ३१२३ २ २३२३१२ ३ २२
नहित्वदन्योगिर्वणोगिरःसघत्क्षोणीरिवप्रतितद्वर्यनोव
चः† ॥४॥ १४१
५ २ २१२ १ १२२ २
I इमेतआ। इतेवयंपूरु२ष्टूता२। येत्वारभ्यचरा-
१ १ २ २ १
मसिप्रभू२वासा२उ। नहित्वदन्योगिर्वणोगिरा२ःसा-
२ १२ १ ३१३
घा२त्। क्षोणीरिवप्रतितद्वर्यनो२वाचाः। वचाओ-
५ ४
२३४वा। होपुइ। डा॥१२॥
५ २ २१२ २ १ २
II इमेतआ। इतेवयंपूरु। ष्टुता। याइत्वा२
१ १ २ २ १ २ १
राभ्या२। चारामसिप्रभू। वसाउ। ना१ही२त्वादा-

* "सत्यस्यार्षम्"-इति वि०।

† "प्रति नो हर्य तद्वच."-इति ऋग्वेदीयः पाठः।

१४१ ऋग्वेदस्य १,४,२२,४।

I,II,III *वैरूपाणि त्रीणि।

१ २ र १ २ २
२न्। योगिर्वणोगिरः। सघात्। त्वो१णी२राडूवा-

१ २ १ १ १र २ १
२। प्रतितद्व। र्यनोवा२३चा२४३ः। ओ२३४५ुइ।

डा ॥ १३ ॥

२ १र ४ ५ ४ ५ ४ ५ ४ ५ १ र र
III इमेता२३इन्द्रतेवयंपुरुष्टुतोवा। येत्वाराभ्या२।

१ र ४ २ र ३ ५ २ १ १र
चरामसी२३प्राभूवसाउ। नहित्वादा२न्। योगिर्व-

४ २ १ ५ १ र र १
णो२३गी३र:सघत्। त्वाणोरिवा२। प्रतितद्वा२३।

४ ४
र्यनो५वचाः। त्वो५ुइ। डा ॥ १४ ॥१४१

"प्रभूवसो" प्रभूतधन हे इन्द्र! अतएव "पुरुष्टुत" पुरुभिर्बहु-भिर्यजमानैः स्तुत! "ये" वयं "त्वा" त्वाम् "आरभ्य" आश्रयतया "बल" "व्यचरामसि"(१) चरामः यागे वर्त्तामहे। "ते" इमे वयन्ते तव स्वभूताः हे "गिर्वणो" गीर्भिर्वननीयेन्द्र! "त्वदन्यः" त्वत्तोन्यः कश्चिदपि "गिरः" स्तुतीः "न हि सघत्" न हि

(१)—"इदन्तोमसि (७,१,४६)"-इति मस इगागमः।

अथ पञ्चमी।

विश्वामित्रस्तौति।

३ १२३२२ ३ २ २३ १२ ३२ ३क२२
चर्षणीधृतंमघवानमुक्थाइ*मिन्द्रंगिरोबृहतीरभ्यनूषत।

३ १ २ ३१ २३ २ ३१२३ १२ ३१
वावृधानपुरुहूतंसुवृक्तिभिरमर्त्यंजरमाणन्दिवे

२
दिवे ॥५॥ १४२

५ २ २१२ २१ १ १
I चर्षणीधृतंहाउ। मघवानमुक्थाइयाम्। इन्द्र

२ २ २१२ २ १० १०
ङ्गिरोबृहतीरभ्यनूषाइता। वावृधानाइम्। पुरुहूता

प्राप्नोति। अतस्त्वं "नो" ऽस्माकं वचः" स्तुति-लक्षणं "प्रतिहर्यं"(१) कामयस्व "द्यावीरिव" यथा द्यावौ पृथिवी स्वकीयानि भूतजातानि कामयते ॥ ४ ॥ १४१

---

* "उक्थइ"-इति ऋग्वेदीयः पाठः।

I वार्हदुक्थम्।

१४२ ऋग्वेदस्य ३,३,१५,१=आरण्ये २,१-२-३।

(१)—"हर्यति" इति वष्टि पर्याये दशमं नैघण्टुकम् २,६।

१ २ ५ १ १ २ १
२३म्। सुवा२र्क्ता२३४इभीः। अमा२र्त्तियाम्। जर-

१ ४ २ ५
माणा२३म्। दा२३इवे३। दा३४५इवो६ऽहाइ ॥१५॥१४२

"बृहतीः" प्रभूताः "गिरः" अस्मदीयाः स्तुति-लक्षणा वाचः "चर्षणीधृतं" चर्षणीनां मनुष्याणां(१) मभिमत-फल-प्रदानेन धारकं पोषकं [यद्वा आकृष्टत्वेन सर्वमिति चर्षणि र्बलं(२) तद्धारकं "मघवानम्" "उक्थ्यम्" उक्थैः प्रशस्यैः प्रशनीयं(३) "वाजधानं" बल-धनादि-सम्पत्या प्रतिक्षणं वर्द्धमानं "पुरुहूत" बहुभिः स्तोतृभि राहूतम् "अमर्त्यं" मरण-धर्म-रहितं "सु-हवेभिः" शोभन-स्तुति-वाक्यैः "दिवे दिवे"(४) प्रत्यहं "जर-माणं" स्तूयमाणं तम्(५) इमम् "इन्द्रम्" "अभ्यनूषत"(६) अभितः सर्वे स्तुवन्तु ॥ ५ ॥ १४२

---

(१)—"चर्षणयः"-इति मनुष्य-नामसु ऋष्टमं नैघण्टुकम् २,३।

(२)—यौगिकार्थ एष न तु निघण्टु लभ्यः। चर्षणिः "चायिता आदित्य"-इति च नै०५.२५।

(३)—"उक्थ्य"—इति प्रशस्य-नामसु सप्तमं पदम् ३,८।

(४)—"दिवेदिवे"-इत्यहर्नाममूपान्त्यं नैघण्टुकम् १,९।

(५)—"जरते"-इत्यर्चति-कर्मसु सप्तमं नैघण्टुकम्।

(६)—"नौति"-इत्यर्चति-कर्मसु जनन्त्यि प्रशस्तमं नैघण्टुकम् ३,१४।

अथ पञ्चमी।

कण्व आङ्गिरस ऋषिः*।

१२ ३ १२३१२३१२ ३२ ३ १२ ३१ २
अच्छाव॑ इन्द्रं मतयः स्वर्युवः॑ सध्रीचीर्विश्वाउशतीरनूषत।
१२ ३ १२३२३ २३२३२ ३ २३१२ ३१ २
परिष्वजन्तजनयोयथापतिंमर्यं नशुं ध्वंमघवानमूतये॥६॥१४३

५ २ ५ २१२२ २
I अच्छावइन्द्रम्मतयःसुवर्युवाई॒ए। सध्रीचीर्विश्वाउ-
१ १ २ १
शतीरनू२षाता२। परिष्वजन्तजनयोयथा२पातौ२म्।
१ २ १ २ १ ३० ५२ २
मर्यन्ना२३शुम्। ध्युम्म। घवा२। नमू३४औहोवा।
२ १ ११११
तयाइई२३४५॥ १६॥

---

* "कण्व आत्मीयान् ऋत्विज आह—" इति वि०।

† "आच्छाम" ‡ "स्वर्विदः" इति च ऋग्वेदीयो पाठो।

---

१४३ ऋग्वेदस्य ७,८,२४.१।

• ८७क,

१ र ५ ४ ५ ४ ५ २ र १
II आ२३४। च्छावदिन्द्रम्म। तयाः। सूवर्युवा२३ः।

१ र ५र ४ ५र ४ ५ २ र १र
सा२३४। ध्रीचीर्विश्वाउ। शतीः। आनूषता२३।

१ ५ ४ ५ २ र १र
पा२३४। रिष्वजन्तज। नयाः। याथापता२३इम्।

१ ५ ४ ५ ४ ५ २ र १र २
मा२३४। र्यन्नशुंध्युम्म। घवा। नामूतया३१उ। वा-

१ १ १ १
२३४५॥ १७॥ १४३

"स्वर्युवः"(१) स्वर्गेण मिश्रयितारः "सध्रीचीः" सङ्गताः विश्वा व्यापाः "उशतीः" कामयमानाः "मतयः" स्तुतयः(२) "इन्द्रम्" ईश्वरम् "अच्छानूषत" अभिष्टुवन्ति(३)। किञ्च।

I,II चासदस्यवे द्वे।

(१)—'यु मिश्रणे'-इति यौतेरूपम् (अदा०प०)। विप्रणये तु 'स्वर्ग' याः गन्तुमिच्छन्ति ताः स्वर्युवः स्वर्ग-गमन-शीला इत्यर्थः'। इतन्मते इच्छत्यर्थे क्यचि "क्याच्छन्दसि (३,२,१७०)"-इति उ प्रत्यये स्वर्युः, तस्य वडवचनान्तस्येदं रूपम्।

(२)—मतय इति "मन्यते"-इति स्तुतिकर्मणो रूपम् (नि० ३, १४, ९८)।

(३)—"अच्छ अभेः, आप्नुमिति शाकपूणिः" (नै० ५, २८)। "निपातस्य च (६. ३,१३६)"-इति ऋचि दीर्घः।

अथ सप्तमी।

सव्यऋषिः*।

३ २उ ३१० ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ २
अभित्यंमेषंपुरुहूतमृग्मियमिन्द्रंगीर्भिर्मदतावसोऋणवम्।

३ २ ३ १ २ ३११ ३ १ २ ३१र २र ३ १र २र
यस्यद्यावोनविचरन्तिमानुषंभुजेमण्यिष्ठमभिविप्र

मर्चत ॥७॥ १४४

५ २ ४र५४ ५ ३ १ र
I अभित्याऽग्मेषंपुरुहू। तमृग्मायाऽग्म्। इन्द्रंगी-

"जनयो" जायाः यथा "पतिं" भर्त्तार "मर्यं न" यथाच "शुन्ध्युं" शुद्धं दोष-रहितं "मघवानं" धनवन्तम् जनये" रक्षणाय "परिष्वजन्त" आलिङ्गन्ति [छान्दसो लोट्(५)] तद्वदिन्द्रं मे स्तुतयः परिष्वजते।

"परिष्वजन्त"-"परिष्वजते"-इति च पाठौ ॥ ६ ॥ १४३

---

* "अङ्गिरा नाम ऋषिः"-इति वि०।

† "मानुषा"-इति ऋग्वेदीयः पाठः।

---

१४४ ऋग्वेदस्य १,४,८,१।

I सोमसाम।

(५)—व्यत्ययेनेति (३,१,८५) भावः। "पर्यपदात ८,३,१०६)" इति रुषम्।

र १ ७ २ ३र २
भाइः। मदतावस्वाऽ३आर्णवम्। ओ३४। ह्वाहोइ।

र र १ ७ २ ३र २
यस्यद्यावोनविचरन्तीऽ३मानुषम्। ओ३४। ह्वाहोइ।

र १ ३ २ ५र र
भुजेमण्हिष्ठमभिविप्रमर्चत। दुरा२। तिनाऽ३४ओहोवा।

३ ५
ऊऽ३४पा॥ १८॥ १४४

"त्वं" तं प्रसिद्धं "मेषं" शत्रुभिः सर्ह्यमानं। [यद्वा। कण्वपुत्रं मेधातिथिं यजमानमिन्द्रो मेषरूपेणागत्य तदीयं सोमं पपौ। स ऋषिस्तं मेष इत्यवोचत् अत इदानीमपि मेष इन्द्रो-विधीयते। मेधातिथेर्मेषेति सुब्रह्मण्या मन्त्रैकदेशस्य व्याख्यान-रूपं ब्राह्मणमेव मान्नायते—"मेधातिथिं ह काण्वं मेषो भूत्वा जहारेति"। आगत्य सोमं अपहृतवानित्यर्थः।] "पुरुहूतं" बहु-भिर्यजमानैराहूतम् "ऋग्मियम्"(१) ऋग्भिर्विक्रियमाणं स्तूय-मानमित्यर्थः। स्तुत्या हि देवता विक्रियते (यद्वा ऋग्भिर्मीयते ऋग्मीः तं) "वस्वो अर्णव" धनाना मावासभूमिम्। एवं शब्दात इति गुणविशिष्ट मिन्द्रं हे स्तोतारः! "गीर्भिः" स्तुतिभिः "अभिमदत" आभिमुख्येन हर्षं प्रापयत। "यस्य"-

(१)—'ऋचः स्तुतयः, ताभिः यः स्तूयते स ऋग्मियः, तम् ऋग्मियं स्तुतिवन्त स्तुत्य मित्यर्थः' इति वि०।

अथाष्टमी।

सव्यऋषिः*।

२उ ३१२ ३१२ ३१२ २२ ३१२ ३१२ २२
त्यꣳसुमेषंमहयास्वर्विदꣳशतंयस्यसुभ्वः†साकमीरते।
३१२ २२ ३२३ २३१२ ३ १२ ३ १ २
अत्यंनवाजꣳहवनस्यदꣳरथमेन्द्रंवत्तयामवसेसुवृक्तिभिः॥८॥

१४५

५ २ ४२५ ४ ५ २ १
I त्यꣳहꣳसुमेषम्महया। सुवर्वाइदा२म्। शतंयस्य

इन्द्रस्य "कर्माणि" मानुषं [जात्येकवचनं(२)] "मानुषाणि" मनुष्याणां हितानि "विचरन्ति" विशेषेण वर्त्तन्ते। अत्र दृष्टान्तः—"द्यावो न" यथा सूर्यस्य(३) रश्मयः सर्वेषां हितकराः "भुजे" भोगाय "मंहिष्ठम्" अतिशयेन प्रवृद्धं "विप्रं" मेधाविनं(४)। तथाविधमिन्द्रम् "अभ्यर्चत" अभिपूजयत॥ ७॥ १४४

---

* "सत्यस्यार्षम्। अन्तरात्मन एवायं प्रेषः"-इति वि०।

† "सुभ्वः"-इति ऋग्वेदीयः पाठः।

---

१४५ ऋग्वेदस्य १,४,१२,१।

I सौभरम्।

(२)—"जात्याख्यायामेकस्मिन बहुवचनमन्यतरस्याम (१,२,५८)" इति पा०।

(३)—यथा "सः"-इति दिवः अन्तरौक्षस्य च नाम (१,४,१) यौ रपि तथा अथवा युष्मत्वादित्योऽपि यौकथ्यते।

(४)—"विप्रः"-इति मेधाविनामसु प्रथम निघण्टुकम ३,१५।

र १ २ र
सुभ्वःसाकाꣳमादुरा१ता२इ। अत्यन्नवाजꣳहवनस्या३-

१ ३ १ २ १२१ २ १
दाꣳरा१था२म्। आइन्द्रंववृत्याम। वसायेऽ३। स्व२-

३ ४र र ३ ४
र्व२३४औहोवा। क्ती२३४भीः॥ १८॥ १४५

"त्वं" तं प्रसिद्धं "मेघं" शत्रुभिः सह स्पर्द्धमानं "स्वर्विदं" स्वरादित्यो द्यौर्वा(१) तस्य "वेदितारं" लम्भारं वा। [यद्वा। स्वः सुष्ठु अरणीयं धनं तस्य लम्भयितारम्।] एवं गुणविशिष्टमिन्द्रं हे अध्वर्यो! "समहय" सम्यक् पूजय। "यस्य" इन्द्रस्य "शतं" शतसंख्याकाः(२) "आवर्त्तन्या" प्रति आवर्त्तयामि। कीदृशं? "रथं" "हवनस्यदं" हवन माह्वानं यागं वा प्रति वेगेन गच्छ-

---

(१)—निघण्टौ साधारण नामसु पठितत्वात् (१.४,१)।

(२)—इतः पर मिह भाष्यपुस्तके किञ्चित् (सुभ्वः साकमीरते इत्यस्य व्याख्यानं) त्रुटितं दृश्यते। विवरणे त्वस्या एवं व्याख्यानम्—'त्वम्' तम इन्द्रं, 'मेघं' मेघरूपम्, 'समहया' सुष्ठु पूजया स्तुतिभिः, हे ऋत्विजः। कीदृशम इन्द्रम? उच्यते—'स्वर्विदम्' (स्वःशब्दः स्वर्गपर्यायः, विद्लृ लाभार्थः ज्ञानार्थो वा) स्वर्गस्य लम्भारं ज्ञानं वा यस्य। किम्? उच्यते—'शतं' यस्य (शतमिति बहुनाम (३.१,२) 'सुभ्वः' अपठितमपि मन्त्रान्मैतद्द्रष्टव्यम् बहवो यस्य मरुतः, के? सामर्थ्यात् स्तोतारः, 'साकं' मरुद्भिः, 'ईरते' प्रेरयन्ति, किम्? सामर्थ्यात् स्तुतीः मरुद्भिर्ऽयं स्तुवन्नीत्यर्थः। अश्वमपि 'अत्यन्न' अश्वमिव 'वाजं' हविर्लक्षणमन्नम्, 'हवस्यदं' स्यन्दति गतिकर्मा आह्वानं प्रति गच्छन्तं, केन? उच्यते—'रथं' द्वितीयैकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यम्, पथेन इन्द्रम् 'आवर्त्तयाम' आवर्तयेदुरित्येतदाशास्महे, किमर्थम्? उच्यते—'वसये तर्पणाय, सोमेन 'सुष्टुभिः' सुष्ठु वर्जित-दोषाभिः स्तुतिभिः"-इति।

अथ नवमी।

भरद्वाज ऋषिः।

१ १ २ ३ १ २ १ २ ० ३ २ १ १ २ ० १ २ १ १ २
घृतवतीभुवनानामभिश्रियोर्वी पृथ्वीमधुदुघेसुपेशसा।

१ २ ३ १ २ २ १ १ २ १ १ २ १ २ २ १ १ २
द्यावापृथिवीवरूणस्यधर्मणाविष्कभितेअजरेभूरि

रेतसा॥ ९॥ १४६

४ ३ ५ ४ २ ३ ४ २ ५ २ १ १ २
I घृतव। ता३इभुवनानाम्। अभिश्रिया। उर्वी-

२ २ २ १ २ २ २
पृथ्वीमधुदुघेसुपेशसा२३द्योइ। द्यावापृथिवीवरूणा। स्या-

१ १ २ १ २ १ २ १ २
धर्मणा२३। द्योइ। विष्काभा२३ते। आजरे। भूरि।

२ २ २ १ २ १ २ १ २ २
राये३। तसाउवा३। ए३। इन्दुःसमुद्रमुर्वियाविभा-

१ १ १ १ १
तीर२३४५॥ २०॥

५ ४ ५ २ ४ ५ २ २ ४ ४ २ १ २ २
II घृतवतीभुवनानाम्। भाभुइश्रिया। उर्वीपृथ्वी-

न्तम्। गमने दृष्टान्तः—"अत्यत्रवाज" गमन साधन मश्वमिव "मह्य" पूजय॥ ८॥१४५

---

१४६ ऋग्वेदस्य ५,१,१४,१।

I,II वरुणसामनी द्वे।

र र १ र र र २र १
मधुदुघेसुपेशा२मा। द्यावापृथिवीवरूणा। स्याधर्मणा।

१ २ १ २१र १र २ २
वाइष्कभिताइ। अजरे२भूरि। रायेइ। तसाउवाइ।

१ २ १ २१र २र ७ १११
इन्दुःससुद्रमुर्वियाविभातीर२३४५॥ २१ १४९॥

"द्यावापृथिवी"(१) द्यावापृथिव्यौ "घृतवती"(२) दीप्तिमत्यौ(३) उदकवत्यौ(४) वा भवत इति शेषः "भुवनानां" भूतानाम् "अभिश्रिये" अभिश्रयणीये भवत इति सर्वत्रानुसन्धेयम्, "उर्वी"(५) विस्तीर्णे "पृथ्वी" बहुकार्यरूपेण प्रथिते च, "मधुदुघे" मधुन उदकस्य दोग्ध्र्यौ(७), "सुपेशसा"(८) सुरूपे,

---

(१), (२) –पूर्वमवर्णे रूपम् ७,१,३९।

(३)—"तेजो वै घृतम्" इत्यादि-श्रुति रवैवमर्थे नियामकम्।

(४)—"घृतम्" इत्युदकनामसु दशमं नैघण्टुकम् १,१२।

(५)—ङ्याप्ये रूपम् ७,१,३९।

(६) –'ऊर्वीनिबङ्गनाम (३,१,१) अवयवभूतत्वाच्च बङ्ग-व्यपदेशः, बहुवचनं' इति वि०।

(७)—'दोग्ध्र्यौ यावत् मात्रादेव उदकं चरति, पृथिव्यपि उदकस्य हेतुभूताया आकृतिनत्प्रदान द्वारेण' इति वि०। "मधु"-इत्युदक-नामसु एकादशतमं नैघण्टुकम् (१.१२)।

(८)—"पेशः" इति रूपनामसु दशम नैघण्टुकम् (३.७)। ङी-प्रत्ययस्याल रूपम् ७,१,३९।

अथ दशमी।

मेधातिथि ऋषिः।

महापङ्क्तिश्छन्दः।

(षड्नाष्टाक्षराः पादा, द्वौ चार्ईचौ वधीमहे)

३ १८ २८ ३ १ २ ३ २ ३ १ २
उभेयदिन्द्ररोदसौआपप्राथोषादुव।

३ १ २ ३ १ २ २ १ २ ३ २
महान्तंत्वामहीनाꣳसंम्राजञ्चर्षणीनाम्॥

३ १८ २८ ३ १८ २८
देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत्॥ १०॥ १४७

५ ४८ ५ ४८ ५ ४ १ २ १ २
I उभेयदिन्द्ररोदसाइ। आ२३पा। प्राथउषा३१उ-

"वरुणस्य" सर्वनियामकस्य(९)" धर्मणा" धारणे "विष्कभिते" पृथक्.धारिते "अजरे" नित्ये "भूरि रेतसा" बहु-रेतस्के बहु-कार्य्ये वा भवतः (अत्र साक्षात् द्यावापृथिव्योः स्तुतिः, प्रसङ्गाद् वरुणस्येति द्रष्टव्यम्॥ ९॥ १४६

I श्येनम्।

१४७ उत्तरार्चिकस्य ४,१,१९,१=८,७,२२,१=आरण्ये ३,१९=ऊहे १,१९।

(९)—वरुणो मेघ-प्रधानक-वायु-विशेष एवेति दैवत-काण्डीय-नैरुक्त पर्यालोचनया मन्यते। विवरणकृता तु 'वरुणो मध्यमस्थानः, सविता द्यु स्थ'-इत्युक्तम्।

९८क,

वा२३। इवआ। महान्तंत्वामहाइनाम्। सम्राौ३ह्वो।
जन्वर्षणा३१उवायेइ। नाइमा। देवीजनित्रियाजी१-
जाना२त्। भद्रौ३ह्वो। जानित्रियजा३१उवा२३। ए३।
जनदा३२॥ २२॥ १४७॥

हे "इन्द्र!" "उभे" "रोदसी" द्यावापृथिव्यौ "यत्" यस्त्वम् "आ पप्राथ" स्व-तेजसा आ पूरयसि [प्रा पूरणे आदादिकः (प०)। छान्दसो लिट्(१)] "उषा इव" यथा उषाः स्वभासा सर्वं जगदा पूरयति तद्वत्। "तं" "महीनां" महतां देवानामपि "महान्तम्" नायकम्। "चर्षणीनां" मनुष्याणामपि "सम्राजम्" ईश्वरम् "इन्द्रम्" "त्वा" त्वां "देवी" देवनशीला(२) "जनित्री" साधु-जनयित्री(३) अदितिः(४) "अजीजनत्" अजनयत् (जनेर्ण्यन्तात्

(१)—"छन्दसि लिट् (३,२,१०५)"-इति पा०।
(२)—'दानादि-गुण-युक्ता'-इति वि०। यास्कस्त्वाह—"देवो दानाद्वा दीपनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता"-इति ७,१५।
(३)—साधुकारिणि वर्तते (३,२,१३५)-भाष्यः।
(४)—"अदितिरदीना देवमाता"-इत्यादि निरुक्तोक्तेः (४,२२-२३)।

षष्ठैकादशी।

एषा गर्भस्राविण्युपनिषत्*।

२३ १२ ३१२ ३२३२ ३ १२ ३१२३ १२
प्रमन्दिनेपितुमद्‌र्चतावचोयःकृष्णगर्भानिरहन्नृजिश्वना।

३ २३१२३१२ ३१२ ३ १२
अवस्यवोवृषणंवज्रदक्षिणंमरुत्वन्तꣳसख्यायहवे-

महि † ॥११॥ १४८

॥ इति चतुर्थ-दशतिः ॥

२ २ ५ २ ४ २२३५ १ २
I प्रमन्दा२३४इने। पितुमदा३र्चा३तावचः। यःका-

लुङि चङि रूपमेतत्) यस्मादेषा जनयित्री ईदृशं पुत्रं मजीजनत् अतः कारणात् सा "भद्रा" कल्याणी प्रशस्ता जाता [जनेर्ण्यन्तात् साधुकारिणि तृन् (३,२,१३५)। "जनिता मन्त्रे (६,४,५३")-इति इडादौ णि-लोपो निपात्यते। "ऋत्व्येभ्य (४.१,५)"-इति ङीप् ॥ १० ॥ १४७

* 'कुत्स आत्मीयान् पुत्रान् पौत्रांश्चाह—"-इति वि०।
† "हवामहे"-इति ऋग्वेदीयः पाठः।

१४८ ऋग्वेदस्य १,७.१२.१।
I वैरूपम्।

१ ५ १ २२ १२ १ २ २ ३
३ओ२३४वा। ष्णगर्भानिरहन्नृजिश्वना३। अवस्या२३-
५ १२ १ २३ ५ १ २ ३
४वाः। वृषणंवा। ऋादत्ता२४४इणाम्। मारौवाओ२-
५ ४ २
३५वा। त्वन्तएसख्यायहवायूदमत्ताउ। वा। २३॥ १४८

हे ऋत्विजः! "मन्दिने" स्तुतिमते(१) स्तोतव्यायेन्द्राय "पितुमत्" हविर्लक्षणेनान्नेनोपेतं(२) "वचः" स्तुतिलक्षणं वचनं "प्रार्चत" प्रकर्षेणोच्चारयत। "यः" इन्द्रः "ऋजिश्विना" एतत् संज्ञकेन राजर्षिणा सख्या सहितः सन् "कृष्णगर्भाः" कृष्णोनाम कश्चिदसुरः, तेन निषिक्तगर्भाः तदीया भार्याः "निरहन्" नितरामवधीत् [कृष्ण मसुरश्च तत्पुत्राणा मनुत्पत्यर्थं गर्भिणीस्तस्य भार्या अपि अवधीदित्यर्थः(३)। "अवस्यवः(४)" रक्षणेच्छवो वयं "वृषणं" कामानां वर्षितारं "वज्रदक्षिणं" वज्रयुक्तेन दक्षिण-हस्तेन

(१)—"मन्दते"-इति स्तोतृकर्मसु षष्ठादशतमं पदम् ३,१४। अत्र यास्कः—"मन्दी मन्दतेः स्तुति-कर्मणः * * * प्रार्चत मन्दिने पितुमद्वचः"-इति ४,२४।

(२)—पितुरित्यन्ननामसु षष्ठं पदम् २,७।

(३)—अत्र विवरण-कार-व्याख्यान मतिदुष्टतरम्, तथाहि—'कृष्णगर्भः—कृष्णो मेघः, तस्य गर्भभूता आपः, निरहन्निति (गत्यर्थाऽकर्मणेति-णत्वं दृष्टव्यः) निर्गमितवान् पातितवानित्यर्थः'-इति।

(४)—रक्षणार्थाद्वयसश्छन्दसि 'व्याच्छन्दसि (३,१,१७०)"-इति उ-प्रत्ययं साधु।

उपेतं "मरुत्वन्तम्" इन्द्रं "सख्याय" सख्युः कर्मणे(५) "हुवेमहि" आङ्गयामः।

"हुवेमहि"-"हवामहे"-इति च पाठौ ॥ ११ ॥ १४८

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्य तृतीयः खण्डः ॥ ३ ॥*

॥ इति जागतम् ॥

—:०:—

अष्टाविंशतिरिन्द्रेति मुख्याः(अ) सप्तदशोष्णिहः।
आद्या(क) दशाद्याः ककुभः(च) पिबेत्यष्टादशी विराट्(ट)॥

---

(५)—"सख्युर्यः (५,२,१३६)"-इति कर्मणि यः।

(अ)—इन्द्रेति "इन्द्रसुतेषु"-इत्यारभ्य "वयमेवैतादृशाः दशतयात्मकाः अष्टादश ऋचः मुख्याः साम्नां व्याख्यातुं प्रतीतत्वेन प्रधानाः।

(क)—तत्र आद्याः सप्तदश "इन्द्रसुतेष्वित्यारभ्य "उपामीवेत्यन्ताः उष्णिहः उष्णिक्-छन्दस्काः।

(च)—अन्त्याः दश "अभ्यर्षन्यो"-इत्यारभ्य "वयमेवैतादृशाः अग्निमदशदात्मकाः दश ऋचः ककुप्-छन्दस्काः।

(ट)—पिबेति "पिबा सोम मिन्द्र"-इति द्वितीय दशदक्षिमा ऋक् तु विराट्-छन्दस्का। इति छन्दः सङ्गतम्

तु चे वेत्था ह्यपामीवामित्यादित्यपरिष्टुतिः(त) ।
आगन्त गाव इत्येते मरुता(प) मिन्द्रदेवताः ॥
अन्या ऋचो(य) ऽभिधीयन्ते ऋषयस्तत्र तत्र हि(श) ॥

तत्र चतुर्थे खण्डे—

सैषा प्रथमा ।

नारद ऋषिः ।

१ २ ३ २ ३ १ २ ३ १ २ ३ क २ र
इन्द्र*सुतेषुसोमेषुक्रतुम्पुनीष†उक्थ्यम् ।

(त)—"तुचे तुनाय"-इति पञ्चदशी, "वेत्था हि निर्ऋतीनां" इति षोड़शी, "अपामीवामपस्निध"-इति च सप्तदशी ऋक्—आदित्यस्य देवस्य परिष्टुतिः सर्वतः स्तवनं यथा तादृशी, आदित्य-देवताका इत्यर्थः ।

(प)—"आगन्ता मा रिषण्यत"-इत्येकविंशतितमा ऋक्, "गावश्चिद्घा"-इति चतुर्विंशतितमा ऋक् च इत्येते द्वे मरुद्देवतानां स्तुत्यर्थे इति शेषः ।

(य)—अन्याः अवशिष्टाः त्रयोविंशति ऋचः इन्द्रदेवताः ज्ञेया इति यावत् । इति दैवत सङ्केतः ।

(श)—आसामष्टाविंशत्यृचामृषयस्तु तत्र तत्रैव व्याख्यानमुखेनैव अभिधीयन्ते कथितु मारभ्यन्त इत्यर्थः ।

* "इन्द्रः" } इमौ ऋग्वेदीयौ पाठौ,
† "पुनीत" } सायण-कृतोत्तर-भाष्ये च ।

३ २ ३ २ ३ १ २ ३ २
विदेवृधस्यदत्तस्य*मह्ाण्चिःषः ॥ १ ॥ १४९

५ ४ २ १ २ २ २ १ १ २ २ १
I इन्द्रा। सुतेषुसोमे। षु। ह्वोई२। ह्वो। वाह्वोइ।

२ २ १ २ १ २
क्रतुम्युनीषउक्थियाम्। विदाइवा१र्ह्वा२३। स्याइद्दात्रा-

३ १ २ १
स्याम। मह्ाण्२३चिषा३४३:। ओ२३४५इ। डा ॥ २४ ॥

३ २ १ ३ २ १ २ १ २ २
II इन्द्राइह्वोइ। ह्वेइह्वोइ। सुतेषुसोमेषुक्रतुम्यु-

२ २ १ २ १ ५
नीषउक्थियाम्। विदाइवा१र्ह्वा२। स्यदस्मा। मा-

४ २ ५ ३ १ १ १ १
इह्वाण्चि। षा२३४५:॥ २५ ॥

---

* "दत्तसो" } इमौ च ऋग्वेदीयौ पाठौ।
† "महान्चि" }

---

१४९ उत्तरार्चिकस्य १,२,१२,१ = ऋग्वेदस्य ६,१,७,१ = जहे १,२,१०—१९,२।

I क्रौञ्चम्।
II अनुक्रौञ्चम्।

५ २ २ ४५ १ १ २ १
III इन्द्रसुतेषुसोमेषू। क्रतू२०पुनाइ। षउक्थि-

२२१ १ २२ १
याम्। विदेवार्द्धा२। स्यदत्तस्या। मह्ाएउहाइषा२ः।

१ २ १
मह्ाएउ२३हिषा३४३ः। ओ२४४५इ। डा॥ २६ ॥ १४९॥

हे "इन्द्र!" "सोमेषु" सुतेष्वभिषुतेषु सत्सु तान् पीत्वा "क्रतुं" कर्म-कर्त्तारं "उक्थ्यं" स्तोतारं च(१) "पुनीषे" शोधयसि(१)। [यदा सोमेष्वभिषुतेषु उक्थ्यं(४) क्रतुं यागं तैः सोमैः पुनीषे यजमानैः पूतङ्कारयसि] किमर्थं? "हृषस्य" वर्द्धकस्य "दत्तस्य" बलस्य(४) "विदे" लाभाय। स तादृग "इन्द्रः" "महान् हि" महान् खलु (अत एवं कर्त्तुं शक्नोतीति भावः॥ १ ॥ १४९

I,II कौसम्।

(१)—क्रतुरिति कर्मनाम (२,१,११)—उक्थ्यमिति स्तोत्रविशेषस्य नाम, शौक्या इत्या इदं तत्तत्कर्मरि व्यपदेश इति भावः।

(२)—विवरणकारस्त्वेवं व्याख्यातम्—'क्रतुं प्रति पुनीषे, पुनातिरत्र गत्यर्थो द्रष्टव्यः गच्छसीत्यर्थः। कीदृशं प्रति गच्छसि? उच्यते—उक्थ्यम् प्रशस्यमधिगुणमित्यर्थः इति। एतन्मते तु पुनीषे-इति "पवते" इत्यस्य गति-कर्मसु पठितस्य (नै०२,१४,१०८) विकरण-व्यत्ययेन१,१,८८ रूपम्। किन्तु उक्थ्यमिति प्रशस्य-नामसु (१,८,६)पठितस्येति।

(३)—अत्र पक्षे उक्थ्यमिति क्रतुमित्यस्य विशेषणम्; उक्थेषु शस्त्राणां सोमसंस्थासामान्यतमम्, तथाहि, 'लाट्यायन-सूत्रम्—"अथ सोमसंस्थाः, अग्निष्टोमो(१) ऽत्यग्निष्टोमो(२) उक्थः(३) षोडश्य(४) तिरात्रो(५) वाजपेया(६) नोर्यामः(७)"-इति (५प्र० ४ख०)।

(४)—"दत्तः" इति बल-नामसु चतुर्दशतमं नैघण्टुकम् (२,९)।

अथ द्वितीया।

द्वयी गोषूक्त्यश्वसूक्तिनाह्वषी*।

१ २ ३ १र २र ३ १ २ ३ २
तमुत्वाभिप्रगायतपुरुह्तंपुरुष्टुतम्।

५र र २ २ १ ५र २ ३
I ह्वाउतमूवभी। प्रगायता। ह्वाउ। पुरुह्व२३४-

५ २ १ ५र २ ३ ५ २
ताम्। पुरुष्टुताम्। ह्वाउ। इन्द्रङ्गा२३४इभीः। त-

१ २ ५र ३ २ ४ ३
वाइषा२३माइ४। ह्वाउ। विवाइसापूता६५६। दी-

५
२३४वी॥ २७॥

३ ५र २ ३४र ५ ५ २ १ २
II ताःमूवभि। ह्वोइ। प्रगायताई६। पुरुह्व३-

---

* 'गोषूक्ती वाश्वसूक्ती वा आत्मीयान् ऋत्विज आह'-इति वि०।

I,II दैवोदासे द्वे।

१ २ ३ १ २ ३१र २र
इन्द्राग्नीभिस्तविषमाविवासत ॥ २ ॥ १५०

२ १ १ २ १ ३ ५ २ १ २
ताम्। पुरुष्टूऽताऽम्। पुरु२ष्टू२३४ताम्। इन्द्राग्नी-

२ १ २ २ १ २ २ १ ३
३र्भाऽइः। तवाऽइषाऽमा। विवासाऽताऽ। विवा२सा-

५ १ २ २र १ १
२३४ता। आऽइन्द्रा३४म्। गीर्भाऽइः। तविषम्।

७ २ १ १ ३ ५ १ १ १ १
आ। विवा२३च्चाऽ। साताओ२३४वा। ऊऽ२३४५ ॥२८॥

५ ४ २ ३ ४ र ५ २ १ र १
III तमू३अभिप्रगायता। पुरु। हूतम्पुरु२ष्टू-

१ १ १ ५ २ १
ता२म्। इन्द्रा२०गाऽइर्भी२ः। तविषा२३४मा। विवा-

१ ३ ५र र ३ ५
२३। सा२ता२३४औच्चोवा। ओ२३४काः ॥ २९ ॥

१५०॰ ऋग्वेदस्य ६,१,१७,१।

III प्रहितोः संयोजनम्।

५४ २ ३४२ ५२ २१ २ १
IV तमू३अभिप्रगायतेदाम्। पुरू। हूतम्पुरू२ष्टूता-

१ २२ २ १ २ १
२म्। आइन्द्रङ्गीर्भिस्तविषमा। विवासा१ता२। आ-

२ ३ १११ २१ २ १
इन्द्रङ्गा२४५इ। भा२३४५इः। तवाइषा२३मा३। वा-

३ ५२ २ ३ १ १ १
२इवा२३४औत्तोवा। सतए२३४५॥ ३०॥ १५०

"पुरूहूतं" बहुभिराहूतं "पुरुष्टुतं" बहुभिः स्तुतं "तमु" तमेव इन्द्रं हे स्तोतारः! "अभिप्रगायत" अभिमुखं प्रकर्षेण स्तुध्वम्। एतदेव स्पष्टयति—"तविषं" महान्तम्(१) इन्द्रं "गीर्भिः" वाग्भिः "आविवासत" परिचरत(२)॥ २॥ १५०

IV श्लोकोनिधनम्।

(१)—"तविषः"-इति महन्नामसु मन्त्रम् नैघण्टुकम् ३,३।

(२)—"विवासति"-इति परिचरण-कर्मसु अग्निम् पदम् ३,५।

अथ तृतीया।

२ ३ १ २ ३ १ २ १ २ ३ १ २ ३ २
तन्त्वेमदङ्गृणीमसिवृषणम्यृत्नु*सासहिम्।

३ १ २ ३ १ २
उलोकक्रत्नुमद्रिवोवरिश्रियम् ॥ ३ ॥१५१

४ ४ २१ २
I तन्त्वेपृमदम्। गृणीपृमसि। वृषा। णम्यृत्नुमा

१ २१२ २ २
सा२ह्वाइम्। उलोका। क्रतनुमद्राइ। वोह्वा२३रीइ।

१ २ १
आ३४३या३४३म्। ओ२३४५इ। डा॥ ३१ ॥

३ ५ २ ३४ २ ५ ५ ७१
II ता४न्ते। ह्वोइ। मदङ्गृणीमसीइए। वृषाह्वो२।

२ २१ २ २ १
णम्यृत्नुसा१साह्वी२म्। उलोककृत्नुमद्रिवोह्वा१री२।

१ ४ ५ ४
श्रियाम्। ओ२३ह्वीवा। ह्वोइ। डा॥ ३२ ॥

---

* "पृत्नम्"-इति ऋग्वेदीय-पाठः, सायणकृतोत्तरभाष्ये च।

---

१५१ उत्तरार्चिकस्य २,२.१८,१ = ऋग्वेदस्य ६,१,१७,४ = जैमिनीये २,२.६—८,१३—१८,१९।

III तन्तेमदग्नृणीमसीइए। वृषाऔइन्द्रोइ४। ण-
म्नृचसासन्द्रीम्। उलाऔइन्द्रोइ४। कक्रन्नुमद्रिवाः।
न्द्रोइ४वा। आपूयोईन्द्राइ ॥ २३ ॥

IV तन्तेमदापृग्नृणीमसाइ। वार्षणंपृ। चसासाइन्द्री-
३म्। न्द्रोवाइन्द्राइ। उलोकाइकृइ। न्द्रोवाइन्द्रा। न्नृमा-
२३। द्रारइवाइ४औन्द्रोवा। न्द्रियाइ४५म् ॥
३४ ॥ १५१ ॥*

हे "अद्रिवः" वज्रवन्निन्द्र! "ते" त्वदीयं "तं" "मदं" सोम-पान-जनितं हर्षं "गृणीमसि" गृणीमः प्रशंसामः (गृ शब्दे क्र्यादिः "ध्वादीनां क्रस्वः(७,४,८०)"। "इदन्तोमसि(७,१,४६)"-इति मस इकारागमः।) कीदृशं? "वृषणं" वर्षितारं कामानां।

I,II,III,IV हारिवर्णानि चत्वारि।

---

* इति अष्टमः प्रपाठकः ॥

अथ चतुर्थी।

पर्वतऋषिः।

१र २र ३ १ २ ३ १ २ ३ २ ३ २
यत्सोममिन्द्रविष्णवियद्दाघचित्त्रात्रेय।
१ २ ३ २ ३ १ २ ३ १र २र
यद्दामरुत्सुमन्दसेसमिन्दभिः॥ ४॥ १५२

५ र ४ ५ १ र र
I ओम्। यत्सोममिन्द्रविष्णावी। यद्दाघचित्त्रात्रियाइ।
२ र १ ५ १ ३ ५र र
यद्दामरुत्सुमाइन्दासो२३४हाइ। सा२मा२३४औहोवा।
२ १ ३ १ १ १ १
ए३। दूभी२३४५ः॥ १॥

"पृत्सु" वैरि-सम्पर्क-जनितेषु संग्रामेषु(१)। (अतएव बह्वृचाः पृत्स्विति पठन्ति। पृत्सु समत्स्विति संग्रामनामसु (नि०२,१७,-२१-२२)पठितम्। "सासहिं"(२) शत्रूणामभिभवितारं "लोकक्रदम्" लोकस्य स्थानस्य कर्त्तारं "हरिभ्यं" हरिभ्यामश्वाभ्यां अयणीयं सेव्यम्। "उ" शब्दः सर्वेषां समुच्चये पाद-पूरणे वा॥ ३॥ १५१

---

१५२ ऋग्वेदस्य ६,१,४,१।

(१)—ननु "पृत्सु"-इत्यस्य सङ्ग्रामेषु रूढेरेव मर्थ्यत्वात् कथं तत्पर्यायेषु न पठितं निघण्टौ। अतएव विनिगमकमावश्यकमित्याह—अतएवेत्यादि। अस्ति पाठः सङ्ग्रामनामसु "पृत्सु" इति पदस्य (२,१७,२१) श्रूयते च तथा पाठो बह्वृचि, तदत्र निघण्टावपि 'पृत्सु'-इति च पाठभेदेन ग्राह्य मिति भावः।

(२)—सुन्नादित्वादायामदोर्घः ६,१,७।

II यत्सोममा५इन्द्र विष्णवाइ। यदाघात्रितआप्त्या२-
याइ। यदामा२रुत्समा। दासाये३। सा२मा२३४-
औह्वोवा। द२३४भीः॥ २॥

III ह्वाउह्वायत्सोममा। द्रा२वा२३४औह्वोवा। ष्णा-
२३४वी। यदा२घत्रितआ२प्त्ये। यदामरुत्समा२३ह्वो।
दमा२इ। समा२३ह्वोये३। दुभिरो २ ३ ४ ५ इ।
डा॥ ३॥

IV औह्वो३१इ। औ२ह्वो२३४वा। यत्सोममी३न्द्रा-
३विष्णवाइ। औह्वो३१इ। औ२ह्वो२३४वा। यदाघ-
त्री३ताइ३आप्त्याइ। औह्वो२१इ। औ२ह्वो२३४वा।
यदामरुत्सु३मन्दसाइ। औह्वो३१इ। औ२ह्वो२३४५वा-
६५६। समिन्दुभी२३४५ः॥ ४॥ १५२॥

I,II,III,IV त्रैतानि चत्वारि।

अथ पञ्चमी।

एतदादितिसृणां विश्वमना वैयश्वऋषिः।

२ ३ १ २ ७ १ २ ३ १ ३ ३ २ २
एदुमधी*र्मदिन्तरꣳसिच्चाध्वर्यो† अन्धसः।

३२उ ३ १र २र २ १ २
एवाहिवीरस्तवतेसदावृधः ॥ ५ ॥ १५३

हे "इन्द्र!" "विष्णवि"(१) विष्णो सोमपानार्थं मागते सति अन्यदीये यागे "यद्" यदि तेन विष्णुना सार्द्धं पिबसि। "यद्वा" यदि वा "आप्ये" अपाम्पुत्रे "चित्ते" एतत्संज्ञके राजर्षौ यजमाने सोमं पिबसि (द्वितिपूरणं) "यद्वा" यदि च "मरुत्सु" च सोमपानायागतेषु अन्यदीये यज्ञे "मन्दसे" माद्यसि तथाप्यस्मदीयैरेव "इन्दुभिः" सोमैः सम्यक् माद्य ॥ ४ ॥ १५२

---

* "मध्वो"
† "सिच्च वाध्वर्यो" } इति-ऋग्वेदीय-पाठौ।

---

१५३ उत्तरार्चिकस्य ८,२,१०,१ = ऋग्वेदस्य ६,२,१८,= जर्हे१५,२,९।

(१)—"छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः"-इति कात्यायनोक्तेरिह मुण्। विवरणे तु—'सप्तम्येकवचनमिदं तृतीयैकवचनस्य स्थाने द्रष्टव्यं, सचथोमे च तृतीया, विष्णुना सह इति व्याख्यानम्।

I एदुमधोः। मदाइ२इन्ता२३४राम्। सिच्चाध्वर्यो-
अन्धसाः। धा२३४साः। एवाहिवीरस्तवया२इ। वा-
२३४ताइ। मदाइवा५र्ङा६४६ः ॥ ५ ॥

II एदुमधोस्तोपुर्मदिन्तराम्। सिच्चाहो२इ। अध्वर्यो-
अन्धसाः। आइवा१इहिवी२। रा२स्तवताइ।
मदात्रा। धा। औइच्चोवा। च्चोपुइ। डा ॥ ६ ॥१५३॥

हे "अध्वर्यो" अध्वरस्य नेतः ऋत्विक्! "मधोः"(१) मदकरस्य "अन्धसः" सोमलक्षणस्यान्नस्य "मदिन्तरं" अत्यर्थं मादयितृतमं(२) सोमरसमेव "आसिञ्च" इन्द्रार्थमभिषुणु(३)। [इदु-इत्यव-धारणे(४)] "वीरः" समर्थः "मदाइवः" सर्वदा ऋविभिर्वर्ध-

I,II सराधसे द्वे।

(१) लिङ्गव्यत्ययेन रूपम् ३,१.८५)।

(२) मद कर्तरि ल्युट् न यस्यामि स मदी अतिशयेन मदी, मदितरम्। अति-शयेन मदकरमित्यर्थः। अत्र मते "मदिन"-इति नकारहीन-टकारान्वित-पाठ एव दृश्यते।

(३)—ग्रहवममादाविति भावः।

(४) "इत्"-"उ" द्वावपि पदपूरणौ इति वि०। "पदपूरणास्ते मिताक्षरेष्व नर्थका. कमोमिर्दिति" इति नि० नै०१,१

अथ षष्ठी।

२ ३ १ २ ३ १ २ ३ १ २ २
एन्दुमिन्द्रायसिञ्चतपिबातिसोम्यंमधु।
१ २ २ ३ २
प्रराधाꣳसिचोदयते*महित्वना ॥ ६ ॥ १५४

२ ४ २ ४ ५ १ ऽ २ १
I एन्दुꣳ५ऽमि। द्रा३याऽमिञ्चना। पिवा२तिसोम्य
२ १ २ १ २ १
म्मध्। प्रराधा२ꣳसी। चोदयताइमाऽहो। त्वना।
२ ४ ५ ४
ओ३ह्होवा। ह्होꣳ५इ। डा ॥ ७ ॥ १५४ ॥

नीयः। यद्वा। सर्वदा स्वबलस्य वर्द्धकोऽयमेवेन्द्रः "स्तवते(५)हि" स्तोतव्यस्त्वादिभिः स्तूयते खलु (स्तुतायेन्द्राय सोमो दातव्यः तस्मादासिञ्चेति समन्वयः ॥ ५ ॥ १५३

हे ऋत्विजः! "इन्द्" स्यन्दनशीलं(१) सोमम् "इन्द्राय"

---

* "राधमा चोदयाते"-इति ऋग्वेदीय-पाठः, सायणीयो-ऽरभाष्ये च।

---

१५४ उत्तरार्चिकस्य ७,१,८,१ = ६,२,१७,३ = ऊहे १०,२,९।

I मारुतम्।

१)—विकरण-व्यत्ययेन रूपम् (३.१,८५)।

२—यद्वा यास्क.—"इन्दुरिन्धेर्दुनत्तेर्वेति(१०,४१)"-तदिह दुनत्तेर्रूपमिति 'उन्दी क्लेदने (रु० प०)'। क्लेदनस्यादीभावः सुतरां स्यन्दनशीलमित्यर्थः।

अथ सप्तमी।

२ २ २ ३ १ २ १ १ २ ३ २ १ १ २
एतोन्विन्द्रꣳस्तवामसखायꣳस्तोम्यन्नरम्।

१ १र २र १ २ ३ ३ २
क्रष्टीर्योविश्वाअभ्यस्तेकइत्॥ ७॥ १५५

५ र र ५ १ २र १ ३ २
। एतोन्विन्द्रꣳस्तवाऽमा। साखायस्तोऽ। मियाऽ४

१ २ १ र र २र १ २ १ २
५म्। नरमाक्रष्टीर्योविश्वाअभि। आ। स्तियाये।

१ ३ ५ र र ३ १ १ १ १
काईऽदा२३४औहोवा। ऊऽ३४५॥ ८॥ १५५॥

इन्द्रार्थम् "आसिञ्चत" आभिमुख्येन प्रत्याचारयत (आज्यरूप द्रव्येण सेचनं कुरुत तमभिगुणतेत्यर्थः) ततः "सोम्य"(२) सोममयं "मधु" मदकरं सोमरसं "पिबाति"(३) पिबत्। पीत्वा च स इन्द्रः "महित्वना" स्व महत्त्वेनैव "राधांसि" अन्नानि स्तोतृभ्यः "प्रचोदयते" प्रकर्षेण चोदयत्॥ ६॥ १५४

---

१५५ ऋग्वेदस्य ६,२,१८,४।

। वैश्वमनसम्।

(२)—'सोममर्हति यः (४,४,१३७)"—"मय च (४,४,१३८)" इति मयडर्थे यः।

(३)—लेटि (३,४,७) बाहुलकात्(३,१ २४) सिबभावे इतोऽत्सयोरपि लेटि बहुलत्वात् (३,४,९७) आडागमः (३,४,९५) रूपम्

अथ नवमी।

गौतमऋषिः।

१ उ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
यएकइद्विदयतेवसुमर्त्तायदाशुषे।
१ २ ३ १ २ ३ १ २ ३ २
ईषानोअप्रतिष्कुतइन्द्रोअङ्ग ॥ ८ ॥ १५७

५ ४ ४ २ १ १
। यएकइद्विहाहाउ। विदयताइ। वसुमा२३र्त्ता।
१४ ४ ४ २ ४ १ २
यदाशुषाइ। ईशानो२३त्ता। प्रातिष्कुता३१उवा२३।
५ १ २ ३ ४ ५ ४
ई२३४न्द्राः। अङ्गा। औ३त्होवा। त्वोऽ५इ। डा ॥१२॥
३ ५ ३ ५ २ ३ ५
II या२३४ए। का२३४ईत्। वीदाया२३४ताइ।
१ २ १ २ १ २ ३ ५ १ २४ ४ १
वासुमर्त्ता२३त्हा३। यादाशू२३४षाइ। आइशानोअ।

स्तुतिमिच्छते(१) "इन्द्राय" "बृहत्" बृहन्नामकं साम "गायत" पठत ॥ ८ ॥ १५६

---

१५७ उत्तरार्चिकस्य ५,२,२२,१ = ऋग्वेदस्य १०६,६,२,= आरण्ये २,१४ = ऊहे६,७।

(१) "पनस्यति इति अर्चति-कर्मसु पञ्चविंशतितमं निघण्टुकं. तस्मादुपत्यये (३ २,१७,) रूपम

प्रता२३च्चाइ। ष्कू२३४ताः। आइन्द्रोअ। गार२।
या२३४औच्चोवा। ई२३४न्द्राः॥ १३॥

III यएकइद्दिदायाऽनाइ। वासुमर्त्तायाऽदा। ऊम्।
शू२३४षाइ। आइशानोअप्रतिष्कृत। आइशा। नो
अप्रताइ। ष्कू२३४ताः। आइन्द्रोअ। गार२। या
२३४औच्चोवा। ई२३४न्द्राः॥ १४॥ १५७॥

"यः" इन्द्रः "एकइत्" एकएव "दाशुषे"(१) हविर्दत्तवते "मर्त्ताय" मनुष्याय यजमानाय "वसु" धनं "विदयते" विशेषेण ददाति [अङ्गेति क्षिप्र-नाम(२)] "अप्रतिष्कृतः" परैरप्रतिगन्धितः [प्रति-कूल-गब्द-रहित इत्यर्थः(३)] एवम्भूतः स "इन्द्रः" क्षिप्रम् "ईशानः" सर्वस्य जगतः स्वामी भवति॥ ९॥ १५७

I,II,III चैककुभानि शीर्षाणि।

(१)—"दाश्वान् साऽहान् मीढ्वांश्च (६,१,१२)।
(२)—"अङ्गेति क्षिप्रनामाक्षिप्तमेवाङ्गित भवति -इति निः नै०५,१७।
(३)—'स्कृ, आवरणे (स्वा० उ०)' इति स्कृनोति रूपम्।

अथ दशमी।

विश्वमना ऋषिः।

१२ ३१ २ ३ १२ २२ ३१२
सखायआशिषामहे*ब्रह्मेन्द्रायवज्रिणे।
३ २३२३ १२ ३१२
स्तुषऊषुवोनृतमायधृष्णवे ॥ १० ॥ १५८

॥ पञ्चम-दशतिः ॥

५ २ २ ३ २ ४ ५ ३ २ ४
। सखायआहाउ। शिषाऽमहेहाउ। ब्रह्माऽइन्द्रा
५ १२ २ २ १७
हाउ। यवज्रिणाइ। स्तूषऊषूऽहाइ। वोनृतमाऽ-
२ १ १ ३ ५२ २ ३
ऽहा। यधाऽऽ। षण्याऽवाऽऽ४औहोवा। ऊऽऽ-
५
४पा ॥ १५ ॥

४ ५२ ४२ ५ २ ४ ५ २ २
॥ सखायआशिषाम। हाइ। ब्रह्मेन्द्रायवज्रि-

* "आशिषामहि"-इति ऋग्वेदस्य।

१५८ ऋग्वेदस्य ६,२,१५,१।

* ॥ इति चतुर्थः प्रपाठकः ॥

३ ५ १ ० २ १ २ २ ३
णोवा। आईतोऽवाऽ। ह्वोवाऽह्वाऽ। ह्वाइ। स्तुष-

२ १ ५ १ २ ५ १ २ २
ऊषू२३४। वोह्वोह्वाइ। नार्त्ताऽमाऽ। ह्वोवाऽह्वाऽ।

२ १ १ ३ ५ २ ३ १ १ १ १
ह्वा। यधाऽ२। षण्याऽ२वाऽ२३४औह्वोवा। ई२३४५॥१६॥

३ ५ २ ४ ५ २ ४ २
III साऽ४खायः। आशिषा। माऽह्वाइ। ब्रह्मे-

५ ४ २ २ १ २ ३
न्द्रायवज्रिणे। ह्वाइ। स्तुषऊषूवोऽनार्त्तामा। याऽ-

३ ५ २ २ २ १ २ ३ ५ २
३४धृ। ह्वाऽह्वाइ। वानार्त्तामा। याऽ३४धृ। ह्वा

२ १ ऽ २ २ २ २ ऽ
ऽह्वा। षण्वाऽइ। औऽह्वो। औह्वोवा। त्मघाऽइ।

२ २ २ २ २ ५ २ ३ ४ ०T
औऽह्वो। औह्वोवाऽ४। औह्वोवा। ऊ ३ २ ३ ४

॥ १७ ॥१५८॥

"मखायः" मित्रभूता हे ऋत्विजः! "वज्रिणे" वज्रहस्तायेन्द्राय "ब्रह्म" स्तोत्रम् "आशिषामहे" वयमाशास्महे च। यद्वा। ब्रह्म अस्माभि र्दीयमानं हवीरूपमन्नम् आशास्महे। गाथ अनु-

I, II, III, औत्तराणि नियानानि त्रीणि।

१०१क,

शिष्टौ (अदा०प०)। व्यत्ययेनात्मनेपदम्(३,१,८५)। अतएव "आशिषामहि"-इति वह्वृचा आमनन्ति) तत्र "वः" सर्वेषामेव युष्माकमर्थाय "नृतमाय" सर्वेषां नेतृतमाय। यद्वा सङ्ग्रामे आयुधानां नेतृतमाय "धृष्णवे" शत्रूणां धर्षण-शीलाय तस्मै इन्द्राय अहमेव "सुस्तुषे" सुष्ठु स्तौमि(१)॥ १०॥ १५८

इति श्रीसायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने चतुर्थस्याध्यायस्य चतुर्थः खण्डः॥ ४॥

अथ पञ्चमे खण्डे

सैषा प्रथमा।

प्रगाथ ऋषिः।

३ १र २र ३ १ २ ३र ३ १ २
गृणेतदिन्द्रतेशवउपमान्देवतातये*।

१र १र३ १ र २र
यद्वृत्रंसिवृत्रमोजसाशचीपते॥ १॥ १५९

---

* "उपमं भद्रा इन्द्रस्य रातयः"-इति ऋग्वेदीय-पाठः।

---

(१)—ऋचि "उषु"-इति "सुञः (८,३,१०७)"-इति षत्वे रूपम्।

१५९ ऋग्वेदस्य ६,४,४०(२३),२।

I ह्वाउगृणाइ। तदा३इन्द्रानाइ। श्रवा२३१२३:।
उपा३मान्देवनातयाइ। यङ्ग्सा२३इवा। त्रमो३-
जासा। श्रचौ। पते। औ२३ह्वोवा३४। औह्वोवा।
द्यू२३४भौः॥ १८॥

II गृणे। तदा३४। औह्वोपृइन्द्रनेशवाः। उप
मान्देवताना२३या३४इ। यङ्गा३४ंसिवा। त्रमोजसा।
शा३चीप। ता२३४५इ॥ १९॥

III गृणेतदौह्वोपृइन्द्रनेशवाः। उपमान्दे२वना२-
तये। उपमान्देवतातार३याइ। यङ्गंसिवृ। त्रमो-

I, प्रयस्वत्, II, आचारम्, III प्रयस्वत्।

अथ द्वितीया।

भरद्वाज ऋषिः।

२ ३ १२ २१२३ २ १ २ ३ १ २

यस्त्यच्छम्बरंमदेदिवोदामायरन्धयन्*।

२ ५ ३ ५ ३

२३जसाउ। वा३। शा२३४ची। पा२३४ताइ। हो

२३४५इ। डा ॥ २० ॥ १५९

हे "इन्द्र!" "ते" तव "तच्छवो" बलं "उपमा" अन्तिकं(१) "देवतातये(२)" यजमानाय यज्ञार्थं वा(३) "गृणे" स्तुवे। "यद्" यस्मात् हे "शचीपते!(४)" "हरिवम्(५)" "ओजसा" बलेन "हंसि" [तस्मात् ते शवो गृण इति सम्बन्धः ॥ १ ॥ १५९

* "रन्धयः"-इति ऋग्वेदीयः पाठः।

—"उपमा" इत्यन्तिक-नामसु पठ्यं (नै०२,१६)।—'सर्वबलानामुपमा क्षोत्कृष्टमित्यर्थः'-इति वि०।

'देवात् तातिल् (४,४,१४२)' इति स्वार्थे तातिलि रूपम्।

'तातां'-इति यज्ञनामसु दशमं नेघण्टुकम् (३,१७)।

'शचीत कर्म-नाम (नै०२,१,२३) तस्य पतिः शचीपतिः, तस्य सम्बोधनं शचीपतीत्यादि-कर्मणामधिपतिभूतइत्यर्थः'-इति वि०।

'हरिवः' इति वि०। "वृत्र"-इति मेघनामसु अष्टाविंशतितमं नेघण्टुकं

३ १र २र ३ १र २र
अयꣳसोमइन्द्रतेसुतःपिब ॥ २ ॥ १६०

३ २ ३ २ ५ २ २
I यस्याऽ३१। त्यक्काऽ३१२३४म्। बरम्। माऽदाइ।

३ २ ३र २ ५ २ २ ३ २
दिवोऽ३१। दासाऽ३१२३४। यर। धाऽयान्। अया-

३ २ ५ २ २ ३ २
३१म्। ससोऽ३१२३४। मई। द्राऽनाइ। सुताऽ३१ः।

३ २ १ ५ ३ ५
पिबाऽ३। ओ२३४वा। ऊ२३४पा ॥ २१ ॥

४ ४ १ र र र
II यस्यत्यक्कापुम्बरम्मदाइ। दिवोदासायरन्धयन्।

३ २ ४५ ३ २ १ ३ ५ ५र र
आयꣳसोऽ३। मइ। द्रताऽइ। सरनाऽ२३४औछोवा।

३ ५
पौ२३४बा ॥ २२ ॥

५ २ ४ ५ ४ ५ १ ३ र र १र २ १
III यस्यत्याऽच्छाम्बरम्मदाइ। दिवोऽदासायरन्धयन्।

---

१६० ऋग्वेदस्य ४,७,१५.१।

७ २ ४५ ३२ १२१ १
आयꣳसोऽ३। मदे। द्रताऽइ। सूतआ२३ः। पा

३ ५र र ३ ५
२इबा२३४औहोवा। इ२३४ती॥ २३॥

१ ५ २ ३४ ५ ५ २र
IV या४स्यत्। हौइ। शम्बरम्मदा६ए। दिवो-

र र २ ४ ५ ३२ ५र
दासायरन्धयन्नयाꣳसाऽसो। मदे। द्रताऽ३४। औ-

र १ ५ ३
होवा। सू२३४ताः। पिबो२३४५इ। डा॥ २४॥ १६०

